Mainly in the Śṛṅgāraśataka of the three Śatakas of Bhartṛhari,have been described more about women. We usually see two types of explanation, praise in condemnation and condemnation in praise. last type of blasphemy is described in this Śṛṅgāraśataka. The poet had personal experience about women, so, his attitude towards women was disgusting and discriminatory. Bhartṛhari was comment about women that the heart of a woman cannot be captured in such a way that the face reflected in the mirror is not acceptable. The complex attitude of a women is not particularly known like flimsy mountain path. He was compared the women with enlarges creeper with toxins.

Bhartṛhai was advised to men to keep safe distance from women and he also compared them with snake. In this world, the crooked eyebrows of the sulocanā women open the door of jamapurī like an iron key and throw the man into misery. He was told about women –

CC BY

"*madhutiṣṭhativāciyoṣitāṁhṛdihālāhalamevakevalam*|" (Śṛṅgāśataka -62)

In the Mangalācaraṇa of Śṛṅgāraśataka, the poet made aware everyone from Women-

"*śambhusvayambhuharayohariṇekṣaṇānāṁ*
yenākriyantasatataṁgṛhakarmadāsāḥ|" (Śṛṅgāśataka-1)

If, Brahmā, Viṣṇu and Maheśvara, they are become a servant of beautiful women, where we are? and what happen with us? The poet mentioned some on women's quality and characteristics-

"*smitenabhavena ca lajjayādhiyā*
parānamukhairardhakatāksavīksitaiḥ|
bachobhirīrṣyākalahenalīlayā
samastabhāvaiḥkhalubandhanaṁstriyaḥ||" (ŚṛṅgāraŚataka - 2)

These are also ornament and weapons of women-

"*strīnāmetatbhūṣaṇam ca āyudham ca*."

The young women, they whom does not subdue in the earth? Bhartṛhari did not trust on women. He was told in Nītiśatakam –

"*bhavahparvatasūksmārgavisamaḥstrīnāmnavingāyate*"

Bhartṛhari arise question again and again that what is the better young women of forest land? He also wants to know create the women, the bond of human.

We know the view of author on women, the dislike the women faith-

"*jalpantisārdhamanyena*
paśyantyanyaṁsabibhramāḥ|
hṛdayecintayantyanyaṁ
priyaḥ ko nāmayoṣitām||" (Śṛngāraśatakam-52)

Women talk to one man, luxuriously look at another man, think of other man in mind, so who is the favourite of women? He advised to men to keep distance from women- "*apasarasakhedūrādasmātkaṭākṣabiṣānatāt*."

Finally, by discussing everything it is understood that what was the condition of women at the time of Bhartṛhari. We know that two types of women were in that time- bitch and Penelope. At that time, women had freedom in society. In this regard, Bhartṛhari was the different from other Sanskrit writers like, Bhāsa, Kālidāsa, Bhāravi, Śūdraka and other writers. Although the poet described śṛṅgāra but he did not hesitate to make people aware. The past incident of his life may have made him think differently.

Bibliography

1. *Śatakatrayam*,Bhartṛhari. Translated & Explainer Sunil Sharma. Manoj Publication. Delhi. 2018. print.
2. D. S. R, Kṛiṣṇamurti.*Bharṭrhari's Nuggets: On Values of Life, Love, & Light*. J. p. Publishing House, Delhi. 2011, Print.
3. *Nīti and VairāgyaŚatakas,*Bhartṛhari.K.MJoglekar. Oriental Publishing Company. Bombay.1911.
4. Kale, M.R. *The Nīti and VairāgyaŚatakas of Bhartṛhari*. Motilal Banarsidas Publishers Private Limited. Delhi. 1971.
5. *Nītiśatakam*, Bhartṛhari. Edited by Balavan Singha Yadav.Chaukhamba Sanskrit Bhawan. Varanasi. 2015.print.
6. *Nītiśatakam*, Bhartṛhari. Translate by SatyakāmVidyālaṁkār. Hind Panket Books Pvt. Ltd., New Delhi. 2010, print.
7. *Nītiśatakam*, Bhartṛhari. Explainer śrīkṛṣṇamaniTripāthi.ChaukhambaSurabharatiPrakashan, Varanasi. 2017.print
8. *Śatakatrayam*, Bhartṛhari. Edited by D. D. Kosambi.MunshiramManoharlal Publishers Pvt. Ltd., Delhi. 2002, print.
9. *Śatakatrayam*, Bhartṛhari. Editors Naresh jha, Jagannatha Shastri Hoshing, Radhelal Trivedi.ChaukhambaVidyabhaban, Varanasi. 2008, print.
10. *Śatakatrayam*. edited by Dr. Dadan Upadhyaya.ChaukhambaSurabharatiPrakashan, Varanasi. 2013, Print.
11. *Śatakatrayam*. edited by P. Gopinath. Nag Publishers, Delhi. 2011, Print.
12. *Śatakatrayam*. edited by Swami Prakhar PrajnanandaSaraswati.Chaukhamba Sanskrit Sansthan, Varanasi. 2015. Print.
13. *Śṛṅgāraśataka* and *Vairāgyaśataka*, Bhartṛhari. Edited by A. V. Gopalachariar. V. Ramaswamy Sastrulu& Sons, Madra. 1994.online.
14. *Subhāṣitatriśatī*, Bhartṛhari. ChoukhambaSurabhāratīPrakashan. Varanasi. 2013.
15. *Subhāṣitatriśati*, Bhartṛhari. Explainer Ramchandrabudhendra.Chaukhamba Sanskrit Sangathan, Varanasi. 2001.print.
16. *The Century of Life*, Aurobindo. Edited by Sampadananda Mishra. Sri Aurobindo Society, Pondicherry. 2005 (1st edit. 1998) print.
17. *The Śatakas*, Bhartṛhari. edited by J. M. Kennedy. University of California Library. online.
18. Tiwari Ujjwal & Kothari Priyanshu, *Bhartṛhari*. Chennai, 2017, print.
19. *Manusaṁhitā*, edited by Manabendubandyopadhyaya.sanskritapustakabhandar. Kolkata. 3rd edition 1419 (1st edition 1410)
20. *Abhijñānaśākuntalam*, kālidāsa. edited by satyanārāyaṇacakrabarty.sanskritapustakabhandar. Kolkata. 5th edition 2004 (1st edition 1988)

Makhan Das
Research Scholar
Assam University
makhan.9563@gmail.com

***

CC BY

अद्वैतसिद्धिग्रन्थे विनियुक्तानां कासाञ्चित् जातीनां न्यायशास्त्रदृष्ट्या परिशीलनम्

- वाणीमञ्जुनाथहेगडे

शोधसारः-

अनुमानप्रामाण्यपरीक्षोपयोगिनां हेत्वाभासजातिनिग्रहस्थानानां निरूपणं महता विस्तरेण अकारि न्यायदर्शने। तत्र "**प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञाना-न्निश्रेयसाधिगमः**[1]" इति न्यायसूत्रे **जातिं** निरदिक्षत् सूत्रकारः।

वादिना स्थापनाहेतौ प्रयुक्ते सति प्रतिवादिना तत्प्रतिषेधबुद्ध्या प्रयुक्तं प्रतिरोधासमर्थम् उत्तरं जातिरित्युच्यते। यदा वादिना प्रयुक्तं स्थापनाहेतुं प्रतिवादी साध्विति मन्यते तदा सः लाभपूजाख्यातिकामः जातिं प्रयुङ्क्ते – 'कदाचिदयं जात्युत्तरेण आकुलीकृतो नोत्तरं प्रतिपद्येत उत्तराप्रतिपत्त्या च निगृह्यते। ततश्च मे विजय एव स्यात्। जातेः अनभिधाने तु मम स्यात् पराजयः, तस्माद् वरमुत्पादनं सन्देहस्य'[2] इति। **साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः**[3] इति सूत्रकारः। जातिश्च साधर्म्यसमा वैधर्म्यसमा उत्कर्षसमा अपकर्षसमा वर्ण्यसमा अवर्ण्यसमा विकल्पसमा साध्यसमा प्राप्तिसमा अप्राप्तिसमा प्रसङ्गसमा प्रतिदृष्टान्तसमा अनुत्पत्तिसमा संशयसमा प्रकरणसमा अहेतुसमा अर्थापत्तिसमा अविशेषसमा उपपत्तिसमा उपलब्धिसमा अनुपलब्धिसमा नित्यसमा अनित्यसमा कार्यसमा इति भेदेन चतुर्विंशतिधा।[4]

एतासां जातीनां विस्तृतं निरूपणं न्यायशास्त्रादन्यत्र न कृतम्।[5] न्यायेऽपि एषामुदाहरणम् उपयोगश्च अल्पतयैव उपलभ्यते। अस्मिन् शोधे अद्वैतसिद्धिग्रन्थस्थ कासाञ्चित् जातीनाम् अन्वेषणं निरूपणं च करिष्यते । तेन जातीनां विपुलानि उदाहरणानि समुपलभ्यन्ते, न्यायशास्त्रस्य विकासे योगदानं भविष्यत्यतः विषयोऽयं संशोधने

---

[1] महर्षिगौतमः, न्यायसूत्रम्, (वात्स्यायनीयन्यायभाष्यसहितम्), 2013, सू.सं. १.१.१, चौखम्बा संस्कृत सीरिज आफिस, वारणासी,पृ.सं.-9

[2] भारद्वाजोद्द्योतकरः, अनन्तलाल ठाकूर, न्यायभाष्यवार्तिकम्, 1997, सू.सं.५.१.१, भारतीयदर्शननिकानुसन्धान-परिषद्, न्यूदिल्ली

[3] महर्षिगौतमः, न्यायसूत्रम्, (वात्स्यायनीयन्यायभाष्यसहितम्), 2013, सू.सं १.२.१८, चौखम्बा संस्कृत सीरिज आफिस, वारणासी,पृ.सं-140

[4] महर्षिगौतमः, न्यायसूत्रम्, (वात्स्यायनीयन्यायभाष्यसहितम्), 2013, सू.सं. ५.१.१. चौखम्बा संस्कृत सीरिज आफिस, वारणासी,पृ.सं-607

[5] बौद्धमते जातिचतुष्टयस्य निरूपणं कृतमस्ति।

प्राधान्यमावहतीति। एवमेव वेदान्तसदृशशास्त्रान्तरेष्वपि जातीनाम् उपयोगः कथं कृतः वर्तते इति ज्ञातुं शक्यते।

अद्वैतसिद्धिग्रन्थो यद्यपि अद्वैतवेदान्तसिद्धान्तप्रतिपादको ग्रन्थः तथापि तत्र नव्यन्यायशैली न्यायवेदान्तादि- नैकशास्त्रसिद्धान्तप्रक्रियाणां समावेशोऽपि परिदृश्यते। ग्रन्थेऽस्मिन् जगन्मिथ्यात्वस्य साधनाय सिद्धान्तिना, तन्निराकरणाय च पूर्वपक्षिणा शताधिकाः अनुमानप्रयोगाः कृताः। एवमेव ग्रन्थेऽस्मिन् कुत्रचित् जातीनां प्रदर्शनं च कृतं वर्तते । तादृशीनां जातीनां समन्वयपुरस्सरं विमर्शः शोधपत्रेऽस्मिन् मया प्रस्तूयते।

1.विमतं सत्त्वाभाववत् (मिथ्या) दृश्यत्वात् शुक्तिरूप्यवत्।

विमतं सत् प्रातिभसिकत्वानधिकरणत्वे सति असद्विलक्षणत्वात् ब्रह्मवत् [6] । इत्यत्र **साधर्म्यसमा** जातिः भवति। उपसंहारे साध्यस्योपसंहरणे वादिना कृते तद्धर्मस्य साध्यरूपधर्मस्य यो विपर्ययो व्यतिरेकः तस्य साधर्म्येण केवलेन व्याप्त्यनपेक्षेण यदुपपादनम् ततो हेतोः साधर्म्यसम उच्यते।[7] पक्षे केनचिद् विपक्षसाधर्म्येण साध्याभावापादकम् उत्तरम्।[8]

तद्यथा- वादिना ‘विमतं सत्त्वाभाववत् (मिथ्या) दृश्यत्वात् शुक्तिरूप्यवत्’ इति वाक्ये प्रयुक्ते सति ‘विमतं प्रातिभसिकत्वानधिकरणत्वविशिष्टासद्विलक्षणत्वेन रूपेण विपक्षात्मकब्रह्मणः सधर्मा भवति, अतः विमतं ब्रह्मवत् सत् कुतो न’ इति वदन् प्रतिवादी दूषयति। अत्र प्रातिभसिकत्वानधिकरणत्वविशिष्टासद्विलक्षणत्वं ब्रह्मणि विमते उभयत्रापि अस्ति’ इति। अत्र ‘विमतं सत् प्रातिभसिकत्वानधिकरणत्वे सति असद्विलक्षणत्वात् ब्रह्मवत्’ इति प्रतिवादिनोऽभिप्रेतम् अनुमानम्। तच्च ब्रह्मात्मैक्ये व्यभिचारग्रस्ततया दुष्टम्। ब्रह्मज्ञानेतरबाध्यत्वमेव प्रातिभासिकत्वं देहात्मैक्यञ्च ब्रह्मज्ञानेतराबाध्यमिति न तस्य प्रातिभासिकत्वम्। तथा च साध्याभाववति परमार्थसत्त्वाभाववति देहात्म्यैक्ये प्रातिभासिकत्वानधिकरणत्वे सति असद्विलक्षणत्वरूपहेतोः सत्त्वात् व्यभिचारः।

2.विमतं(आत्मज्ञानं) मिथ्या ज्ञाननिवर्त्यत्त्वात् शुक्तिज्ञानवत्।

यथा च शुक्त्यादिज्ञानस्य रूप्यादिनिवर्तकत्वमप्रामाण्यज्ञानविरहमपेक्ष्यैव, एवमात्मज्ञानस्यापि श्रवणादिनिवृत्तावसंभावनादिनिवृत्तिरूपाप्रामाण्य-

---

[6] श्रीयोगेन्द्रनाथदेवशर्मः, श्रीशीतांशुशेखरदेवशर्मा, अद्वैतसिद्धिः (बालबोधिनी-व्याख्ययोद्भासिता प्रथमभागः),1971,परि॰. १, मिथ्यात्वानुमानस्यानुमानबाधोद्धारः, तारा पब्लिकेशन्स, वारणासी, पृ.सं.-498

[7]महामहोपाध्याय-भीमाचार्यः,न्यायकोशः,1996, गौ.वृ. ५.१.२, भण्डारकर् ओरियन्टल् रिसर्च इन्स्टिट्य्युट्, पुणे, पृ.सं-997

[8] व.नवीनहोळळः, तर्कप्रवेशगौतमसरणिः, 2019, प्रज्ञानम्, श्रीमाता,भारतीनगरम्,शृङ्गेरी, कर्नाटक, पृ.सं-58

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

ज्ञानविरहापेक्षत्वमिति न किंचिदप्यधिकं कल्पितम्। आत्मज्ञानस्य सर्वसुकृतसाध्यत्वं शुक्त्यादिज्ञानापेक्षया विलक्षणमिति तु दृष्टान्तदार्ष्टन्तिकयोर्वैधर्म्यमात्रोद्भावनात् वैधर्म्यसमा जातिः । आज्ञनस्य च समानाधिकरणसमानाकारज्ञाननिवर्त्यत्वम् ।[9] इत्यत्र **वैधर्म्यसमा** जातिः।

वैधर्म्येणोपसंहारे तद्धर्मविपर्ययोपपत्तेर्वैधर्म्यसमः।[10] वैधर्म्येणोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं साधर्म्येण चोक्ते हेतौ तद्विपरीतवैधर्म्येण प्रत्यवस्थानं वैधर्म्यसमः। [11] पक्षे केनचिद् दृष्टान्तवैधर्म्येण साध्याभावापादकम् उत्तरम्।

तद्यथा – वादिना 'प्रपञ्चः मिथ्या ज्ञाननिवर्त्यत्त्वात् शुक्तिज्ञानवत्' इति वाक्ये प्रयुक्ते सति 'दृष्टान्तः शुक्तिज्ञानं सर्वसुकृतिनिरपेक्षं, पक्षान्तर्गत-आत्मज्ञानं तु सर्वसुकृतिसापेक्षम्। तथा च पक्षान्तर्गतात्मज्ञानस्य शुक्तिज्ञानेन वैधर्म्याद् शुक्तिज्ञानस्य ज्ञाननिवर्त्यत्वेऽपि प्रपञ्चस्य(आत्मज्ञानस्य) अमिथ्यात्व(सत्यत्व)मेव स्यात्' इति वदन् प्रतिवादी दूषयति। अत्र प्रतिवादिनोऽभिप्रेतमनुमानम्, 'प्रपञ्चः(आत्मज्ञानं) सत्यं सर्वसुकृतिसापेक्षत्वात् यन्नैवं तन्नैवं यथा शुक्तिज्ञानम्' इति। बाधनाक्षमदूषणोद्भावनं जात्युत्तरम्। ज्ञानाज्ञानयोः समानाश्रयविषयकयोरेव बाध्यबाधकभावः, ज्ञानसमानाश्रय विषयकमेवाज्ञानं ज्ञाने न बाध्यते। जीवन्मुक्तौ तु आत्मज्ञाने सत्यपि बन्धनाशविलम्बः प्रारब्धकर्मप्रतिबन्धात्।

3.'अयं पटः', एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी, अंशित्वात्, इतरांशिवत्।

'अयं पटः', एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न, एतत्तन्त्वारब्धत्वात्, व्यतिरेकेण पटान्तरवदिति।

ननु – अयं पट एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न, एतत्तन्त्वारब्धत्वात्, व्यतिरेकेण पटान्तरवदिति प्रतिरोधः; न च अप्रसिद्धविशेषणत्वम्।[12] इत्यत्र **प्रकरणसमा** जातिः।

---

[9] श्रीयोगेन्द्रनाथदेवशर्मः,श्रीशीतांशुशेखरदेवशर्मा, अद्वैतसिद्धिः (बालबोधिनी-व्याख्ययोद्भासिता द्वितीयभागः),1971, परि°. १, ज्ञाननिवर्त्यत्वान्यथानुपपत्तिः, तारा पब्लिकेशन्स, वारणासी, पृ.सं.-1024

[10] महर्षिगौतमः,(वात्स्यायनीयन्यायभाष्यसहितम्), न्यायसूत्रम्, 2013, सू.सं. ५.१.२. चौखम्बा संस्कृत सीरिज आफिस, वारणासी
पृ.सं.609

[11] भारद्वाजोद्द्योतकरः, अनन्तलाल ठाकूर्, न्यायभाष्यवार्तिकम्, 1997, सू.सं.५.१.२, भारतीयदर्शननिकानुसन्धान-परिषद्, न्यूदिल्ली, पृ.सं.499

[12] श्रीयोगेन्द्रनाथदेवशर्मः,श्रीशीतांशुशेखरदेवशर्मा, अद्वैतसिद्धिः (बालबोधिनी-व्याख्ययोद्भासिता प्रथमभागः),1971, परि°. १, अंशित्वहेतूपपत्तिः, तारा पब्लिकेशन्स, वारणासी, पृ.सं.-283

वाद्युक्तहेतोः साध्यविपरीतसाधकं हेत्वन्तरोद्भावनं प्रकरणसमा। सत्प्रतिपक्षोदाहरणमेव अत्रोदाहरणं बोध्यम्।[13] अभ्युपगतानधिकबलेन प्रतिप्रमाणेन परकीयहेतोः बाधाभिमानेन प्रत्यवस्थानं प्रकरणसमा जातिः। तदुक्तम् - उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसम इति।[14]

तद्यथा- 'अयं पटः', एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी अंशित्वात् इतरांशिवत्' इति वादिनोक्ते सति 'अयं पटः', एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न, एतत्तन्त्वारब्धत्वात्, व्यतिरेकेण पटान्तरवदिति' इत्यभिधानम्। अत्र वादिना उक्तसाधनस्य अंशित्वस्य एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वरूपसाध्यव्याप्यत्वात् एतत्पटरूपपक्षवृत्तित्वाच्च एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वसाधकत्वमस्ति। संयोगस्याव्याप्यवृत्तितया स्वात्यन्ताभावसामानाधिकरण्यतया संयोगाधिकरणतन्तुषु संयोगात्यन्ताभावोऽपि वर्तते। तथा च एतत्तन्तुनिष्ठात्यन्ताभावाप्रतियोगित्वाभावाभाववति(एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वव ति-साध्याभाववति) एतत्तन्त्वारब्धे एतत्तन्तुसंयोगे एतत्तन्त्वारब्धत्वरूपहेतोः सत्त्वात् प्रतिवादिनोक्तमनुमानं तु व्यभिचारग्रस्तं भवति। अतस्तदुत्तरमसत्। यत्र प्रथमहेतुः अदुष्टः, द्वितीयो हेतुः दुष्टः तत्र द्वितीयहेतुप्रयोगः प्रकरणसमाजातिः भवति।[15] तथा च प्रकृतेऽपि अंशित्वरूपप्रथमहेतुस्तु अदुष्टः एतत्तन्त्वारब्धत्वरूपद्वितीयहेतुस्तु दुष्टः इत्यतः द्वितीयहेतुप्रयोगः प्रकरणसमाजातिः प्रकृते स्म्भवति।

प्रतिवादिनोक्तमनुमानं तु व्याप्यत्वासिद्धिग्रस्तं भवति। तद्यथा- अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न एतत्तन्त्वारब्धत्वात् व्यतिरेकेण पटान्तरवत् इति सत्प्रतिपक्षानुमानम्। पूर्वपक्षिणा दत्तानुमाने प्रागभावाप्रतियोगित्वरूपमुपाधिम् आशङ्कते सिद्धान्ति। इदमनुमानं केवलव्यतिरेकिलिङ्गयुक्तम्। सर्वदा उपाधेः साध्यव्यापकत्वदलं नाम यत्र यत्र साध्यं सपक्षे(दृष्टान्ते-पक्षादन्यत्र) तत्र तत्र उपाधिः इति उच्यते अन्वयव्यतिरेकलिङ्गादौ। प्रकृते केवलव्यतिरेकलिङ्गमित्यतः पक्षादन्यत्र साध्यस्य प्रसिध्यभावात् उपाधेः साध्यव्यापकत्वं न स्यात्। यदि साध्यव्यापकत्वं पक्षे प्रतिपाद्यते तदा पक्षे उपाधेः सत्वे साधनाव्यापकत्वं न स्यात्। अतः केवलव्यतिरेकिणि उपाधिर्न भवतीति चित्सुखाचार्याणां मतम्। मधुसूदचार्यैस्तु उच्यते यत् केवलव्यतिरेकिलिङ्गकानुमाने साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपोपाधिः न सम्भवति। अपि तु व्यापकव्यापकस्य तद्व्याप्याव्यापकत्वे उपाधिर्भवत्येव।

तद्यथा- अयं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी न एतत्तन्त्वारब्धत्वात् इत्यत्र यत्र एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वं (साध्याभावः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वाभावाभावः) तत्र एतत्तन्त्वारब्धत्वाभावः(हेत्वभावः)

---

[13] नीलकण्ठभट्टः, नीलकण्ठप्रकाशिका, 2006, श्री नृसिंहसरस्वती पाठशाला (शास्त्रविभागः) पुण्यपत्तनम्, पृ.सं-78

[14] वरदराजः,राजेन्द्रनाथ शर्मा , तार्किकरक्षा, 2016, परि॰-२, ज्ञानभारती पब्लिकेशन्स,दिल्ली, पृ.स.-76

[15] व.नवीनहोळळः, तर्कप्रवेशगौतमसरणिः, 2019, प्रज्ञानम्, श्रीमाता,भारतीनगरम्,शृङ्गेरी, कर्नाटक, पृ.सं-63

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

इत्येवं पूर्वपक्षीयप्रतिरोधानुमाने व्यतिरेकव्याप्तिरभिमता। अत्र हेत्वभावः-(व्यापकः-साध्यं) साध्याभावः-व्याप्यः(साधनं) अत्र व्यापकस्य व्यापकत्वे सति व्याप्यस्य अव्यापकत्वमिति उपाधेः लक्षणं समन्वेति। तथा च यत्र यत्र व्यापकं(हेत्वभावः) एतत्तन्त्वारब्धत्वाभावः पटान्तरेषु तत्र तत्र उपाधिरूपप्रागभावाप्रतियोगित्वमस्तीत्यतः व्यापकस्य व्यापकत्वमुपाधौ आयाति। एवमेव यत्र यत्र व्याप्यः(साध्याभावः) एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वम् अस्मिन् पटे तत्र प्रागभावाप्रतियोगित्वरूपोपाधिः नास्तीति व्याप्यस्य अव्यापकत्वमपि आयातीत्यतः प्रागभावाप्रतियोगित्वं भवत्युपाधिः। उपाधिः सर्वदा व्यभिचारोन्नायकतया व्याप्तिं भञ्जयति व्याप्तिभङ्गद्वारा अनुमानं अवरोधयति। इत्थं च व्याप्यत्वासिद्धहेत्वाभासे अन्तर्भवति। इत्थं च प्रतिवादिनोक्तानुमानं व्याप्यत्वासिद्धिग्रस्तं भवति। अतस्तदुत्तरमसत्।

4.विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवत्।

ननु – उक्तमिथ्यात्वस्य मिथ्यात्वे प्रपञ्चसत्यत्वापातः, एकस्मिन् धर्मिणि प्रसक्तयोः विरुद्धधर्मयोरेकमिथ्यात्वे अपरसत्यत्वनियमात्।[16]अस्ति च प्रपञ्चतन्मिथ्यात्वयोरेकब्रह्मज्ञानबाध्यत्वम्। अतः समसत्ताकत्वान्मिथ्यात्वबाधकेन प्रपञ्चस्यापि बाधात् न अद्वैतक्षतिरिति कृतमधिकेन।[17] इत्यत्र **नित्यसमा** जातिः।

धर्मस्य तदतद्रूपविकल्पानुपपत्तितः। धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यसमो भवेत्।[18] इति।

पक्षरूपे धर्मिणि साध्यस्य धर्मस्य, तद्रूपत्वातद्रूपत्वयोः विकल्पयोः प्रत्येकं साध्ये अभ्युपगतयोः, या "अनुपपत्तिः" अनिष्टापत्तिभयादसम्भवः, तस्मादसम्भवाद् "धर्मिणः" पक्षस्य तद्विशिष्टत्वभङ्गः साध्यविशिष्टत्वस्यासम्भवः, नित्यसमो दोषः। नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः।[19] धर्मस्य सर्वदा भावाद्धर्मिणोऽपि सर्वदा भावः न ह्यस्ति संभवः सामान्यसमवायातिरिक्तधर्मा नित्या धर्मी चानित्य इति।[20] इत्यत्र उक्तरीत्या प्रकृते नित्यसमा जातिः।

तद्यथा- वादिना 'विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवत्' इत्युक्ते सति, 'प्रपञ्चे (विमति) विद्यमानं मिथ्यात्त्वरूपधर्मः अमिथ्या(सत्यम्) उत मिथ्या ?

---

[16] श्रीयोगेन्द्रनाथदेवशर्मः,श्रीशीतांशुशेखरदेवशर्मा, अद्वैतसिद्धिः (बालबोधिनी-व्याख्ययोद्भासिता प्रथमभागः),1971, परि॰. १, मिथ्यात्वसामान्योपपत्तिः, तारा पब्लिकेशन्स, वारणासी, पृ.सं.-157

[17] श्रीयोगेन्द्रनाथदेवशर्मः,श्रीशीतांशुशेखरदेवशर्मा, अद्वैतसिद्धिः (बालबोधिनी-व्याख्ययोद्भासिता प्रथमभागः),1971, परि॰. १, मिथ्यात्वसामान्योपपत्तिः, तारा पब्लिकेशन्स, वारणासी, पृ.सं.- 166

[18] वरदराजः,राजेन्द्रनाथ शर्मा , तार्किकरक्षा, 2016, परि॰-२, ज्ञानभारती पब्लिकेशन्स,दिल्ली, , पृ.स.-86

[19] महर्षिगौतमः, (वात्स्यायनीयन्यायभाष्यसहितम्), न्यायसूत्रम्, 2013, सू.सं. ५.१.३५, चौखम्बा संस्कृत सीरिज आफिस, वारणासी, पृ.सं-644

[20] वाचस्पतिमिश्राः,पराञ्जेश्वरशास्त्री, न्यायवार्तिक-तात्पर्यटीका, 1989, सू.सं.५.१.३५,चौखम्बासंस्कृतसंस्थानम्, वारणासी, पृ.सं. 691

अमिथ्या(सत्यं) चेत् धर्मिणं विना धर्मस्य स्थित्यसम्भवात् धर्मिणः प्रपञ्चस्यापि सत्यत्वमायाति। मिथ्यात्वमिति धर्मः प्रपञ्चगतः सत्यं चेत्, प्रपञ्चे मिथ्यात्वाभावोऽस्तीति उभयथा प्रपञ्चस्य सत्यत्वं सिद्ध्यति' इति प्रतिपादनम्।

अत्रेदमुत्तरम्-प्रपञ्चे विद्यमानम् मिथ्यात्वं मिथ्या एव, यतः विरुद्धधर्मयोः द्वयोः मिथ्यात्वसत्यत्वयोः एकत्र प्रपञ्चे सहावस्थानं न सम्भवति। इत्थञ्च प्रपञ्चस्य मिथ्यात्वाभावः(सत्यत्वं) न भवति इति।।

विमर्शः- प्राचीनबौद्धपरम्परायां नागार्जुनः वाक्छलसामान्यछलसंशयसमवर्ण्यसमप्रकरणसम-सव्यभिचारविरुद्धकालातीतभेदेन अष्टविधहेत्वाभासान् अङ्गीकृतवान्। तत्र वाक्छल, सामान्यछल, संशयसम, वर्ण्यसम इत्येते जात्याः अवान्तरभेदाः। अवशिष्टचतुष्टयं हेत्वाभासः इति तेन उक्तमस्ति।[21] तदेकं त्यक्त्वा अन्यत्र कुत्रापि मीमांसकादिशास्त्रान्तरेषु नैयायिकैः प्रदर्शितजातिभेदः तस्याः लक्षणादिकं न दृश्यते। इत्थञ्च **'व्यवहारे भट्टनयम्'** अङ्गीकुर्वाणाः अपि वेदान्तिनः अद्वैतसिद्धिग्रन्थेऽस्मिन् नैयायिकसम्मतजातिलक्षणमेव स्वीकृतवन्तः इति अनेन शोधेन प्रतिपादयितुं शक्यते।

सन्दर्भग्रन्थसूची

1. महर्षिगौतमः, न्यायसूत्रम्, (वात्स्यायनीयन्यायभाष्यसहितम्), 2013, चौखम्बा संस्कृत सीरिज आफिस, वारणासी
2. वाचस्पतिमिश्राः,पराञ्जेश्वरशास्त्री, न्यायवार्तिक-तात्पर्यटीका, 1989, चौखम्बासंस्कृतसंस्थानम्, वारणासी
3. श्रीयोगेन्द्रनाथदेवशर्मः, श्रीशीतांशुशेखरदेवशर्मा, अद्वैतसिद्धिः (बालबोधिनी-व्याख्ययोद्भासिता प्रथमभागः),1971, तारा पब्लिकेशन्स, वारणासी
4. वरदराजः,राजेन्द्रनाथ शर्मा , तार्किकरक्षा, 2016, ज्ञानभारती पब्लिकेशन्स,दिल्ली
5. व.नवीनहोळळः, तर्कप्रवेशगौतमसरणिः, 2019, प्रज्ञानम्, श्रीमाता,भारतीनगरम्, शृङ्गेरी, कर्नाटक
6. नीलकण्ठभट्टः, नीलकण्ठप्रकाशिका, 2006, श्री नृसिंहसरस्वती पाठशाला (शास्त्रविभागः), पुण्यपत्तनम्
7. मोक्षाकरगुप्तः, बौद्धतर्कभाषा,1936, प्राच्य प्रकाशन८४–ए, जगतगंज, वारणासी-२
8. भारद्वाजोद्द्योतकरः, अनन्तलाल ठाकूर्, न्यायभाष्यवार्तिकम्, 1997, भारतीयदर्शननिकानुसन्धान-परिषद्, न्यूदिल्ली
9. महामहोपाध्याय-भीमाचार्यः,न्यायकोशः,1996, भण्डारकर् ओरियन्टल् रिसर्च इन्स्टिट्युट्, पुणे

[21] मोक्षाकरगुप्तः, बौद्धतर्कभाषा,1936, प्राच्य प्रकाशन८४–ए, जगतगंज,वारणासी-२, भूमिकायाम्।

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

सङ्केताक्षरसूची

सू.सं-सूत्रसंख्या
पृ.सं-पृष्ठसंख्या
परि॰-परिच्छेदः
गौ.वृ.-गौतमसूत्रवृत्तिः

वाणीमञ्जुनाथहेगडे
(Vani Manjunath Hegde)
शोधच्छात्रा
केन्द्रीयसंस्कृतविश्वविद्यालयः
राजीवगान्धीपरिसरः, मेणसे, (शृङ्गेरी)
पत्राचारसङ्केतः – मेणसे, चिक्कमगळूरु, (कर्नाटक) 577139
अणुपत्रसङ्केतः – vanijhegde@gmail.com

***

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

आयुर्वेद में त्रिदोषविज्ञान

- प्रियंका मिश्रा

शोध सार -

त्रिदोषविज्ञान का अभिप्राय प्रस्तुत शोध में मुख्यतः वेद के उपाङ्ग आयुर्वेद में प्रतिपादित क्रियाशरीर से है। त्रिदोष आयुर्वेद का परिवर्तित प्रत्यय है। अग्नि, वायु तथा जल शरीर में विद्यमान होकर पित्त, वात, तथा कफ के रूप में ज्ञेय होते हैं। ये त्रिगुणात्मक होते हैं तथा अग्नि आदि भूतों के विकार कहे जाते हैं।

इस प्रकार आयुर्वेद सम्मत अग्नि, वायु तथा जल की संघटनात्मक अवधारणा त्रिदोष की संकल्पना का आधार है। ये त्रिदोष ही शरीर में विद्यमान होकर शरीर के परिमाण, तापमान, तथा ऊर्जास्तर के निर्धारक होते हैं। साम्यावस्था में रहने पर ये आरोग्य कारक तथा प्रकुपित होने पर ये रोगकारक होते हैं। अतः स्वस्थ तथा दीर्घायु जीवन की दृष्टि से इनके स्वरूप ,शरीर में इनके स्थान, प्रकृति आदि का निरूपण करना आवश्यक माना गया है।

कुंची शब्द:- त्रिदोष, आयुर्वेद, क्रियाशरीर, त्रिदोषविज्ञान ।

शरीर के मूलभूत आधार वात, पित्त तथा कफ ये तीन दोष माने गये हैं, जोकि शरीर के अधोभाग, मध्यभाग तथा उर्ध्वभाग में व्याप्त होकर शरीर को धारण किये रहते हैं। सम्पूर्ण शरीर को धारण किए रहने के कारण ही ये शरीर के आधार स्तम्भ माने जाते हैं।
आचार्य सुश्रुत ने उपरोक्त तथ्य को स्पष्ट करते हुए कहा है कि -

‘वातपित्तश्लेष्माण एव देहसंभवहेतवः। तैरेवाव्यापन्नैरधोमध्योर्ध्वसन्निविष्टैः शरीरमिदं धार्यतेऽगारमिव स्थूणाभिस्तिसृभिः अतश्च त्रिस्थूणमाहुरेके।।’ [1]

त्रिदोषों को त्रिगुणात्मक भी कहा जाता है, क्योंकि इनमें सत्त्व ,रज तथा तम का समावेश होता है। वायु में रजोगुण, पित्त में सतोगुण तथा कफ में तमोगुण की बहुलता होती है। ये अग्नि, वायु

----

1. सुश्रुतसंहिता, सूत्रस्थान अ0 21/3

CC BY

तथा जल आदि भूतों के विकार होते है, जोकि शरीर में विद्यमान होकर त्रिदोष कहलाते हैं। ये त्रिदोष शरीर के भीतर अपने स्वरूप तथा कार्यों के आधार पर शरीर को ऊर्जावान, गतिमान तथा स्निग्धवान बनाते हुए उच्छवास निश्वास तथा मल निष्कासन आदि विभिन्न शारीरिक क्रियाओं को भी सम्पन्न करते हैं।

इस प्रकार आयुर्वेद में त्रिदोषों को उनके स्वरूप ,कार्यो तथा शरीर में उनके स्थानों के आधार पर पृथक-पृथक रूप से वर्णित किया गया है, जोकि निम्नवत् द्रष्टव्य है -

1- वात के कार्य तथा स्थान –

वायु के चलायमान गुण के कारण ही वात भी सम्पूर्ण शरीर में गतिशील होता है। गतिशीलता के कारण ही इसकी स्थिति शरीर में सर्वत्र मानी गयी है। किन्तु आचार्य चरक आदि ने निश्चित शरीर अवयवों में वात के स्थानों का वर्णन करते हुए कहा है कि - **विशेष रूप से पक्वाशय तथा मूत्राशय, मलाशय कटि, दोनो उरू ,दोनो पैर, अस्थियाँ ये वात के स्थान हैं।'**[2]

यह वात दोष रजोगुण प्रधान रूक्ष, लघु तथा चंचल स्वभाव वाला होता है। वात के स्वभाव को स्पष्ट करते हुए शाङ्गर्धरसंहिता में कहा भी गया है कि—

'पवनस्तेषु बलवान् विभागकरणान्मतः

रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः।।' *3

गरुडमहापुराण में भी वात के स्वरूप को स्पष्ट करते हुए कहा गया है कि - **वात शीतल, रूक्ष, लघु, सूक्ष्म, स्वरविहीन, स्थिर तथा बली होता है।'**[4]

----

2. चरकसंहिता, सूत्रस्थान अ0 20/8
3. शाङ्गर्धरसंहिता, पूर्वखण्ड अ0 5/ 44
4. गरुडमहापुराण,आचारकाण्ड,अ0168 श्लोक सं0 16

पित्त तथा कफ दोष भी वात पर आधारित होते है , क्योंकि वात क्रियाप्रधान होता है जिसके कारणस्वरूप उपरोक्त पित्तादि भी क्रियाशील होते हैं। वात के अभाव में ये दोनो दोष पङ्गुवत् हो जाते हैं। शाङ्र्गधरसंहिता में इस तथ्य को स्पष्ट करते हुए कहा गया है कि –

पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्।।*5

वात दोष सूक्ष्म तथा लघु होता है। अपनी सूक्ष्मता तथा लघुता आदि गुणों के कारण ही यह सरलता से शरीर के अवयवों में प्रवेश कर जाता है तथा लघुता के कारण ही शरीर को स्वस्थ बनाए रखता है। किन्तु इसके विपरीत वात दोष के कुपित होने पर शरीर शोक, मोह, दीनता, लोभ, आदि विभिन्न विकारों से ग्रसित हो जाता है। वाणी, श्रोत्र आदि सभी इन्द्रियाँ वात के कारण ही प्रवृत्त होती हैं तथा शरीर के मलादि दोष जैसे मूत्र पुरीष, स्वेद आदि का सम्यक् प्रकार से निष्कासन वात दोष के कारण ही सम्भव होता है।

इस प्रकार वात दोष सम्पूर्ण शरीर में व्याप्त होकर शरीरिक क्रियाओं यथा-उच्छवास, निश्वास, मल निष्कासन, शरीर को पोषण देना, इन्द्रियों को गति प्रदान करना आदि कार्यो में प्रवृत्त होता हुआ शरीर को क्रियाशील बनाता है।

2-पित्त के कार्य तथा स्थान –

पित्त, उष्ण, तीक्ष्ण, सत्त्व प्रधान, द्रव्य तथा कटु प्रधान माना गया है। इसके स्वरूप को स्पष्ट करते हुए शाङ्र्ग धरसंहिता में द्रष्टव्य है कि -

पित्तमुष्णं द्रव्यं पीतं नीलं सत्त्वगुणोत्तरम्।
कटुतिक्तरसं ज्ञेयं विदग्धं चाम्लतां व्रजेत्।।’ *6

5- शाङ्र्ग धरसंहिता, पूर्वखण्ड अ0 5/ 43

6- शाङ्र्ग धरसंहिता, पूर्वखण्ड अ0 5/ 47

गरुडमहापुराण में भी पित्त का यह स्वरूप द्रष्टव्य है उसके अनुसार- **पित्त, अम्ल, कटु, उष्ण, पंकिल एवं रोगकारक होता है।**’[7]

CC BY

उपरोक्त गुणों में उष्णता को पित्त का प्रमुख गुण माना गया है, क्योंकि पित्त अग्नि भूत का विकार होता है जिसके द्वारा शरीर में पाचन आदि क्रियाएँ हो पाती हैं। शरीर द्वारा जो भी अन्न ग्रहण किया जाता है, वह पित्त के द्वारा ही पकाया जाता है। यह पित्त भी शरीर के विभिन्न अवयवों में व्याप्त होकर अलग-अलग कार्यो में प्रवृत्त होता है जैसे- अग्नाशय में स्थित होकर पित्त शरीर में कान्ति को प्रकट करता है। यकृत के भीतर रहने वाला पित्त रस को रंजित करके उसे रक्त के रूप में परिणत करता है। इसी प्रकार नेत्र में विद्यमान हुआ पित्त नेत्रों को देखने की शक्ति प्रदान करता है तथा हृदय के भीतर विद्यमान हुआ पित्त शरीर के मानसिक गुणों को स्वच्छ तथा सुचारु रूप से क्रियाशील बनाता है । कहा भी गया है कि-

'अग्नाशये भवेत् पित्तमग्निरूपं तिलोन्मितम्।
त्वचि कान्तिकरं ज्ञेयं लेपाभ्यङ्गादिपाचकम्।।
दृश्यं यकृति यत् पित्तं तद्रसं शोणितं नयेत्।
यत् पित्तं नेत्रयुगले रूपदर्शनकारि तत्।।
यत् पितं हृदये तिष्ठेन्मेधाप्रज्ञाकरं च तत्।' *8

इस प्रकार शरीर में कान्ति, रूपदर्शन तथा मानसिक क्रियाओं का सुसंचालन पित्त के कारण ही सम्भव होता है।

3- कफ के कार्य तथा स्थान –

पित्त के विपरीत लक्षणों वाला कफ दोष होता है, जो कि स्निग्ध प्रधान, गुरु, शीत तथा तमोगुण युक्त बताया गया है। शाङ्गर्ग धरसंहिता ने कफ के स्वरूप को स्पष्ट करते हुए लिखा है कि –

'कफः स्निग्धो गुरुः श्वेतः पिच्छिलः शीतलस्तथा।
तमोगुणाधिकः स्वादु विदग्धो लवणो भवेत्।।' *9

इसी प्रकार गरुडमहापुराण के अनुसार कफ का स्वरूप इस प्रकार है- **कफ मधुर, लवण, स्निग्ध, गुरु तथा अधिक चिकना होता है।*10**

----

7 - गरुडमहापुराण, आचारकाण्ड, अ0168 श्लोक सं0 16

8 - शाङ्गर्ग धरसंहिता, पूर्वखण्ड अ0 5/ 48-50

9 - शाङ्गर्गधरसंहिता, पूर्वखण्ड अ0 5/ 52

10 - ग़रुडमहापुराण, आचारकाण्ड, अ0168 श्लोक सं0 17

कफ दोष जल की प्रधानता के कारण ही स्निग्ध प्रधान होता है। स्निग्ध आहारों के कारण ही शरीर में श्लेष्मा की वृद्धि हो जाती है। श्लेष्मा वात दोष से उत्पन्न होने वाली रूक्षता को कम करता हुआ शरीर की साम्यावस्था को बनाए रखता है। शरीर में कफ, रस तथा रक्त के साथ मिलकर सम्पूर्ण शरीर में परिभ्रमण करता है जिसके परिणामस्वरुप शरीर दृढ़ तथा स्थिर बनता है।

त्रिदोषों की साम्यावस्था -

जैसा कि पूर्वविदित है कि शरीर में होने वाली सभी क्रियाओं का आधार त्रिदोष ही होते हैं, जोकि साम्यावस्था में रहते हुए शरीर को स्वस्थ रखते हैं तथा शतायु प्रदान करते हैं। किन्तु जब ये त्रिदोष प्रकुपित होकर विकृतावास्था में होते है तो ये विद्यमान रस, रक्त, मांस, मज्जा, स्नायु, कण्डरा, मूत्र, आदि सभी धातुओं और उपधातुओं को विकृत करते हुए शरीर को

रोग युक्त तथा मलिन बना देते हैं जिसके कारण इनको मल की भी संज्ञा दी गयी है इसका वर्णन करते हुए कहा भी गया है कि –

शरीरदूषणाद् दोषा धातवो देहधारणात ।
वातपित्तकफा ज्ञेया मलिनी करणान्मला: ।।[11]

किन्तु ये वात, पित्त तथा कफ धातु तथा मल की अपेक्षा शारीरिक दोष ही माने जाते है क्योकि ये त्रि दोष ही जीवन का आधार है

आचार्य चरक ने इस तथ्य को स्पष्ट करते हुए कहा भी है कि -

वायु: पित्तं कफश्चोक्त: शारीरो दोष संग्रह :। [12]

इस प्रकार त्रिदोषों की साम्यावस्था स्वस्थता तथा विकृतावस्था रोग की सूचक होती है।

निष्कर्ष -

प्रस्तुत शोध पत्र का सम्भावित निष्कर्ष यह होगा कि आयुर्वेद में त्रिदोष विषयक विवेचन जिस प्रकार किया गया है, वह केवल जीवन के भौतिक शरीर से सम्बन्धित नहीं है अपितु शरीर को आन्तरिक संरचना और उसकी रक्षा के द्वारा स्वस्थ और शतवर्ष के जीवन की भारतीय अवधारणा की पुष्टि भी करता है। अतः शोध पत्र के माध्यम से शोधार्थिनी द्वारा यह सन्देश देना अभीष्ट है कि त्रिदोष सभी प्रकार की अन्तः क्रियाओं के प्रथम साधन है । इसलिए इसको समझना हमारा परम दायित्त्व है।

----

11 - शाङ्गर्धरसंहिता, पूर्वखण्ड अ0 5/24

12 - चरकसंहिता सूत्रस्थान अ0 1 /56

CC BY

सन्दर्भग्रन्थ सूची -

1 त्रिपाठी, डा. ब्रह्मानन्द चरकसंहिता, चौखम्भा सुरभारती प्रकाशन वाराणसी ,
2 त्रिपाठी, डा. ब्रह्मानन्द शाङ्र्गधरसंहिता, चौखम्भा सुरभारती प्रकाशन वाराणसी
3 धाणेकर, डा. भास्कर गोविन्दजी सुश्रुतसंहिता, मोतीलाल बनारसी दास दिल्ली।
4 वर्मा, मुकुन्दस्वरूप ,मानव शरीर रचना, मोतीलाल बनारसीदास दिल्ली,
5 शर्मा राजेन्द्रनाथ एवं सिंह श्री नागशरण , गरुडमहापुराण, दिल्ली वाराणसी,
6 शास्त्री, अम्बिकादत्त, सुश्रुतसंहिता, चौखम्भा सुरभारती प्रकाशन वाराणसी
7 शास्त्री , वेदप्रकाश आर्य शाङ्र्ग धरसंहिता में शारीर विज्ञान, क्लासिकल पब्लिशिंग कम्पनी दिल्ली ।

प्रियंका मिश्रा
शोधछात्रा (संस्कृत)
वी.एस.एस.डी. कालेज
नबावगंज, कानपुर उ.प्र.,
सी.एस.जे.एम.यू. कानपुर
priyanknjpm111@gmail.com

***

"ईशा वास्यमिदं सर्वम्"- ईशोपनिषन्मन्त्रस्य स्वतन्त्रमेकमध्ययनम्

- पलाश-घोडइः

शोधसारः -
प्राचीनाः नवीनाश्च नैके भाष्यकाराः ईशोपनिषन्मन्त्राणाम् अर्थनिर्णयाय भाष्यटीकादिकं प्रणीतवन्तः इत्यतः उपनिषदोऽस्याः अर्थगाम्भीर्यम् अनुमातुं शक्यते। मन्त्रार्थविषये भाष्यकारेषु मतवैभिन्न्यपि दृग्गोचरीभवति। अतः मन्त्रार्थनिर्णयाय मयात्र प्रबन्धे ईशोपनिषदः प्रथममन्त्रमादाय बहूनां भाष्यकाराणां भाष्याणि सूक्ष्मेक्षिमकया पर्यालोच्य मम मन्त्रविषये स्वकीयं मतं निगदितम्। यद्यपि भाष्यकाराणां भाष्यमन्तरेण उपनिषदः तात्पर्यनिर्णयः सुकरो नास्ति, तथापि तैः कृतः मन्त्रार्थः स्वसम्प्रसायसिद्धान्तानुगामित्वेन पक्षपातदोषदुष्टः इत्यपि बहुभाष्यपर्यालोचनाज् ज्ञायते। तस्मात् उपनिषन्मन्त्राणां स्वतन्त्रतया अर्थबोधनाय प्रयासः कर्तव्यः येन उपनिषदः स्वकीयः अर्थः प्रकाशितो भवेत्।

शोधप्रबन्धः -

भारतीयदर्शनसन्दर्भे श्रुतिप्रस्थानभूता उपनिषद आस्तिकविद्वत्समवाये परमप्रमाणभूताः। प्रसिद्धासु उपनिषत्सु ईशोपनिषद् अन्यतमा। प्राचीनाः नवीनाश्च नैके भाष्यकाराः ईशोपनिषन्मन्त्राणाम् अर्थनिर्णयाय भाष्यटीकादिकं प्रणीतवन्त इत्यस्मात् अस्या उपनिषदो मन्त्राणाम् अर्थगाम्भीर्यम् अनुमातुं शक्यते। शुक्लयजुर्वेदसंहितायाः चत्वारिंशदध्याये विद्यमानायाः ईशोपनिषदः मन्त्राणाम् उपदेशात् प्राक् शुक्लयजुर्वेदसंहितायां पुरुषमेध-सर्वमेध-पितृमेधादियज्ञानां विस्तृतं विवरणं दृश्यते, अर्थात् कर्मपराः मन्त्राः पूर्वम् उपदिष्टाः। अतो ये कर्मनिष्णाता मुमुक्षवः तेषां कृते ईशोपनिषन्मन्त्राणाम् उपदेश इति प्रायेण निश्चेतुं शक्यते। कर्मप्रतिपादकानां यज्ञानाम् वर्णनाद् अनन्तरम् ईशोपनिषद् आरभ्यते। तत्र प्रथममन्त्रो हि -

ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥१॥ इति।

भाष्यकारेषु आदिमतमस्य अद्वैतिनः शङ्कराचार्यस्य मते अयं हि मन्त्रः ज्ञाननिष्ठानां कृते उपदिश्यते। तन्मते मन्त्रस्यार्थो हि - अहमेव इदं सर्वमिति परमार्थसत्यरूपेण इदं चराचरात्मकं सर्वम् अनृतं वस्तुजातम् ईशा परमेश्वरेण निर्गुणब्रह्मणा आच्छादनीयम्। "यथा चन्दनागुर्वादेरुदकादिसम्बन्धज-क्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेन आच्छाद्यते स्वेन पारमार्थिकेन गन्धेन, तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं

CC BY

जगत्... सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्।"[1] अर्थात् इदं सर्वं वस्तुतः अधिष्ठानब्रह्मस्वरूपमिति ज्ञानेन अध्यस्तं मिथ्याभूतं सर्वं स्वत एव परित्यक्तं स्यात्। एवं परमार्थसत्यात्मभावनया नामरूपाख्यप्रपञ्चप्रविलापनरूपेण त्यागेन त्वं ज्ञाननिष्ठः सन्न्यासी भुञ्जीथाः पालयेथाः आत्मानं रक्षयेः। सर्वम् अध्यस्तम् अनृतम्, अधिष्ठानं ब्रह्मैव सत्यमिति विज्ञाय कुत्रचिद् मिथ्याविषयां गृधिम् आकाङ्क्षां न कुर्याः, कस्यापि धने लोभं मा कार्षीः इत्यर्थः।

विशिष्टाद्वैतिना रामानुजाचार्येण यद्यपि अस्या उपनिषदः भाष्यं न विरचितं तथापि तत्सिद्धान्तानुसारेण वेङ्कटनाथेन ईशोपनिषन्मन्त्राणां भाष्यं रचितम्। तन्मते ईशोपनिषद्धि शिष्यं प्रति गुरोः ब्रह्मविद्यानुशासनम्।[2] तद्भाष्यानुसारेण ईशोपनिषदः प्रथमस्य मन्त्रस्य आदिमपादद्वयेन सर्वस्य मुमुक्षोः जीवस्य ईश्वरपारतन्त्र्यं बोध्यते। ततः अन्तिमपादद्वयेन वैराग्यवृत्तिः उपदिश्यते।[3] तन्मते मन्त्रस्यार्थो हि - इदम् ईश्वरव्यतिरिक्तं चिदचिदात्मकं सर्वम्, ईशा "'ज्ञाज्ञौ द्वावजावीशनीशा'-वित्यादिषु जीवादत्यन्तविलक्षणतया प्रख्यातेन सर्वनियन्त्रा पुरुषोत्तमेन", वास्यं व्याप्यं, सर्वाधारे स्वस्मिन् स्वेन वसनीयं वा। जगत्यां लोकेषु, "जगत् स्वरूपतो धर्मतो वान्यथात्वं गच्छत् भोक्तृभोग्यरूपं वस्तुजातम्। अतदात्मकं किञ्चिदपि नास्ति"। "तेन जगता भोग्यताभ्रमविषयेण त्यक्तेन दोषभूयस्त्वदर्शनात् परित्यक्तेन" भुञ्जीथाः। अथवा सर्वावास्यत्वेन प्रकृतं निरतिशयभोग्यं ब्रह्म भुञ्जीथाः। अर्थात् कस्यापि बन्धोः अबन्धोर्वा धनं मा गृधः मा अभिकांक्षः। अयं च धनाशापरित्यागः परमात्मेतरकृत्स्नविषयेभ्यः मुमुक्षोः वैराग्यं लक्षयति।

द्वैतवेदान्तमूर्धन्यभूतेन मध्वाचार्येण ईशोपनिषदः प्रथममन्त्रस्य संक्षेपेण भाष्यरचनावसरे ईशावास्यमिति (ईश-आवास्यम्) पाठं स्वीकुर्वता उच्यते - "ईशस्यावासयोग्यमीशावास्यम्। जगत्यां प्रकृतौ। तेन ईशेन त्यक्तेन दत्तेन भुञ्जीथाः।"[4]

---

1 *श्रीशङ्करभगवत्पादाचार्यविरचितम् उपनिषद्भाष्यम्*, खण्डः १, सम्पा.- एस्, सुब्रह्मण्यशास्त्री, दक्षिणामूर्ति-मठ-प्रकाशन, वाराणसी, पृ. ४।

2 Vedanta Desika, *Isavasyopanishad Bhashya*, p. 1. तत्र भाष्यारम्भे वेङ्कटनाथेन अयं श्लोकः निगद्यते - ईशावास्यमिदं सर्वमित्यादि यदनूच्यते। शिष्यं प्रति गुरोरेतद्ब्रह्मविद्यानुशासनम्।।

3 तदेव, "तत्र प्रथमम् अचिद्विकाराधिष्ठितस्य स्वतन्त्रतात्मभ्रमादिपरिजिहीर्षया सर्वस्य परमपुरुषायत्तस्वरूपस्थितिप्रवृत्तित्वमभिप्रेत्याह" (पृ.२) "मुमुक्षोरीश्वरपारतन्त्र्यबोधमुत्पाद्य वैराग्यभूषितां वृत्तिमुपदिशति" (पृ.४)।

4 शङ्कराचार्यादयः ईट् इति प्रातिपदिकं स्वीकृत्य तस्य तृतीयाविभक्त्यैकवचने 'ईशा' पाठं स्वीकुर्वन्ति, परन्तु मध्वाचार्यः 'ईशेन' 'ईशस्य' इत्यादिपदप्रयोगात् ईश इति अकारान्तं प्रादिपदिकं स्वीचकार इति अवधेयम्।

ब्रह्माण्डपुराणम् उद्धृत्य तेनोच्यते यत् - स्वतः प्रवृत्त्यशक्तत्वाद् ईशावास्यमिदं जगत्। सर्वस्यापि ईश्वराधीनप्रवृत्तित्वात् ईश्वरप्रदत्तेन एव वस्तुना भुञ्जीथाः, नान्यं प्रयाचयेत् इति। द्वैतवेदान्तिना जयतीर्थेन मध्वाचार्यकृतस्य भाष्यस्य स्पष्टीकरणाय किञ्चिद् विशदीकृतम्। तेनोच्यते - प्रकृत्यन्तर्भूतं कृत्स्नमिदं जगत् स्वतः प्रवृत्त्यशक्तत्वात् स्वतन्त्रेण ईशेन सर्वप्रवृत्तिकारणभूतेन एव भवितव्यम्।[5]

वेदान्तदर्शनस्य प्रधानसम्प्रदायत्रयस्य भाष्यम् उपरिष्टात् निगदितम्। सिद्धान्तभेदात् सम्प्रदायानां व्याख्यानभेदः भाष्येषु स्पष्टः। इदानीं प्रथममन्त्रम् आश्रित्य भाष्येषु यत्र मुख्यविरोधः परिलक्ष्यते तत् पर्यालोच्यते।

प्रथमतः ‘ईशावास्यम्’ अथवा ‘ईशा वास्यम्’ - इत्यत्र ‘वास्यम्’ अथवा ‘आवास्यम्’ इति। अद्वैतवेदान्तिना शङ्कराचार्येण विशिष्टाद्वैतवेदान्तिना वेङ्कटनाथेन च ‘ईशा वास्यमि’ति पाठं स्वीचक्रुः। शङ्कराचार्येण ‘वास्यमि’ति पदस्य ‘आच्छादनीयम्’ इत्यर्थं गृहीत्वा परमेश्वरेण कृत्स्नम् अनृतं वस्तुजातम् आच्छादनीयम् इत्यर्थः कृतः। परन्तु विशिष्टाद्वैतवेदान्तिना वेङ्कटनाथेन ‘वास्यमि’ति पदस्य ‘व्याप्यम्’ ‘वसनीयं’ वेति द्विविधः अर्थः स्वीकृतः। द्वैतवेदान्तिना मध्वाचार्येण यद्यपि ‘ईशावास्यम्’ इति पाठं स्वीकृत्य “ईशस्य आवासयोग्यम्” इति वास्यपदस्य आवासयोग्यार्थः स्वीकृतः तथापि वेङ्कटनाथस्वीकृतेन अर्थेन सह तत्स्वीकृतस्य अर्थस्य विरोधो नास्ति।[6] “वस आच्छादने”, “वस निवासे”, “वास उपसेवायाम्” इति धातुत्रयम् विद्यते। एतेभ्यः त्रिभ्य एव धातुभ्यः ण्यत्प्रत्यये वास्यमिति रूपं सिद्ध्यति। उपसेवा उपसेवनम् उपभोगः इत्यर्थः। श्रीअरविन्देन वासः वसनम् परिधानम् इत्यर्थाद् वास्यमिति पदस्य परिधेयम् इत्यर्थः अपि स्वीकृतः।[7] वासः सुगन्धः इत्यस्माद् वासशब्दार्थाद् वास्यमिति पदस्य सुगन्धनीयम् इत्यर्थः अपि शक्यते स्वीकर्तुम्। पि. ठीम-महोदयेन आवास्यपदस्य अर्थपर्यालोचनवेलायाम् अयमर्थः निगदितः।[8] तेन च परमेश्वरेण सर्वं

---

[5] *श्रीभाष्यखण्डार्थसहितः ईशावास्योपनिषन्नामा प्रथमो मणिः*, प्रकाशकः- हे. कृ. रङ्गनाथाचार्यः, वेङ्गलुरु, पृ. ५।

[6] Magnone-महोदयेनापि तस्य प्रबन्धे विषयोऽयम् आलोचितः। (*Hermeneutical Wrigglings about the Īśopaniṣad*, p. 352)

[7] Sri Aurobindo, *Isha Upanishad*, p.5. Here he says, “There are three possible senses of vāsyam, “to be clothed”, “to be worn as a garment” and “to be inhabited”.”

[8] P. Theime, Īśopaniṣad (=Vājasaneyi-saṃhitā 40) 1-14, p. 89. There he says, “There are several possibilities worth to be considered: *ā-vāsya* may be derived (a) from *ā-vas* ‘put on as clothing’ (pres. -*vaste*), or (b) from *āvāsya-* ‘pervade by odor, perfume,’ or (c) *ā-vas* ‘dwell in’ (pres. -*vasati),* constructed with acc.”

CC BY

सुगन्धनीयम् अर्थात् परमेश्वरभावः सर्वेषु चराचरवस्तुषु आपादनीयः येन परमेश्वरस्य अस्तित्वं निखिलेषु वस्तुषु उपलभ्येत इत्यर्थः सम्भवति। परन्तु श्रीअरविन्दः, ठीम-महोदयश्च आवासयोग्यम् इति अर्थं प्रसङ्गेऽस्मिन् समीचीनं मन्येते। इत्थं वास्यपदस्य बहवः अर्थाः सम्भवन्ति।

द्वितीयतः, "तेन त्यक्तेन भुञ्जीथाः" इति तृतीयः पादः। पादस्यास्य व्याख्यानवेलायां शङ्करभाष्ये उक्तम् - "तेन त्यक्तेन त्यागेनेत्यर्थः" "भुञ्जीथाः पालयेथाः" इति। तेन इति पदस्यार्थः शङ्करभाष्ये नैव स्पष्टतया निगदितम्। तेनेति पदस्य विशेषार्थानिरूपणात् पदमिदं त्यक्तेन इति पदस्य विशेषणमिति शङ्कराचार्यस्याशय इति ऊहितुं शक्यते। वेङ्कटनाथेन तु तेन इति पदस्य "जगता भोग्यताभ्रमविषयेण" इत्यर्थः स्वीकृतः। अत्र पूर्वोक्तं पदं हि जगत्। तस्मात् तेन इति पदं पूर्वोक्तं जगत् इति पदं परामृशतीति तस्याभिप्रायः। मध्वाचार्येण पुनः तेन इत्यस्य 'ईशेन' इत्यर्थः कृतः। वस्तुतः तच्छब्दः पूर्वोक्तं पदं किञ्चित् परामृशति। मध्वाचार्यमते तेन इति तृतीयान्तं पदं पूर्वोक्तेन ईशा इति तृतीयान्तेन पदेन अन्वेति। तस्मात् तेन इति पदं पूर्वोक्तम् ईशेन इति पदं निर्दिशति इति मध्वाचार्यस्याशयः। 'त्यक्तेन' इति पदस्य शङ्कराचार्यः 'त्यागेन' इति, वेङ्कटनाथः 'परित्यक्तेन' इति, मध्वाचार्यश्च 'दत्तेन' इत्यर्थं स्वीचक्रुः। त्यक्तम् इति पदं क्तप्रत्ययान्तत्वात् विशेषणम्। वेङ्कटनाथमते अत्र विशेष्यं हि पूर्वोक्तं 'तेन जगता' इति। तस्मात् परित्यक्तेन तेन जगता इत्यर्थः वेङ्कटनाथेन स्वीकृतः। मध्वाचार्यमते विशेषणभूतस्य त्यक्तेनेति पदस्य विशेष्यम् अस्मिन् मन्त्रे उल्लिखितं नास्ति। तस्मात् मध्वाचार्येण त्यक्तेन इत्यस्य दत्तेन वस्तुना इत्यर्थः स्वीकृतः। यद्यपि तदीयभाष्ये 'वस्तुना' इति पदं नास्ति तथापि अर्थतः तद् अवगम्यते। विवेकानन्दस्वामिनम् अनुसरता हर्षानन्देन 'तेने'ति पदस्य 'जगदे'वार्थः स्वीकृतः। तथाहि हर्षानन्देनोच्यते - "यत् त्यक्तव्यं सा जगति स्थूलजगद्दृष्टेरेव न तु जगदेव। एष त्यागश्च जगति ईशावास्यत्वेन जगति ईश्वरदृष्टिकरणेन साधितव्यः" इति।[9] विवेकानन्देनोच्यते - "Thus we have to give up the world, and when the world is given up, what remains? God. What is meant? You can have your wife; it does not mean that you are to abandon her, but that you are to see God in the wife."[10]

---

[9] Swami Harshananda, *Īśāvāsyopaniṣat: with the commentary Vivekasukhavardhinī*, p. 33.

[10] *The Complete Works of Swami Vivekananda*, Vol.2, Advaita Ashrama, Kolkata: 2002, pp. 144-154

किञ्च, शङ्कराचार्येण 'भुञ्जीथाः' इति पदस्य 'पालयेथाः' इत्यर्थः कृतः। वेङ्कटनाथेन यद्यपि स्पष्टतया 'भुञ्जीथाः' इत्यस्य अर्थः न निगदितः तथापि तन्मते 'भोगं कुर्याः' अथवा 'अनुभवेः' इत्यर्थः भाष्यदृष्ट्या युक्तः। मध्वाचार्यमतेऽपि 'भोगं कुर्याः' इत्यर्थः युक्ततामेति, न तु 'पालयेथाः' इति।

"भुज पालनाभ्यवहारयोः" इति पालनार्थे भोजनार्थे च भुज्धातुः व्यवह्रियते। "भुजोऽनवने" इति पाणिनीयसूत्रनियमात् अपालने अर्थे अर्थात् भोजनार्थे भुज्धातोः आत्मनेपदलकारप्रयोगः स्यात्। पालनार्थे तु परस्मैपदलकारप्रयोगः स्यात्। एतल्लौकिकनियममाश्रित्य मन्त्रे 'भुञ्जीथाः' इति आत्मनेपदप्रयोगस्य अर्थः स्यात् 'भक्षयेः' इति, न तु 'पालयेथाः'। यद्यपि "छन्दसि बहुलमि"ति नियमात् वेदे उक्तलौकिकनियमव्यतिक्रमो न दोषाय, तथापि स्वाभाविकस्य अर्थस्य अन्वये सति तद् अगृहीत्वा अन्यार्थस्य ग्रहणं गौरवदोषाय कल्पते। तस्मात् भुञ्जीथा इति पदस्य पालनार्थं विहाय 'भोगं कुर्याः' 'अनुभवेः' वा इत्यर्थस्वीकार एव युक्ततर इति मदीया मतिः। अधिकतया भाष्यकाराः भुञ्जीथाः इति पदस्यार्थं अनुभवेः अथवा भोगं कुर्याः इति स्वीकृतवन्तः, परन्तु नैके भाष्यकाराः पालनार्थमपि उररीकृतवन्तः। तथाहि - पि. ठीमः "should nourish" (पालयेथाः) इति, श्रीअरविन्दः "shouldst enjoy" (उपभोगं कुर्याः) इति, सिनिय-कोहेन "eat" (खादेः) इति, राधाकृष्णन् "find your enjoyment" (भोगं पश्येः) इति च स्वीकृतवन्तः। हर्षानन्दस्वामिना मूलतः 'अनुभवेः' इत्यर्थः स्वीकृतः, परन्तु 'पालयेथाः' इत्यर्थपरत्वेनापि पदस्यास्य व्याख्यानं तेन प्रदत्तम्।

इदानीं मुख्यवेदान्तसम्प्रदायत्रयकृतभाष्यं पर्यालोच्य प्रथममन्त्रस्यार्थनिर्णयाय मया प्रयत्यते-- ईशा सर्वनियन्त्रा परमेश्वरेण इदं परिदृश्यमानं ज्ञेयं यत्किञ्च यत्किमपि जगत्यां प्रपञ्चे जगत् परिवर्तनशीलं सर्वं कृत्स्नं भोक्तृभोग्यरूपं वस्तुजातम् आवास्यं वास्यं वा, आवसनीयं व्याप्यमित्यर्थः,[11] अर्थात् परमेश्वरः सर्वं चराचरवस्तुजातं व्याप्य विराजते इति

[11] मन्मते वास्यमिति पदस्य आच्छादनीयम्, निवसनीयम्, परिधेयम्, सुगन्धनीयम्, उपभोक्तव्यं चेति पञ्चसु अर्थेषु आच्छादनीयम्, निवसनीयम्, सुगन्धनीयम् इति अर्थत्रयस्य व्यापकत्वे तात्पर्यम्। परिधेयार्थः उपभोगार्थश्च प्रसङ्गेऽस्मिन् अयुक्तः। आच्छादनीयम् इति पदार्थप्रसङ्गे इदं वक्तव्यं यत् यथा वस्त्रेण किञ्चिद् वस्तु आच्छाद्यते चेत् तद् वस्त्रं कृत्स्नं वस्तु व्याप्य तिष्ठति, तद्वत् परमेश्वेण जगत् आच्छादनीयम् इत्यस्य तात्पर्यं परमेश्वरः जगत् परिव्याप्य तिष्ठति इति। शङ्करभगवत्पादः यथा आच्छादनीयमिति पदस्य गोपनीयम् (hiding) इत्यर्थम् स्वीकृतवान्, न तथा अत्रेति अवधेयम्।

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

निश्चिततया मनसि धारणीयं साधकैः। यदा सर्वमेव परमेश्वरेण व्याप्तमिति सुदृढं ज्ञानं भवति तदा तेन सर्ववस्तुषु परमेश्वरव्याप्तिहेतुना[12] त्यक्तेन वासनात्यागेन[13] भुञ्जीथाः भोगं कुर्यात् अनुभवेः आस्वादनं कुर्यादिति यावत्। कस्यस्विद् धनं कस्यापि धनं, मा गृधः न गृह्णीयात्, अथवा मा गृधः कुत्रापि गृधिम् आकाङ्क्षां लोभं वा न कुर्यात्, यतो हि कस्यस्विद् धनम्? धनं कस्य? धनं न कस्यापि अन्यस्य विद्यते, सर्वं परमेश्वरेण व्याप्यत्वात् धनं नाम न परमेश्वराद् अन्यत् किञ्चिद् विद्यते येन परकीयेषु वस्तुषु लोभः स्यात् इत्यर्थः। परमेश्वरेण सर्वं चराचरात्मकं वस्तुजातं वास्यमित्यस्य तात्पर्यं हि परमेश्वरः सर्वेषु वस्तुषु साक्षाद् विराजते, सर्वत्र निवासं करोति च। न हि प्रपञ्चस्थितं कृत्स्नं वस्तुजातं परमेश्वरात् आत्यन्तिकतया सम्बन्धरहितम्, अपि तु सर्वं वस्तु तस्यैव परमेश्वरस्य प्रकाशभूतम्। तस्मात् सर्वत्र परमेश्वरबुद्धिः कर्तव्या। सर्वत्र परमेश्वरबुद्धौ सत्यामेव वासनात्यागेन यथार्थतया परमेश्वरात्मकस्य प्रपञ्चस्य सम्यक् आस्वादनं कर्तुं शक्यते। तादृशस्थितावेव कस्यापि लोभो मोहो वा न भवतः।

एतादृश एवानुभवः श्रीरामकृष्णदर्शने विज्ञानिनो भवति। न हि विज्ञानी भोक्तृभोग्यात्मकं प्रपञ्चम् ईश्वराद् वास्तविकतया सम्बन्धरहितं मन्वानः तं परित्यज्यति, अपि तु ईश्वरमयं प्रपञ्चं पश्यन् प्रतिक्षणं मोमुद्यते। भोगवासना अथवा कर्मफलवासना एव जीवानां बन्धं प्रति निदानम्। अज्ञाः वासनावशाद् भोगाय अर्थाद् विषयास्वादनाय प्रवर्तन्ते, किन्तु यथार्थतया आस्वादनं तदैव सम्भवति यदा वासनाः परित्यज्य निर्लिप्ततया आस्वादनं क्रियते। अतः सर्वेषु चराचरात्मकप्रपञ्चेषु परमेश्वरभावं निश्चिततया संस्थाप्य वासनासमूहं परित्यज्य विषयास्वादनाय प्रवर्त्यतां, जगद्रूपलीलाविलासो वा आस्वाद्यतां साधकैरिति मन्त्रस्यास्य अन्तर्निहितार्थः।

उपनिषद्व्याख्यानकाले उपनिषत् स्वतन्त्रतया किम् अभिप्रैतीति अनवलोक्य स्वमनोगतस्यार्थस्य आपादनेन अथवा स्वानुकूलसिद्धान्तानुसारेण कथञ्चित् अर्थसङ्गतिं साधयित्वा उपनिषद्व्याख्यानं नैव औचित्यमावहति। तस्माद् ऐदम्प्राथम्येन वक्तव्यं यत् ईशा वास्यमिति ईशोपनिषदः प्रथममन्त्रव्याख्यानावसरे सर्वं प्रपञ्चजातं मिथ्याभूतम् अनृतमिति

---

12 'तेन' इति पदस्यार्थः जगता इति वेङ्कटनाथादिभिः आचार्यैः यत् प्रतिपादितं तन्नैव असङ्गतम्। परन्तु मन्मते तेनेति पदस्य हेत्वर्थः प्रसङ्गेऽस्मिन् युक्ततरः। ठीम-महोदयेन, सर्वेपल्लि-राधाकृष्णन् -महोदयेन च हेत्वर्थः एव समादृतः।

13 त्यक्तेन इत्यस्य वासनात्यागेन इत्यर्थप्रसङ्गे इदं वक्तव्यं यत् मन्त्रस्यास्य चतुर्थपादेन लोभत्यागाय उपदिश्यते, लोभस्य मूलं हि वासना। किञ्च, प्रथमद्वितीयपादाभ्यां कृत्स्नस्य प्रपञ्चस्य ईश्वरव्याप्तिः उपदिश्यते। एकेनैव ईश्वरेण सर्वावास्यत्वात् वासनात्यागेनैव तस्यास्वादनं शक्यसम्भवमिति कारणात् वासनापदस्यात्र निवेशः आवश्यकः।

अद्वैतवेदान्तमतस्य स्वीकारः नैव यथार्थः। ईशोपनिषत् सर्वं प्रपञ्चं नामरूपत्वेन मिथ्याभूतत्वात् परित्याज्यमिति नैव उपदिशति, अपि तु सर्वेषु वस्तुषु परमेश्वरबुद्धिः कर्तव्येति उपदिशति। सर्वं चराचरात्मकं जगद् यदि मिथ्याभूतम् अनृतमेव स्यात् तर्हि सर्वस्मिन् परमात्मभावः केन प्रकारेण स्यात्? परमेश्वरो यदि सर्वमेव वस्तु व्याप्नोति तर्हि नामरूपे अपि स व्याप्नोति, अर्थात् नामरूपयोरपि ईश्वरबुद्धिः कर्तव्या; परमेश्वरो यदि सर्ववस्तुषु वासं करोति, तर्हि नामरूपयोरपि वासं करोतीत्येव अङ्गीकरणीयम्। नहि नामरूपे परमेश्वरव्याप्तिरहिते। किञ्च, सर्वस्य वस्तुनः ईश्वरनियन्त्रृत्वं मन्त्रेऽस्मिन् द्योत्यते इति द्वैतवादिनां यः सिद्धान्तः तस्य यौक्तिकत्वेऽपि “ईश्वरप्रदत्तेन वस्तुना भोगः कर्तव्यः” इति द्वैतवेदान्तसम्मता या ईश्वरसमर्पणबुद्धिः मध्वाचार्येणात्र निगदिता सा प्रसङ्गेऽस्मिन् कष्टकल्पना। त्यक्तेन इति पदस्य दत्तेन इत्यर्थस्वीकारे सर्वस्यापि भोक्तृभोग्यरूपस्य प्रपञ्चस्य ईश्वरप्रदत्तत्वात् सर्वस्यापि प्रपञ्चस्यैव भोगः अत्रोपदिश्यते इति मन्तव्यम्। अपि च, विशिष्टाद्वैतिना वेङ्कटनाथेन यद्यपि मन्त्रस्यास्य पक्षपातरहिततया व्याख्यानाय चेष्टितं तथापि तदीयभाष्ये सम्प्रदायमतस्य आपादनम् अवलोक्यते। ईशेति पदस्यार्थनिर्णयावसरे तेनोच्यते “‘ज्ञाज्ञौ द्वावजावीशनीशा’-वित्यादिषु जीवादत्यन्तविलक्षणतया प्रख्यातेन सर्वनियन्त्रा पुरुषोत्तमेन” इति। जीवाद् अत्यन्तविलक्षणतया कुत्रचित् शास्त्रे प्रसिद्धस्य पुरुषोत्तमस्य उल्लेखः अत्र ईशोपनिषद्व्याख्यानप्रसङ्गे अप्रासङ्गिकः। इत्थं दोषाः सर्वभाष्येषु एव क्वचित् सम्भवन्ति।

परन्तु यदि वयं व्याख्यानभेदरूपदोषान् परित्यज्य मन्त्रस्य साधारणम् अर्थं स्वीकुर्मस्तर्हि अवलोक्यते यत् मन्त्रेऽस्मिन् ईश्वरस्य कृत्स्नप्रपञ्चव्यापकता एव उपदिश्यते, अर्थात् जगद् दृष्ट्वा जगतः ईश्वरभिन्नत्वेन यो बोधः अस्माकं प्राकृतबुद्धीनां साधारणमानवानां भवति तं स्थूलबोधं परित्यज्य जगतः प्रतिवस्तु ईश्वरबोधः मन्त्रेणानेन उपदिश्यते। अपि च मन्त्रेऽस्मिन् जगद्भोगवासनात्यागपूर्वकः प्रपञ्चास्वादनम् उपदिश्यते, अन्यस्य वस्तुनि लोभश्च निषिध्यते इति शम्।

CC BY

परिशीलितग्रन्थाः

1. (२०११)। *श्रीशङ्करभगवत्पादाचार्यविरचितम् उपनिषद्भाषम्* (खण्डः १)। सम्पाएस् -., सुब्रह्मण्यशास्त्री। वाराणसी: दक्षिणामूर्तिप्रकाशन-मठ-।
2. *श्रीभाष्यखण्डार्थसहितः ईशावास्योपनिषन्नामा प्रथमो मणिः*। प्रकाशकःरङ्गनाथाचार्यः .कृ .हे -। वेङ्गलुरु।
3. श्रीमहेन्द्रलालगुप्तः (१९८७)। *श्रीश्रीरामकृष्णकथामृत* (अखण्ड)। कलकाता: उद्बोधन कार्यालय।
4. हर्षानन्दपुरी, स्वामी (१९९७)। *विवेकसुखवर्धिनी व्याख्यासहिता ईशावास्योपनिषद्*। रामकृष्ण मठ: बेङ्गलुरु।
5. (2007). *Īśāvāsyopaniṣad*. Swāmī Sarvānanda. Chennai: Sri Ramakrishna Math.
6. (2002). *The Complete Works of Swami Vivekananda*. Vol.2. Kolkata: Advaita Ashrama.
7. Aurobindo, Sri (2003). *The Upanishads-I, Isha Upanishad*. Pondicherry: Sri Aurobindo Ashram.
8. Magnone, Paolo (2012). "*Aho Kauśalam Apūrvam*. Hermeneutical Wrigglings about the *Īśopaniṣad*." World View and Theory in Indian Philosophy. Ed. Piotr Balcerowicz. Warsaw: Warsaw Indological Studies. pp. 349-365.
9. Signe Cohen (2018). "Īśā Uapniṣad." *The Upanishads: A Complete Guide*. New York.
10. Theime, P (1965). "Īśopaniṣad (=Vājasaneyi-Saṃhitā 40) 1-14." *Journal of the American Oriental Society* (Vol. 85, No. 1 (Jan.- Mar.,). pp. 89-99.

पलाश-घोडइः

Palash Ghorai
Assistant Professor in Sanskrit
Raja N. L. Khan Women's College, Midnapore,
Postal Address:
Raja N. L. Khan Women's College, Teachers Quarter
Gope Palace, P.O. - Vidyasagar University, Midnapore,
Paschim Medinipur, West Bengal-721102
Email: palasghorai@gmail.com

***

ऋग्वेदीयदार्शनिकसूक्तेषु सृष्टितत्त्वसमीक्षा

- शङ्करमण्डलः

शोधसारः –

मनुष्याणां तदितरेषाञ्च निवासस्थलभूतस्यास्य जगतः बहु कालात्प्रागेवोत्पत्तिरभूदिति तु निश्चप्रचमेव। परं कथंकारमस्य जगत उत्पत्तिर्जातेति चिन्तयद्भिर्यथाधुनिकैर्वैज्ञानिकैर्विविधानि तत्त्वानि आविष्कृतानि तथैवास्माकं पुरातनैः ऋषिभिरपि वैदिकसाहित्ये बहूनि तत्त्वानि उपनिबद्धानि। ऋग्वेदस्य नासदीयसूक्ते पुरुषसूक्ते हिरण्यगर्भसूक्ते च सृष्टितत्त्वानां भूयः समाहारोऽवलोक्यते। तथाहि ऋग्वेदे आम्नायते-

“नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्” (ऋग्वेदः, १/१२९/१)

जगतो जन्म तर्हि कथमभवदिति चेत्तत्रैवाम्नायते -

“तपसस्तन्महिनाजायत” (ऋग्वेदः, १/१२९/३) इति।

पुरुषसूक्ते पुनः ऋषिणा नारायणेन परमात्मनः सकाशादेव अखिलप्रपञ्चस्यास्य सर्वेषां स्थावरजङ्गमात्मकानां च प्राणिनां सृष्टिरुदीरिता। स च पुरुषः-

“सहस्रशीर्षा सहस्राक्षः सहस्रपात्” (ऋग्वेदः,१०/९०/१)

स पुरुषः अखिलमिदं ब्रह्माण्डं ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थितः। स एव प्रलयानन्तरं सर्वप्राणिनां कर्मफलभोगाय स्वीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति, तस्मात् यदिदं भूतं भव्यं वर्तमानं च तत्सर्वं पुरुष एवेति निश्चप्रचम्। पुनश्च हिरण्यगर्भसूक्ते ऋषिः प्रजापतिः हिरण्यगर्भादेव समेषां सृष्टिरभवदिति प्रतिपादयति। प्रजापतिर्वै हिरण्यगर्भः अथवा हिरण्मयोऽण्डो गर्भवद्यस्योदरे वर्तते सोऽसौ सूत्रात्मा हिरण्यगर्भ इत्युच्यते। तादृशः प्रजापतिर्हिरण्यगर्भः प्रपञ्चोत्पत्तेः प्राक् मायाध्यक्षात्परमात्मनः सकाशादजायत। तथा च आम्नातमृग्वेदे-

“हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम”।।(१०/१२१/१) इति।

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

मूलप्रबन्धः

भूमिका

अखिलमिदं विश्वं ब्रह्माण्डं वा मनुष्याणामन्येषां च प्राणिनां निवासस्थलम्। बहु कालात् प्राक् अस्यां पृथिव्यां प्राणिनां जन्म अभूत्। कस्मिन् निर्दिष्टे समये तेषां सृष्टिरभूदिति निश्चयेन केनापि वक्तुं न शक्यते। जीवेषु च श्रेष्ठतमो हि मनुष्यः। सृष्टेरारभ्य बहु विवर्तनमार्गेण मनुष्या आधुनिकतां प्रापुः। तेषु च चिन्ताया जगत् विकसितमभवत्। यया चिन्तया ते विश्वसृष्टेः उत्सभूमौ रन्तुमीषुः। स्वप्रज्ञाशक्त्या ते विचारितवन्तः यदस्माकं जन्मनो यथा कारणभूतं भवत्यस्माकं पितरौ तथैवास्य जगत आधारभूतं कारणभूतं पितृस्वरूपं वा अस्ति किमपि इति निश्चप्रचम्। तस्य स्वरूपान्वेषणाय यावत्ते मनांसि निदधिरे तावदेव नवनवोन्मेषशालीनि तत्त्वानि तेषां मनःसु प्रोद्भासितानीति वेदानामध्ययनेनैव ज्ञायते। विश्वसृष्टिविषये महती चर्चा दृश्यते तत्र। विशेषतः ऋग्वेदस्य दशमे मण्डले एतेषां दार्शनिकतत्त्वानां समाहारो भूयः अवलोक्यते इति कृत्वा तस्य मण्डलस्य दार्शनिकमण्डल इति नाम अपि प्रसिद्धिमवाप।

ऋग्वेदस्य दार्शनिकसूक्तेषु सृष्टिविषयकसूक्तेषु वा नासदीयसूक्तम् पुरुषसूक्तम् हिरण्यगर्भसूक्तम् च अत्यन्तं तात्पर्यावहम्। अधस्तादेषु सूक्तत्रयेषु प्रतिपादितानि तत्त्वानि समासेनालोच्यन्ते।

।। नासदीयसूक्तम् ।।

ऋग्वेदस्य दशममण्डलस्थितस्य १२९-तम-सूक्तस्यास्य परमेष्ठी प्रजापतिः ऋषिः, परमात्मा च देवता। सप्तमन्त्रात्मकेऽस्मिन् सूक्ते आदौ सृष्टेः प्रागवस्था निरस्तसमस्तप्रपञ्चा या प्रलयावस्था सा निरूपिता।

सर्वं हि कार्यजातं कारणादेव समुत्पन्नम्। असति च कारणे कार्याभावः। अत्र तु अन्वयव्यतिरेकनियमः कार्यकारणभावावेदको भवति। तथाहि कार्यसत्त्वे कारणसत्ता इति अन्वयः, कारणाभावे च कार्याभावः इति व्यतिरेकः। अत एवेदं परिदृश्यमानं जगत्प्रपञ्चं सांख्यानुसारं सद्वा भवतु अद्वैतवेदान्तानुसारम् असदेव वा भवतु, तस्य कार्यत्वात् कारणमस्त्येव। किं तत् कारणमित्यन्विष्यतः ऋषेः प्रजापतेः नयनयोः सृष्टेः प्रागवस्थावभासिता-

"नासदासीन्नो सदासीत्तदानीम्"[1] इति।

तथाहि तदानीमस्य परिदृश्यमानस्य जगतः कारणभूतं यदासीत् तत् न असत् शशविषाणवत् अलीकं न, नापि च सत्। असत्त्वेनात्र पारमार्थिकसत्ताभावो द्योतितः। तदानीं केवलं तमः

---

[1] ऋग्वेदः (१०/१२९/१)।

अज्ञानमेवासीत् इति। तस्य अज्ञानस्य जगत्कारणत्वं तृतीयमन्त्रे आम्नातम्। तच्चाज्ञानं किंस्वरूपकमित्याह- नासदासीन्नो सदासीत् इति। तथाहि अज्ञानं न सत्, मुक्तौ बाधात्, नापि असत् आसंसारं तस्य प्रतीतेः । किञ्च असत्वेन तस्य शशविषाणसादृश्यात् तादृशात् कारणादस्य जगत उत्पत्तिर्न सम्भवति। नापि च सदसदुभयात्मकं गोत्वाश्वत्वयोरिव परस्परविरोधात्। गीतं च देवीगीतायां-

"न सती सा नासती सा नोभयात्मा विरोधतः"[2]। इति।

आचार्येण शङ्करेणापि विवेकचूडामणौ चोदितं-

"सन्नापि असन्नापि उभयात्मिका नो
भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्गाप्यनङ्गा ह्युभयात्मिका नो
महाद्भूतानिर्वचनीयरूपा"[3]।। इति।

तदानीं चावान्तरप्रलयदशायां लोका नासन्। नापि च व्योम अन्तरिक्षं द्युलोकादि आसन्। एवं च चतुर्दशभुवनगर्भस्य ब्रह्माण्डस्य आवर्यस्य स्वरूपेण निषेधात् तदावरकस्यापि स्वरूपतः निषेधो भवति। तथाहि-

"आवर्याभावात्तदावरकमपि नासीदित्यर्थः"[4] इति।

तथा च भोग्यप्रपञ्चाभावात् भोक्तृप्रपञ्चोऽपि तदानीं नासीत् इति। ननु "आपो वा इदमग्रे सलिलमासीत्"[5] इति तैत्तिरीयश्रुतेः अखिलब्रह्माण्डस्य निषेधः अनुपयुक्त इति चेदत्रोच्यते-

"अम्भः किमासीद्गहनं गभीरम्"[6]

नासीदेवेति पर्यवस्यति। तथा च तदानीं मृत्युः अमृतत्वं च नास्ताम्। सूर्याचन्द्रमसोश्चाभावात् रात्रिदिवसयोर्ज्ञानमपि नाभवत्। अत एव नो सदासीत् तदानीम् इत्यत्र औपचारात्कालवाची प्रत्ययः। तथाहि भाषितं सायणाचार्येण-

"न रात्र्या अह्नश्च प्रकेतः प्रज्ञानमासीत्, तद्धेतुभूतयोः सूर्याचन्द्रमसोरभावात्। एतेन अहोरात्रनिषेधेन तदात्मको मासर्तुसंवत्सरप्रभृतिकः सर्वः कालः प्रत्याख्यातः। कथं

---

[2] देवीगीता (१/४)।
[3] विवेकचूडामणिः (१०९)
[4] ऋग्वेदीयनासदीयसूक्तस्य सायणभाष्यम्
[5] तैत्तिरीयसंहिता (३/१/५/१)।
[6] ऋग्वेदः (१०/१२९/१)।

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

तर्हि नो सदासीत्तदानीमिति कालवाची प्रत्ययः, उपचारादिति ब्रूमः। यथेदानीन्तननिषेधस्य कालोऽवच्छेदकस्तथा मायापि तदवच्छेदहेतुः इत्यवच्छेदकत्वसाम्येनाकालेऽपि कालवाची प्रत्ययः”[7] इति।

अपि च प्रागुक्तलक्षणमायया सहैक्येन ब्रह्म एव असत्यपि प्राणवायौ प्राणितवत् रराज। “तस्मात् खलु पूर्वोक्तान्मायासहिताद्ब्रह्मणः अन्यत् किं च न किमपि वस्तु भूतभौतिकात्मकं जगन्नास”[8] इति।

इत्थं च इदानीं परिदृश्यमानस्य कार्यभूतस्य जगतः जन्म तर्हि कथमभवत् इति चेदत्राम्नातं-

“तम आसीत्तमसा गूढमग्रे
ऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत्
तपसस्तन्महिनाजायतैकम्”[9]।। इति।

तथाहि कारणावस्थायामपि जगन्नासीदिति चेन्न तत्तु तमसा अज्ञानेनावृतं सत् नीरक्षीर इव एकीभूय अवर्तत इति नामरूपाभ्यां तस्य प्रकाशो नाभूत्। उक्तं च मनुना-

“आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः”[10]।। इति।

“आच्छादकात्तस्मात्तमसो नामरूपाभ्यां यदाविर्भवनं तदेव तस्य जन्म इत्युच्यते” इति। एतेन कार्यमसत् कारणे इति असत्कार्यवादिनां नैयायिकप्रमुखानां मतमपास्तम्। सांख्याः पुनः अस्मिन् सत्कार्यवादे प्रमाणमुपस्थापयन्ति-

“असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्”[11]।। इति।

भगवता श्रीकृष्णेन च प्रतिपादितं गीतायां-

“नासतो विद्यते भावो नाभावो विद्यते सतः”[12] इति।

---

[7] ऋग्वेदीयनासदीयसूक्तस्य सायणभाष्यम्।
[8] ऋग्वेदीयनासदीयसूक्तस्य सायणभाष्यम्।
[9] ऋग्वेदः (१०/१२९/३)।
[10] मनुसंहिता (१/५)।
[11] सांख्यकारिका (९)।

एवं च जगत्कार्यस्य कारणभूतं यत्तस्य किं कारणमिति चेदत्रोच्यते-

"मूले मूलाभावादमूलं मूलम्"[13] इति।

जगति नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसम्बन्धात्। तदुक्तम-

"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।

आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्"[14]।। इति।

एवं च कारणीभूताज्ञानेन सहैक्येन विद्यमानस्य जगतः कथं नामरूपाभ्यां जन्म इति चेद् अत्र श्रूयते- "तपसस्तन्महिनाजायत"[15] इति। ननु परमेश्वरस्य संकल्पः किंहेतुक इत्यत्राम्नायते-

"कामस्तदग्रे समवर्तत"[16] इति।

ईश्वरस्य मनसि सिसृक्षाजायत। तथाहि श्रुतं तैत्तिरीयारण्यके-

"सोऽकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किञ्च"[17] इति। अपि च प्रतिपादितं छान्दोग्ये श्रुतौ- बहु स्यां प्रजायेय इति सिसृक्षा जाता। सिसृक्षावशाच्च स आत्मनः तेजो जलं पृथिवी चेति भूतत्रयाणां सृष्टिमकरोत्। किन्तु केवलं भूतत्रयस्य सृष्ट्या एव तस्य बहुभवनस्पृहा न सफलतां गता। ततः स त्रीणि भूतानि गुणप्रधानतया संमिश्रीकृत्य त्रिवृत्कृततेजोजलपृथिवीनां सृष्टिमकरोत् इति।

तत्र त्रिवृत्करणं तावत् त्रयाणां भूतानां प्रत्येकं द्विधा समं विभज्य प्रत्यर्द्धभागं पुनः द्विधा समं विभज्य इतरभूतद्वयोः प्रत्येकं एकचतुर्थांशेन सह अवशिष्टभूतस्यार्धभागस्य मेलनेनैव तेज आदीनि भूतानि त्रिवृदात्मकानि भवन्ति। यथा-

भूतं तेजः= १/२ तेजः+१/४ जलं +१/४पृथिवी = १स्थूलं तेजः

एवमेवान्यत्रापि। तदनन्तरं च स्वस्मिन् बीजरूपेऽवस्थितेऽनभिव्यक्तनामरूपे व्यक्ते चकार।

ननु ईश्वरस्येयं सिसृक्षा किंनिबन्धना ? सर्वप्राण्यन्तःकरणे समवेतं यत् पापपुण्यादिकं कर्म तदेव ईश्वरसिसृक्षामूलं तदेव च जगतः बीजम्। एवं तर्हि ईश्वरस्य

---

12 श्रीमद्भगवद्गीता (२/१६)।
13 सांख्यसूत्रम्।
14 दृग्दृश्यविवेकः (२०)।
15 ऋग्वेदः (१०/१२९/३)।
16 ऋग्वेदः (१०/१२९/४)।
17 तैत्तिरीयारण्यकम्।

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

सिसृक्षाया पराधीनत्वात् तस्य वेदान्तादिशास्त्रोक्तं सर्वज्ञत्वं सर्वनियन्तृत्वं च कथं संगच्छते इति चिन्त्यमेव।

ततश्च अविद्या-काम-कर्मभ्यः वियदादिभूतजातानि सृजतां रश्मी सूर्यरश्मिरिव निमेषमात्रेण चतुर्दिक्षु व्याप्नुवन् जगत् ससर्ज। तथाहि आम्नातं-

"तिरश्चीनो विततो रश्मिरेषा-
मधः स्विदासीदुपरि स्विदासीत्।
रेतोधा आसन्महिमान आसन्
त्स्वधा अवस्तात्प्रयतिः परस्तात्"[18]।। इति।

एवं तर्हि "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी" इति तैत्तिरीयारण्यकोक्तक्रमस्य का दशेति चेदत्रोच्यते सायणेन-

"एवं नाम शीघ्रं सर्वतो दिक्षु सर्गो निष्पन्न इत्यर्थः"[19] इति।

एवं मायासहितः परमेश्वरः सर्वं जगत् सृष्ट्वा स्वयं चानुप्रविश्य भोक्तृभोग्यादिरूपेण विभागं कृतवान्। तथाहि तैत्तिरीयारण्यकम्-

"तत्सृष्ट्वा तदेवानुप्राविशत्"[20] इति।

इत्थं चात्र ऋषिणा प्रजापतिना मन्त्रपञ्चकेन सृष्टिक्रमं व्याख्याय तस्य जगत्सर्जनस्य दुर्विज्ञेयत्वम् अज्ञेयत्वम् प्रतिपादितम् अन्तिममन्त्राभ्याम्।

।। पुरुषसूक्तम् ।।

ऋग्वेदस्य सृष्टितत्त्वविषयकसूक्तेषु दशममण्डलस्थं नवतितमम् इदं सूक्तम् प्रसिद्धतमम् अत्यन्तं तात्पर्यावहं च सर्वेषु एव वेदेषु प्रक्षिप्तं विभिन्नासु भाषासु च अनूदितम्। भागवतपुराणेऽपि अस्य सूक्तस्य सारांशः समुपलभ्यते। सूक्तस्यास्य ऋषिः नारायणः पुरुषश्च देवता।

सूक्तेऽस्मिन् परमात्मनः सकाशादेव अखिलप्रपञ्चस्यास्य सर्वेषां स्थावरजङ्गमात्मकानां च प्राणिनां सृष्टिरुदीरिता। तत्र अव्यक्तमहदादिविलक्षणः चेतनः पुरुषः। तथाहि प्रतिपादितं सांख्यकारिकायां-

"त्रिगुणमविवेकिविषयः सामान्यमचेतनम्प्रसवधर्मि।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्"[21]।। इति।

---

[18] ऋग्वेदः (१०/१२९/५)। तैत्तिरीयारण्यकम्।
[19] ऋग्वेदीयनासदीयसूक्तस्य सायणभाष्यम्।
[20] तैत्तिरीयारण्यकम्।
[21] सांख्यकारिका।

पुरि शेते इति पुरुषः। पुरश्च शरीराणि। पूर्यन्ते सप्त धातुभिः इति पुरः शरीराणि। श्वेताश्वेतरोपनिषद्याम्नातम्-

"एको देवः सर्वभूतेषु गूढः सर्वव्यापी भूतान्तरात्मा"[22] इति।

शतपथब्राह्मणे आम्नातम्-

"अथ ह यस्मात् पुरुषमेधो नामेमे वै लोकाः पूरयमेव पुरुषोऽयं पवते सोऽस्यां पुरि शेते तस्मात् पुरुषः। तस्य यदेष लोकेष्वन्नं तदस्यान्नं मेधस्तदस्यैतदन्नं मेधस्तस्मात् पुरुषमेधः"[23] इति।

स च आत्मा पुरुषः अणोरपि अणीयान् महतश्च महीयान्। तथाहि-

"अणोरणीयान् महतो महीयान् आत्मास्य जन्तोर्निहितो गुहायाम्" इति।

स च परमात्मा पुरुषः वाङ्मनसोः गोचरो न भवति। अत एव सदानन्दयोगीन्द्रेण स्वकीये वेदान्तसारग्रन्थे मङ्गलमाचरयता उक्तम्-

"अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्।

आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये"[24]।। इति।

अवाङ्मनसगोचरत्वेऽपि कथञ्चिद् वेदमन्त्रेण तस्य स्वरूपमुपलक्ष्यते-

"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।

स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्"[25]।। इति।

तथाहि भगवान् वेदपुरुष आह- स पुरुषः सहस्रशीर्षा। सहस्रशब्दश्चात्र उपलक्षणेनानन्तपर्यायवाची। अत एव स पुरुषः अनन्तैः शिरोभिः अनन्तैः अक्षिभिः पादैश्च युक्तः। स पुरुषः अखिलमिदं ब्रह्माण्डं ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्य अवस्थितः। स पुरुष एव प्रलयानन्तरं सर्वप्राणिनां कर्मफलभोगाय स्वीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात् यदिदं भूतं भव्यं वर्तमानं च तत्सर्वं पुरुष एवेति निश्चप्रचम्। आम्नातं च –

"पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्।

उतामृतत्वस्येशानो यदन्नेनातिरोहति"[26]।। इति।

---

[22] श्वेताश्वेतरोपनिषद्।
[23] शतपथब्राह्मणम् (१३/६/२/१)।
[24] वेदान्तसारः।
[25] ऋग्वेदः (१०/९०/१)।
[26] ऋग्वेदः (१०/९०/२)।

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

तत्र पुरुषस्य जगदवस्थाप्राप्तौ विविधदार्शनिकानां तत्त्वान्तरे मतिर्विलोक्यते। तथाहि- सांख्यनये इदं सृष्टितत्त्वं परिणामवादनाम्नाभिधीयते। "परिणामो नाम उपादानसमसत्ताककार्यापत्तिः" ।तथाहि तेषां नये पुरुषो यथा सत्यस्तथैव जगदपि सत्यम्। कारणावस्थायां पुरुषे तु जगत् उत्पत्तेः प्रागपि सदेव। अत एव ते सत्कार्यवादिन इति कथ्यन्ते। वेदान्तिनः पुनः अत्र प्रत्यवतिष्ठन्ते। तथाहि तेषां नये अज्ञानवशात् रज्जौ सर्पभ्रमवत् अत्रापि परमात्मनि पुरुषे जगतः प्रतीतिः भवति। दूरीभूते तस्मिन् कारणभूतेऽज्ञाने अखिलमिदं जगत्प्रपञ्चं विलीयते परमात्मस्वरूपमेव केवलमवभासते। तेषां नये ब्रह्मणः जगतः प्रतिभासः उत्पत्तिर्वा अध्यासवशादेव भवति। तैः स्वीकृतोऽयं वादो विवर्तवादनाम्ना अभिधीयते। "विवर्तो नाम उपादानविषमसत्ताककार्यापत्तिः"। उक्तं च वेदान्तसारे-

"अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः" इति।

पुरुषस्तु स्वस्य एकांशेनेदं जगत् ससर्ज दधार च । तथाहि गीतायां गीतम्-

"अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्"[27]।। इति।

इदमेव प्रपञ्च्यते पुरुषसूक्ते-

"तस्माद् विराडजायत विराजोऽधि पूरुषः।
स जातोऽत्यरिच्यत पश्चाद् भूमिमथो पुरः"[28]।। इति।

विविधानि वस्तूनि अत्र राजन्ते विराट् ब्रह्माण्डदेहः। तथाहि सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत्। तथाहि आम्नातं-

"तत्सृष्ट्वा तदेवानुप्राविशत्"[29] इति।

ततः स जातः विराट्पुरुषः देवतिर्यङ्मनुष्यादिरूपेण अतिरिक्तोऽभूत्, पश्चाच्च भूमिं तथा जीवानां शरीराणि ससर्ज। एवं च उत्तरसृष्टिसिद्ध्यर्थं सृष्टियज्ञः वक्ष्यते। भगवता उक्तं गीतायाम्-

"अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः"[30]।। इति।

---

[27] श्रीमद्भगवद्गीता (१०/४२)।
[28] ऋग्वेदः (१०/९०/५)।
[29] तैत्तिरीयोपनिषद्।

तदा तु बाह्यद्रव्यस्यानुत्पन्नत्वेन देवाः पुरुषमेव हविस्त्वेन संकल्प्य मानसं यज्ञं सम्पादितवन्तः। तस्मिन् मानसयज्ञे ते देवाः प्रथममुत्पन्नं विराडाख्यं पुरुषं पशुत्वभावनया यूपे प्रोक्षितवन्तः। तथाहि आम्नातं-

"तं यज्ञं बर्हिषि प्रौक्षन्पुरुषः जातमग्रतः।

तेन देवा अयजन्त साध्या ऋषयश्च ये"।। इति।

इत्थं च सम्पादितात् सर्वहुतः तस्माद् यज्ञात् दधिमिश्रमाज्यमुत्पन्नम्। अपि च तस्मात् वायव्य-वन्य-ग्राम्यपशवः उत्पन्नाः। तस्मादेव यज्ञात् वेदाः प्रादुर्बभूवुः।

इदानीं मनुष्याणां मध्ये ब्राह्मणादीनामुत्पत्तिः वर्ण्यते। अस्य विराट्पुरुषस्य मुखतः ब्राह्मणः बाहुभ्यां क्षत्रियः ऊरुभ्यां वैश्यः पद्भ्यांश्च शूद्रः अजायन्त। तथाहि आम्नातं-

"ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।

ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत"[31]।। इति।

अपि च तस्य यज्ञपुरुषस्य मनसः चन्द्रमाः जातः, चक्षुषः सूर्यः, मुखाद् इन्द्रश्च अग्निश्च, वायुश्च प्राणादजायत। एवं च पृथिव्यादयस्त्रयो लोका अपि तस्माज्जाताः। तथाहि आम्नातं-

"नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।

पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्"[32]।। इति।

अनेनैव प्रकारेण ऋग्वेदीयेऽस्मिन् सूक्ते एकस्मात् पुरुषादेवास्य जगत्प्रपञ्चस्य उत्पत्तिरुदीरिता।

।। हिरण्यगर्भसूक्तम् ।।

ऋग्वेदस्य दशममण्डलस्य एकविंशत्युत्तरशततमं सूक्तं हि हिरण्यगर्भसूक्तम्। दार्शनिकसूक्तेषु इदं प्राधान्यमर्हति। अत्र ऋषिः प्रजापतिः हिरण्यगर्भादेव समेषां सृष्टिरभवदिति प्रतिपादयति। अपि चात्र एकेश्वरवादस्यापि उद्घोषः दरीदृश्यते।

"सदेव सोम्य इदमग्र आसीत्। ...तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत"[33] इति।

नामरूपाभ्यां व्याकृतमिदं जगदादौ ब्रह्मात्मनैवासीत्। तस्य ब्रह्मण एव परिणामभूतमिदं जगत्। इदमेव स्मर्यते मनुस्मृतौ-

---

[30] श्रीमद्भगवद्गीता (३/१४)।
[31] ऋग्वेदः (१०/९०/१२)।
[32] ऋग्वेदः (१०/९०/१४)।
[33] छान्दोग्योपनिषद्।

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

"सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु बीजमवासृजत्।।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः"[34]।। इति।

परमेश्वरस्यानुग्रहेण सृष्टौ हैमाण्डे परमात्मा एव हिरण्यगर्भरूपेण प्रादुरभूत्। स एव सर्वलोकानां पितामहः जनक इति वोच्यते। अयं हिरण्यगर्भ एक एव भूतानां सृष्टेः प्राक् विद्यमान आसीत्। ननु कोऽसौ हिरण्यगर्भः? प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय इति तैत्तिरीयसंहिताबलात् हिरण्मयस्याण्डस्य गर्भभूतः प्रजापतिरेव हिरण्यगर्भ इत्याख्यायते। अथवा हिरण्मयोऽण्डो गर्भवद्यस्योदरे वर्तते सोऽसौ सूत्रात्मा हिरण्यगर्भ इत्युच्यते। तादृशः प्रजापतिर्हिरण्यगर्भः प्रपञ्चोत्पत्तेः प्राक् मायाध्यक्षात्परमात्मनः सकाशादजायत। तथाहि आम्नातं-

"हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम"[35]।। इति।

यद्यपि परमात्मैव हिरण्यगर्भस्तथापि तदुपाधिभूतानां वियदादीनां सूक्ष्मभूतानां ब्रह्मण उत्पत्तेस्तदुपहितोऽप्युत्पन्न इत्युच्यते।स हिरण्यगर्भः प्रजापतिरेव आत्मदा। यथा अग्नेः सकाशाद् विस्फुलिङ्गा जायन्ते तथैव तस्मात् परमात्मन आत्मानः जीवात्मान इति यावत् उत्पद्यन्ते। तथाहि-

"य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।
यस्य च्छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम"[36]।। इति।

स हिरण्यगर्भः प्राणतः प्रश्वसतः अक्षिपक्ष्मचलनं कुर्वतः जगत एक एव राजा अभूत्। इमे पर्वताः समुद्राः दिशश्च तन्महिम्ना एव विराजन्तेतराम्। तेनैव प्रजापतिना द्योः उग्रा बभूव, पृथिवी च दृढा अजायत, स्वश्च स्तम्भितमभवत्। अन्तरिक्षलोकेऽपि स एव जलस्य निर्माता। द्यावापृथिव्यौ हिरण्यगर्भादेव जनिं लेभाते। किञ्च तत्रैव हिरण्यगर्भे सूर्यः उदितः सन् प्रकाशते। तथाहि आम्नातं-

"यं क्रन्दसी अवसा तस्तभाने

---

[34] मनुसंहिता।
[35] ऋग्वेदः (१०/१२१/१)।
[36] ऋग्वेदः (१०/१२१/२)।

अभ्यैक्षेतां मनसा रेजमाने।
यत्राधि सूर उदितो विभाति
कस्मै देवाय हविषा विधेम”[37]।। इति।

“तद्वा इयम् आपः सलिलमासीत्”। जलेनैवेदं विश्वं व्याप्तमासीत्। तज्जलं सिसृक्षया गर्भं दधत् अग्निं जजान। तथाहि आम्नातम्-

“आपो ह यद्वृहतीर्विश्वमायन्
गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानां समवर्ततासुरेकः
कस्मै देवाय हविषा विधेम”[38]।। इति।

अत्र गर्भो नाम हिरण्मयाण्डस्य गर्भभूतः प्रजापतिः, अग्निश्च जगद्रूपार्थे लाक्षणिकः। अर्थात् सर्वव्यापिनी जलराशिः प्रजापतिं गर्भीकृत्य जगत्प्रपञ्चमिदमवासृजत। इत्थं च परमेश्वरः प्रजापतिर्हिरण्यगर्भः अपः सृष्ट्वा तासु स्वयं बीजरूपेण अनुप्रविश्य पृथिवीं ससर्ज। अत एव नामरूपाभ्यां व्याकृतस्य प्रकाशितस्यास्य चराचरस्य स परमेश्वर एव उपादानकारणं निमित्तकारणं च भवति। तथाहि उक्तं वेदान्तसारे-

“शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतया उपादानं च भवति”[39] इति।

उपसंहृतिः

एतेषां सूक्तत्रयाणां तात्पर्यालोचनेनैतत्तु स्पष्टमवगम्यते यद्वैदिककालेऽपि प्रपञ्चसृष्टिप्रक्रियाविषये तथा तत्कारणविषये ऋषीणां मध्येऽपि वैमत्यमवर्तत एव। अत एव परमेष्ठी ऋषिर्यदा सृष्टेः पूर्वं “नासीद्रजो नो व्योमा...अम्भः किमासीद्गहनं गभीरम्” इत्यादिना आकाशादीनां विद्यमानत्वे संशयं द्योतयित्वा कारणीभूताज्ञानात् परमेश्वरस्य सङ्कल्पवशात् जगतः सृष्टिं स्वदृष्टे नासदीयसूक्ते प्रतिपादयति तदैव ऋषिर्नारायणः पुरुषसूक्ते एकस्मात्परमात्मनः सकाशादेवाखिलप्रपञ्चस्य सृष्टिं प्रत्यक्षीकरोति। पुनः हिरण्यगर्भसूक्ते ऋषिणा प्रजापतिना हिरण्यगर्भादेव समेषां सृष्टिरुदीरिता। अत एवैकस्मिन्नेव सृष्टितत्त्वे सर्वे नैव प्रामाण्यं देधिरे। अत एव गवेषणा प्रचलिता। किञ्च तदानीं प्रचलितैषा गवेषणाधारा

---

[37] ऋग्वेदः (१०/१२१/६)।
[38] ऋग्वेदः (१०/१२१/७)।
[39] वेदान्तसारः।

CC BY

अद्यापि न समाप्तिं गता। अद्यापि दृश्यन्ते सृष्टितत्त्वविषये वैज्ञानिकानां नानाविधानि तत्त्वानि तेषु च परस्परं वैमत्यानि। अतः सनातनवैदिकयुगे ऋषिभिरारब्धैषा गवेषणाधारा चिराय प्रचलिष्यति यावन्न परां काष्ठां स्पृशतीति तु निश्चप्रचमिति शिवम्।

सहायकग्रन्थसूची

- Hazari, Umakanta. (2010) *Vaidika-Gaveṣaṇā*. Ed. Satyaranjan Bandyopadhyaya. Kolkata: Sadesha. Print.
- Īśvarakṛṣṇa. (1404 Bengali year) *Sānkhyakārikā.* Ed. Narayan-Chandra Goswami. Kolkata: Sanskrit Pustak Bhāndār. Print.
- (1966) *Ṛgveda-samitā (With the glossary of Mādhavīyavedārthprakāśa)Vol. IV.* Ed. Mokshamularabhatta. Baranasi: Choukhamba Sanskrit Sirij Office. Print.
- (2002) *Chāngyopaniṣad. Vol. I.* Ed. Durgacharan Sānkhyavedāntatīrtha. Kolkata: Deva Sahitya Kutir Privt. Limtd. Print.
- Biswas, Didhiti. (2013) *Vaidika Pāthasanchayan.* Kolkata: Paśambanga Rājya Pustak Pariṣad. Print.
- Bhattacharya, Bhabani. Taraknath. Adhikari. (2007) *Vaidika Sankalan.* Kolkata: Sanskrit Book Dipo. Print.
- Śankarācārya. (2016) *Vivekacūrāmani.* Ed. Swami Vedananda. Kolkata: Udbodhana Kāryalaya. Print.
- Sadānanda-Yogīndra. *Vedāntasāra.* Ed. Bipandbhanjan Pal. Kolakta: Sanskrit Pustak Bhāndār. Print.
- Chatterjee, Khitish Chandra. (1961) *Vedic selections (part 2),* Kolkata: University of Calcutta. Print.
- www.sanskritdocuments.org

Sankar Mondal

शङ्करमण्डलः

Ph.D. Scholar, Department of Sanskrit

Ramakrishna Mission Vidyamandira, Belur Math, Howrah, 711202

sankarmondal109@gmail.com

***

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

ऋङ्मन्त्रेषु जीवनमौल्याधानम्

- नवीनः भट्टः

सर्वेषां जनानां हितमेव काङ्क्षयन्, सर्वानपि जनान् सन्मार्गे प्रवर्तयन् दुष्टमार्गात् च निवर्तयन् अस्ति वेदः। स्तुतिरूपार्थवादवाक्यैः सत्कार्यं कर्तुं स्व आस्तिकान् जनान् चोदयति, तथा निन्दारूपार्थवादवाक्यैः दुष्टकार्यात् आस्तिकान् जनान् निवर्तयति । अतः विध्यर्थवाक्येन प्रवर्तको भवति, निषेधवाक्येन निवर्तकोऽपि भवति वेदः । अतः वेदस्य व्युत्पत्तिं विद्वांसः एवं दर्शितवन्तः :-“विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिः धर्मादिपुरुषार्थाः इति वेदाः” इति विद्-धातुनिष्पन्नत्वात् वेदस्य ज्ञानार्थत्वं, लाभार्थत्वं च दर्शितं ऋग्वेदप्रातिशख्ये । वेदभाष्यकारेण सायणाचार्येणापि अयमेवाभिप्रायः प्रकटितः स्वीयायाम् ऋग्वेदभाष्यभूमिकायाम् – ‘इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः’ इति । वेदस्य स्वरूपविचारे बहवः विचाराः प्रकटिताः विद्वद्भिः, सर्वप्रथमं बौधायन-आपस्तम्बप्रभृतिभिः सूत्रकारैः “मन्त्रब्राह्मणयोः वेदनामधेयम्” इति मन्त्रब्राह्मणात्मकं स्वरूपं वेदस्य इति निर्धारितम् ।

जनान् सन्मार्गे एव प्रवर्तयितुकामाः संस्कारावपनम् एव इच्छन्तः ऋषयः अनेकान् मन्त्रान् जीवनमौल्यपरान् दृष्टवन्तः । तत्र प्राधान्येन संवादसूक्तानि, अक्षसूक्तानि, मण्डूकसूक्तम्, विवाहसूक्तम् इत्यादीनि सन्ति । अत्र कांश्चन विचारान् वयं पश्यामः ।

अस्माकं जीवने दानम् अत्यन्तं प्रमुखं पात्रं वहति । उक्तं “त्रयोधर्मस्कन्धाः” इत्यत्र दानमपि अन्यतमम् । ऋङ्मन्त्रोक्तान् अंशान् पश्यामः – “उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सहते सूर्येण । हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोमप्रतिरन्त आयुः”[1] अर्थात् ये अश्व-हिरण्य-दक्षिणादानादि कर्म कुर्वन्ति ते अमृतत्वं प्राप्य उत्तमलोके विराजन्ते इति । अस्माकं परम्परायां प्राचीनकालादपि विद्वांसःधर्मान्तर्गतत्वेन दानं स्तुन्वन्ति स्म । ऋषयः वेदे दानमेवं स्तुन्वन्ति – दानमिति सर्वाणि भूतानि प्रशंसन्ति दानान्नाति दुश्चरं तस्माद्दाने रमन्ते ___दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्युपजीवन्ति दानेनारातीरपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति । एवं दानेन समाजः सुस्थितौ भवति, अस्मान् द्विषन्तः जनाः अपि मित्रा भवन्ति, दानेन कर्ता सद्गतिमपि प्राप्नोति इति ।

---

[1] ऋग् - १०/१०७/२

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

○ "य आध्राय चकमानाय पित्वः अन्नवान् सन् रफिताय उजजग्मुषे ।स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डितारं न विन्दते" ॥"स इद्भोजो यो गृहवे ददाति अन्नकामाय चरते कृशाय"।

○ मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्सतस्य । नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥

○ कृषन् इत्फालः अशितं कृणोति यन् अध्वानं अपवृङ्क्ते चरित्रैः । वदन् ब्रह्मा वदतः वनीयान् पृणन्नापिः अपृणन्तमभिष्यात् ॥

अत्र केचन मन्त्राः दानमेव मुख्यविषयत्वेन स्वीकृत्य तदन्तर्गतत्वेन अन्नस्य (कृषेः) प्रामुख्यं कथयन्ति, यथा अन्नवान्, अन्नकामाय चरते इत्यादिरूपेण अन्नवतः पुरुषान् श्लाघयन्, मोघमन्नं विन्दते, केवलाघो भवति केवलादी इत्यादिरूपेण यः पुरुषः विद्यमानमपि अन्येभ्यः न वितरति तं निन्दति श्रुतिः ।अत्र मन्त्रे कृषकस्यापि निर्देशं करोति श्रुतिः 'कृषन् इत्फालः अशितं कृणोति' इति, अर्थात् यः कृषकः सर्वदा कृषिकार्यं कुर्वन् इतरान् जनान् पालयति तं सर्वदा देवता अन्नवन्तं करोति इति ।

सूची पदानि (कूटशब्दाः)–

- वेदस्य संक्षिप्तपरिचयः
- दानस्तुतिः
- संस्काराधानम्
- समाजे सन्तुलितस्थितिपरिपालनम्

अस्मिन् प्रपञ्चे अत्यन्तप्राचीनतमः वाङ्मयः वेदः इति श्रूयते । ऋषयश्च अस्य द्रष्टारः न तु कर्तारः सन्ति । यतः वेदोऽयं अनादिः इति उच्यते । वेदस्य अनादित्वे ऋषीणां द्रष्टृत्वे च श्लोकोऽयं प्रमाणीभूतः वर्तते यत् –"युगान्तेन्तर्हितान् वेदान् सेतिहासान् महर्षयः । लेभिरे तपसा पूर्वं अनुज्ञाता स्वयम्भुवा"।[2] इति ।अस्य समस्तज्ञानाकराणां ग्रन्थानाम् आधारभूतत्वात् चराचरवस्तुहितार्थत्वाच्च भारतीयपरम्परायां प्रामाण्यं सर्वैःआस्तिकैः समानरूपेण अभ्युपगतं वर्तते । उक्तं च मनुना :- "वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनां आत्मनस्तुष्टिरेव च ॥[3]चातुर्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् । भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिद्ध्यति ॥[4] भगवता कृष्णद्वैपायनेनापि महाभारते भणितं –

---

[2] महाभारतम्

[3] मनु-२-६,६

[4] मनु-१२-९७

- अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥[5]

सर्वेषां जनानां हितमेव काङ्क्षयन्, सर्वानपि जनान् सन्मार्गे प्रवर्तयन् दुष्टमार्गात् च निवर्तयन् अस्ति वेदः। स्तुतिरूपार्थवादवाक्यैः सत्कार्यं कर्तुं स्व आस्तिकान् जनान् चोदयति, तथा निन्दारूपार्थवादवाक्यैः दुष्टकार्यात् आस्तिकान् जनान् निवर्तयति । अतः विध्यर्थवाक्येन प्रवर्तको भवति, निषेधवाक्येन निवर्तकोऽपि भवति वेदः । अतः वेदस्य व्युत्पत्तिं विद्वांसः एवं दर्शितवन्तः :-"विद्यन्ते ज्ञायन्ते लभ्यन्ते वा एभिः धर्मादिपुरुषार्थाः इति वेदाः" इति विद्-धातुनिष्पन्नत्वात् वेदस्य ज्ञानार्थत्वं, लाभार्थत्वं च दर्शितं ऋग्वेदप्रातिशख्ये। वेदभाष्यकारेण सायणाचार्येणापि अयमेवाभिप्रायः प्रकटितः स्वीयायाम् ऋग्वेदभाष्यभूमिकायाम् – 'इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः' इति । वेदस्य स्वरूपविचारे बहवः विचाराः प्रकटिताः विद्वद्भिः, सर्वप्रथमं बौधायन-आपस्तम्बप्रभृतिभिः सूत्रकारैः "मन्त्रब्राह्मणयोः वेदनामधेयम्" इति मन्त्रब्राह्मणात्मकं स्वरूपं वेदस्य इति निर्धारितम्।

जनान् सन्मार्गे एव प्रवर्तयितुकामाः संस्कारावपनम् एव इच्छन्तः ऋषयः अनेकान् मन्त्रान् जीवनमौल्यपरान् दृष्टवन्तः । तत्र प्राधान्येन संवादसूक्तानि, अक्षसूक्तानि, मण्डूकसूक्तम्, विवाहसूक्तम् इत्यादीनि सन्ति। अत्र कांश्चन विचारान् वयं पश्यामः।

अस्माकं जीवने दानम् अत्यन्तं प्रमुखं पात्रं वहति । उक्तं "त्रयोधर्मस्कन्धाः" इत्यत्र दानमपि अन्यतमम् । ऋङ्मन्त्रोक्तान् अंशान् पश्यामः – "उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सहते सूर्येण। हिरण्यदा अमृतत्त्वं भजन्ते वासोदाः सोमप्रतिरन्त आयुः"[6] अर्थात् ये अश्व-हिरण्य-दक्षिणादानादि कर्म कुर्वन्ति ते अमृतत्वं प्राप्य उत्तमलोके विराजन्ते इति।अस्माकं परम्परायां प्राचीनकालादपि विद्वांसःधर्मान्तर्गतत्वेन दानं स्तुन्वन्ति स्म। ऋषयः वेदे दानमेवं स्तुन्वन्ति – दानमिति सर्वाणि भूतानि प्रशंसन्ति दानान्नाति दुश्चरं तस्माद्दाने रमन्ते ___दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्युपजीवन्ति दानेनारातीरपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति। एवं दानेन समाजः सुस्थितौ भवति, अस्मान् द्विषन्तः जनाः अपि मित्रा भवन्ति, दानेन कर्ता सद्गतिमपि प्राप्नोति इति।

---

[5] महा.भा.शान्ति.२४४.५५

[6] ऋग् - १०/१०७/२

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

○ "य आध्राय चकमानाय पित्वः अन्नवान् सन् रफिताय उजजग्मुषे ।स्थिरं मनः कृणुते सेवते पुरोतो चित्स मर्डितारं न विन्दते" ॥"स इद्भोजो यो गृहवे ददाति अन्नकामाय चरते कृशाय"।

○ मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्सतस्य । नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥

○ कृषन् इत्फालः अशितं कृणोति यन् अध्वानं अपवृङ्क्ते चरित्रैः । वदन् ब्रह्मा वदतः वनीयान् पृणन्नापिः अपृणन्तमभिष्यात् ॥

अत्र केचन मन्त्राः दानमेव मुख्यविषयत्वेन स्वीकृत्य तदन्तर्गतत्वेन अन्नस्य (कृषेः) प्रामुख्यं कथयन्ति, यथा अन्नवान्, अन्नकामाय चरते इत्यादिरूपेण अन्नवतः पुरुषान् श्लाघयन्, मोघमन्नं विन्दते, केवलाघो भवति केवलादी इत्यादिरूपेण यः पुरुषः विद्यमानमपि अन्येभ्यः न वितरति तं निन्दति श्रुतिः । अत्र मन्त्रे कृषकस्यापि निर्देशं करोति श्रुतिः 'कृषन् इत्फालः अशितं कृणोति' इति, अर्थात् यः कृषकः सर्वदा कृषिकार्यं कुर्वन् इतरान् जनान् पालयति तं सर्वदा देवता अन्नवन्तं करोति इति । अन्नस्य प्राशस्त्यम् अन्यत्र एवं कथयन्ति– अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्चित् पृथिवीं श्रिताः। अथो अन्नेनैव जीवन्ति।..... अन्नं हि भूतानां ज्यैष्ठ्यं । "अन्नं न निन्द्यात् । तद्वृतम् । प्राणो हि अन्नम्। .... अन्नवानन्नादो भवति । महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या" । श्रुतिः एवमनेकैः मन्त्रपूगैः मानवजीवने अन्नस्य, अन्नादस्य, दानस्य च माहात्म्यं वर्णयति । अनेन दानेन समाजे सन्तुलिता स्थितिः भवति तेन समाजः वर्धते ।

ऋषयः स्वजीवनम् आदर्शजीवनं कृत्वा मन्त्रैः देवतास्तवनपूर्वकं मानवेभ्यः उपदिशन्ति यत् सर्वेऽपि स्वजीवने निद्रालस्या-कृपणता-निन्दादीन् दुर्गुणान् दूरीकृत्य लौकिकजीवनस्य शुद्ध्यर्थं, परिपूर्णार्थं, विकासार्थं प्रत्येकं व्यक्तेः समाजस्य च कल्याणमेव कुर्युः इति । समाजस्य च उन्नतिः जीवनस्य उदात्तमौल्येभ्यः सत्य-धर्म-दान-अद्रोह-अहिंसादिभ्यः भवति । ये मानवाः एतत् विरुध्य समाजघातकाः भवन्ति तेभ्यः देवाः शिक्षाप्रदातारः भवन्ति । यथा – 'पापासः सन्तो अनृता असत्या इदं पदमजानता गभीरम्'[7], 'यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानाम्'[8] इत्यादयः ।अस्माकं शरीरं समाजकल्याणर्थं सदृढं भवतु 'बलं धेहि तनूषु नो'[9] इति । मानवीय-मनस्सु द्वेष-कार्पण्य-अविवेक-दौर्बल्यम्- आधयादयः

---

[7] ऋग् -४/५/५

[8] ऋग् - ७/४९/३

[9] ऋग् - ३/५३/१८

सामान्याः भवन्ति तादृशाः मनसः दूरीभूत्वा मनः सन्मार्गे प्रवर्तताम् उक्तम् –'विषुद्वेषो व्यंहंतीम्', 'अपामीवामपसिध्रमपसेधत दुर्मतिम्' , 'मा नो निद्रा ईशत मोत जल्पिः', 'भद्रं नो अपिवातय मनः' इत्यादयः मन्त्राः मनुष्यं दुर्मार्गात् निवर्तयन् सन्मार्गे च प्रवर्तयति ।

कृष्-धातुना व्युत्पन्नोऽयं कृषिशब्दः विलेखने, व्याकर्षणे इत्यस्मिन् अर्थे रूढः अस्ति । अस्य कृषेः प्रामुख्यं वर्णितमस्ति, अर्थात् यदा मनुष्यः सत्कार्यं सन्मार्गं च त्यक्त्वा दुष्टकार्येषु प्रवर्तते तेन च मानहानिः, धनहानिः, स्वयं समाजस्य स्वास्थ्यहानिः सम्भवति । अनेन दुष्टकार्येण सम्भाव्यमानान् दुष्परिमाणान् वर्णयन् सामाजिकस्वास्थ्यं परिपालयति श्रुतिः । यथा

- प्रावेपा मा बृहतो मादयन्ति .... विभीदको जागृवीर्मह्यमच्छान् ॥
- द्वेष्टि श्वश्रूरप जाया रुणद्धि .... नाहं विन्दामि कितवस्य भोगम् ॥
- नीचा वर्तन्त उपरि स्फुरन्ति ...... शीताः सन्तो हृदयं निर्दहन्ति ॥

यथा अत्र पूर्वोक्तम् वेदा न केवलं कर्मसु चोदयन्ति किन्तु कस्माच्चित्कर्मणः निवर्तयन्त्यपि । तादृशस्य दृष्टान्तः अत्र प्रदत्तः वर्तते । सामान्येन मानवाः दुष्टकर्मसु बहुवेगेन आकृष्टाः भवन्ति, यदा आकृष्यते तत् कर्म तदर्थं यत्किञ्चिदपि दातुं, यादृशमपि नीचकर्मकर्तुमपि च ते न लज्जाम् अनुभवन्ति, तस्माद् विरक्तुं न इच्छन्ति, इष्टं चेदपि तेषां तद् बहुकष्टसाध्यम् इति अत्र अत्यन्तं मार्मिकरूपेण वर्णितम् ॥

- अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहुमन्यमानः ।
  तत्र गावः कितव तत्र जाया तन्मे विचष्टे सवितायमर्यः ॥

वेदः न केवलं निन्दावचनैः असाधुकर्मणः जनान् निवर्तयति किन्तु तस्मात् कथं निवर्तनीयम् | उपरमणादूर्ध्वं किं कर्तव्यम् इति तस्मै दिग्दर्शनम् अपि करोति । अत्रास्ति कश्चन मन्त्रः "अक्षैः मा दीव्यः कृषिमत् कृषस्व" इति । उपर्युक्तप्रकारेण यदा कश्चन पुरुषः एदादृशे कर्मणि आसक्तो भवति यद्यपि तस्माद् उपरमणं दुःशकं तथापि स्वकीयधर्मान् ज्ञापयति श्रुतिः कृषिमत् कृषस्व इति । कृषिकार्यमपि धर्मकार्यमेव यतः अत्रैकां उक्तिं ज्ञापयति ' सर्वारम्भाः तण्डुलप्रस्थमूलाः' इति । अतः अत्र कृषेः प्रामुख्यं द्योतयन् तद्दिशि प्रवृत्तान् मानवान् स्व वचनैः प्रेरयति उत्तेजयति च श्रुतिः । कृषिकार्यं कृत्वा तेन सम्पादितैः धनैः सन्तोषम् अनुभवत न तु द्यूतक्रीडया । कृषिकार्येण एव स्वपत्निपुत्रान्, पशून्, गृहम् च पालयत । अनेनैव कर्मणा सर्वप्रेरकः ईश्वरः सन्तुष्टो भूत्वा जीवने आनन्दं प्रयच्छति । "संगच्छध्वं संवदध्वं सं वो मनांसि

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

जानतम् । देवभागं यथा पूर्वे संजानाना उपासते" – अनेन मन्त्रेण ज्ञायते यत् अस्मिन् समाजे सर्वेऽपि जनाः एकमनस्काः भूत्वा परस्परं सहकारभावेन सर्वेषां हितमेव इच्छेयुः इति ।

ग्रन्थसूची

१) सायणमाधवः, सर्वदर्शनसङ्ग्रहः, भाण्डारकर् प्राच्यविद्यासंशोधन मन्दिरम्, पुण्यपत्तनम्, १९७८.

२) शास्त्री आचार्यजगदीशः, ब्रह्मसूत्रशङ्करभाष्यम्, मोतीलाल बनारसीदास्, वाराणासी २००५.

३) शास्त्री कपालिः, collected works of T.V Kapali Shastri, दीप्तिप्रकाशनालयः,पुद्दुच्चेरि,१९८८

४) उपाद्यायः बलदेवः, संस्कृतवाङ्मय का इतिहास, उत्तरप्रदेह्श संस्कृत संस्थानम्, लखनौ २००६.

५) सायाणाचार्यः, ऋग्वेदभाष्यभूमिका, चौखाम्बा कृष्णदास् अकाडेमी,वाराणासी,२००५

६) भर्तृहरी, वाक्यपदीयम्, मोतीलाल बनारसी दास् वाराणासी, १९७१

७) मनुः, मनुस्मृतिः, Pt,dav Lahore, लाहोर, १९१३

८) सायणाचार्यः, ऋग्वेदसंहिता, वैदिकसंशोधनमण्डलम्, पुणे १९९५

नवीनः भट्टः

Dr. NAVEEN BHAT

Assistant Professor

Department of Samskruta

Dayananda Sagar Degree College

nabharigvedi@gmail.com

***

कवि विभाग निरूपण

- सोनाली बाजपेई

[शोधसार- कवि विभाग का मुख्य आशय गुणों के आधार पर कवियों का प्रकार बताना है।कवित्व आत्मा का संस्कार है जिस प्रकार आत्मा एक साथ अनेक गुणों को धारण कर सकती है उसी प्रकार एक कवि,काव्य की अनेक विधाओं में रचना कर कविवैविध्य के दर्शन करा सकता है। यह कवि विभाग आचार्य राजशेखर कृत काव्यमीमांसा मे विस्तृत रूप से बताया गया है।]

काव्य के हेतुविषयक विचारणा में संस्कृत विद्वानो में पर्याप्त मतभेद रहा है परन्तु ये हेतुविषयक तत्व तीन ही रहे है - शक्ति, अभ्यास एवं व्युत्पत्ति।इन्ही में से कोई विद्वान शक्ति को श्रेष्ठ बताता है और कोई व्युत्पत्ति को। आचार्य मम्मट ने दण्डचक्रचीवरन्याय से इन तीनों को एक ही हेतु बताया है-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥[i]

इसी प्रकार पण्डितराज जगन्नाथ ने रसगंगाधर में कविता का हेतु प्रतिभा को बताया है तथा अभ्यास व व्युत्पत्ति को प्रतिभा का हेतु बताया है-

तस्य च कारणं कविगता केवला प्रतिभा। तस्याश्च हेतुक्वचिद् : देवतामहापुरुषप्रसादादिजन्यमदृष्टम्, क्वचिच्च विलक्षणव्युत्पत्ति*काव्यकरणाभ्यासौ*।[ii]

यह प्रतिभा क्या है? शब्दसमूह,अर्थसमूह,अलंकारशास्त्र,उक्तिमार्ग आदि काव्य तत्वों को हृदय में जो प्रतिभासित करे उस नवोन्मेषशालिनी बुद्धि को प्रतिभा कहा गया है।

प्रतिभाशाली व्यक्ति को परोक्ष पदार्थ भी प्रत्यक्ष हो जाते है इसलिये महाकवि अन्य लोको का चित्रण भी ऐसे प्रस्तुत करते है जैसे वह लोक उनके प्रत्यक्ष विद्यमान हो, जैसे महाकवि कालिदास ने अलकापुरी का वर्णन मेघदूत में जीवन्त रूप में किया है-

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।
अन्तस्तोयं मणिमयभुवस्तुङ्.गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषः॥[iii]

इस प्रतिभा को आचार्य राजशेखर ने दो प्रकार का बताया है-

1-कारयित्री प्रतिभा 2-भावयित्री प्रतिभा

यह कारयित्री प्रतिभा ही कवि की उपकारक होती,यह तीन प्रकार की होती है-

1-सहजा 2-आहार्या 3-औपदेशिकी

सहजा प्रतिभा जन्मान्तर संस्कार से उत्पन्न होती है यह पूर्वजन्म में किये गये कर्मों का फल होती है,इसके विपरीत आहार्या वर्तमान जन्म के संस्कारों से उत्पन्न होती है इसको अभ्यास भी कहा जा सकता है ,तीसरी औपदेशिकी प्रतिभा तन्त्र,मन्त्र,आदि के उपदेश से प्राप्त होती है।

सा च द्विधा कारयित्री भावयित्री च। कवेरूपकुर्वाणा कारयित्री। साऽपि त्रिविधा सहजाऽऽहार्यौपदेशिकी च। जन्मान्तरसंस्कारापेक्षिणी सहजा। इह जन्मान्तरसंस्कारापेक्षिणी सहजा।इह जन्मसंस्कारयोर्निराहार्या। मन्त्रतन्त्राद्युपदेशप्रभवा औपदेशिकी। ऐहिकेन कियतापि संस्कारेण प्रथमा तां सहजेति व्यपदिशन्ति। महता पुनराहार्या।औपदेशिक्याः पुनरैहिक एव उपदेशकालः,ऐहिक एव संस्कारकालः।[iv]

इन्ही तीन प्रकार की कारयित्री प्रतिभाओं के आधार पर कवि को भी तीन प्रकार का कहा गया है यह कवि सहजा,आहार्या,औपदेशिकी प्रतिभाओं से युक्त होते हैं-

1-सारस्वत कवि-जन्मान्तरसंस्कारप्रवृत्तसरस्वतीको बुद्धीमानसारस्वतः।
2-आभ्यासिक कवि-इह जन्माभ्यासोद्भासितभारतीक आहार्यबुद्धीराभ्यासिकः।
3-औपदेशिक कवि-उपदेशितदर्शितवाग्विभवा दुर्बुद्धिरौपदेशिकः।

सारस्वत कवि को तीनों में श्रेष्ठ माना गया है यह सहजा प्रतिभा से युक्त होता है:-

सारस्वतः स्वतन्त्र स्याद्भवेदाभ्यासिको मितः।
औपदेशिकविस्त्वत्र वल्गु फल्गु च जल्पति॥[v]

"सारस्वत कवि स्वतन्त्र होता है, आभ्यासिक सीमित किन्तु औपदेशिक सुन्दर तथा सारहीन कहता है।"

सहजा प्रतिभा से युक्त होने के कारण सारस्वत कवि की रचना स्वव्युत्पत्ति युक्त होती है, आभ्यासिक सीमित होता है क्योंकि आभ्यासिक कवि अभ्यास के द्वारा ही सीखता है उसके अन्दर नये शब्दो की व्युत्पत्ति विरल ही होती है अतः उसकी रचना भी अनन्त ना होकर सीमित हो जाती है इसी प्रकार औपदेशिक कवि दूसरो के उपदेश से प्रभावित हो अपनी रचना करता है वह स्वबुद्धि से काव्य रचना में अक्षम रहता है इसलिये औपदेशिक कवि को दुर्बुद्धि भी कहा गया है।

सारस्वत कवि का उल्लेख आचार्य राजशेखर ने काव्यमीमांसा में भी किया है जब महामुनि वाल्मीकि ने शोक सन्तप्त हो निषाद को प्रस्तुत श्लोक द्वारा श्राप दिया था-

मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधी काममोहितम्॥[vi]

तब देवी सरस्वती ने इस श्लोक को वरदान दिया कि, जो व्यक्ति अन्य वस्तु न पढकर इस श्लोक को पहले पढेगा वह सारस्वत कवि होगा-

ततो दिव्यदृष्टिर्देवी तस्मा अपि श्लोकाय वरमदात्, यदुतान्यदनधीयानो यः प्रथममेनमध्येष्यते स सारस्वतः कविः संपत्स्यत इति।[vii]

इसी प्रकार सारस्वत कवि का वर्णन महाकवि बाण ने हर्षचरितम् के प्रथम उच्छवास में अपनी वंश बेला का वर्णन करते हुए किया है, ऋषि दुर्वासा के श्राप से देवी सरस्वती मृत्युलोक में आकर महामुनि दधिची के साथ विवाह करती हैं जिससे उन्हें सारस्वत नामक पुत्र की प्राप्ति होती है।

कारयित्री प्रतिभा के बाद भावयित्री प्रतिभा का उल्लेख प्राप्त होता है भावयित्री प्रतिभा से युक्त कवि भावक कवि कहलाता है, भावक कवि,कवि के परिश्रम तथा अभिप्राय का मूल्याङ्कन करता है उसी के आश्रय से कवि का काव्य- व्यापार-रूपी वृक्ष फलता है,इसके बिना काव्य वृक्ष वन्ध्य हो जाता है,भावक कवि ही आलोचक होता है,अतः कवित्व से भावकत्व भिन्न होता है जिसका उल्लेख कालिदास नामक आचार्य ने किया है-

पृथगेव हि कवित्वाद्भावकत्वं,भावकत्वाच्च कवित्वम्।स्वरूपभेदाद्विषयभेदाच्च।

कल्याणी ते मतिरूभयथा विस्मयं नस्तनोति

नह्येकस्मिन्नतिशयवतां सन्निपातो गुणाना-
मेकः सूते कनकमुपलस्तत्परीक्षाक्षमोऽन्यः॥[viii]

भावक कवि के अलग-अलग विद्वानों ने अलग-अलग भेद बताये हैं मङ्गल नामक आचार्य ने इसे दो प्रकार का बताया है-आरोचकी,सतृणाभ्यवहारी।यायावरीय राजशेखर ने इसमें मत्सरी तथा तत्वाभिनिवेशी को जोड़कर चार प्रकार का बताया है।भावक कवि का महत्व कवि के स्वामी,मित्र,मंत्री,शिष्य के रूप में बताया गया है-

स्वामी मित्रं च मन्त्री च शिष्यश्चाचार्य एव च।
कवेर्भवति ही चित्रं किं हि तद्यत्र भावकः।।[ix]

कवि के पुनः तीन भेद बताये गये-

1-शास्त्रकवि 2-काव्यकवि 3- उभय कवि।

प्रतिभाव्युत्पत्तिमांश्च कविः कविरित्युच्यते।स च त्रिधा। शास्त्रकविः काव्यकविरुभयकविश्च। यच्छास्त्रकविःकाव्ये रससम्पदं विच्छिन्नत्ति।यत्काव्यकविःशास्त्रे तर्ककर्कशमप्यर्थमुक्तिवैचित्र्येण श्लथयति। उभयकविस्तूभयोरपि वरीयान्यद्युभयत्र परं प्रवीण स्यात्।[x]

वर्ण्यविषय के आधार पर विद्वानों ने शास्त्रकवि,काव्यकवि व उभय कवि को उत्तरोत्तर श्रेष्ठ बताया है परन्तु जिस प्रकार राजहंस चन्द्रिका का पान नही कर सकता उसी प्रकार चकोर पानी से दूध अलग नही कर सकता है इसलिये अपने-अपने विषय में सभी श्रेष्ठ होते हैं।

शास्त्रकवि तथा काव्यकवि में उपकार्य उपकारक भाव माना जाता है क्योंकि शास्त्र काव्य को निर्देशित करता है तथा शास्त्र से निर्देशित कवि अधिक उत्कृष्ट काव्य की रचना करता है

परन्तु केवल शास्त्र संलग्नता रसयुक्त काव्य को भी नीरस बना देता है इसीलिये शास्त्र के लिये काव्य व काव्य के लिये शास्त्र उपकारक होता है।

यह शास्त्र कवि तीन प्रकार का होता है-

"तत्र त्रिधा शास्त्रकविः। यः शास्त्रं विधत्ते, यश्च शास्त्रे काव्यं संविधत्ते योऽपि काव्ये शास्त्रार्थं निधत्ते।"

अर्थात् जो शास्त्र का निर्माण करता है, जो शास्त्र में काव्य को निविष्ट करता है और वह जो काव्य में शास्त्र का सन्निवेश करता है।

पुनः काव्यकवि का विभाग आठ प्रकार से किया गया है;-

1-रचना कवि 2-शब्द कवि 3-अर्थ कवि 4-अलंकार कवि 5-उक्ति कवि 6-रस कवि 7-मार्ग कवि 8-शास्त्रार्थ कवि |

रचना कवि वह होता है जिसके काव्य में अर्थ गाम्भीर्य तो अधिक पुष्ट नही होता परन्तु काव्य का स्वरूप रोचक विधि से प्रस्तुत किया गया होता है, अन्य शब्दों में शब्दचित्र काव्य को रचना काव्य कहा जा सकता है जिसे ही काव्यशास्त्र में अधम काव्य की संज्ञा दी गई है अधम काव्य का लक्षण भी रचना कवि के काव्य के लक्षण के समकक्ष प्राप्त होता है:-

यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं,तदधमं चतुर्थम्।[xi]

इसके उदाहरण में रचना कवि का उदाहरण भी प्राप्त हो रहा है-

मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे
गोत्रारिगोत्रजत्राय,गोत्रात्रे ते नमो नमः॥[xii]

रचना कवि के काव्य के अन्तर्गत ही एकाक्षरपद्य,पद्मबन्ध आदि काव्य भी आते है।

शब्द कवि को तीन भागो में विभाजित किया गया है-

1-नाम कवि 2-आख्यात कवि 3-उभय कवि।

नाम कवि के काव्य में संज्ञापद की प्रधानता पायी जाती है-

मणि: शाणोल्लीढः समरविजयी हेतनिहतो
मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः।
कलाशेषश्चन्द्रः सुरतमृदिता बालललना
स्तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः॥[xiii]

आख्यात कवि के काव्य में क्रियापद की अधिकता तथा संज्ञा पदों की न्यूनता पायी जाती है-

एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोगौरवम्।
दंपत्योः शनकैरपाङ्गबलनान्मिश्रीवचक्षषो

र्भग्नो मानकलिः सहासरभसव्यासक्तकण्ठग्रहः॥[xiv]

तीसरे प्रकार के शब्दकवि का नाम नामाख्यात कवि है,इस प्रकार के कवि के काव्य में नामपद और क्रियापद दोनो समान अवस्था में पाये जाते हैं, ना क्रियापद की अधिकता पायी जाती है और ना ही नामपद की-

हतत्विषोऽन्धाः शिथिलांसबाहवः स्त्रियो विषादेन विचेतना इव।
न चक्रुशुर्नो रुरुदुर्नसस्वनुर्न चेलुरासुर्लिखिता इव क्षणम्॥[xv]

यहाँ पर पूर्वार्ध में नामपदों की व उत्तरार्ध में आख्यात पदों की अधिकता पायी गई है।

इसके पश्चात् अर्थकवि का विवेचन प्राप्त होता है अर्थकवि के काव्य में शब्द रचना की अपेक्षा अर्थ अधिक प्रभावशाली रहता है।अर्थकवि के अन्तर्गत उत्तम व मध्यम काव्य की गणना की जा सकती है क्योंकि इन दोनो काव्यों में शब्द की अपेक्षा उसके पीछे छिपे गूढ अर्थ की प्रधानता रहती है-

महामहानीलशिलारुचः पुरो,निषेदिवान कंसकृषः स विष्टरे
श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच्चन्द्रमसोऽभिरामताम्॥[xvi]

यहाँ कवि की शब्दरचना से अधिक अर्थरचना दर्शनीय है।

अर्थकवि के पश्चात् अलङ्कारकवि का विवेचन प्राप्त होता है शब्दालङ्कार व अर्थालङ्कार के भेद से यह कवि भी दो प्रकार का होता है।शब्दालङ्कार कवि के अन्तर्गत वह कवि आते जो शब्दालङ्कार का प्रयोग प्रचुर मात्रा में करते हैं-

द्विषां विघाताय विधातुमिच्छतो रहस्यनुग्यामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥[xvii]

यहाँ शब्दालङ्कार मे गणित अनुप्रास अलङ्कार की अनुपम छटा दर्शनीय है।
इसी प्रकार अर्थालङ्कार का प्रयोग जो कवि अधिकता में करते है वह अर्थालङ्कारिक कवि कहे जाते है-

म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि॥[xviii]

यहाँ पर कवि ने रूपक अलङ्कार का अद्भुत् प्रयोग किया है जो कि अर्थालङ्कार में गणित है।

उक्तिकवि के उल्लेख से पहले उक्ति क्या है यह जानना चाहिये-"उक्तिर्नाम यदि स्वार्थो भङ्ग्या भव्योऽभिधीयते।" अर्थात् किसी विचार को सुन्दर रीति से प्रस्तुत करना उक्ति है। उक्तिकवि का आशय है जो काव्य की रचना में उक्ति वैचित्र्य का प्रयोग करे,काव्य विषय का सूक्ष्मता के साथ रोचक वर्णन करे:-

CC BY

प्रतीच्छत्याशोकीं किसलयपरावृत्तिमधरः
कपोलः पाण्डुत्वादवतरति ताडीपरिणतिम्
परिम्लानप्रायामनुवदति दृष्टीः कमलिनी
मितीयं माधुर्य स्पृशति च तनुत्वं च भजते॥xix

यहाँ नायिका के नख-शिख का वर्णन प्राकृतिक सौन्दर्य से समानता दिखाकर किया गया है।

तत्पश्चात् रसकवि का उल्लेख प्राप्त होता है।रस काव्य की आत्मा है,काव्यरचना का मुख्य उद्देश्य रसस्वादन ही होता है आचार्य विश्वनाथ ने रस को काव्यलक्षण में केवल स्थान ही नहीं दिया अपितु सम्पूर्ण काव्य की आत्मा ही रस को बताया है-

वाक्यं रसात्मकं काव्यं।xx

ऐसी कोई भी रचना जो रसात्मक ना हो काव्य नही कही जा सकती है।आचार्य राजशेखर ने काव्यमीमांसा के तृतीय अध्याय काव्यपुरुषोत्पत्ति में काव्य पुरुष के अंगो का वर्णन करते हुए आत्मा कि संज्ञा रस को दी है तथा रसयुक्त काव्य की रचना करने वाले कवि को रसकवि कहा है-

करकमलवितीर्णैरम्बनीवारशष्पै
द्रव इव हृदयस्य प्रस्त्रवोद्धेद्योग्यः॥xxi

यहाँ उत्तररामचरितम् का उदाहरण प्राप्त होता है जो करुण रस का प्रतिष्ठित ग्रन्थ है।

अब मार्ग कवि का उल्लेख प्राप्त होता है। मार्ग अर्थात् रीति। आचार्य वामन के मत में रीतियाँ तीन प्रकार की हैं- वैदर्भी, गौडी, पाञ्चाली। इन्ही वैदर्भी आदि रीतियों को आचार्य उद्भट् ने क्रमश: उपनागरिका, परुषा, कोमला(ग्राम्या)वृत्ति कहा है।आचार्य वामन ने रीति को काव्य की आत्मा कहा है-"रीतिरात्मा काव्यस्य" तथा अपने ग्रन्थ काव्यालंकारसूत्रवृत्ति में रीति सम्प्रदाय की स्थापना की है। इस रीति के द्वारा काव्य की रचना करने वाले कवि को मार्गकवि कहते है,यथा-

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥xxii

शास्त्रार्थ कवि अपने काव्य में अन्य शास्त्रों का दृष्टान्त प्रस्तुत करता है जैसे किसी नाटक में योगदर्शन,न्याय दर्शन आदि विषयक तथ्यों को कहना-

"आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोद्रेकाद्विघटिततमोग्रन्थय: सत्वनिष्ठा:।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्ता-
त्तं मोहान्धः कथमयममुं वेत्ति देवं पुराणम् ॥xxiii

प्रस्तुत उदाहरण वेणीसंहार नाटक से उद्धृत है,परन्तु यहाँ ‘आत्माराम’,‘निर्विकल्पक समाधि’ जैसे शब्दों का प्रयोग हुआ है जो योगदर्शन से सम्बन्धित है।

इन समस्त कवियों में जो उपर्युक्त दो या तीन गुणों वाला है वह अवर कोटि का जिसमें पांच गुण हो वह मध्यम कोटि का व जिसमें समस्त गुण विद्यमान हो वह उत्तम कोटि का महाकवि कहा गया है।

कवि की अवस्था के आधार पर भी कवि दस प्रकार के बताये गये है,एक कवि अपने सम्पूर्ण जीवन में इन दस अवस्थाओं को प्राप्त कर सकता है जिसमें सारस्वत तथा आहार्य बुद्धि कवि की सात अवस्थाएं व औपदेशिक की तीन अवस्थाएं बतायी गयी है-
काव्यविद्यास्नातक, हृदयकवि, अन्यापदेशी, सेविता, घटमान, महाकवि, कविराज, आवेशिक, अविच्छेदी, संक्रामयिता।

इसमें काव्यविद्यास्नातक वह कवि है जो काव्यरचना की इच्छा करता हुआ अभ्यास हेतु गुरुकुल में विद्या, उपविद्याओं का अध्ययन करता है। हृदयकवि अपनी कविता को स्वयं तक रखता है अर्थात् वह दूसरों के सामने अपना काव्य नही रख पाता।अन्यापदेशी अपनी रचना के गुण, दोषो से भयभीत होकर उसे किसी अन्य द्वारा रचित बताकर प्रस्तुत करता है।सेविता कवि किसी श्रेष्ठ महाकवि की छाया में रहकर काव्य की रचना करता है,वह महाकवि की सेवा कर कवित्व रूपी फल प्राप्त करता है परन्तु वह काव्य को प्रबन्ध रूप में निबद्ध नही कर पाता है।जो श्रेष्ठ रचना करके प्रबन्धित भी करे वह महाकवि कहलाता है।जो कवि विभिन्न भाषाओं विद्याओं तथा विभिन्न रसों का निरूपण काव्य रचना में करने में प्रवीण हो उसे कविराज कहा जाता है ऐसे कवि संसार में कम पाये जाते है। जो कवि तन्त्र मन्त्रादि की सिद्धि प्राप्तकर आवेश में आकर काव्य निर्माण करे वह आवेशिक कवि कहलाता है,जो कवि इच्छा होने पर ही निरवच्छिन्न कविता करे वह अविच्छेदी कवि कहलाता है तथा मंत्र-सिद्ध जो कवि कन्याओं तथा कुमारों में सरस्वती का संचार कर देता है उसे संक्रामयिता कहते है।

पुन: कवि को चार भागो में विभाजित किया गया है- असूर्यम्पश्य, निषण्ण, दत्तावसर, प्रायोजनिक।

असूर्यम्पश्य कवि गुफा या भूमि में निश्चल वृत्ति वाला होकर काव्य करता है अर्थात् वह एक अपने काव्य में ही दत्तचित्त रहता है तथा जो व्यक्ति काव्य रचना कि प्रबल इच्छा होने पर ही काव्य करे वह अभिनिषण्ण कवि कहलाता है। अविच्छेदी कवि तथा अभिनिषण्ण कवि में यह अन्तर है कि अविच्छेदी कवि इच्छा होने पर सम्पूर्ण काव्य की रचना एकबार में ही करता है यथा नलचम्पूकार त्रिविक्रमभट्ट के बारे में किंवदन्ति प्रचलित है तथा अभिनिषण्ण कवि इच्छा होने पर कभी भी काव्यरचना कर सकता है। दत्तावसर कवि सेवादि कार्यों को करता हुआ काव्यरचना करता है दत्तावसर के लिये दिन का कुछ ही समय काव्य रचना के लिये प्राप्त होता है यह जब-जब अपनें कार्यों से अवकाश पाता है तभी काव्य

CC BY

रचना करता है वर्तमान परिवेश में दत्तावसर कवि ही अधिक प्राप्त होते है। प्रायोजनिक कवि प्रासङ्गिक विषय को उद्दिष्ट कर काव्य रचना करता है, यह काव्य किसी एक विषय पर ही आधारित रहता है।

यह कवि विभाग स्त्री व पुरुष दोनो का माना गया है क्योंकि आत्मा में संस्कार तो दोनो के ही समान रहते हैं अत: यह स्त्री पुरुष के भेद की अपेक्षा नही रखता है।कवि विभाग गुणों पर आधारित होता है कोई भी कवि इन गुणों को धारण कर उपरोक्त कविसंज्ञाओं को प्राप्त करता है।

---

[i] काव्यप्रकाश,1/3.

[ii] रसगङ्गाधर,प्रथमाननम्,पृष्ठ 27,'चन्द्रिका'संस्कृत-हिन्दी टीका(पण्डित बद्रीनाथ झा,पण्डित मदन मोहन झा),चौखम्भा विद्याभवन,वाराणसी, 2013.

[iii] मेघदूतम्, उत्तरमेघ/1.

[iv] काव्यमीमांसा,चतुर्थ अध्याय,पृष्ठ 27,डा० गङ्गासागर राय,चौखम्भा विद्याभवन, वाराणसी,2013.

[v] काव्यमीमांसा,चतुर्थ अध्याय,पृष्ठ 28,डा० गङ्गासागर राय,चौखम्भा विद्याभवन, वाराणसी,2013.

[vi] काव्यमीमांसा,तृतीय अध्याय,पृष्ठ 16,डा० गङ्गासागर राय,चौखम्भा विद्याभवन, वाराणसी,2013.

[vii] काव्यमीमांसा,तृतीय अध्याय,पृष्ठ 16, डा० गङ्गासागर राय,चौखम्भा विद्याभवन, वाराणसी,2013.

[viii] काव्यमीमांसा,तृतीय अध्याय,पृष्ठ 30, डा० गङ्गासागर राय,चौखम्भा विद्याभवन, वाराणसी,2013.

[ix] काव्यमीमांसा,चतुर्थ अध्याय,पृष्ठ 32,डा० गङ्गासागर राय,चौखम्भा विद्याभवन, वाराणसी,2013.

[x] काव्यमीमांसा,पञ्चम् अध्याय,पृष्ठ 37,डा० गङ्गासागर राय,चौखम्भा विद्याभवन, वाराणसी,2013.

[xi] रसगङ्गाधर,प्रथम आनन,अधम काव्य लक्षण,पृष्ठ78, चौखम्भा विद्याभवन, वाराणसी,2013.

[xii] रसगङ्गाधर,प्रथम आनन,अधम काव्य उदाहरण,पृष्ठ79, चौखम्भा विद्याभवन, वाराणसी,2013.

[xiii]नीतिशतक,45

[xiv] अमरूकशतक,19.

[xv]काव्यमीमांसा,पञ्चम् अध्याय,नामाख्यात उदाहरण,पृष्ठ39, डा० गङ्गासागर राय,चौखम्भा विद्याभवन, वाराणसी,2013.

[xvi]शिशुपालवधम्,1/26.

[xvii]किरातार्जुनीयम, 1/3.

[xviii]उत्तररामचरितम्,1/36.

[xix] विद्धशालभञ्जिका,4/5.

[xx]साहित्यदर्पण,काव्यलक्षण.

[xxi]उत्तरामचरितम्,3/24.

[xxii] उत्तररामचरितम्,2/7.

[xxiii]वेणीसंहार,1/23.

सन्दर्भ ग्रन्थ सूची

1-उत्तररामचरितम्,महाकवि भवभूति,(आनन्दस्वरूप),मोतीलाल बनारसीदास,वाराणसी,2013.

2-काव्यप्रकाश,आचार्य मम्मट,डा॰ नरेन्द्र,ज्ञानमण्डल लिमिटेड,वाराणसी,2013.

3-काव्यमीमांसा,यायावरीय राजशेखर,'प्रकाश'हिन्दी टीका(डा॰ गंगासागर राय),चौखम्भा विद्याभवन, वाराणसी,2013.

4-किरातार्जुनीयम्, महाकवि भारवि,'पौर्णमासी'व्याख्या(डा॰ अशोक कुमार शतपथी),लखनऊ,2018.

5-मेघदूत,महाकवि कालिदास,'चन्द्रकला'संस्कृत-हिन्दी टीका(आचार्य शेषराज शर्मा),चौखम्भा विद्याभवन,वाराणसी,2013.

6-रसगङ्॰गाधर,पण्डितराज जगन्नाथ,'चन्द्रिका'संस्कृत-हिन्दी टीका(पण्डित बद्रीनाथ झा,पण्डित मदन मोहन झा),चौखम्भा विद्याभवन,वाराणसी,2013.

7-वेणीसंहार,भट्टनारायण,प्रकाशन केन्द्र,लखनऊ.

8-साहित्यदर्पण,आचार्य विश्वनाथ,'शशिकला'हिन्दी टीका(डा॰ सत्यव्रत सिंह),चौखम्भा विद्याभवन,वाराणसी, 2015.

9-संस्कृत साहित्य का समीक्षात्मक इतिहास,डा॰ कपिलदेव द्विवेदी,रामनारायण विजयकुमार,इलाहाबाद,2015.

10-शिशुपालवधम्,महाकवि माघ,(आचार्य कृष्णकुमार अवस्थी, तारणीश झा),प्रकाशन केन्द्र,लखनऊ।

Miss.Sonali Bajpai
Research scholar,
Department of Sanskrit & Prakrit Languages,
University of Lucknow.
Uttar Pradesh, Bhārat (India) 226007.
sonalibajpai1994@gmail.com

***

CC BY

कवे: हरेकृष्णमेहेरस्य काव्यकृतिषु प्रकृतिचित्रणम्

- सस्मिता साहुः

सारांशः -
नित्य-शाश्वत्या प्रकृत्या सार्धं मानवसमाजस्य सदैव नितान्तमन्तरङ्ग-सम्बन्धो विद्यते। अत: वैदिक-साहित्ये लौकिक-साहित्ये च बहव: कवय: स्वस्व-काव्यकवितासु प्रकृत्या: सूक्ष्मकलात्मक-सौन्दर्यं चित्रितवन्त: । मानव: स्वीय-भावुक-दृष्ट्या प्रकृत्या: विविधानि उपादानानि दर्शयति अनुशीलयति च। साम्प्रतिक-साहित्येऽपि प्रकृत्या: विविधा: विभावा: कवीनां लेखन्यां परिदृश्यन्ते । आधुनिक-संस्कृत-साहित्यस्य सुकवि: हरेकृष्णमेहेर: तस्य प्रणीतेषु विविध-काव्येषु प्रकृत्या: बाह्यसौन्दर्य-समेतम् आन्तरिक-सौन्दर्यं चित्रयति ।एवञ्च कविना प्रकृत्यां प्रेमप्रसङ्ग:, परिवेश-तत्त्वं, विभु-तत्त्वं, साङ्गीतिकता चेत्यादीनां वर्णनमपि कृतम् । कविना अस्माकं जन्मभूम्याः भारतमातुः महत्त्व-वर्णन-प्रसङ्गे प्रमुखानां नैसर्गिक-विभावानां नदी-पर्वत-समुद्रादीनां समुल्लेखः कृतोऽस्ति । कविः श्रीमेहेरः समुद्र-गगन-तरुलता-पुष्प-पल्लवादीनां विविधानां प्राकृतिक-विभावानां हृद्यां शोभां वर्णयति । तेन कविना नाना-प्राकृतिक-विभावै: साकं विविध-रूपकल्प-माध्यमेन जीवनस्य तुलना विहिता। अस्मिन् लेखे कवि-दर्शितानां कतिपय-प्राकृतिक-विभावानां विवेचना कृतास्ति।

- **उपक्रमः**

भारतीय-दर्शनानुसारं प्रकृति: जीवनस्य आदिशक्ति-रूपेण विराजमाना विद्यते । एषा प्रकृति: सर्वदा विविधरूपधारिणी शोभामयी च । प्रकृत्या: क्रोड़े संसारस्य सर्वे जीवा: आविर्भवन्ति विलीयन्ते च। प्रकृत्या साकं समग्र-मानवसमाजस्य सदैव नितान्तमन्तरङ्ग-सम्पर्को विद्यते। वैदिक-साहित्ये सर्वत्र पञ्चभूतात्मिकाया: प्रकृत्या: स्वरूपम् आलोचितमस्ति । ऋग्वेदस्य प्रथम-मण्डले जलदेवताया: स्तुति-समेता महनीयता प्रतिपादितास्ति। यथा-

" आपो देवीरूप ह्वये यत्र गाव: पिबन्ति न:। सिन्धुभ्य: कर्त्वं हवि:। (ऋग्वेद:- १/२३, १८)

भारतमातु: प्राकृतिक-विभावानां वर्णनं ऋग्वेदस्य दशममण्डलस्य नदीस्तुतिसूक्ते दरीदृश्यते । तत्र विविधानां नदीनां वर्णनेन साकं तासां स्तुति: क्रियते। यथा-

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि सतोमं सचता परुष्ण्या।
असिकन्या महद्वधे वितस्तयार्जीकीये शर्णुह्या सुषोमया॥ (ऋग्वेद:, १०/७५, ५)

श्वेताश्वेतरोपनिषदि भगवत: व्यापकरूपं प्राकृतिक-विभावेषु एव अन्तर्निहितमस्ति इति वर्णितमस्ति। यथा-

नील: पतङ्गो हरितो लोहिताक्ष-स्तडिद्गर्भ ऋतव: समुद्रा:।
अनादिमत्त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा॥ (श्वेताश्वेतरोपनिषद्, ४/४)

वैदिक-साहित्यादारभ्य साम्प्रतिक-साहित्यं यावत् विविध-कृतिषु प्रकृत्या: आन्तरिक-रूपस्य बाह्यरूपस्य च वर्णनमुपलभ्यते । संस्कृतसाहित्यस्य बहव: सारस्वत-साधका: स्वस्वकाव्यकृतिषु प्रकृत्या: सूक्ष्मकलात्मक-सौन्दर्यं चित्रितवन्त: । मानव: स्वीयभावुक-दृष्ट्या प्रकृत्या: विविधानि

उपादानानि दर्शयति अनुशीलयति च । अद्यतन-साहित्येऽपि प्रकृत्या: विविधा: विभावा: कवीनां लेखन्यां चित्रिता: विलोक्यन्ते । साम्प्रतिक-संस्कृतसाहित्यस्य बहुमुखीप्रतिभासम्पन्नस्य सुकवे: हरेकृष्णमेहेरस्य रचनासु प्रकृत्या: मधुर-सरस-ललित-कलात्मक-स्वरूपाणि समुपलभ्यन्ते । तस्य प्रणीतेषु मातृगीतिकाञ्जलि:, सौन्दर्य-सन्दर्शनम्, पुष्पाञ्जलिविचित्रा, जीवनालेख्यम् चेत्यादिषु काव्येषु प्राकृतिक-विभावा: रमणीयरूपेण वर्णिता: सन्ति । तेषु कतिपयानां प्राकृतिक-विभावानां विवेचनं कर्तुं प्रयासो विहितोऽस्ति अस्मिन् शोधप्रबन्धे ।

- ## प्रकृत्या: बाह्य-सौन्दर्यम्

मातृगीतिकाञ्जलि-काव्यस्य मातृगीतिकायां कवि-मेहेरेण अस्माकं जन्मभूम्याः भारतमातुः महत्त्व-वर्णनप्रसङ्गे नैसर्गिकविभावानां प्रमुखानां नदी-पर्वत-समुद्रादीनां समुल्लेखः कृतोऽस्ति । शस्यश्यामला रत्नप्रसूः भारत-वसुन्धरा कामधेनु-रूपिणी, कल्पलता-स्वरूपा । गाभी तथा लताऽपि अत्र सूचिता । अस्याः भूमेः भूषणं भवति विन्ध्यगिरिः, समुद्रः अस्याः मेखला, हिमालय-पर्वतः अस्याः समुन्नत-शिखा । पावनी गङ्गा, यमुना, महानदी, नर्मदा चेत्याद्याः नद्यः अत्र प्रवहन्ति । प्राकृतिक-धनसम्पत्तिभिः सुसम्पन्ना शोभिता इयं भारत-धरणी कर्मतत्पराणां तपोरतानां च सार्थक-तीर्थभूता । कवेः वर्णनायां माधुर्यमयं पद्यमेवंरूपम् -

'धरित्रीयं श्यामला, कामधेनुः कोमला ।

रत्नगर्भा शाश्वती, कल्पवल्ली भास्वती ।

विन्ध्य-भूषा सिन्धु-रशना हिमगिरि-शिखा शर्मदा,

रम्य-गङ्गा-सङ्ग-यमुना महानदीह नर्मदा ।

कर्म-तपसां सार्थ-तीर्थं प्रकृति-विभवालङ्कृतम् ।

विजयतां नो वन्दनीयं सुन्दरं धामामृतम् ।

भव्य-भुवनं भारतम् ॥' (मातृगीतिका-१/मातृगीतिकाञ्जलि:)

कवि: अस्माकं भारतभूम्याः सुसमृद्धं प्राकृतिक-वैभवं वर्णयति देश-गीतिकायाम् । भारतमातुः सुरम्य-पादसेवायां निरतोऽस्ति सततं विशाल-जलराशिपूर्णः समुद्रः । गङ्गादि-नदीनां जलेषु तस्याः मधुरं मन्दहसितं राजते । अस्याः पुष्पोद्यानेषु सरसः सुगन्धमयः पवनः धीरं प्रवहति । तरुलतादीनां संवर्धने अस्याः कलेवरं सुफलं सुरञ्जितं मनोहरं च विभाति । अत्र पक्षिणः सुमधुर-काकली-माध्यमेन मङ्गल-गानं कुर्वन्ति । धान्य-शस्यादिभिः परिपूर्णा श्यामला इयं जन्मभूमिः अस्माकं सुवन्दनीया । पराधीन-भारतवर्षस्य स्वाधीनताप्राप्ति-दिशायां संग्रामरतानां वीरगणानां तपस्याऽपि साफल्य-मण्डिता विद्यते । इत्थं भारत-जनन्याः महनीयतां वर्णयति कविः । स्वकीय-लालित्य-माधुर्यपूर्ण-शब्दसंयोजनायां गीतिकायाः पद्यमेकमुदाहरण-स्वरूपम् –

'अम्बुधि-विधौत-सुमधुर-चरण-विलासा,

गङ्गा-सलिलेसलील-सुललित-हासा ।

कुसुमारामे रसभर-सुरभि-समीरा,

तरुवर-पुञ्जे रञ्जित-मञ्जु-शरीरा ।

CC BY

विहङ्ग-ताने मङ्गल-गाने श्यामल-शस्या विजयते ।
भारतमाता परम-नमस्या विजयते ।
स्वतन्त्रताया रण-वीराणां
सफल-तपस्या विजयते ॥' (देश-गीतिका,१/मातृगीतिकाञ्जलिः)

समय-गीतिकायां कवि-मेहेरेण समयं प्रति सम्बोधनं विहितम् । अत्र नद्या साकं समयस्य तुलना दृश्यते रूपकालङ्कार-माध्यमेन । समय-नद्याः प्रखरा मुहूर्त्तमयी धारा अग्रेसरति । नद्याः पार्श्वद्वय-रूपेण दिवसः रात्रिश्च विद्येते । अत्र कदा प्राणिनां मिलनं भवति, कदा च विरहो जायते । समयस्य प्रवाह-रोधनार्थं न कोऽपि समर्थो भवति संसारे । समयं सम्बोध्य कविना मेहेरेण भणितम् -

'भुवि-भवदीया वहति नदी या
प्रखराऽधीरा क्षणमय-धारा,
विरहं विधुरं मिलनं मधुरं
तनुते वासर-रजनी-पारा ।
न कोऽपि रोद्धुं रयं क्षमस्ते ।
समय ! नमस्ते, समय ! नमस्ते ॥' (समय-गीतिका,४/मातृगीतिकाञ्जलिः)

प्रकृतेः विभाव-विशेषस्य गगन-मण्डले विराजमानस्य कलाकरस्य चन्द्रस्य वर्णनायामपि कवेर्लेखनी तत्परा । तस्य स्वच्छ-शुभ्रकिरणैः हृदयस्य समुद्भासः काम्यते कविना । प्रसङ्गेऽस्मिन् पद्यमित्थम् -

'कलाकर हे ! हृदय-वियति म मसमुदय नियतम्,
निज-किरणैः सुविकिरणैः
शुचि-हासैरुद्भासय नियतम् ॥' (कलाकर-गीतिका,ध्रुवम् /मातृगीतिकाञ्जलिः)

- ## प्रकृत्याः कलात्मक-चारुता :

प्रकृत्याः कलात्मिका रमणीयता खलु भावुक-काव्यरसिकानां सहृदय-जनानां मनोहारिणी । कविः श्रीमेहेरः समुद्र-गगन-तरुलता-पुष्प-पल्लवादीनां विविधानां प्राकृतिक-विभावानां हृद्यां शोभां चित्रयति । तस्य मतेन निसर्गः अर्थात् प्रकृतिः प्रवीण-कलाकाररूपिणी । नैसर्गिक-तत्त्वानां वर्ण-विचित्रता-प्रसङ्गे सौम्यभावना प्रकाशिता कविना । सौन्दर्यतत्त्वात्मके अस्मिन् विषये मुक्तच्छन्दसा विरचितायां कवितायां कविः प्रस्तौति इत्थम् -

'अद्वितीयो निपुण-कलाकारो निसर्गः,
अद्भुत-वर्ण-विभामयः
तस्य प्रत्येक-सर्गः ।
नीरनिधे-र्नीलिमा

अम्बरस्यापि तादृग् रङ्गिमा,

तरु-वल्लरीणां कोमल-वर्णाभा,

पल्लवानां हरितिमा लोहितिमा

कुसुमानां मनोहारिणां च बहुवर्णिमा ॥' (निसर्गस्य रङ्गकला/ सौन्दर्य-सन्दर्शनम्)

प्राकृतिक-विभावेषु उषाया: अरुणिमा अतीव रमणीयत्वं वहति, तथैव स्वर्णिमा सन्ध्या हृदयहारिणी मनोरमा च भवति। सर्वस्मिन् वस्तुनि वर्ण-विचित्रता दर्शनीया भवतीति कवे-र्मेहेरस्य आशय: । मयूर-चित्रपतङ्गादीनां लावण्यम्, नीलकण्ठादि-विहगानां विचित्र-चित्रमयी द्युतिः, अन्येषां पक्षिणामपि सौम्या चमत्कारिता जन-मानसं समाकर्षति । मुक्तच्छन्दसा विरचितायां माधुर्यानुप्रासिकता-भरितायां कवितायां कवि-र्निगदति यत् -

'अरुणिमा रमणीयाया उषायाः,

स्वर्णिमा सन्ध्यायाः सुवेषायाः,

मयूर-व्रातस्य चित्रपतङ्ग-वर्गस्य च

वर्ण-लावण्येषु कला-प्रावीण्यम्

समस्तं वस्तुतो दर्शनीयं निसर्गस्य

वैमनस्यं वैरस्यं निरस्य ॥' (निसर्गस्य रङ्गकला / सौन्दर्य-सन्दर्शनम्)

कवेः श्रीमेहेरस्य सौन्दर्य-सन्दर्शनम्-काव्यस्य सौन्दर्यानुभूतिः इत्याख्यां कवितायां सौन्दर्य-चर्च्चा-प्रसङ्गे सुरम्य-पुष्पसम्पन्नाः लता:, सुफलपूर्णा: पादपाश्च जनानां हृदयं समाह्लादयन्ति इति वर्णितमस्ति। अत्रापि वृक्षलतादयो नैसर्गिक-विभावाः सन्निवेशिताः। उपजाति-च्छन्दसा विरचिते पद्ये कवेरभिव्यक्तिरित्थम् -

'वल्ली सपुष्पा सुफला सपादपा

आह्लादिनी सा मनसां रसान्विता।

विभान्ति चान्ये प्रकृते-र्विभावाः

सुदर्शनास्ते नयनाभिरामाः ॥' (सौन्दर्यानुभूतिः /सौन्दर्यसन्दर्शनम्)

'सौन्दर्य-पञ्चकम्' इति कवितायां शब्द-स्पर्श-रूप-रस-गन्ध-विषया: मञ्जुलरूपेण चित्रिता: । अत्र कमलिन्या: भ्रमरस्य च प्रसङ्गं सन्निवेशयन् प्रकृत्या: विभावमेकं वर्णयति कविः । गन्ध-प्रसङ्गे कविना मुक्तच्छन्दसा सोपधामिलनं सुकोमलं वचनं समुपस्थापितमेवंरूपम् -

'अहो ! विचित्रता सुगन्धस्य

जगति वियति वितत-भावबन्धस्य।

विवृणुते स्वरूपमात्मनः

समाकर्षति सघ्राणं प्राणि-मनः।

कमलिन्याः सुरभिरभितः

CC BY

प्रफुल्लायाः समुल्लास-भरितः
निविशते मानसं सानन्दः
मधुरो मधुकरः काम्य-मकरन्दः ।
नन्दति प्रेयसी रसिका
भजते सार्थकतां नासिका ॥' (सौन्दर्य-पञ्चकम्,४/ सौन्दर्यसन्दर्शनम्)

- **प्रकृत्यां प्रेमभाव-प्रसङ्गः**

प्रकृतिः प्राणिजीवने रसभावादिकं हार्दिकं तत्त्वमपि वितरति । प्रसङ्गतः शृङ्गारभाव-प्रेमसम्पन्नयोः दम्पत्योः वर्णनायां कविना मेहेरेण कतिपय-नैसर्गिक-विभावाः सम्भाविताः दृश्यन्ते । नायक-नायिकयोः परस्परं सम्बोधनात्मिका गीतिकाद्वयी वर्त्तते प्रणयिनी-गीतिका, प्रणयि-गीतिका चेति । नायिका नायकं प्रति सम्बोधयन्ती वदति यत् त्वं वसन्तः, अहं कोकिल-काकली; त्वं चन्द्रः, अहं रात्रिः; त्वं सूर्यः, अहं पद्मिनी; त्वं जलदः, अहं विद्युत् । कवेर्भाषायाम् –

'वसन्तस्य पिक-काकली, रतिः कन्दर्प-कन्दली ।
अहं हिमांशो-र्यामिनी, विवस्वतस्तव पद्मिनी ।
अम्बुद-कम्पा स्वर्णा शम्पा, विभ्रम-सुकलित-कोलाऽहम् ।
लीलाऽहम्, लोलाऽहम् ॥' (प्रणयिनी-गीतिका,१/मातृगीतिकाञ्जलिः)

नायिका पुनः नायकं प्रति निगदति यत् त्वं तरुवरः, अहं तरु-वल्लभा लतिका; त्वं समीरः, अहं सुरभिः; त्वमाकाशः, अहं नीलिमा; त्वं पुष्परूपः, अहं सुस्मितिः । अत्र कविना नैसर्गिक-प्रेम प्रदर्शितं विविध-दृष्टान्त-माध्यमेन । कवेरभिव्यक्तौ सुमधुर-पद्यमित्थम् –

'वल्ली तरुवर-वल्लभा, अस्मि सुरभिः समीर-भा ।
नीलताऽम्बर-करम्बिता, शून्यता पूर्ण-लम्बिता ।
अस्मि सुस्मितिः कुसुम-परिचितिः, पुलकित-कम्र-कपोलाऽहम् ।
लीलाऽहम्, लोलाऽहम् ॥' (प्रणयिनी-गीतिका,२/मातृगीतिकाञ्जलिः)

अपरपक्षे प्रणयि-गीतिकायां नायिकां प्रति नायकस्य सम्बोधनेऽपि दाम्पत्य-प्रेमभावस्य कतिपय-दृष्टान्ताः समुपस्थापिताः प्राकृतिक-विभाव-समुल्लेख-माध्यमेन । नायकः कथयति यत् त्वं अवनी, अहम् आकाशः; अहं प्रशान्त-समुद्रः, त्वं कल्लोलमयी तटिनी । कवेर्भाषायाम् -

'शुभाङ्गना मम सङ्गिनी, अवनी नभसो भाविनी ।
अस्मि समुद्रः प्रशान्त-मुद्रः, सरिता कल-कल्लोला त्वम् ।
लीला त्वम्, लोला त्वम् ॥' (प्रणयि-गीतिका,१/मातृगीतिकाञ्जलिः)

पुनः उषया सह दिग्वलयस्य आत्मिक-सम्बन्धः कविना वर्णितः । नायकः नायिकां सम्बोध्य कथयति –

'उषा कृत-लया वृत-दिग्वलया पाटलासि चटुलोला त्वम् ।
लीला त्वम्, लोला त्वम् ॥' (प्रणयि-गीतिका,५/मातृगीतिकाञ्जलिः)

प्रकृत्याः अपरे विभावाः अपि कवे: रचनायां वर्णिताः । पिकस्य कुहु-विरुतं प्रेमानन्ददायकम्, पवनस्य धीर-गति: सौख्यदायिनी, पुष्प-सुरभिः हृदयोल्लासं जनयति, तरुप्रिया लतिका शोभते विलासमयी । सौभाग्यं प्रियतमस्य कृते मानसं रञ्जयति । कवेर्गीतिमय-भाषायाम् -

'वाति मन्द-मारुतो भाति चारु-सौरभम्,
वल्लरी विलासिनी प्राप्य वृक्ष-वल्लभम् ।
एहि रे ! धेहि रे ! सौभगं प्रियाय चित्त-रञ्जनम् ।
कोकिलस्य कुहू-कुहू-कूजनम् ॥' (कुहू-कुहू-कूजनम्, २/ पुष्पाञ्जलिविचित्रा)

एवमुपर्युक्त-कतिपय-रचनासु प्रकृतेः प्रेमभावादिकं परिलक्ष्यते कविमतानुसारम् ।

- **प्रकृत्या: अन्त:सौन्दर्यम्**

जीवन-गीतिकायां कवि: मानव-जीवनस्य सार्थकता-निमित्तं सम्बोधयन् प्रकृत्या: विविध-विभावेभ्य: कानिचन शिक्षणीय-तत्त्वानि समाहर्तुं सदिच्छां व्यक्तीकरोति । यथा पुष्पेभ्य: सुगन्धः, सूर्यात् अन्धकार-दूरीकरणम्, तारकाभ्य: दीप्ति:, चन्द्रकिरणात् कोमलता, मधुरता शीतलता च, कोकिलात् झरणात् च सुगीतं चेत्यादयो विषयाः मानवैः समाहरणीयाः । प्रसङ्गेऽस्मिन् कवे: लेखन्यामभिव्यक्तिरेवम् -

'कुसुमानुगुणं देहि सौरभं
सुस्मित-ललितं सरसोल्लासम्,
सूर्य-समो भव तमो हर त्वं
वितर तारका-दीप्ति-विलासम् ।
शशि-किरणानां मृदु-मधु-शीतं
पिक-झरणानां रचय सुगीतं
परमानन्द-प्लावनम् ।
जीवनं सुन्दरं सुन्दरं तनु-तपोवनम् ॥' (जीवनगीतिका-२/मातृगीतिकाञ्जलिः)

नववर्ष-गीतिकायां कविना मेहेरेण कतिपयं प्राकृतिक-तत्त्वं सूचितमस्ति । मानसरूपे सरोवरे विमल-कमलस्य प्रस्फुटनं कवेरभीप्सितम् । तस्य लेखन्याम् -

मनोऽरविन्दं विन्दन्तु विमलं सुन्दरताम् ।' (नववर्ष-गीतिका,१/ मातृगीतिकाञ्जलिः)

CC BY

देश-गीतिकायां रूपकालङ्कार-माध्यमेन कविना प्राकृतिक-विभावेषु अन्यतमस्य पद्म-कुसुमस्य सरोवरस्य च समुल्लेखः कृतोऽस्ति । देशात्मबोध-प्रसङ्गे हृदय-रूपिण्याः सरस्याः मध्ये मानवता-रूपकं रमणीयं कमलं विकसितं भूत्वा विराजते इति कविनाभावात्मकता सूचिता । एतद्विषयकं पद्यं कवि-लेखन्यामित्थम् –

'मानवताया रम्य-शतदलं हृदय-सरस्या विजयते ।

भारतमाता परम-नमस्या विजयते ॥' (देश-गीतिका, ६/ मातृगीतिकाञ्जलिः)

कवेः मेहेरस्य जीवनालेख्यम्-काव्ये 'जीवन-दशकम्' इति कवितायां नाना-प्राकृतिक-विभावैः साकं विविध-रूपकल्प-माध्यमेन जीवनस्य तुलना विहिता । जीवनं नाम विहङ्गमः, जीवनं नाम तरङ्गिणी, जीवनं नाम वासरः, जीवनं नाम प्रसूनम्, जीवनं नाम सरोवरः चेत्यादयः रूपकल्प-समूहाः कवेर्लेखन्यां प्रस्फुटिताः सन्ति । जीवन-सरोवरः इत्यस्याः कवितायाः पङ्क्तौ प्राकृतिक-वर्णनेन सार्धं जीवनदर्शनमपि कविः सूचयति । अत्र सरोवरेण सार्धं शारदीयः सुमञ्जुलो हंसो लब्धस्थानो वर्त्तते । उदाहरणार्थम् -

'जीवनं नाम सरोवरः,
संसार-जञ्जालपुञ्ज-कासर-मज्जनैरपि
सव्यथं विमथितं दुर्जनैरपि
निश्चल-गभीरं वारिभरः
निर्मलोदरो नियतमवदातः
प्रेम्णा संसेवित-प्राणिजातः,
यत्र शारदीय-वैशद्यावतंसः
सम्फुल्ल-मानसो विहरति मनोहारी हंसः ॥' (जीवनदशकम्, ६/ जीवनालेख्यम्)

जीवनं नाम विहङ्गमः इति कविः कथयति । हृदय-रूपिणि गगन-परिसरे लक्ष्यं प्रति पक्षं प्रसार्य स जीवन-विहङ्गमः विहरति इति कवेर्मतम् । संसारेऽस्मिन् स जीवन-पक्षी मधुर-कूजित-वचनं वितरन् सर्वान् जनान् समाह्लादयति । माधुर्यपूर्णं वर्णनमित्थं कवेर्भाषायाम्,

'जीवनं नाम विहङ्गमः
अवसाद-शून्याङ्गो नीड़-गृहङ्गमः ।
हृदय-व्योम्नि विहरति
प्रसारित-पक्षः स्वलक्ष्यं प्रति,
वितरन् मञ्जुलां गुञ्जित-काकलीं
मधुर-रीत्या गीत्यावलीं
समाह्लादित-स्थावर-जङ्गमः

प्रपञ्चित-पञ्चम-स्वर-सङ्गमः ॥' (जीवन-दशकम्,१/ जीवनालेख्यम्)

कवेः पुष्पाञ्जलि-विचित्रा इत्याख्ये गीतिकाव्ये 'कुहू-कुहू-कूजनम्' इति गीतमेकं प्रकृतिचित्रण-प्रसङ्गे समुल्लेखनीयम् । प्रकृतेः अन्यतम-विभावस्य कोकिलस्य सुमधुर-कुहुकुहु-ध्वनिः निसर्ग-रूपस्य देवस्य समाराधना-निमित्तं मन्त्रोच्चारणस्वरूपो दीव्यति इति कवेः कल्पना । प्राकरणिक-वर्णना कवे-र्भाषायामेवंभूता -

'कोकिलस्य कुहू-कुहू-कूजनम्,

किं निसर्ग-देव-मन्त्र-पूजनम् ॥' (कुहू-कुहू-कूजनम्,ध्रुवम् /पुष्पाञ्जलि-विचित्रा)

- ## प्रकृत्यां साङ्गीतिकता :

कविमेहेरस्य प्रतिभा-दृष्ट्या समस्तं विश्वब्रह्माण्डं सङ्गीतमयं प्रतिभाति । प्रकृत्या: कणे कणे कविना सङ्गीतस्य मर्म समनुभूतम् । विश्वं सङ्गीतमयं प्रतिपादयन् कविः कथयति-

'विधातुः प्राङ्गणं, विततं सङ्गीतमयम् ।

प्रकृत्याः प्रतिकणं, नियतं युत-ताल-लयम् ॥ (सङ्गीतगीतिका, ध्रुवम् /मातृगीतिकाञ्जलि:)

यदा तटिन्याः निर्झरिण्या: वा सलिलं कलकल-नादेन वहति, तदा सङ्गीतस्य ताल-लय-माधुर्यञ्च दरीदृश्यते । प्रवहमान: पवन: मधुर-स्वरेण वेणुस्वनं करोतीति कवेरनुभूतिः । समुद्रस्य चञ्चल-तरङ्गेऽपि कवि: ताल-लययोः समनुभवं कृतवान् । प्रसङ्गतः कविः प्रकाशयति इत्थम् -

'प्रवहति कल-कलकल-धारं निर्झरम्,

वादयते पवनो वेणुं सुस्वरम् ।

सभङ्गी-सर्पणं, चल-सिन्धु-तरङ्ग-रयम्,

नियतं युत-ताल-लयम् ।

प्रकृत्याः प्रतिकणं, नियतं युत-ताल-लयम् ।

विततं सङ्गीतमयम् ॥' (सङ्गीत-गीतिका,३/ मातृगीतिकाञ्जलि:)

प्रकृत्या: विभावस्वरूपायां लतायां नायिकाया: व्यवहारारोप-समेतं कवि-मेहेरेण समासोक्त्यलङ्कारस्य संयोजनं विहितम् । पल्लविता पुष्पिता लता मन्द-मन्द-नृत्येन साकं स्व-हावभावं प्रकटयति । लता-रूपिण्या: नायिकाया: कङ्कण-नादे न केवलं साङ्गीतिकौ ताल-लयौ विद्येते, अपितु कलाभिनयस्य परिप्रकाशोऽपि स्पष्टतया समनुभूयते । अत्र साङ्गीतिक-सौन्दर्यमपि प्रकाशते । कवि: लालित्यभरया वाण्या वर्णयति यत्-

'पल्लविनी प्रफुल्ल-कुसुमा वल्लरी,

गति-मन्दं नृत्यति छन्दःसुन्दरी ।

सुनिनदत्-कङ्कणं, स्फुट-भाव-कलाभिनयम्,

CC BY

नियतं युत-ताल-लयम् ।

प्रकृत्याः प्रतिकणं, नियतं युत-ताल-लयम् ।

विततं सङ्गीतमयम् ॥' (सङ्गीत-गीतिका,४/ मातृगीतिकाञ्जलि:)

वर्षाकाले मेघो यदा घड़-घड़-शब्दं कृत्वा गर्जति, जलविन्दव: टप-टप-शब्दं कृत्वा आकाशात् स्खलन्ति, तदापि कविना साङ्गीतिक-तालल‌यौ अनुमीयेते । ग्रह-नक्षत्राणां गतिपथेऽपि कवि: साङ्गीतिकयोः ताल-लययोः स्थितिमनुभवति । कवि: स्वीय-मौलिकच्छन्दसा मेघगर्जन-वर्षापातानां च स्वाभाविक-ध्वनिं समाहृत्य वर्णयति -

'गर्जति घड़-घड़-घनमाला-घर्षणम्,

प्रपतति टप-टप-टप-पृषतां वर्षणम् ।

ग्रहाणां विहरणं, विधि-दिष्ट-यथावलयम्,

नियतं युत-ताल-लयम् ॥' (सङ्गीत-गीतिका,५/ मातृगीतिकाञ्जलि:)

कीट-पतङ्गादि-जीवेष्वपि साङ्गीतिकता प्रतिभाति कवेः प्रतिभा-लोचने । झिङ्कारि-भ्रमरादीनां नादेषु न केवलं साङ्गीतिकतत्त्वं निहितमस्ति, अपितु रसरागपूर्ण-प्रेमभावश्च द्योतते । कवेर्वर्णनायाम् –

'झिमि-झिमि-झिमि-झिङ्कारि-कृतं शिञ्जनम्,

कुरुते सम्भ्रमितो भ्रमरो गुञ्जनम् ।

समेषां लक्षणं, रस-रागभर-प्रणयम्,

नियतं युत-ताल-लयम् ॥' (सङ्गीत-गीतिका,६/ मातृगीतिकाञ्जलि:)

'सा-रे-गा-मा-पा-धा-नि' चेति सप्तस्वराः प्रकृतेः पशुपक्षिप्रभृति-विभावेभ्यो गृहीताः सन्ति इति सङ्गीतशास्त्रादिषु वर्णितम् । कविना मेहेरेण प्रसङ्गतः पञ्चम(पा)-स्वरस्य प्रकाशकारिणः कोकिलस्य समुल्लेखः कृतः पक्षिणां प्रतिनिधिरूपेण । पुनश्च निषाद(नि)-स्वरस्य व्यक्तकारिणः हस्तिनः उदाहरणं प्रदत्तं पशुवर्गस्य प्रतिनिधिरूपेण । कवेर्भाषायाम् –

'कूजति पिक-मुखो विहङ्गो मधुगलम्,

स्वनति पुनर्मितङ्गमादि-र्मङ्गलम् ॥' (सङ्गीत-गीतिका,७/ मातृगीतिकाञ्जलि:)

कवेः कुहू-कुहू-कूजनम् इत्याख्ये मौलिक-गीतिमयच्छन्दोबद्धे गीते रागरङ्ग-मङ्गलमयी रमणीया अङ्गना शोभां वहति । सागरस्य तरङ्गो यथा चञ्चलत्वं प्रकाशयति, तथा नायिका-हृदये भावरूपिणी ऊर्मिमाला अधीरतां भजते । अत्र प्रकृतेः अन्यतम-विभावस्य नदी-तरङ्गस्य समुद्र-तरङ्गस्य वा सूचना विहितास्ति । कवेः कथनमेवंरूपम् -

'राग-रङ्ग-मङ्गला शोभते शुभाङ्गना,

भाव-वीचि-चञ्चला काञ्चनी वरानना ।

एहि रे ! धेहि रे !

मानिनी-जनस्य मान-भञ्जनम् ।

कोकिलस्य कुहू-कुहू-कूजनम् ॥’ (कुहू-कुहू-कूजनम्,४/ पुष्पाञ्जलिविचित्रा)

- ## प्रकृत्यां विभुतत्त्वम्

मातृगीतिकाञ्जलि-गीतिकाव्यस्य विभुगीतिकायां भगवतः सर्वव्यापकत्वं प्रतिपादितम् । कवि-प्रतिभया कोकिलस्य पञ्चम-स्वरे, सुरभित-पद्मे, विमल-जले सरोवरे, कलकल-झरे पर्वते च परमेश्वरस्य स्थितिः समनुभूयते । विभु-गीतिकायां विभोः परमेश्वरस्य सर्वव्यापित्वं कविना सुप्रतिपादितम् । अस्यां सम्बोधनात्मक-गीतिकायां कवि: कथयति यत् अस्मिन् संसारे सर्वत्र परमेश्वरस्य दिव्यत्वं नव्यत्वं च विद्येते । कवेरभिव्यक्तौ चित्रणमित्थम् -

‘मधु-सङ्गीते पिक-स्वरे, सुरभि-सरसिजे विकस्वरे ।

प्रसन्न-सलिले सरोवरे, कलकल-झरणे महीधरे ।

दीव्यति भवतो नव्यत्वम्, नव्यत्वम्, दिव्यत्वम् ।

सर्वस्मिन् हे स्वामिन् !

त्वमसि त्वमसि त्वमसि त्वम् ॥’ (विभुगीतिका,१/मातृगीतिकाञ्जलि:)

सीमाहीन-नील-महाकाशस्य, सुदुस्तर-समुद्रस्य, विद्युत्-समुल्लसित-जलदस्य, सुकोमल-तरुलतादीनां पुनः सूर्य-चन्द्र-किरणानां चापि वर्णना कविना कृतास्ति । तस्य मतेन एतेषु सर्वेषु प्राकृतिकतत्त्वेषु परमात्मन: व्यापकत्वं नव्यत्वं दिव्यत्वं च विराजन्ते । कवेरभिव्यक्तौ -

‘अनन्त-नीलिम-महाम्बरे, अगाध-जलधौ सुदुस्तरे ।

विद्युल्लसिते वारिधरे, वल्लि-तरुवरे चारुतरे ।

सौर-सुरुचिरे चराचरे, सान्द्र-सुन्दरे चान्द्र-करे ।

दीव्यति भवतो नव्यत्वम्, नव्यत्वम्, दिव्यत्वम् ॥’ (विभुगीतिका-२-३/मातृगीतिकाञ्जलि:)

- ## प्रकृत्यां परिवेश-तत्त्वम्

पर्यावरण-चित्रणे निसर्गस्य नैके विभावाः कविना मेहेरेण समुल्लिखिताः । नानाविधाः वृक्ष-लतादयः सांसारिक-जीवानां प्राणदानं कुर्वन्ति, मङ्गलं च साधयन्ति । काननं, पर्वतः, तटिनी, पशु-पक्षिणः, रजनी, दिवसम्, ऋतवः, चन्द्रः, सूर्यश्चेत्यादयः समस्ताः विभावा: लोक-कल्याण-निमित्तं तत्पराः विद्यन्ते । मातृवत् प्रकृतिः अस्मान् सम्पोषयति पार्थिव-जीवने । अतः प्रकृत्याः विभावा: तरुलतादयः वन्य-प्राणिप्रभृतयोऽपि अस्माभिः सुरक्षणीया इति कवि: कामयते । प्रकृति-मनुष्ययोः निबिड़-सम्बन्ध-समेतं कवेः स्वीय-गीतिमय-समुपस्थापनमित्थम् -

‘सन्ति निरतं जीव-जगतां प्राण-दाने,

CC BY

तरु-लतानां विविध-वर्गाः शं दधाने ।

वन-गिरि-नदी-पशु-विहङ्गाः

रात्रि-दिन-ऋतु-शशि-पतङ्गाः,

सर्वमास्ते जन-हितार्थं संहतम् ।

रक्षति प्रकृतिः सती, सौख्य-राशिं तन्वती,

वन्य-सम्पद् रक्षणीया सन्ततम् ।

शाश्वतम्, प्रकृति-मानव-सङ्गतम् ॥' (पर्यावरण-गीतिका,१/ पुष्पाञ्जलिविचित्रा)

नववर्षस्य शुभकामना-ज्ञापन-प्रसङ्गे विहङ्ग-कूजन-गीतसमेतं पुष्प-फलान्वित-तरुलतानां समृद्धिः काम्यते कविना मेहेरेण । स्वच्छ-निर्मल-नीरं संसारस्य तृषां निवारयतु इति कवेः कामना । कवेर्भाषायाम् –

'प्रदिशतु दिशि दिशि मधु-सन्देशं सुमञ्जुलम्,

शकुन्त-गीतं सकुसुम-फल-तरु-लताकुलम् ।

अनाविलं शुचि सलिलं, शमयतु जगतां तर्षम् ॥' (नववर्ष-गीतिका,३/ मातृगीतिकाञ्जलि:)

समीरणो भवति प्रकृतेः अन्यतमो मुख्य-विभावः । कविः श्रीमेहेरः प्रदूषण-मुक्तं निर्मलं वायुमपि कामयते विश्ववासिनां कल्याण-निमित्तम् । कवेर्लेखन्यां पद्यमेवंप्रकारम् -

'परिमल-मरुतो रमयतु मर्त्त्यं चराचरम्,

दूषण-रहितो वातु सर्वतो निरन्तरम् ।' (नववर्ष-गीतिका,४/ मातृगीतिकाञ्जलि:)

जलवृष्टिरपि एका नैसर्गिकी प्रक्रिया । तस्या अपि सूचना कविना मेहेरेण प्रदत्ता । सुवृष्ट्या धरणी शस्यप्राचुर्य-सम्पन्ना वन्य-सम्पद्भिः समृद्धिशालिनी सती अभ्युदयं लभतामिति कविः शुभकामनां निवेदयति । कवेर्भाषायाम् -

''धृत-पर्जन्या रमतां धन्या वसुन्धरा,

प्रशस्य-शस्या वन्य-वैभवै रत्न-भरा ।' (नववर्ष-गीतिका,५/ मातृगीतिकाञ्जलि:)

कवेः मेहेरस्य हाइकु-सिजो-तान्का-कवितानां सङ्कलनभूता कृतिरस्ति हासितास्या वयस्या इत्याख्या । सिजो दक्षिणकोरिया-देशीया काव्यविधा । सिजो-छन्दः सीजो इति नाम्नापि संस्कृते परिचितम् । सिजो-कविता-संरचनायां ८-७-८-७-८-७- वर्णक्रमो भवति । कवेः वर्णनानुसारं सुन्दरमुद्यानं पुष्पैः परिपूर्णम् । नवीना सुन्दरी-लता लज्जाशीला वर्त्तते । प्रान्तरे शस्य-तृणादय: परिपूरिता: सन्ति । पक्षी ताल-लयेन साकं सुमधुरं गीतं गायति । प्रकृत्या: सौन्दर्यवैभवं दृष्ट्वा दर्शकस्य कमल-नयनयो: आनन्दाश्रुधारा प्रवहति । कविना श्रीमेहेरेण सिजो-छन्दसा लिखिता नैसर्गिक-सौन्दर्यपरका एका कवितास्ति एवंरूपा-

'पुष्पराक्षं बाष्पालयम्,
उद्यानं पुष्पालयम्,
वल्ली त्रपा-रूपालयम्,
प्रान्तर: शष्पालयम्,
विहङ्गस्तनुते स्वयम्
मन्त्रं सताल-लयम् ॥' (बाष्पालयम्)

(सिजो-कविताः, हासितास्या वयस्या/ पद्यबन्धा-९, पृ.९९)

एवं कवेः हरेकृष्णमेहेरस्य रचनासु वर्णिताः कतिपयाः नैसर्गिक-विभावनां प्रसङ्गाः उपर्युक्तरूपेण विश्लेषिताः। कवेः अन्यान्य-रचनास्वपि प्राकृतिक-विषयाः प्रतिफलिताः।

- ## उपसंहारः

प्रकृति-मानवयो: सम्बन्ध: परस्पर-परिपूरको वर्तते । प्रकृतिं विना जीवनधारणं न सम्भवति पार्थिवभुवने । मानव: यत् किमपि ज्ञानार्जनं करोति, तत् सर्वं प्रकृतित: एव प्राप्नोति । अत: प्राचीनकालात् आरभ्य अद्ययावत् संस्कृत-साहित्यस्य बहव: कवय: स्वीय-काव्यकृतिषु प्राकृतिक-तत्त्वानां समावेशो कृतवन्त: । कविना हरेकृष्ण-मेहेरेण स्वीय-विविध-रचनासु उपर्युक्तानां विविधानां प्राकृतिक-विभावानां सुन्दरं सन्निवेशनं कृतम् । प्रकृतेः बाह्यसौन्दर्य-समेतम् अन्तःसौन्दर्यम्, कलात्मकता, साङ्गीतिकता चेत्यादयो विविधाः विषयाः कवेः रचनासु परस्परम् ओतप्रोताः परिलक्ष्यन्ते । यथास्थानं प्रयोजनानुसारं विविधानां काव्यालङ्काराणामपि संयोजनं कृतम् । कवेर्भाषा भावानुरूपा सुमधुरा शोभते । अत्र रचनासु गुणदोषविवेचने दोषावसरो न विलोक्यते । काव्यगुणाः शोभनरूपाः अनुभूयन्ते । नैसर्गिक-तत्त्वानां मनोहारित्वं, परोपकारित्वं, मानव-समाजेन सार्धं तेषां निबिड़-सम्बन्धं च दर्शयन् कविः प्रकृतेः बाह्य-सौन्दर्य-समेतम् आन्तरिक-सौन्दर्यं चित्रयति नितरां हृद्यरूपेण । कवेः सुप्रतिभायाः प्रकृष्टं वास्तविकं निदर्शनं खलु सर्वमेतत् सुरम्य-वर्णनम्।

- - - - - - - - - - -

सहायक-ग्रन्थादीनां सूची

१.ऋग्वेदसंहिता, भाष्यकार पं. ईश्वरचन्द्र, कन्हैयालालजोशी,परिमल-पब्लिकेशन्स,दिल्ली, २०११.
२. ईशादि नौ उपनिषद्, व्याख्याकार- हरिकृष्णदास गोयन्दका, गीताप्रेस, गोरखपुर.
३. ऋग्वेद संहिता, संपा. रामगोविन्द त्रिवेदी, चौखम्बा विद्याभवन, वाराणासी,१९९७.
४. मातृगीतिकाञ्जलिः, हरेकृष्णमेहेरः, कलाहाण्डि-लेखक-कला-परिषद्, ओड़िशा, १९९७.
५. जीवनालेख्यम्, हरेकृष्ण-मेहेरः
६. पुष्पाञ्जलिविचित्रा, हरेकृष्ण-मेहेरः
७. सौन्दर्य-सन्दर्शनम्, हरेकृष्ण-मेहेरः.
८. हासितास्या वयस्या, हरेकृष्ण-मेहेरः
९. संस्कृतमञ्जरी, जुलाई-सितम्बर, २००५, दिल्ली संस्कृत अकादमी, दिल्ली.
१०. काव्यसंजीवनी (संस्कृत-कविता-संकलनम्) अङ्कः-१, २०१५, संस्कृतविभागः, उत्कल-विश्वविद्यालयः, भुवनेश्वरम्, ओड़िशा.
११. पद्यबन्धा (समकालिक-संस्कृतकविता-पत्रिका, ISSN: 2278-4888), स्पन्दः-९, २०१६, वीणापाणि-संस्कृत-समितिः, भोपालम्, मध्यप्रदेशः.
१२. हरेकृष्ण-मेहेरः (जालस्थानम्- www.hkmeher.blogspot.com)
१३. हरेकृष्ण-मेहेरस्य संस्कृत-रचनावली : (अन्तर्जाले) :
* Contributions of Harekrishna Meher to Sanskrit Literature : Link :
http://tapasvini-kavya.blogspot.com/2013/04/contributions-of-drharekrishna-meher-to.html
१४. आधुनिक-संस्कृतसाहित्येतिहासः, देवर्षि कलानाथ शास्त्री, जयपुर, प्रकाशन २००४.

डा. सस्मिता साहुः

Sasmita Sahu
Junior Lecturer In Sanskrit,
Panchayat College, Bargarh, Odisha
sasmitasahu80@gmail.com

***

कालिदासीये विक्रमोर्वशीये रूपके अद्भुतरसस्य प्रयोगसमीक्षणम्

- सोमनाथ-चट्टोपाध्यायः

शोधसारः -

'न हि रसादृते कश्चिदर्थः प्रवर्तते'। रसो हि काव्यस्य प्राणभूतः पदार्थः। आचार्यस्य भरतस्य मतानुसारेण आदिरसास्तावच्चत्वारः। तद्यथा शृङ्गार-वीर-रौद्र-बीभत्साश्च। वीररसाज्जायते अद्भुतरसः । दर्पणकारेणोक्तं – 'रसो लोकोत्तरचमत्कारप्राणः'। अत्र चमत्कारस्य अर्थो विस्मयः। तेनोक्तम् - 'चमत्कारश्चित्तविस्ताररूपो विस्मयपरपर्य्यायः' । भरत-धनञ्जय-विश्वनाथाद्यालंकारिका रसस्यास्य गुरुत्वं स्वीकुर्वन्ति। ते मन्यन्ते 'कार्यं निर्वहणेऽद्भुतम्'। अर्थात् नाटकस्यान्ते अद्भुतरसस्यावस्थितिः नाट्यकौशलदृष्ट्या आवश्यिकीति निर्देशः। परमुल्लेख्यं यदद्भुतरसमङ्गीकृत्य किमपि नाटकं न रचितम्। परं मयैका कालिदासस्य विक्रमोर्वशीयमिति रूपकात् पञ्चधा अद्भुतरसगर्भितान् दृष्टान्तान् उद्धृत्य प्रमाणीकर्तुम् इष्यते यत् कालिदासेन नाट्यतात्त्विकनिर्देशानुसारमेव अद्भुतरस्य प्रयोगः अकारि । प्रतिक्षेत्रं रसस्यास्य प्रयोगः अपृथग्यत्ननिर्वर्त्यः। यद्यपि इह काव्ये अद्भुतरसस्य अङ्गित्वं नास्ति तथापि कवेरस्य नैपुण्यादेव रसोऽयं लोकोत्तीर्णतां गत इत्यत्र नास्ति संशयः कश्चित्। अत्रैव कालिदासस्य श्रेष्ठत्वं रसप्रयोगविधौ।

0.1. भूमिका -

उच्यते – 'न हि रसादृते कश्चिदर्थः प्रवर्तते'। रसो हि काव्यस्य प्राणभूतः पदार्थः। सर्व्वे आलंकारिकाः रसमेव हि काव्यस्य मुख्योपजीव्यमिति कथयन्ति। रससंख्यानिर्णये आलंकारिकेषु वैमत्यम् अस्तीत्यपि रसालोचनं भरतस्य नाट्यशास्त्रे प्रथममेव प्राप्तमिति सत्यं परं नन्दिकेश्वर एव रसस्य आद्याचार्यः इति - 'रूपकनिरूपणीयं भरतः रसाधिकारिकं नन्दिकेश्वरः'। तेनोक्तम् –

"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः"[1]।।

---

[1] *नाट्यशास्त्रम्* (षष्ठाध्यायः)

CC BY

पुनश्च, आलंकारिकेषु सारभूतरसविषये वैमत्यं दृश्यते। वैद्यनाथेन निगदितं - शृङ्गार एव सारभूतः रसः। तेनोक्तम् -'शृङ्गारैको रसः'। विश्वनाथस्त्वद्भुतरसं मूलीभूतं रसं वदति। आचार्यस्य भरतस्य मतानुसारेण आदिरसास्तावच्चत्वारः। तद्यथा शृङ्गार-वीर-रौद्र-बीभत्साश्च। वीररसाज्जायते अद्भुतरसः । दर्पणकारेणोक्तं – 'रसो लोकोत्तरचमत्कारप्राणः'। अत्र चमत्कारस्य अर्थो विस्मयः। तेनोक्तम् - 'चमत्कारश्चित्तविस्ताररूपो विस्मयपरपर्य्यायः'[2]। आलंकारिको नारायणः अद्भुतरसः एव रसः इति स्वीचकार ।

नाटकेषु साधारणतया अयमद्भुतरसः अङ्गरसरूपेण विराजते। कालिदासस्य नाटकानि सामाजिकानां मनसि शृङ्गाररसस्य नाटकरूपेण प्रतिष्ठितानि। भवभूतिना विरचितम् उत्तररामचरितं नाटकं करुणरसप्रधानम्। कृष्णमिश्रस्य प्रबोधचन्द्रोदयं नाटकं शान्तरसप्रधानम्। शूद्रकस्य मृच्छकटिकं शृङ्गाररसस्य प्रकरणम्। विशाखदत्तस्य मुद्राराक्षसं वीररसप्रधानम्। नाट्यतत्त्वानुसारतः शृङ्गार-करुण-हास्य-वीररसाः अङ्गिरसरूपेण संस्कृतनाटकेषु विराजन्ते। तथापि संस्कृतनाट्यतत्त्वे अद्भुतरसस्य विशिष्टं स्थानं दृश्यते। भरत-धनञ्जय-विश्वनाथाद्यालंकारिका रसस्यास्य गुरुत्वं स्वीकुर्वन्ति। ते मन्यन्ते 'कार्यं निर्वहणेऽद्भुतम्'। अर्थात् नाटकस्यान्ते अद्भुतरसस्यावस्थितिः नाट्यकौशलदृष्ट्या आवश्यकीति निर्देशः। परमुल्लेख्यं यदद्भुतरसमङ्गीकृत्य किमपि नाटकं न रचितम्। परम् इह प्रबन्धे कालिदासस्य विक्रमोर्वशीयमिति रूपके अद्भुतरसस्य प्रयोगविधिः पर्यालोच्यतेऽस्माभिः।

0.2. विक्रमोर्वशीये रूपके अद्भुतरस्य कतिचित् स्थलानि

महाकविना कालिदासेन विक्रमोर्वशीयमिति नाटके नवरसेष्वद्भुतस्य प्रयोगवैचित्र्यं समुपवर्णितम्। तत्र पञ्चमाङ्के अप्यद्भुतरसस्य प्रयोगो नः नयनयोरापतति । तत्र दिङ्मात्रम् उदाहरणं तावत् -

"कञ्चुकी – जयतु जयतु देवः।
अनेन निर्भिन्नतनुः स बध्यो बलेन ते मार्गणतां गतेन।
प्राप्तापराधः सहसान्तरीक्षात्समौलिरत्नः पतितः पतत्री"[3]।। इति
(सर्वे विस्मयं रूपयन्ति)

कञ्चुकी सशरं मुनिना सह प्रवेशयति नृपस्य कक्षाभ्यन्तरम्। भर्त्तुरत्यन्तरविलासि-मौलिरत्नयोग्यं गृध्रेण आक्षिप्तम्। ततस्तस्य गृहस्य शान्तिरूपेण नृपो बाणसंयोगश्चकार।

---

[2] *साहित्यदर्पणः* (तृतीयः परिच्छेदः)
[3] विक्रमोर्वशीये पञ्चमाङ्कस्य षष्ठश्लोकः

बाणेन विदारितः सन् तस्करविहङ्गो वसुधातलात् पतति। ततः सर्वे समुपस्थिता राजपुरुषा तस्करविहङ्गं पश्यन्ति। विहङ्गस्य विचित्राकृतिं दृष्ट्वा सर्वे राजपुरुषा विस्मयाभिभूता जाता इति कृत्वायं प्रकारो विस्मयजः अद्भुतरस एव।

अस्मिन् अंशे 'स बध्या बलेन' इत्युक्त्या स इति पतत्री बोधनात् विभावनोद्रेकात् आलम्बनविभावः। अपि च 'अनेन निर्भिन्नतनुः स बध्या' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च अस्मिन् अंशे श्लाघाप्रकाशनात् अनुभावः। किञ्च अत्र विस्मयेन रोमाञ्चभावप्रकाशनात् व्यभिचारिभावः सूच्यते ।

अद्भुतरसभरितं द्वितीयम् उदाहरणं प्रस्तौमि -

"राजा – भगवति अभिवादये।

तापसी – महाभाग, सोमवंशविस्तारयिता भव। (आत्मगतम्) अहो अनाख्यातोऽपि विज्ञातोऽस्य राजर्षेरौरसः सम्बन्धः। (प्रकाशम्) जातः प्रणम्य ते गुरुम्। (कुमारश्चापगर्भमञ्जलिं करोति)

राजा – आयुष्मान् भव।

कुमारः – (आत्मगतम्)

"यदि हार्दमिदं श्रुत्वा पिता ममायं सुतोऽहमस्येति।

उत्सङ्गवर्धितानां गुरुषु भवेत् कीदृशः स्नेहः"[4]।। इति

अस्मिन् अंशे 'राजर्षेरौरसः' इत्युक्त्या राजर्षिरूपालम्बनविभावनोद्रेकात् आलम्बनविभावः। अपि च 'कुमारश्चापगर्भमञ्जलिं करोति' इत्यंशे अङ्गुलिसञ्चालनात्मकाद् भावप्रकाशनात् अनुभावः। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते ।

पुनश्च दृश्यते यत् –

"राजा – भगवति, किमागमनप्रयोजनम्। तापसी – शृणोतु महाराजः। एष दीर्घायुर्वायुर्जातमात्र एवोर्वश्या किमपि निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः। यत् क्षत्रियकुमारस्य जातकर्मादिविधानां तदस्य भगवता च्यवनेनाशेषमनुष्ठितम्। गृहीतविद्यो धनुर्वेदे च विनीतः।

[4]विक्रमोर्वशीये पञ्चमाङ्कस्य दशमश्लोकः

cc BY

राजा – सनाथ खलु संवृत्तः।

तापसी – अद्य पुष्पसमिदर्थमृषिकुमारकैः सह गतेनानेनाश्रमविरुद्धमाचरितम्।

विदूषकः – कथमिव।

तापसी – गृहीतामिषः किल गृध्रः पादपशिखरे निलीयमानो लक्ष्यीकृतो बाणस्य।

(विदूषको राजानमवलोकयति)

राजा – ततस्ततः।

तापसी –ततः उपलब्धवृत्तान्तेन भगवता च्यवनेनाहं समादिष्टा निर्यातया हस्तन्यासमिति। तदिच्छाम्युर्व्यशीं प्रेक्षितुम्"[5]।

पुरुरवसा सह पुत्रेण साक्षात्कारोऽत्र वर्णितः। तत्र राजर्षिभ्यां समं कुमारस्य सादृश्यं दृष्ट्वा तापसी आश्चार्यान्विताभवत्। अपरिचितेनापि राज्ञा सह बालकस्य कोऽपि सम्बन्धो वर्तते इत्यात्मगतं मन्यते तापसी। परन्तु लोकपवादात् सा तन्न प्रकाशयति। राज्ञा तापसीमुखात् कुमारस्य जन्मवृत्तान्तो ज्ञातः। महर्षिश्च्यवणः कुमारस्याभिभावक इति ज्ञात्वा राजर्षिः परमानन्दितोऽभवत्। पुरुरवा कुमारस्य महावीरत्वं तापसीमुखाच्छ्रुत्वा स्वयं विस्मयान्वितोऽभवत्। अयं प्रकारको विस्मयोऽद्भुतरसस्य जनकः।

अस्मिन् अंशे 'पादशिखरे निलीयमानो' इत्युक्त्या विभावनोद्रेकात् आलम्बनविभावः। अपि च 'लक्ष्यीकृतो' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पञ्चमाङ्के पुनश्च दृश्यते यत् –

"(सर्वे दृष्टिविघातं रूपयन्ति)

राजा – (आकाशमवलोक्य) किं नु खलु निरभ्रे विद्युत्सम्पातः।

उर्वशी – (विलोक्य) अम्मो भगवान् नारदः"[6]।

आकाशे सहसा विद्युत्सम्पातो दृश्यते। विद्युत्सम्पातमाध्यमेन नारदस्यागमनवार्त्ता सूचिता। निर्मले आकाशे विद्युत्सम्पातोऽस्वाभाविकः। अतिथेरागमनवार्त्ता विद्युत्सम्पातेन सूचितेत्यलौकिकः। महर्षिर्नारदो न साधारणपुरुषः। स एव दिव्यः पुरुषः। दिव्यपुरुषदर्शनजनितो विस्मयोऽद्भुतरसस्य जनकः। तत्रभवतालंकारिकेण हेमचन्द्रेनोक्तम् - 'दिव्यदर्शनादिविभावो नयनविस्ताराद्यनुभावो हर्षादिव्यभिचारी विस्मयोऽद्भुतः'[7] इति।

---

[5]विक्रमोर्वशीये पञ्चामाङ्के

[6]विक्रमोर्वशीये पञ्चमाङ्के

[7] काव्यानुशासनम्

उर्वशी महर्षिं नारदं दृष्ट्वा चमकिता जाता। नारदं दृष्ट्वा सर्वे विस्मिता भवन्ति। अयम्प्रकारको विस्मयः चमत्कारः। अयञ्चमत्कारोऽद्भुतरस एव।

अत्र कालिदासेन कृतं दिव्यवस्तु-प्रयोगदर्शनेन अद्भुतरसप्रयोगवैचित्र्यं हेमचन्द्रसम्मतम्। अस्मिन् अंशे 'निरभ्रेविद्युत्सम्पातः' इत्युक्त्या दिव्यपुरुषं नारदमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'विद्युत्सम्पातः' इत्यंशे दिव्यभाव विभावनोद्रेकात् उद्दीपनविभावः। अपि च नेत्रविकासप्रकाशनात् अनुभावः। किञ्च अंशेऽस्मिन् विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावः सूच्यते।

पुनश्च दृश्यते यत् –

"नारदः – त्रिकालदर्शिभिर्मुनिभिरादिष्टः सुरासुरविमर्दो भावी। भवांश्च सांयुगीनः सहायो नः। तेन त्वया न शस्त्रं संन्यस्तव्यम्। इयं चोर्वशी यावदायुस्तव सहधर्मचारिणी भवत्विति।

उर्वशी – (अपवार्य) अहो शल्यं मे हृदयादपनीतमिव"[८]।

अत्र दृश्यते यद् उर्वशी नारदस्यागमनवार्त्तां श्रुत्वा चकिता सञ्जाता। नारदेनोक्तं यद्देवासुरयोर्युद्धे पुरुरवो देवतायाः प्रधानरूपेण सहायकः। अतएव अत्र तेन न शस्त्रं संन्यस्तव्यम्। पञ्चमाङ्के नृपस्य पुत्रदर्शनकारणात् पुनः विप्रलम्भशृङ्गाररसः सहृदयैर्मनसानुभूयते। नाट्यकारेण चातुर्य्येणाद्भूतरसप्रयोगेणास्य विप्रलम्भरसस्य प्रसङ्गो निवारितः। अङ्केऽस्मिन् इन्द्रस्य संवादेन नारदस्योपस्थितिरद्भुतरसात्मिकीति प्रतीयते। उर्वशी सर्वदैवपुरुरवसः सहधर्मिणी स्थातव्येति वार्त्तेन्द्रेण दत्तेत्युक्तं नारदेन। वार्त्तामिमां श्रुत्वा उर्वशी आश्चर्यान्विताभवत्। वानप्रस्थग्रहणेच्छुं राजानं निवारयितुं नारदवृत्तान्तोऽङ्केस्मिन्नावश्यकः। अयं वृत्तान्तः सत्यमेव विस्मयसूचकः। अयम्प्रकारो विस्मयोऽद्भुतरसस्य उत्स एव।

अस्याद्भुतरसस्य आश्रयो नारदः। आलम्बनविभावस्तावद् उर्वशीति। इन्द्रस्य संवादः उद्दीपनविभावः। अपरा भावा अपि विलसन्त्यत्र। एतेन अद्भुतरस उद्भवति। अंशेऽस्मिन् 'त्रिकालदर्शिभिर्मुनिभिः' इत्युक्त्या मुनिमालम्ब्य विभावनोद्रेकात् आलम्बनविभावः। अपि च 'सुरासुरविमर्दीभावी' इत्यंशे विभावनोद्रेकात् उद्दीपनविभावः। एवञ्च पुलकभावप्रकाशनात् अनुभावः दृश्यते। किञ्च अस्मिन् अंशे विस्मयेन हर्षभावप्रकाशनात् व्यभिचारिभावोऽपि सूच्यते।

उपसंहृतिः

इत्थं महाकविना कालिदासेन बहुत्रैव अद्भुतरस्य प्रयोगाः कृताः। प्रतिक्षेत्रं रसस्यास्य प्रयोगः अपृथग्यत्ननिर्वर्त्यः। यद्यपि इह काव्ये अद्भुतरसस्य अङ्गित्वं नास्ति तथापि कवेरस्य

---

[८]विक्रमो. (पञ्चमाङ्कः)

CC BY

नैपुण्यादेव रसोऽयं लोकोत्तीर्णतां गत इत्यत्र नास्ति संशयः कश्चित्। अत्रैव कालिदासस्य श्रेष्ठत्वं रसप्रयोगविधौ। य़द्यपि उच्यते – उपमायां कालिदासः सर्वान् कविवरान् अतिशेते, तथापि रसप्रयोगे विशेषेण अद्भुतरस्य व्यवहारे काल्याः दासः कालिदासः अद्वितीय इत्यपि निश्चितम् ।

परिशीलितग्रन्थानुक्रमणी

- Bharatamuni. *Nāṭyaśāstra*. Ed. R.S. Nagar. vols.1. Delhi :Parimal Publications, 1981.
- Viśvanātha. *Sāhityadarpaṇa*. Ed. P.V. Kane. Delhi : MLBD, 1974. (Edn-VI).
- Kālidāsa. *Vikramorvaśīya.* Ed. Sitanath Acharya and Devakumar Das. Kolkata : Sanskrit PustakBhandar, Edn-1st 1999.
- Kālidāsa. *Vikramorvaśīya.* Ed. M.R. Kāle with a new Sanskrit Comm and Arthaprakashka, various Readings, Introduction, A literal translation, Exhaustive notes in English and Appendices. Delhi : MLBD. XI EDn 1967. Rpt.-1991.
- Kālidāsa. *Vikramorvaśīya.* Ed. Shankar PāndurangPandit and Bhāskar Rāmchandra Arte with English Notes containing extracts prom two commentaries. Bombay (Now Mumbai) : Government Central Book Depot, 1901. Edn-III. (BSS No XVI).

डा. सोमनाथ-चट्टोपाध्यायः

Dr. Somnath Chattopadhyay

Assistant Professor, Dept. of Sanskrit,

Shyampur Siddheswari Mahavidyalaya, Howrah, West Bengal

chattopadhyay.somnath43@gmail.com

***

"प्राची प्रज्ञा" (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

जम्मूकाश्मीरप्रान्तस्य भौगोलिकचित्रणम्

- हेमराजः

शोधसारः

महिमभट्टस्यानुमितिवादः, क्षेमेन्द्रस्यौचित्यवादश्च काश्मीरराज्यस्य पावनधरायामेव उद्भूताः। व्याकरणशास्त्रस्य अनेके वैयाकरणाः काश्मीरराज्यस्य गौरवं वर्धितवन्तः। वामनः जयादित्यः-चन्द्रगोमी-क्षीरस्वामीप्रभृतयः महाप्रकाण्डविद्वांसः काश्मीरराज्यं भूषितवन्तः। अवन्तिवर्मा-जयापीड़-प्रवरसेनः-मातृगुप्तादयः राजानः स्वख्यातिं संस्कृतसाहित्यस्य सेवकरूपेण प्रसारितवन्तः। एतादृशं वैशिष्ट्यं विलोक्य कस्य हृदयं काश्मीरराज्यस्य विषये ज्ञातुं व्याकुलो न भवेत्। अस्य विस्तृतमध्ययनं कर्तुं मम जिज्ञासा अपि सञ्जाता । तत्र प्रो. सूर्यमणिरथ महोदयाणां विशिष्टरीत्या विलिखतम् आधुनिकमैतिहासिकं खण्डकाव्यं "काश्मीरोदयम्" वर्तते। अस्मिन् खण्डकाव्ये काश्मीरस्य प्रादुर्भावात् वर्तमानकालं यावत् वर्णनं वर्तते। काश्मीरप्रान्ते विद्यमानप्रसिद्धस्थलेषु शोभायमानं श्रीनगरं डलहृदः श्रीवैष्णोदेवी कैलाशपर्वतश्च विख्यातः वर्तते।एतानि स्थानानि सर्वेषां मनांसि आकर्षन्ति। काश्मीरस्य भौगोलिकं चित्रणं ज्ञातुं सर्वेषां जिज्ञासा भवति । एतस्मिन् शोधपत्रे काश्मीरप्रान्तस्य भौगोलिकवातावरणस्य चित्रणं कृतमस्ति। काश्मीरस्य भौगोलिकवातावरणं ज्ञातुम् एतत् शोधपत्रं सहायकं भविष्यति इति मत्वा भवतां सविधे पत्रमिदं प्रस्तूयते।

काश्मीरेति शब्दस्य नामकरणं कथं जातम् इति विषये कथितम् प्रकाशनार्थे कश् धातुः मुडागमात् ऊरन् इति प्रत्ययत्वात् काश्मीर इति शब्दः सिद्धयति। अस्यार्थः यः देशः सर्वदा प्रकाशमयः भवति। तदनन्तरं काश्मीरस्य निर्माणं केन कृतम्। "काश्मीरनामकरणे नीलमुनेः कथनमस्ति यत् केन (प्रजापतिना, कश्यपेन) निर्माणं कृतम्। द्वितीयमतमस्ति यत् काश्मीरे

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

प्रभूतं जलमासीत् तानि जलानि भगवान् हरिः निष्कासितवान् अतः देशस्यास्य नाम काश्मीरः इति सञ्ज्ञातः।[1]

भारतदेशस्य सीमानिर्धारणविषये कविः प्रो.सूर्यमणिरथमहोदयः काश्मीरोदयमिति ऐतिहासिकखण्डकाव्ये कथयति यत् अयं भारतदेशः पूर्वसमुद्रात् पश्चिमसमुद्रं यावत् व्याप्तः वर्तते। भारतदेशस्य मध्यभागे विन्ध्यपर्वतःमेखलारूपेण विराजते।अस्य भारतदेशस्य उत्तरस्यां दिशि दण्डायमानः हिमालयपर्वतः मस्तकमिव शोभते।हिमालयपर्वतसमीपे उत्तरस्यां दिशि एकः पर्वतराजितःभूभागः काश्मीरः इति नाम्ना प्रसिद्धो वर्तते।[2] काश्मीरराज्य भौगोलिकवर्णनं कुर्वन् कविः कथयति यत् अत्र पवित्रवितस्तानदी प्रवहति नद्यास्तटः उर्वरभूमियुक्तः वर्तते।ऋग्वेदस्य नदीसूक्ते एतस्योल्लेखः वर्तते।[3] ततः परं कविः काश्मीरप्रान्तस्य महाभारतकाले विद्यमाननृपगोनन्दस्य राज्यसीमायाः वर्णनं करोति ।अनेन काश्मीरस्य भौगोलिकस्थितेः ज्ञानं भवति।गोनन्दस्य राज्यसीमा गङ्गानद्याः पवित्रप्रवाहभूभागात् आरभ्य कैलासपर्वतं यावत् व्याप्तधान्यगोधूमादि शस्यशोभितासीत्। हिमालयपर्वस्य पादक्षेत्रे विद्यमानः भूभागः गोनन्दस्याधीने आसीत् । अर्थात् काश्मीरप्रान्तस्य सीमा एतावत् विस्तृता आसीत्।[4] अग्रे कविः कथयति यत्

---

1 . कः प्रजापतिरुद्दिष्टः कश्यपश्च प्रजापतिः।
तेनासौ निर्मितो देशः काश्मीराख्यो भविष्यति।
कं वारि हरिणा यस्माद् देशादस्मादपाकृतम्।
काश्मीराख्यं ततः पश्य नाम लोके भविष्यति।   नीलमतपुराणम्, श्लो. २२६-२२७, पृ.सं. – ५९

ख.कश्चित् प्रकाशनगतः ‘कश ’धातुरस्ति – काश्मीरनामकरणं कुरुते यथार्थम् (का पृ.सं.44 श्लोकसंख्या-35)

2 पूर्वापरौ जलनिधी स्पृशतः प्रभूतैर्नैसर्गिकैश्च विभवैर्लसतः समन्तात्।
विन्ध्याद्रिकल्पितमनोहरमेखलस्य यस्यास्ति मस्तकसमः सुमहान् हिमाद्रिः।।31
एतादृशेन विभवेन विभूषितस्य तस्यास्ति पर्वतविराजितभूरुदीच्याम्।
काश्मीर इत्यभिधया जनमानसेषु ख्यातिं चिराय विमलां परितो वहन्ती।।32 काश्मी पृ.स.41,42

3 नित्योर्वरे नयनसौख्यकरे वितस्तातीरे तरुव्रततिपुञ्जनिकुञ्जरम्यः।
देशोऽयमुन्नततरः श्रुतिकीर्तितश्च संशोभते प्रकृतिवैभवपुष्टकायः।।34 काश्मीरोदयम् पृ.स.43

4 गङ्गाप्रवाहपरिपूतवसुन्धरायाः कैलासपर्वतमुमावसतिं च यावत्।
व्याप्य स्थितं विपुलभूतलमप्रमेयं शस्यादिभिर्विलसितं यदधीनमासीत्।।38 काश्मीरोदयम् पृ.स.46

बौद्धधर्मावलम्बीसत्यप्रियाशोकः सर्वान् म्लेच्छान् पराजित्य एकं स्वर्गकान्तियुक्तं नगरं निर्मितवान् ।एतन्नगरं विविधभास्कर्यशिल्पकलादिभिः निर्मितमासीत् ।एतन्नगरं श्रीनगरमित्याख्यो वर्तमानसमयेऽपि काश्मीरे विराजते । अत्राशोकः प्रजाहिताय स्वराजकोषात् धनव्ययं कृत्वा 96लक्षगृहाणि निर्मीय प्रजाजनेभ्यः प्रदत्तवान्।एतदपि काश्मीरस्य भौगोलिकस्थितिं प्रदर्शयति।[5]

अशोकस्य पुत्रः जलौकाः इति काश्मीरे विख्यातमुन्नतरञ्च नगरं प्रतिष्ठापितवान्। तस्य नगरस्य नाम कनिष्कपुरमिति आसीत् ।[6]काश्मीरराज्ये 108 तमे ख्रीष्टाब्दे प्रवरसेनः शासकत्वेन शासनमकरोत्।तस्य साम्राज्यं पूर्वसमुद्राराभ्य पश्चिमसागरं यावत् व्याप्तमासीत्।[7]काश्मीरे शङ्करवर्माख्यःशासकः युवावस्थायां यदा विवाहयोग्यःजातःतदा उत्तरापथराज्यस्य राज्ञःश्रीस्वामिराजस्य सुगन्धाख्यां सुन्दरकन्यां परिणीतवान् ।पूर्वं भारतस्य प्राचीनग्रन्थेषु जम्बूद्वीपस्य उत्तरभागस्य नामुत्तरापथेति आसीत्।यत् पूर्वक्षेत्रताम्रलिप्तिकातः(तामलुकतः)पश्चिमक्षेत्रे तक्षशिलायाः मध्येशियाभागे बल्खक्षेत्रं यावत् विस्तृतमासीत्।[8] 1112तमे ख्रीष्टाब्दे सुस्सलः काश्मीरस्य नृपः अभवत् । कतिचन् वर्षानन्तरं काश्मीरराज्यं विशृङ्खलितम् अभवत्। शनैः शनैः तत्र तस्य प्रभावः ह्रासमागतः। सुस्सलः अपमानितः सन् प्राणरक्षणाय काश्मीरात् लोहरदुर्गं पलायितः।तदा नगराधिपः कनकसिंहः भोजपुत्रं भिक्षाचरं काश्मीरराज्ये राजानम् अकरोत। [9]अत्रापि भौगोलिकवर्णनं वर्तते।यदा

---

[5]श्रीपूर्वकं नगरमाढ्यमतीवरम्यं संस्थापितं सुकृतिनां प्रमुखेन तेन।
अद्यापि यल्लसति नाकसमानकान्ति भास्कर्यसांस्कृतिकशिल्पकलाप्रशस्ति।47
तस्मिन् पुरे बहुधनान्युपयुज्य राजा रम्याणि षण्णवतिलक्षगृहाणि चक्रे।
राज्ञां किमस्ति जनतासुखमन्तरेण कार्यं पृथग् गुरुतरं धरणीतलेऽस्मिन्।।48 काश्मीरोदयम् पृ.स.54,55
[6]तस्मात्परं कतिपयेषु गतेषु वर्षेष्वाविर्बभूव सुगतानुगतः कनिष्कः।
काश्मीरवक्षसि तदा निरमापयद् यो विख्यातमुन्नतकनिष्कपुरं स्वनाम्ना।।50काश्मीरोद पृ.स.56
[7]दिव्यैर्गुणैर्विलसितः प्रबलप्रतापो राजा ततः परमजायत वैरतापः।
आरभ्य पूर्वजलधेरपरं च यावत् सर्वान् प्रवरसेन इति प्रसिद्धः।।58 काश्मीर.पृ.स.63
[8] श्रीस्वामीराजतनयां स युवा सुगन्धामर्धाङ्गिनीमलभतोत्कटकामगन्धाम्।
या राजकोशसचिवं विधवा मदान्धा पश्चात्प्रभाकरमचीकमत स्मरान्धा।।74 काश्मी.पृ.75
[9]केनापि कारणवशेन जनेषु तस्मिन् वीतस्पृहेषु निखिलेषु युवाऽधिचक्रे।
भिक्षाचरो नृपतितामथ भोजपुत्र उच्चैः पदं स्थिरतरं जनरञ्जनेन।।104 काश्मी.पृ.100

CC BY

यूसुफशाहःकाश्मीरस्य नृपः आसीत् तदा दिल्ल्याम् आकबरस्य शासनमासीत् ।यूसुफशाहः आकबरस्य दिल्ल्यां शासनं सुदृढीकरणसमये तस्य सहाय्यार्थं दिल्लीमगच्छत्। [10]अत्र काश्मीरराज्यस्य सीमान्तदिल्लीप्रान्तेन सार्धं मित्रता परिदृश्यते।कविः काश्मीरस्य भौगोलिकस्थितिं वर्णयन् अग्रे कथयति यत् काश्मीरस्य परिसीमायां शोभमानः तापीसरित् जलैः पवित्रितः दुर्गरः(जम्मू) इति एक देशः वर्तते।एतस्यार्थः जम्मूकाश्मीरप्रान्ते "तापीनदी " (तव्वीनदी) प्रवहति।[11] कविः अग्रे काश्मीरस्य भौगोलिकं वर्णनं कुर्वन् लिखति यत् यदा काश्मीरे महाराजश्रीरणजित्सिंहस्य शासनमासीत् तदा तस्य प्रमुखसेनापतिगुलाबसिंहः आसीत्।महाराजरणजित्सिंहः स्व यमालयं गमनात् पूर्वं जम्मूनगरस्य समीपवर्तिनःअखनुर इति स्थानस्य निकटे प्रवहन्त्याःचन्द्रभागा(चेनाव) इति नद्याः तटे गुलाबसिंहं जम्मूकाश्मीरप्रान्तयोः राजानमुद्घोषितवान्।जम्मू इति गुलाबसिंहस्य पैतृकराज्यमासीत्। काश्मीरराज्यं तु तेन प्राप्तं राज्यमासीत्।[12]अष्टादशे वयसि पण्डितकर्णसिंहः जम्मूकाश्मीरस्य राजरूपेण घोषितः ।यदा सः विवाहयोग्यः सञ्जातः तदा 5मार्च1950तमे ख्रीष्टाब्दे सीमान्तनेपालप्रान्तस्य नेपालराजस्य दुहितरं यशोराजलक्ष्मीं परिणीतवान्।[13]काश्मीरस्य भौगोलिकवर्णनं कुर्वन् कविः कथयति यत् काश्मीरे श्रीनगराख्यं सुरमनोहरं नगरं वर्तते। तस्मिन् नगरे विशालःडालह्रदःविद्यमानो वर्तते।काश्मीरभ्रमणार्थमागताः पर्यटकाः नौकामाध्यमेन अस्मिन् ह्रदे नौकाविहारं कृत्वा आनन्दमनुभवन्ति।वर्तमानसमयेऽपि स्थानमिदं काश्मीरे विराजते।[14]अग्रे कविः कथयति यत् काश्मीरे कैलासपर्वतःवर्तते तस्मिन् पर्वते महादेवशिवशङ्करस्य विग्रहः तुषारलिङ्गरूपेण विराजमानो भवति ।तत्रैव

---

[10]दिल्लीपतेरकवरस्य च सेवनार्थम् अस्मिन् गते तनयपुङ्गव एतदीयः।
याकूव इत्यभिधया प्रथितोऽतिवीरः सिंहासनं झटिति दुर्लभमारुरोह।।122 का.पृ.115

[11] काश्मीरदेशपरिसीमसमीपवर्ती तापीसरिज्जलसुधाकणकृत्यपूर्तिः।
पूतःसुसंस्कृतजनःश्रुतिवित्तपूर्णः स्वाध्यायतुन्दिलितदुर्गदेश आस्ते।।142 का.पृ.131

[12] संपूर्णराजगुणवान् स गुलावसिंहनामा वलाधिपतिरर्जितभूरिकीर्तिः।
याते दिवं विधिवशान्नृपतावमुष्मिन् काश्मीरभूमिवनितां ललितामवाप।।144 का.पृ.133

[13]नेपालराजदुहिताऽखिलसद्गुणाढ्या यत्पाणिपीडनमवाप्य मुदा नतास्ति।
पुत्रद्वयस्य दुहितुश्च वशंवदस्य यो भूषितः पितृतयाऽमितयापि दिष्ट्या।।153 का.पृ.141

[14]डालह्रदो लसति पर्वतपाददेशे भूस्वर्गभूमिवलये स्वतनुं वितन्वन् ।
देशान्तराधिगतपर्यटकैः परीते यन्नोडुपेषु पणनं क्रियते वणिग्भिः।156 का.पृ.143

उन्नतपर्वतैःआवेष्टितःअत्यन्तदुर्गमः मानसरोवरःविद्यते।भगवता मानवकल्याणाय अस्य निर्माणं कृतमस्ति।काश्मीरभूमौ डालह्रदः जनानां मनोविनोदाय निर्मितमिति।[15] अग्रे कविः भौगोलिकवर्णनं कुर्वन् कथयति यत् काश्मीरे श्रीनगरस्य निकटवर्तिस्थानेषु पहलगाम् इति विख्यातं स्थानं वर्तते। पहलगाम् इति स्थाने आवुभालिः वेतावभालिरिति चित्ताकर्षकं स्थानद्वयमस्ति।अत्रैव चन्दवाडि इति प्रसिद्धं स्थानं वर्तते। इतः अमरनाथयात्रा प्रारभ्यते।श्रद्धालवः शिवस्य दर्शनार्थं प्रतिवर्षम् आगच्छन्ति।[16]श्रीनगरात् किञ्चित् दूरे गोलमार्गः सोनमार्गश्चेति स्थानद्वयं शोभायमानं वर्तते।तत्र देवदारु पाइन्जातीयवृक्षाःशोभन्ते।[17] काश्मीरस्य भौगोलिकवर्णनं कुर्वन् कविः प्रतिपादयति यत् काश्मीरभूमिः उत्कृष्टसेवनास्पातिप्रभृतैःफलैः केसरकुङ्कुमाख्यैःबहुमूल्यपदार्थैः सुशोभते।[18] एतस्याभिप्रायः यत् एतैः पदार्थैः काश्मीरभूमेः परिज्ञानं भवति। अग्रे कविः काश्मीरस्य भौगोलिकस्थितिं वर्णयन् कथयति यत् काश्मीरराज्य सीमया सार्धं प्रतिवेशिपाकिस्तानदेशस्य सीमा वर्तते। यतः पाकिस्तानदेशःभारतदेशे आतङ्कमुत्पादयितुं सर्वदा प्रयासं करोति।भारतदेशस्य सीमायां देशरक्षार्थं नियोजितसैनिकान् विस्फोटकपदार्थेन घातकाक्रमणैः मारयति। अस्माकं देशस्य सैनिकाः तेषाम् आक्रमणानां प्रत्युत्तरं पराक्रमेण यच्छन्ति।[19]अग्रे कविः प्रतिपादयति यत् केशरकुङ्कुमशालिधान्याङ्गुरसेवनास्पातिप्रभृतिभिः पदार्थैः सुशोभितं जम्मूकाश्मीरं तु भारतदेशस्य मस्तकरूपेण विराजते।उन्नपर्वतैः

---

[15]कैलासपर्वतधरोपरि राजमानं कस्यापि दुर्गमतया भुवि नोपकारम्।
विस्तारयन्नपघनं घननीरपूर्णो यो मानसं हसति पद्मवनच्छलेन।।157 का.पृ.144

[16] यत्पार्श्ववर्ति विधिनिर्मितमस्ति हृद्यं स्थानं सदा पहलगामिति दर्शनीयम्।
वेतावभालिरवुभालिरिति प्रसिद्धं यस्मिन् विराजति च चन्दनवाटिकाऽपि।161
नैसर्गिकं च गिरिमूर्धनि राजमानं मुक्तिप्रदायकमपूर्वमतीवरम्यम्।
भक्ता जना अमरनाथतुषारलिङ्गं द्रष्टुं व्रजन्ति किल चन्दनवाटिकातः।।162का.पृ.सं 146,147

[17]स्वच्छाम्बुनिर्झरजनादविमण्डिताङ्गश्चेतोहरः प्रकृतिसुन्दरसोनमार्गः।
आकाशचुम्बिसरलैस्तरुभिर्विराजन् वैदेशिकान् च परिकर्षति गोलमार्गः।।163का.पृ.148

[18]अत्रत्यसेवफल-नास्पतिकेशराणि चोत्पादितानि कृषकैर्बहुना श्रमेण ।
देशान्तरेषु बहुमानपदं लभन्ते श्रद्धास्पदं भवति को न गुणैकधारी।।165

[19] विस्फोटकैर्निरपराधजनाननेकान् सीमासु रक्षकवलानि च मारयित्वा। आतङ्कवादमसकृद्बहुगर्हणीयं सोऽयं प्रसारयति भारतवर्षमध्ये।।167का.पृ.151

CC BY

जलपूर्णनदीभिःआकाशचुम्बिपादपैःसुशोभितजम्मूकाश्मीरप्रान्तः भारतदेशस्याभिन्नाङ्गरूपेण जगतितले विराजमानो वर्तते।[20] अनेन प्रकारेण प्रो.सूर्यमणिरथमहोदयेन काश्मीरोदयम् इति खण्डकाव्ये काश्मीरस्य भौगोलिकवर्णनं प्रतिपादितम्। अन्यग्रन्थेषु काश्मीरस्य भौगोलिकस्थितेः वर्णनमपि प्राप्यते तस्य किञ्चोदोल्लेखःअग्रे अहं कुर्वन् अस्मि।

'काश्मीरे वेरीनागस्थानात् वितस्तानदी निर्गच्छति । हिमालयपर्वतस्य एकापर्वतश्रेणी वितस्ताकृष्णगङ्गायाः जलं पृथक-पृथक कृत्वा पूर्वं पूर्वदिशि अनन्तरं पश्चिमदिशि तत्पश्चात् दक्षिणदिशि गच्छति।काश्मीरे (हरमुक) काजनागाख्यपर्वतो विद्यते।तत्र पूर्वतःएका पर्वतश्रृंखला दक्षिणं प्रति परिभ्रमति तत्रैव काश्मीरस्य परंपवित्रम् अमरनाथतीर्थम् विराजते। अमरनाथपर्वतश्रृंखला वितस्तानद्याः प्रवाहं दक्षिणपूर्वं भूत्वा उत्तरपश्चिमं प्रति नयति।सा पर्वतश्रृंखला (परिपंचाल)पीरपंचालेति नाम्ना प्रसिद्धा वर्तते। हिमालयपर्वतस्य उपरोक्ता पर्वतश्रृंखला 84मील उन्नतमम् 25मील विशालं काश्मीरभूमण्डलं चतुर्दिग्भिः स्पृशति।'[21]

'विभाजनात् पूर्वं जम्मूकाश्मीरप्रान्तः भारतस्य सुदीर्घप्रान्तः आसीत् । काश्मीरस्य समग्रक्षेत्रम्2,22,870 वर्गकि.मी.आसीत्।1947 तमे ख्रीष्टाब्दे तत्रत्याः जनसंख्या 38,66,243 आसीत् । प्रतिवर्गकिलोमीटर 17 जनाः आसन्। तत्र 39 नगराणि आसन् तेषां जनसंख्या 3,62,314 आसीत्। 8903 ग्रामेषु जनसंख्या 35,03,929 आसीत्। 1947-1948 तमख्रीष्टाब्दानन्तरं सर्वकारीयविवरणानुसारं जम्मूकाश्मीरस्य प्रर्वतश्रेणीनां वर्णनमत्र प्रस्तूयते।हिमाचलप्रदेशस्य लाहौल-स्पीतिजिला वर्तते। स्पीत्याः पश्चिमीसीमायाःदक्षिणभागे हिमालयस्य महत्त्वपूर्णः पर्वतस्कन्धः वर्तते पीरपंजालपर्वतश्रेणी। एषा पश्चिमीक्षेत्रे बारामूला-उडी-झेलमनद्याःउपत्यकामार्गं यावत् समानरूपेण गच्छति।किश्तवाड़ समीपे चिनाबनदी पीरपंजालपर्वतश्रृंखलां स्पृशति। एषा पर्वतश्रृंखला चिनावनद्याः जलं

---

[20] आसूर्यचन्द्रमिदमुन्नतभूमिखण्डम् उत्तुङ्गपर्वतसरित्तरुराजिपूर्णम्।
देवस्थलीति विदितं पृथिवितले यद् भायादभिन्नतनुवन्नवभारतस्य।।169 का.पृ.153

[21] 1.काश्मीर पृ.सं5 -काश्मीर .डॉ.बी.के शास्त्री प्रकाशक राजेश प्रकाशन जम्मू कश्मीर मुद्रक नवनीत प्रिंटर्स शाहदरा दिल्ली 110032 संस्करणः 1990

व्यासरावीनद्योःजलात् पृथक् करोति।प्रशासनिकरूपेण एषा पर्वतश्रृंखला लाहौलं कुल्लूजनपदात् पृथक् करोति।काश्मीरं जम्मूनगरात् तस्य अखनूर-कोटली-मीरपुर-भिंबर-नौशेरा-राजौरी-पुंछाख्येभ्यःक्षेत्रेभ्यःपृथक् कृत्वा काश्मीरभूमेः दक्षिणभित्तिरूपेण तिष्ठति। एतस्याः पर्वतश्रृंखलायाः समुद्रतलात् औनत्यम् 4572 मीटर वर्तते।[22] अत्र पर्वतीयराज्येषु प्रायः उन्नताः पर्वताः सन्ति जनानां गमनागमनं ततः एव भवति ।पूर्वं जनाः पर्वतम् आरोहन्ति द्वितीयपक्षम् अवतरन्ति ।पर्वतशिखरे यत्र जनानाम् आरोहणं समाप्तं भवति अपि च अवतरणं प्रारभते तं संकुचितप्राकृतिकमार्गं स्थानं वा दर्रा आङ्गले(Pass) इति उच्यते।जम्मूकाश्मीरराज्ये अपि एतादृशानि स्थानानि मार्गाश्च सन्ति येषां विषये अहम् अग्रे चर्चां कुर्वन् अस्मि। पीरपंजालपर्वतश्रृंखलायां रोहतांगमार्गः(दर्रा)3978 मीटर(Rohtang Pass) कुल्लूजनपदं लाहौलजनपदेन योजयति ,बनिहालमार्ग (दर्रा)2743 मीटर जम्मूतः श्रीनगरं प्रति मार्गः पीरपंजालः मार्गः(दर्रा)3494 मीटर राजौरीतः काश्मीरं प्रति वर्तते।नीलकंठ (दर्रा) पुंछात् गुलमर्गं योजयति। हिमालयस्य मुख्यपर्वतमाला वामपक्षे पीरपंजालात् साक्षात् उत्तरपश्चिमे विस्तृता वर्तते। एषा एकस्मिन् पक्षे चिनाब-झेलमनदीं द्वितीयपक्षे सिन्धुजलं विभाजयति। एतस्य पूर्वीभागः रुपशू दक्षिणपूर्वलद्दाखं लाहौलजनपदात् पथक् करोति। पश्चिमिभागे एषा पर्वतमाला किश्तवाड़ं काश्मीरघाटीञ्च लद्दाखस्य उच्चभूम्याः बालतिस्तानात् च पृथक् करोति।'पूर्वतःपश्चिमं प्रति एते मुख्यमार्गाः (दर्राः) इति सन्ति। बारालाचा दर्रा(4890 मीटर) लेह-कुल्लू मार्गे किश्तवाड़तः जास्करघाटीं प्रति गच्छति। उमसी ला (5924मीटर)चिलुँग ला (4401 मीटर) मार्गौ (दर्रौ)जास्कर-लद्दाखे विद्यमानसुरुनदीनां जलं विभाजयतः। जोजीला (3529 मीटर) (दर्रा) श्रीनगर-लेहमार्गे मध्यस्थिते कारवाँमार्गे वर्तते।

---

[22] 2.संघर्ष पृष्ठ सं.47-49' कश्मीर निरंतर युद्ध के साए में 'लेफ्टिनेंट जनरल के.के नंदा अनुवाद पैमिला मानसी प्रकाशक प्रभात प्रकाशन दिल्ली 110002 प्रथमसंस्करण2001

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

कामरी-बुर्जिल (दर्रौ) मार्गौ गिलगितमार्गे स्तः। [23]एषा पर्वतश्रृंखला नांगापर्वतस्य गिरिपिंडस्थाने समाप्ता भवति।हिमालयपर्वतस्य एकः बृहद्पर्वतस्कन्धः पश्चिम,दक्षिण-पश्चिमं प्रति गच्छति। यः मुजफ्फराबादसमीपे झेलमनद्याः समक्षे पीरपंजालपर्वतश्रृंखलायाः पुरतः वर्तते। जोजीलासमीपे मुख्यपर्वतश्रृंखलातः शाखाद्वयं निर्गच्छति। एका चिनाबनद्याः जलं झेलमनद्याः(वितस्ता) जलात् पृथक् करोति।दक्षिणं प्रति गच्छति काश्मीरस्य कृते पूर्वभित्त्याःकार्यं करोति।किश्तवाड़ समीपे एषा श्रृंखला पश्चिमं प्रति परिभ्रम्य बनिहालदर्रासमीपे पीरपंजालपर्वतश्रृंखलया सार्धं मिलति। एतस्याः औनत्यं समुद्रतलात् 4572 मीटर वर्तते।तत्र दूरादेव कालाहोई(5425 मीटर)महादेवः(3966 मीटर) लघुपर्वतस्कन्धौ स्तः।एतौ अमरनाथसमीपे मुख्यदक्षिणपर्वतस्कन्धस्य पश्चिमं प्रति गच्छति।एषः पर्वतः प्रसिद्धसिंधुघाट्याःदक्षिण्यवरोधरूपेण विद्यमानो वर्तते। द्वितीयः पर्वतस्कन्धः जोजीलातःकिशनगंगानदीघाटीं काश्मीरघाटीतः पृथक् कुर्वन् पश्चिमं प्रति गच्छति।इतः श्रीनगर-गिलगितमार्गः वर्तते यः राजडियंगनमार्गात् (दर्रात्) (3638 मीटर) भूत्वा किशनगंगायाः वामतः अग्रे दक्षिणं प्रति भूत्वा उडीसमीपे झेलमनदीं यावत् गच्छति। एतस्याः श्रृंखलायाः दक्षिणीभागः काजीनागपर्वतनाम्ना ज्ञायते।विशालहिमालयपर्वतश्रृंखलायाः द्वितीयपक्षे लद्दाख-बालतिस्तानश्च वर्तते।लद्दाखभूभागस्य राजधानी लेह वर्तते । यारकंड-ल्हासा मार्गे केन्द्रबिन्दुरूपेण स्तः यतोहि ततः जनाः शिमला-श्रीनगर-गिलगितं प्रति गच्छन्ति।सिंधुघाट्याः उत्तरे लद्दाखपर्वतमाला अस्ति या तां सियोकघाटीतः पृथक् करोति।स्कर्दूतः कतिचन् किलोमीटर उपरि शियोकनदी लद्दाखश्रृंखलायाः विशालकाकोरमस्य हरामोशश्रृंखलायाःमध्ये निर्गत्य सिंधुनदीं प्रविशति।

---

[23] 2.संघर्ष पृष्ठ सं.49 ‘ कश्मीर निरंतर युद्ध के साए में ’लेफ्टिनेंट जनरल के.के नंदा अनुवाद पैमिला मानसी प्रकाशक प्रभात प्रकाशन दिल्ली 110002 प्रथमसंस्करण2001

विश्वस्य द्वितीयसर्वोन्नपर्वतशिखरम् के-2 (8611 मीटर) अत्रैव वर्तते।अत्र विशालहिमनदाःसन्ति यथा बलतेरो –सियाचिन।बियाफो –हिस्परहिमनदौ स्तः । एतयोः विस्तारः 80कि.मी.परिमितं वर्तते। [24]

एताः पर्वतश्रृंखलाः सम्पूर्णराज्यं भौगोलिकरूपेण त्रिभागेषु विभाजयन्ति।जम्मूक्षेत्रस्य बाह्यपर्वताः,कश्मीरघाटी तस्याः विशालपर्वतीयक्षेत्रम् । जम्मूक्षेत्रम् पूर्वीपश्चिमीपंजाबसीमायाः पीरपंजालश्रृंखलायाः मध्ये स्थितो वर्तते।अत्र समतलभूमिः बाह्यपर्वताश्च सन्ति। अत्रत्यःक्षेत्रौनत्यं समुद्रतलात्(366मीटर) अस्ति ।सम्पूर्णं समतलक्षेत्रम् उत्पादकं वर्तते । जनाः कृषिकार्यं कृत्वा सम्यक् सस्यादिकमुत्पादयन्ति। जम्मूनगरम् सुसमृद्धं नगरमस्ति ।पूर्वं जम्मूकाश्मीरराज्यस्य शीतकालीनराजधानी अत्रैव आसीत्।कश्मीरघाटी समतलकछारभूमिः वर्तते। दक्षिणपूर्वतः उत्तरपश्चिमं प्रति विस्तृतघाट्याः विस्तारः135 मीटर वैशाल्यम् 32-40 मीटर आसीत्।झेलमनदी(वितस्ता)इतः प्रवहन्ति दक्षिण-पश्चिमदिशि तस्याः पृथक् भवति।वुलरह्रदम्-बारामूला-उडी-मुजफ्फराबाद भूत्वा पाकिस्ताने पश्चिमपंजाबं प्रविशति। झेलमनद्याः तटे श्रीनगरम् इति सुरम्यं स्थानं वर्तते।श्रीनगरमेव जम्मूकाश्मीरराज्य ग्रीष्मकालीनराजधानी आसीत्।

वर्तमानसमये जम्मूकाश्मीरस्य अन्तर्राष्ट्रियसीमा पाकिस्तान –अफगानिस्तान-चीन देशैः सार्धं संलग्ना वर्तते ।अन्तर्राज्यसीमायां पंजाबहिमाचलप्रदेशलेहलद्दाखादिनी राज्यानि सन्ति ।जम्मूकाश्मीरस्य स्वकीय सीमायां तस्य एतानि क्षेत्राणि वर्तन्ते।हिमाचलप्रदेशेन सार्धं जम्मूकाश्मीरराज्यस्य कठुआ –डोडा-किश्तवाड़ क्षेत्रञ्च वर्तते।जम्मूकाश्मीरराज्यस्य सांबा-जम्मू-मीरपुर-पुंछ-मुजफ्फराबादक्षेत्रं पाकिस्तानदेशेन संलग्नमस्ति ।बांडीपुर-गांदरबल-अनंतनागश्च लेहलद्दाखक्षेत्रं राज्येन युक्तं वर्तते।जम्मूकाश्मीरस्य मध्यभागे बारामूला-श्रीनगर-बडगाम-पुलवामा-शोपियां-कुलगाम-रामबन-रियासी-राजौरी-उधमपुराख्यानि

---

[24] 2.संघर्ष पृष्ठ सं.51‘ कश्मीर निरंतर युद्ध के साए में ’लेफ्टिनेंट जनरल के.के नंदा अनुवाद पैमिला मानसी प्रकाशक प्रभात प्रकाशन दिल्ली 110002 प्रथमसंस्करण2001

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

क्षेत्राणि विद्यमानानि सन्ति।भारतदेशस्य स्वतन्त्रतायाः अनन्तरं गीष्मकालिकराजधानी श्रीनगरम् शीतकालिकराजधानी जम्मूनगरम् आसीत्। यतः जम्मूकाश्मीरस्य राजकीयकार्यं भवति स्म। यदा आरभ्य जम्मूकाश्मीरः केन्द्रशासितप्रदेशः सञ्जातःतदारभ्य जम्मू एव जम्मूकाश्मीरस्य राजधानी वर्तते । जम्मूकाश्मीरस्य राज्यपालः इतः एव शासकीयकार्यस्य सञ्चालनं करोति। अन्तर्राष्ट्रियसीमायां पाकिस्तानदेशः चीनदेशश्च बारं –बारं भारतदेशस्य शान्तिं नष्टां कर्तुं विफलप्रयासं करोति। भारतदेशस्य पराक्रमशालिनः सुवीराः अहर्निशं देशस्य सीमायां सुरक्षार्थं कृतसंकल्पाः स्थिताः सन्ति। अनेन जम्मूकाश्मीरराज्यस्य भौगोलिकवर्णनेन जम्मूकाश्मीरस्य भौगोलिक स्थितिं सम्यक् रूपेण ज्ञातुं शक्यते।

सन्दर्भग्रन्थाः -

1.इतिहास दृष्टि,इतिहास लेखन एवं इतिहास के स्रोत विषयक राष्टीय महिला इतिहासकार संगोष्ठी में प्रस्तुत लेखों का संग्रह
संरक्षक /मार्गदर्शक डॉ.बालमुकुन्द पाण्डेय डॉ. देवी प्रसाद सिंह सुश्री अनुराधा राजहंस
प्रकाशक-
प्रकाशन विभाग अखिलभारतीय इतिहास संकलन योजना बाबा साहेब आप्टे-स्मृति भवन ,केशव कुञ्ज,झण्डेवाला नई दिल्ली-110055 प्रथम संस्करण 2018
मुद्रकः ग्राफ़िक वर्ड,1659 दखनीराय स्ट्रीट दरियागंज नयी दिल्ली 110002

2.Crisis in Kashmir Sh. Pyarelal Kaul Suman Publications Srinagar –Delhi Printed and Published by Susheel Vakil at Tarang Printers, Laxminagar ,Delhi 92 Sole distributors:- Migrants Top Floor,C -50 Main Road ,Preet Vihar ,New Delhi 110092 First Published 15 Oct 1991

3.Kashmir Imbroglio Diagnosis And Remedy Sh.M.G Chitkara Aph Publishing Corporation 5 Ansari Road Darya Ganj New Delhi -110002

4.Kashmir A Tale Of Partition Vol-I,Ii M.G Chitkara Aph Publishing Corporation 5 Ansari Road Darya Ganj New Delhi -110002

5. Baharistan –i- shahi a chronicle of mediaevel kashmir by k.n. Pandit published by firma klm private limited 257b b.b.b ganguly street calcutta 700012 india first published 1991

6.Jammu And Kashmir By Somnath Dhar National Book Trust India Published By The Director National Book Trust India A -5 Green Park New Delhi -110016 Fist Edition 1977

7.Kashmir Shaivism Under Siege M.G.Chitkara Aph Publishing Corporation 5 Ansari Road Darya Ganj New Delhi -110002 Published 2002

8.Kashmiri Pandits : Looking To The Future

Proceeding Of The National Seminar Conduted By Kashmir Education Culture And Science Society B-36 Pamposh Enclave New Delhi 110048 Aph Publishing Corporation 5 Ansari Road Darya Ganj New Delhi -110002 Published 2001

9.Kashmir From Crisis To Crisis By Nasir A Nagash And G.M Shah Aph Publishing Corporation 5 Ansari Road Darya Ganj New Delhi -110002 Published 1997

10.Kashmir's Buddhist Ladakh M.G.Chitkara Aph Publishing Corporation 5 Ansari Road Darya Ganj New Delhi -110002 Published 2003

11.Kashmir Wail Of A Valley Atrocity And Terror Mohan Lal Koul Gyan Sagar Publicationas New Delhi 110063 Prited At Ram Printograph India Delhi 110051 First Published 1999

12 Memorial Of Mistakes .Converted Kashmir Narender Sehgal Utpal Publications R-22 ,Iind Floor Khaneja Complex Main Market Shakarpur Dehli 110092 First Edition 1994, Printed At Kiran Mudran Kendra A -38 /2maya Puri Phase -1 New Delhi 110064

13.व्यथित जम्मू कश्मीर नरेन्द्र सहगल सूर्य भारती प्रकाशन नई सड़क दिल्ली 11006 मुद्रक एस.एन .प्रिंटर्स नवीन शाहदरा दिल्ली -32 प्रथम संस्करण2010

14.कश्मीर निरंतर युद्ध के साए में लेफ्टिनेंट जनरल के.के.नंदा अनुवाद पैमिला मानसी प्रभात प्रकाशन दिल्ली4/19 आसफ अली रोड नई दिल्ली 110002 प्रथम संस्करण 2001

15.कश्मीर अलगाव बनाम जुड़ाव रामशंकर अग्निहोत्री जागृति प्रकाशन , नौएडा 201301प्रथम संस्करण-2007

16.खोया हुआ कश्मीर इतिहास के दर्पण में विजय गुप्त अनामिका पब्लिशर्स एंड डिस्ट्रीब्यूटर्स (प्रा) लि. 4697 /3 21ए अंसारी रोड दरियागंज नई दिल्ली 110002 प्रथम संस्करण 2008

17. हमारी भूलों का स्मारक ,धर्मान्तरित कश्मीर नरेन्द्र सहगल जागृति प्रकाशन एफ 109 सैक्टर 27 नोएडा 201301 प्रथम संस्करण 1992

18.काश्मीर डॉ.बी.के शास्त्री प्रो.एवं पूर्व अध्यक्ष हिन्दी विभाग गवर्नमैन्ट एम.ए एम.कॉलेज जम्मू प्रकाशक राजेश प्रकाशन 121 रघुनाथपुरा जम्मू कश्मीर मुद्रक नवनीत प्रिंटर्स शाहदरा दिल्ली 110032 संस्करण1990

CC BY

19.कश्मीर समस्या ,कश्मीर जीत में हार बलराज मधोक प्रकाशकः-भारती साहित्य सदन 30/90 कनॉट सर्कस नई दिल्ली 110001 संस्करण 1991

20. कश्मीर एवं हैदराबाद सरदार पटेल संपादक सं.पी.एन .चोपड़ा प्रभा चोपड़ा प्रभात प्रकाशन दिल्ली4/19 आसफ अली रोड नई दिल्ली 110002 प्रथम संस्करण 2010

21.Kashmir Politics Problems And Prospects Gull Mohd. Wani Published By S.B Nangia For Ashis Publishing House /81 Punjabi Bag New Delhi 110026 Edition 1993

22.Political Awakening In Kashmir Ravinderjit Kaur Aph Publishing Corporation 5 Ansari Road Darya Ganj New Delhi -110002 Published 1996

23.Kashmir Need For Sub – Continental Political Initiative Gull Mohd. Wani Ashis Publishing House /81 Punjabi Bag New Delhi 110026 Edition 1995

24.राजतरङ्गिणी व्याख्याकारः श्रीरामतेजशास्त्री पाण्डेयः चौखम्बा संस्कृत प्रतिष्ठान 38 यू.ए.जवाहरनगर बंगलो रोड दिल्ली 110007 पुनर्मुद्रित संस्करण2015

25.काश्मीरोदयम् (मणिव्याख्यायुक्तम्) रचयिता व्याख्याकर्ता च प्रो.सूर्यमणिरथः साहित्यविभागाध्यक्षः केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीसदाशिवपरिसरः पुरी ओडिशा प्रकाशिका – कवितारथः प्रथमप्रकाशनम्-कार्त्तिकपूर्णिमा 17.11.2013

26.काश्मीरेतिहासः प्रस्तावनालेखकः जम्मू- काश्मीरमहाराजाधिराजः डॉ.कर्णसिंहः एम.ए.,पी.एच.डी. पर्यटन-नागरविमाननमन्त्री भारतप्रशासनस्य प्रधानसम्पादकः डॉ.मण्डनमिश्रः मीमांसा- साहित्याचार्यः एम.ए पी.एच.डी मूलग्रन्थलेखकः स्वर्गीय आचार्यश्रीहनुमत्प्रसादशास्त्री पण्डितमार्तण्डः (विद्यापीठस्य भूतपूर्वप्राध्यापकः) श्री लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् दिल्ली विक्रमसंवत् 2024

27.The Nilamata Purana Vol Ii (A Critical Edition & English Translation) By Dr.Ved Kumari Published By J&K Academy Of Art .Culture And Languages Srinagar.

हेमराजः
शोधछात्रः, साहित्यविभागः केन्द्रीयविश्वविद्यालयः वेदव्यासपरिसरः बलाहरः ,
तहसील प्रागपुर जिला कांगडा हिमाचल प्रदेशः।,
(प्रवक्ता संस्कृत राजकीय वरिष्ठ माध्यमिक विद्यालय बरमाणा जिला बिलासपुर हिमाचल प्रदेशः।)
hemraj.shastri@gmail.com

***

दण्डनाथनारायणस्य भोजव्याकरणपरम्परायां योगदानम्

- कृष्णगोपालपात्रः

शोधसारः

सरस्वतीकण्ठाभरणव्याकरणस्य वृत्तिग्रन्थस्य हृदयहारिण्याः रचयितुः दण्डनाथनारायणस्य परिचयः इह सूक्ष्मेक्षिकया प्रतिपाद्यते। अस्य च विषये याथातथ्यं विवरणं नैव लभ्यते। नैके दण्डनाथाः आसन् इति बहुग्रन्थालोडनेन स्पष्टं प्रतीयते। तेषु कतमः दण्डनाथः हृदयहारिणीवृत्तिं लिलेख इत्यत्रापि नास्ति किञ्चिन्मानम्। एवं संशयग्रस्तः तस्य सर्वोऽपि पक्षः। यद्यपि बहवः ग्रन्थकाराः प्रबन्धकाराश्च बहुविधं मतं प्रदर्शयामासुः अथापि वरीवर्त्येव तदीयदेशकालादिविचारे विवादः। अतोऽत्र तस्य दण्डनाथनाथनारायणस्य हृदयहारिणीद्ग्रन्थं क्वचित् बाह्यसाक्ष्यं च समाश्रित्य संशयशमनाय प्रयतामहेऽत्र।

कूटशब्दाः— दण्डनाथनारायणः, हृदयहारिणी, सरस्वतीकण्ठाभरणम्।

उपोद्घातः

प्रथितयशसः भोजस्य नाम केनापि अश्रुतमिति नास्ति। तदीयं विद्यावैचक्षण्यम् अद्यापि अधिविश्वं भूयोभूयः जोघुष्यते। पण्डितमणेरस्य चरमा कृतिः सरस्वतीकण्ठाभरणम्। भोजस्यैवम् अविच्छिन्नव्याकरणधारा कदापि मूर्धाभिषिक्ता इदानीं न तथा प्रसिद्धिमुपैति। अस्यैव टीकारत्नं हृदयहारिण्याख्यं दण्डनाथनारायणग्रथितम् एकमेवाद्वितीयम् अद्यापि भोजशब्दानुशासनपाठसहायकं शब्दसाधुत्वप्रतिपादकं गङ्गातोयमिव वरीवर्ति। यस्य च सरस्वतीकण्ठाभरणस्य नास्त्यादरोऽधुना तादृशग्रन्थस्य टीकाकर्तुर्विषये सन्देहः सुतरां जागर्त्येव। इतरत्र ग्रन्थेषु तद्विषयकं यत्किञ्चित् प्राप्यते तत्त्वं तदपि न पर्याप्तमित्यतः तस्य देशकालादिविचारः इह यथामति विमृश्यते।

को वायं दण्डनाथः?

विश्वविश्रुतस्य भोजव्याकरणस्य व्याख्याकारः सन्नपि कोऽयं दण्डनाथः किंदेशीयः इति प्रश्ने तु सन्दिग्धाः विद्वांसोऽपि। वस्तुतः तस्य देशकालादिविचारे अनुमानमेव शरणम्। सरस्वतीकण्ठाभरणस्य व्याख्यातृत्वेन दण्डनाथनारायणस्य नाम अवाप्यते। किन्तु कस्यायं दण्डनाथः इति विषयस्तु नैव स्फुटः। एतदपि भवितुमर्हति यत् भोजस्यैवायं दण्डनाथ इति।

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

The Unadisutras In Various Recensions (Part-Vi) इति ग्रन्थस्य उपोद्धाते[1] ग्रन्थकृता नैके दण्डनाथाः उल्लिखिताः। तेष्वेकः त्रयोदशशतकस्य प्रथमार्धे (1216 A.D)देवगिरेः राज्ञः सिङ्गणस्य सहायकः आसीत्।

परश्च अनन्तपालस्य भ्राता कदम्बवंशीयः यः खलु वनवासिशासको बभूव। चालुक्यनृपतेः विक्रमादित्यषष्ठस्यएकत्र शिलालेखे २४ चालुक्यविक्रमसंवति चिक्कणाडिगोल इत्याख्ये गदग-तालुकायां धारावादमण्डले अनन्तपालः तद्भ्राता च उल्लिखितौ। किञ्चेदं स्पष्टं यत् अनन्तपालः द्वादशशतकस्य प्रथमार्धे वनवासिशासकः आसीत्।

अन्यश्च दण्डनाथनारायणः 'पारिजातहरणकाव्य'कर्तुः कविराजपण्डितस्य संरक्षकः। अयञ्च दण्डनाथः द्वादशशतकस्य पूर्वार्धे (1120 A.D) बभूव वनवासिप्रदेशे। अतः कविराजपण्डितस्य सहायकः स भवितुमर्हत्येव। पुनश्च इदमपि सम्भवं यत् सरस्वतीकण्ठाभरणव्याख्याकृत् नारायणः कविराजपण्डितसंरक्षकश्च अभिन्न इति।

एवं बहवः दण्डनाथाः आसन् इति प्रतीयते एव। अतः तेषु कतमोऽयं सरस्वतीकण्ठाभरणटीकाकृत् दण्डनाथनारायणः इति विषये विद्यते समालोचकेषु वैमत्यं। यः कोऽपि वा भवतु स च माधवीयधातुवृत्तिकर्तुः पूर्ववर्ती आसीत् इति अनुमीयते। यतो हि माधवीयधातुवृत्तौ दण्डनाथनारायणस्य कृतेः समुल्लेखः प्राप्यते। एतदपि नासम्भवं यत् स भोजस्यैव दण्डनाथः आसीत्। दण्डनाथः नाम न्यायाधीशः दण्डनायकः सेनापतिर्वा। तथापि इह आन्तःसाक्ष्येण बाह्यसाक्ष्येण च सयुक्तिकं तस्य देशकालकृत्यादिकं यथामति विमृश्यते।

देशः

दण्डनाथनारायणः कः आसीत् इति विषये किमपि तथाविधं प्रमाणं नैव समुपलभ्यते। अतः तस्य देशकालकृत्यादिनिर्धारणमपि महत् कष्टसाध्यम्। वस्तुतः दण्डनाथः इति कश्चिदुपाधिरिति केचन मन्यन्ते।गवेषकैः दण्डनाथ इति नामश्रवणेन इदमनुमीयते यत् स कश्चित् सेनापतिः न्यायाधिपतिः वासीत्। भोजराजस्यैव अयं सेनापतिः न्यायाधीशो वा इत्यपि केषाञ्चन मतम्। भोजश्च धाराधीशः अतः अयमपि तद्देशनिवासी इति यद्यपि कैश्चित् प्रतिपाद्यते परन्त्वत्रापि किमपि दृढतरं मानं नैव विलसति।

---

1 पृ-XII-XIII

कालः

ग्रन्थकाराः स्वकालविषये न क्वचिद् विलिखन्ति इति भारतीया परम्परा। अतो महत् कष्टसाध्यं कार्यं कस्यचिदपि ग्रन्थकृतः कालनिर्णयः। तथात्वेऽपि विद्याध्मातमूर्तयः विपश्चितः स्वीयविद्यावैचक्षण्येन तस्य तस्य ग्रन्थकृतः कालं निर्णयामासुः। दण्डनाथस्य नामनिर्देशः ऐदंप्राथम्येन सायणपूर्ववर्तिनः देवराजस्य निघण्टुव्याख्यायां[2] दरीदृश्यते। सोऽयं देवराजश्च चतुर्दशशतकीयः। अतः दण्डनाथस्य देवराजग्रन्थे उल्लेखात् देवराजः दण्डनाथपरवर्ती। अतः दण्डनाथः चतुर्दशशतकात् पूर्वतनीयः एव भवेत्। भोजराजस्य न्यायाधीशः सेनापतिर्वा इति पक्षमुररीकृत्य स भोजसमकालिकः तदुत्तरकालीयो वासीत् इति पण्डितानां प्रसिद्धम् आकूतं यत् स दण्डनाथनारायणः द्वादशशतकीयः इति।

एवं तत्रभवान् टि.आर्.चिन्तामणिमहोदयः स्वग्रन्थस्य उपोद्घातांशे विचारयामास यद् त्रयो हि दण्डनाथाः आसन्। तेषु एतद्ग्रन्थव्याख्याता दण्डनाथस्तु द्वादशशतकपूर्वार्धे आसीदिति तन्मतम्। परमयमपि तस्य ऊह एव, पक्षेऽस्मिन् प्रमाणसद्भावोऽपि नैव प्रदर्शितस्तेन।

सरस्वतीकण्ठाभरणस्य वृत्तिः हृदयहारिणी प्रथमतः साम्बशिवशास्त्रिणा त्रिवन्दन्तः मुद्रिता प्राकाश्यं च प्रापिता। तस्य चतुर्थभागस्य भूमिकायां महादेवशास्त्री अभिप्रैति यत् दण्डनाथः मुग्धबोधकृतः वोपदेवात् पश्चाद्वर्ती। तथाह्यत्र साक्षात्तन्मतं सप्रमाणम् अनुवदामः—"केचित् णलि थल्यपि विशेषनिर्देशेनैव सिद्धेः अलिटीति सामान्येन निर्देशात् व्ययतोर्लिटि सम्प्रसारणं परपूर्वत्वं वा विभाषयन्ति। तेन संविव्ययतुः संविव्ययुः इत्याद्यपि भवति। तद्यथा "संविव्ययुर्वसनचारुचमूसमुत्थं पृथ्वीरजः करभकण्टकडारमाशाः"[6/1/56] इति सूत्रे मतान्तरमनुवदति दण्डनाथः। नैव भाष्ये नवा काशिकादिषु प्राचीनेषु ग्रन्थेषु व्ययतेर्लिटि सम्प्रसारणविकल्पः प्रपञ्चितः। नापि कातन्त्रे शाकटायने वा सम्प्रसारणस्य विकल्पो निषेधो वा निरूपितः। माघव्याख्याता वल्लभदेवश्च केचित् संविव्ययुर्वसनचारुचमूसमुत्थमिति पठन्ति। तैः सम्प्रसारणाभावे युक्तिर्वक्तव्या इति वदन् स्वजीवितसमये संविव्ययुरिति पाठान्तरस्य सत्तां सूचयन् सम्प्रसारणविकल्पे युक्त्यभावं प्रतिपादयति। मुग्धबोधे परं विकल्पैः प्रतिपाद्यते— यथा "जि वान्त्यः किति"[सू-669] द्वेर्व्येञोऽन्त्यो भागो जिं वा प्राप्नोति ठ्यां किति। विव्यतुः, विव्ययतुः इति। तथाच वोपदेवेन सम्प्रसारणस्य वैकल्पिकताप्रपञ्चेन विव्ययतुरिति सम्प्रसारणाभावे रूपं साधितम्। प्रक्रियाकौमुदीव्याख्याने प्रसादे व्येञोऽन्त्यभागस्य किति लिटि सम्प्रसारणं वेति केचित् इति

---

2 निघण्टुनिर्वचनम्- २/९/१२,३/२/१।

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

मूलवाक्यस्थं केचित् इति प्रतीकमुपादाय केचिदिति। महाकवयः मुग्धबोधकारश्च। तथाहि वक्त्रेः संविव्ययुर्देहान्। संविव्ययुर्वसनचारुचमूसमुत्थमित्यादि महाकवयः। जिं वान्त्यः किति इति प्रतिपादयता विट्ठलाचार्येण च सम्प्रसारणविकल्पस्य मुग्धबोधोपज्ञत्वं स्पष्टमेवोक्तम्। तथा च दण्डनाथेनापि केचिदित्यादिवाक्येन मुग्धबोधकारमतमेवाविष्कृतमिति सम्भाव्यते।

तथा 'स्फायः स्फी'[6/1/37]) इति सूत्रे पूर्वसूत्रात् वेत्यनुवर्त्य स्फायतेर्निष्ठायां स्फी इत्ययमादेशो वा भवति। स्फीतः स्फीतवान्, स्फातः स्फातवान् इति रूपद्वयमुदाहारि दण्डनाथेन। काशिकादिषु च स्फीतः स्फीतवान् इत्येकमेव रूपमूदाहृतम्। दुर्गसिंहेन परं कातन्त्रव्याख्यात्रा 'स्फायीति इदनुबन्धबलादादेशोऽयमनित्यः' इति स्फातः इत्यभिहितम्। अत्रापि च प्रसादे 'वेति केचित्' इति कौमुदीगतं प्रतीकमुपादाय तथोक्तं मुग्धबोधे स्फायः स्फी वा इति मुग्धबोध एव प्रमाणीकृतः।

तथा 'समौनस्य पक्ष.....'(६/२/१२२)इति सूत्रे 'आदिग्रहणात् सलोहितसकुक्षिसवेण्यादयो भवन्ति' इति काशिकादावदृष्टात् मुग्धबोधमात्रोदाहृतान् सलोहितादिशब्दान् आदिग्रहणेन संगृह्णाति दण्डनाथः। अत्रापि प्रसादे 'पिण्डगन्धलोहितवेणिपत्नीपक्षेष्वपीति केचित्' इत्यत्र पिण्डेत्यादि। तथोक्तं मुग्धबोधे ज्योतिर्जनपदरात्रिनाभिबन्धुगन्धपिण्डलोहितकुक्षिवेणीब्रह्मचारितीर्थ्यपत्नीपक्षे समानस्य स इति मुग्धबोधोक्तमत्वं कुक्ष्यादेः प्रतिपाद्यते। तथा चैवमादिस्थलेषु दण्डनाथेन मुग्धबोध एवानूदित इति तत्प्रणेतुर्वोपदेवात् त्रयोदशशतकमध्यजीविनोऽर्वाचीनत्वं चतुर्दशशतकोत्तरार्धजीवितमाधवाचार्यात् प्राचीनत्वं चानुमीयते।

धूञ्प्रीञोर्नुग् वेति केचित् इति प्रक्रियाकौमुदीवाक्यं व्याचक्षाणेन प्रसादकृता केचिदिति प्रतीकमुपादाय केचिदिति। तथा च सरस्वतीकण्ठाभरणप्रक्रियायां पदसिन्धुसेतावित्युक्तं धावयतीत्येके धाययतीत्येके इति च वर्णितत्वाद् पदसिन्धुसेतुनामकं व्याख्यान्तरमासीदित्यनुमीयते। तथा दण्डनाथेनापि, केचित् कर्मकर्तरीति नानुवर्तयन्ति, तेषां दोषान्धकारभिदुरः, दृप्तारिपक्षच्छिदुरः(1/4/233), केचिदभ्यवाभ्यामिति तृतीयां व्याचक्षाणाः तद्योगे समा व्यवधाने विकल्पमिच्छन्ति, (6/1/36) केचित् णलि थल्यपि विशेषनिर्देशेनैव सिद्धे अलिटीति सामान्येन निर्देशात् व्ययतेर्लिटि सम्प्रसारणं परपूर्वत्वं वा

विभाषयन्ति(6/1/53) इति बहुषु स्थलेषु व्याख्यानान्तरप्रदर्शनाच्च व्याख्यानान्तरसत्ता दण्डनाथप्राक्कालीनता च तस्याः स्फुटमनुमीयते।"[3]

एवं महता प्रयत्नेन दण्डनाथकालनिर्णये प्रायतत। किन्तु तन्मते हि दण्डनाथः १३५०-१४५० इत्यभ्यन्तरे कदाचिदासीत्। परं इदं मतमपि कियत् प्रमाणोपेतं तदपि चिन्त्यम्। तथा च मुग्धबोधे ये विचाराः विचारिताः ते हृदयहारिण्यां लभ्यन्ते इति धिया मुग्धबोधात् पश्चाद्वर्ती अयं व्याख्याग्रन्थः इति मतं तु नैव प्रामाणिकम्। यतो हि मुग्धबोधात् प्राग्वर्तिष्वपि ग्रन्थेषु ते विचाराः क्वचित् वर्णिताः दृश्यन्ते, अतः तेभ्योऽपि पश्चाद्वर्तित्वापत्तिः अस्य ग्रन्थस्य। इदं च युधिष्टिरमीमांसकोऽपि सप्रमाणं खण्डितवान्।[4] अर्वाचीनकाले अन्येऽपि केचन पाश्चात्यपण्डिताः अस्मिन् सन्दर्भे संशयं प्रकटितवन्तः।

वर्धमानः हृदयहारिणीवृत्तिं सम्यक् जानाति स्म इति बहुत्र प्रमाणं समुपलभ्यते। वर्धमानश्च गणरत्नमहोदधिग्रन्थं ११४० क्रैस्ताब्दे विरचितवान्। अतः अयं च कालः दण्डनाथनारायणस्य उत्तरकालः, तथैव भोजकालः एव तस्य पूर्वकालः। तन्नाम प्रायः १०१०/१०५० तः ११४० इत्यस्मिन् कालखण्डे यदा जीवितः आसीत् तत्समये एव इमां वृत्तिं विरचितवान् दण्डनाथ इति रोवर्ट-बिर्वेमहोदयस्य[5] मतम्।

माधवीयधातुवृत्तौ "चपो वृक्षः इति मैत्रेयः। वेणुविशेष इति दण्डनाथः"[6] इति माधवाचार्येण स्मर्यमाणत्वात् अयं दण्डनाथनारायणः तत्पूर्वभावीति अनुमीयते। यतो हि हृदयहारिण्यां "चपो नाम वंशविशेषस्तस्य विकारश्चापः"[7] इति पाठः अवलोक्यते। एवं सः माधवाचार्यात् पूर्ववर्ती इत्यत्र नास्ति संशयः।

एवं माधवाचार्यात् प्राचीनत्वे सम्भवे सत्यपि कथमपि मुग्धबोधकर्तुः वोपदेवात् अर्वाचीनत्वं दण्डनाथनारायणस्य न सम्भवति इति सप्रमाणं समुत्पादितम्। तथा चात्र सिद्धान्तरूपेण इदं वक्तुं शक्यते यत् देवराजपूर्ववर्ती भोजपरवर्ती चायं दण्डनाथनारायणः एकादशशतकाद् त्रयोदशशतकमध्ये कदाचित् आसीत् इति।

---

3 सरस्वतीकण्ठाभरणम्, चतुर्थभागः, महादेवशास्त्रिविलिखितप्रस्तावनायाम्।

4 संस्कृत व्याकरणशास्त्र का इतिहास (प्रथम भाग), पृ-558-559।

5 Narayana dandanathas commentary on Rules III.2, 106-121 of Bhoja's sarasvatikanthabharana of Robert Birwe, page-150-162

6 माधवीया धातुवृत्तिः भ्वा. २७७ पृ-१५२।

7 भोजसूत्रम्-४/४/१०।

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

कृतिः।

भोजराजविरचितस्य सरस्वतीकण्ठभरणस्य वृत्तिरियं हृदयहारिणी। सरस्वतीकण्ठाभरणस्य कियन्तमशंमादाय हृदयहारिणी विरचिता इत्यत्र विषये अपि सन्देहो वरीवर्ति। सम्पूर्णं सरस्वतीकण्ठाभरणमादाय इयं हृदयहारिणी विरचिता इति केषाञ्चन मतम्, परेषां तु षष्ठाध्यायान्तं भागं समादाय इहृयहारिणी लिखिता, अन्येषां सप्तमाध्यायपर्यन्तं हृदयहारिणी लभ्यते इति आशयः। साम्बशिवशास्त्रिणा तथा रामास्वामिशास्त्रिणा हृदयहारिणीवृत्तिसहितं सरस्वतीकण्ठाभरणं प्रकाशितम्। तत्र च ग्रन्थे षष्ठाध्यायान्तं हृदयहारिणीवृत्तिः समुपलभ्यते। सप्तमाध्यायस्य अष्टमाध्यायस्य च हृदयहारिणीवृत्तिः अत्र ग्रन्थेषु नैव संकलिता। किन्तु सप्तमाध्यायान्तमेव दण्डनाथेन व्याख्यानं लिखितमित्यपि विपश्चितां मतं प्राप्यते। अस्य च सप्तमाध्यायस्य दण्डनाथवृत्तेः हस्तलेखः मालयालमलिप्या महाराज पैलेस लाइब्रेरी त्रिबन्दम्-नगरे विद्यते। हस्तलेखान्तरं च आड्यार लाइब्रेरी चेन्नइनगरे समुपलभ्यते। अष्टमाध्यायस्य वृत्तिः तेन लिखिता न वा इत्यत्रैव सन्दिग्धाः विपश्चितः। यद्यपि गुर्जरभाषया नारायणकांसारा-महोदयेन अष्टमाध्यायस्य वृत्तिः लिखिता तथापि सा बहुत्र त्रुटिपूर्णा इति समालोचकानां मतम्। पुनश्च उणादिसूत्राणामपि विस्तृतं विवरणम् अनेन विरचितम्। यानि चादाय गच्छति काले The Unadisutras In Various Recensions इत्यादयः नैके ग्रन्थाः सम्पादिताः। येषां मूलभूता सामग्री दण्डनाथनारायणविरचिता हृदयहारिणी एव। वस्तुतः सरस्वतीकण्ठाभरणस्य उणादिभागं हृदयहारिणीवृत्तिं च समादाय विरचितोऽयं ग्रन्थः। काञ्चिद्बृहद्वृत्तिं समादाय विरचिता इयं हृदयहारिणी इति सर्वैरपि अनुमीयते। अस्य ग्रन्थस्य रचनाशैली तादृशी अस्ति येन द्रागेव विद्वांसोऽप्यत्र मोदन्ते। यथा अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रव्याख्यानसमये व्याख्याकृता कथितम् "अर्थोऽभिधेयः स च स्वार्थो द्रव्यं लिङ्गं संख्या शक्तिरिति। द्योत्यश्च समुच्चयादिः। तद्वच्छब्दरूपं प्रातिपदिकसंज्ञं भवति। धातुः प्रत्ययान्तश्च न भवति।"एवं बहुत्र स्थलेषु असकृत् पाठकहृदयं हरति हृदयहारिणी।

प्रायः सर्वेषां सूत्राणां व्याख्यानमत्र प्रस्तुतमित्यतः भोजव्याकरणपरम्परायां अतिशयेन समादृतः अयं टीकाग्रन्थः। क्वचित् पाणिनीयव्याकरणपरम्परायां वार्तिककारभाष्यकारादिभिः प्रत्याख्याताः परं कविभिः प्रयुक्ताः प्रयोगाः अत्र ग्रन्थे साधुतया साधिताः। शब्दसाधुत्वनियामकं हि व्याकरणमित्युच्यते। तस्मात् तादृशप्रयोगानां साधुत्वं प्रतिपाद्य इदमपि व्याकरणपदवीं लभते। तत्प्रयोगसाधुत्वे मर्मोद्घाटनमप्यस्य प्रतिपादनविषयः। यथा

सरसजम् इति शब्दस्य व्युत्पत्तिप्रदर्शनप्रक्रियायां[8] दृश्यते भोजीया भिन्ना रीतिः। भाष्यकारादिभिः[9] सरसजमिति रूपं अव्ययीभावसमासेन व्युत्पादितम्। परं अत्र व्याकरणे अव्ययीभावादन्यत्र बहुव्रीहावपि सरसजमिति रूपं निष्पादितम्।

पाणिनीयतन्त्रे पारङ्गतस्य अस्य अलङ्कारशास्त्रादिष्वपि स्वच्छन्दा गतिरासीत् इति तु तद्ग्रन्थपठनेनैव ज्ञायते। यतो ह्ययं बहुत्र काव्यग्रन्थेभ्यः उदाहरणानि संगृह्य सावलीलतया पाठकहृदयं मोदयति। तस्मादेव प्रायः अस्य व्याख्यानम् अतीव समादृतं लोके।

विमर्शः

सरस्वतीकण्ठाभरणस्य उपलभ्यमानायाः टीकायाः हृदयहारिण्याः रचयिता व्याकरणसमयविद् दण्डनाथनारायणः। अयं च कदा कुत्र जनुरधत्त इत्यस्मिन् विषये विपश्चिदपश्चिमाः अपि संशयग्रस्ताः। अत्र च प्रबन्धे तद्विषये यथामति विचाराः विचारिताः। को वा स आसीत् इत्ययमपि पक्षोऽप्यत्र मीमांसितो विद्यते। हृदयहारिणीद्वारेणैव सरस्वतीकण्ठाभरणस्य प्रचारः व्यापृतः भोजव्याकरणपरम्परायाम्। नायं ग्रन्थः शुष्कशास्त्रीयविचारमात्रपरः शास्त्रान्तरसमुद्धरणेन प्रकृतग्रन्थतात्पर्यविमर्शनेन च विद्वत्तल्लजाभिमतोऽपि। भोजीयसूत्राणां अवक्रः प्रवाहः दण्डनाथटीकायां परिलक्ष्यते। हृदयहारिणीमन्तरेण बहुत्र सरस्वतीकण्ठाभरणस्य अर्थावगमः सन्देहनिरसनं वा नैव सम्भवति। पदप्रयोगः वाक्यप्रयोगश्चापि तस्यात्र व्याख्यायां विलक्षणः। टीकाकारः व्याकरणस्यास्य विषयान् ललितया सरसया च शैल्या पाठकान् प्रति प्रापयति। अतः सरस्वतीकण्ठाभरणसदृशग्रन्थपठनेऽपि क्लेशः नैव भवति।

अस्मिन् सरस्वतीकण्ठाभरणव्याकरणे यद्यपि नैकग्रन्थानां प्रभावो दरीदृश्यते तथापि बाहुल्येन काशिकावृत्तिं महाभाष्यप्रदीपं चादाय अयं व्याख्याग्रन्थः विरचितः इत्यन्ततो वक्तुं शक्यते। काशिकायाः महाभाष्यस्य प्रदीपस्य च प्रभावः प्रतिपदमत्र व्याख्याने स्फुटमवाप्यते। चान्द्रव्याकरणमपि संस्मृतमिह। यथा 'अ इ उ ण्' इति माहेश्वरसूत्रव्याख्यानप्रसङ्गे काशिकाकृता व्याख्यातम्- "अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम्" इति। चान्द्रवृत्तावपि तथैव-"अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम्। तस्योच्चारणं भवत्येकेन। ॠकोऽणो रलो इत्यकारेण। जातिनिर्देशश्चायम्।" एवं हृदयहारिणीकृता अपि साक्षात् तथैव व्याख्यायते—"अ इ उ इति

---

8 सरसजमिति साकल्येऽव्ययीभावः सरसजमभ्यवहरति। बहुव्रीहिर्वा। सरसमजपहाय केतकीनां प्रसवम्।

9 अचतुर......(5/4/77)........ततोऽव्ययीभावः। सह रजसा सरसजम् इति। काशिकायामपि साकल्ये- सरसजमभ्यवहरति। बहुव्रीहौ न भवति। सह रजसा सरजं पङ्कजम् इति

CC BY

क्रमेण वर्णानुपदिश्यान्ते णकारिमितं करोति प्रत्याहारार्थम्"। एवं महाभाष्यस्य च्छाया अपि स्पष्टं प्रतीयते अत्र ग्रन्थे।किन्तु केवलं एतेषां ग्रन्थानामेव न अपि तु वाक्यपदीयप्रभृतिग्रन्थानामपि उद्धरणं समवलोक्यते।एवं बहूनामपि ग्रन्थानामिह समन्वयः द्रष्टुं शक्यः। नानाग्रन्थमन्थनेनापि मौलिकत्वमपि न जहाति ग्रन्थरत्नमिदमिति आश्चर्यम्।

वृत्तिरियं दण्डनाथनारायणभट्टसमुद्धृता नाम्ना हृदयहारिणी सरलललितोदारमधुरया वाचा समुदितोदाहरणप्रदानेन च मूलार्थं विवृण्वती प्रमाणभूतप्राचीनाचार्यमतान्यपि आविष्कुर्वती तत्र तत्र यावदपेक्षितं लघुना विवरणेन सूत्रकाराशयं विशदयन्ती च हृदयहारिणीत्वं स्वस्वान्वर्थयति।

उपसंहारः

इत्थम् सत्यामपि संशीतौ इहास्मिन् शोधप्रबन्धे सरस्वतीकण्ठाभरणवृत्तिकृतः दण्डनाथनारायणस्य देशकालादिविचाराः यथाशक्ति यथामति च विचारिताः। सत्सु नैकमतेषु कतमो ग्राह्य इत्यपि मीमांसित इह। भोजपरम्परायाः एधकोऽयं दण्डनाथनारायणः। अतस्तद्वृत्तिपठनेन नितरां पुनरुज्जीविता भवेत् भोजवाक् इति आशास्महे।

सहायकग्रन्थाः

1. भोजः। १९३७। *सरस्वतीकण्ठाभरणम् (मूलमात्रम्)* । चिन्तामणिः टि. आर् (सम्पा.)। मद्रास विश्वविद्यालयः।
2. भोजः। १९३५। *सरस्वतीकण्ठाभरणम् (व्याकरणशास्त्रीयम्)* । शास्त्री शाम्बशिव (सम्पा.)। त्रिवन्दम् : अनन्तशयन विश्वविद्यालयः।
3. युधिष्ठिरमीमांसकः। *संस्कृत व्याकरणशास्त्र का इतिहास (प्रथमः भागः)*। हरियाणा।
4. वामनजयादित्यौ। २०१६। *काशिका(न्यासपदमञ्जरीभावबोधिनीसहिता)* । त्रिपाठी जयशङ्करलालः (सम्पा.)। वाराणसी : तारा बुक एजेन्सी।
5. शास्त्री विश्वनाथ। १९९६। *सरस्वतीकण्ठाभरण का समीक्षात्मक इतिहास* । दिल्ली :परिमल पाब्लिकेशन्स।
6. डा. रामचन्द्र। २०१०। सरस्वतीकण्ठाभरण और सिद्धान्तकौमुदी का साङ्गोपाङ्ग विवेचन (तद्धित प्रकरण के विशिष्ट सन्दर्भ सहित)। दिल्ली :परिमल पाब्लिकेशन्स।
7. 1934. The Unadisutras In Various Recensions (Part-Vi), Chintamani, T. R.,(ed.), Madras : University of Madras.

शोधप्रबन्धाः

1. Birwe Robert. *Narayana dandanathas commentary on Rules III.2, 106-121 of Bhoja's sarasvatikanthabharana*. American Oriental Society.
2. *Prasad Narayan. 2002. Sarasvatikanthabharana the Magnum Opus of Sanskrit Grammar*, Ahmedabad : L. D Indology.

कृष्णगोपालपात्रः

Krishna Gopal Patra

Ph.D Research Scholar

Ramakrishna Mission Vivekananda Educatioanal & Research Institute

Belur Math, Howrah, 711202, West Bengal

krishnagopalpatranitya@gmail.com

***

cc BY

धर्मशास्त्रग्रन्थेषु सुशासनव्यवस्था

- डि.रेखा

सुशासनव्यवस्था प्रस्तावः धर्मशास्त्रग्रन्थेषु विस्तरेण दृश्यते। तत्र सर्वेषाम् आद्यः मनुस्मृतिग्रन्थ एव। तत्र सप्तमाध्याये शासनव्यवस्थायाः लक्षणम् उत्तमस्य राज्ञः धर्मस्य षड्विंशत्यधिकद्विशतश्लोकैः प्रतिपादितः। यद्यपि वैवश्वतमन्वन्तरे प्रवृत्ता इयं स्मृतिः तथापि प्रथमस्वायम्भुवमनोः आरभ्यैव प्रवृत्ता। प्रथमोऽध्याये पूर्वोक्तादब्रह्माण्डोत्पत्तिः धर्मोत्पत्तिश्च वर्णिता। तदैव स्वायम्भुवमनुना धर्माधर्मादिनिर्णयः कृतः। स्वायम्भुवमनुः देवान् धर्ममुपदिदेश। महर्षयः अपि मनोरेव अधिगतधर्माणः बभूवुः। स एव धर्मः परम्परया अनुसृतः वैवश्वतमन्वन्तरेऽपि प्रवृत्तः। अस्मिन् मन्वन्तरे भृगुमहर्षिः तं धर्मशासनप्रकारं च ग्रन्थस्थं कृतवान्। अतः सुशासनव्यवस्थायाः प्रथमप्रतिपादनग्रन्थः मनुस्मृतिरेव।

मनुस्मृतेः अनन्तरं गौतमर्षिः गौतमधर्मसूत्राणि इति नाम्ना धर्मशास्त्रं रचितवान्। तत्रापि शासनव्यवस्थायाः स्वरूपं राज्ञां धर्मनिर्णयः द्वितीयप्रश्ने द्वितीयेऽध्याये विस्तरेण उपवर्णितम्। प्रथमेऽध्यायेऽपि शुल्कदानादि कोशवृद्धिप्रकारः दर्शितः। ततो याज्ञवल्क्यस्मृतिः शासनव्यवस्थानिरूपणे प्रामाणिकी वर्तते। तत्र आचाराध्यायादिविभागो वर्तते। व्यवहाराध्याये शासनप्रकारः राजधर्माश्च दर्शिताः।[1]प्रायशः महाभारते शासनव्यवस्थैव मनुलस्मृतौ निरूपिता ज्ञायते।

मनुधर्मशास्त्रे सप्तमाध्याये प्रथमं राज्ञः प्रभावः ततो दण्डस्य प्राधान्यं, राज्याङ्गभूताः दुर्गादयः, राज्ञा वर्जनीयाः दोषाः, योग्यानां मन्त्रिणां लक्षणं, योग्या राजधानी, प्रासादः, युद्धधर्माः, कोशपूरणार्थं प्रजाभ्यः करग्रहणं, चारलक्षणं, षाड्गुण्यं, जैत्रयात्राकालः, चतुर्विधोपायप्रयोगः इति सर्वेषां समाहारेणैव सुशासनं भवतीति स्पष्टमुक्तम्। सर्वाणि तानि लक्षणानि, सुशासनव्यवस्थायाम् अपेक्षिता नीतिः इति तस्याः लक्षणमपि निरूप्यते।

1.1.मनुना प्रोक्ता सुशासनव्यवस्था

राजा क्षत्रियः एव भवेदिति स्मृतिषु स्पष्टम्। क्षत्रियस्यापि ब्राह्मणवत् उपनयनसंस्कारः वेदाध्ययनञ्च यथाविधि भवति। एवं समाप्तविद्यः एव क्षत्रियः प्रजारक्षणे नियुक्तो भवितुमर्हति। रक्षणमेव राज्ञः मुख्यकर्तव्यमिति अध्यायसारांशः प्रकरणारम्भे एव निरूपितः।

ब्रह्म प्राप्तेन संस्कारं क्षत्रियेण यज्ञाविधि।
सर्वस्यास्य यथान्यायं कर्तव्यं परिरक्षणम्॥[2]

अत्र श्लोके दलद्वयं वर्तते। यथान्यायं कर्तव्यमिति च। द्वयमपि परिरक्षणस्य विशेषणम्। न्यायमनतिक्रम्य यथान्यायम्। अल्पापराधस्य अल्पो दण्डः महतश्च महानिति। क्रोधादिना

---

[1]रामायणम्.त्र.पृष्ठसंख्या.199-222

[2]मनुस्मृतिः7.2

आविष्टः अपि न्यायातीतं पन्थानं न त्यजेदिति तात्पर्यम्। एवं कर्तव्यम् इत्यत्र तव्य प्रत्ययः विधिसूचकः। अवश्यं करणीयमेव इत्यर्थः।

1.1.2.भृगुणोपदिष्टा राज्ञः उत्पत्तिः

सृष्टेः आरम्भकाले कृतयुगे सर्वाः प्रजाः स्वयं सत्यव्रताः धर्मपालनपराश्च आसन्। तदा शासकस्य अवसरः एव नासीत्। यदा युगपरिवृत्तिः तदा धर्मस्य ग्लानिः क्रमेण अभूत्। ततो धर्मरक्षणार्थं ब्रह्म दिग्पालानाम् अंशैः राज्ञः सृष्टवान्। राज्ञः भीताः सर्वे स्वेषु स्वेषु कर्तव्येषु प्रवर्तन्ते। तदा पुनः धर्मप्रतिष्ठाऽभूत्। शासनकार्यनिर्वहणार्थं प्रजानाम् आदायात् षड्भागं कररूपेण राजा गृह्णाति। गृहीतस्य षड्भागः राज्ञः स्वीयो भवति।

राजा सर्वभूतांशैः दिग्पालांशैः च सृष्टः इति स्वप्रभावेण सर्वान् शासितुम् अर्हति, सर्वभूतानां कार्याण्यपि कर्तुं प्रभवति। अत एव उक्तं मनुना **सर्वभूतमयो हि सः**[3]

1.1.3.दण्डस्य प्राधान्यम्

राजा सर्वदा देशकालौ स्वशक्तिं च आलोच्य यस्य दोषस्य यो दण्डो विधेयः तमेव दण्डं प्रयुज्येत। दण्डभयादेव चतुर्णां वर्णानामाश्रमाणां च धर्माः प्रचलन्ति। अत एव राजा धर्मस्य प्रतिभूः भवति। असमीक्ष्य कृतो दण्डः राज्ञा सार्थं सर्वान् नाशयन्ति समीक्ष्य धृतः सर्वान् रञ्जयति।

दण्डश्शास्ति प्रजास्सर्वा दण्ड एवाभिरक्षति।
दण्डस्सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः॥[4]

दण्डो धर्मस्वरूपः। अस्य आकारः श्यामवर्णं लोहिताक्षश्च। यदि दण्डनायकः दण्डं सम्यक् पालयति, प्रजाः मोहरहिताः भवन्ति। दण्डवन्तमेव राजानं धर्मोऽपि रक्षति। राजा स्वयं सत्यवादी भवेत्। पक्षपातेन यो राजा धर्मान् विचलति सः दण्डेनैव निहन्यते। दण्डरहितः मूढः विद्याजन्यविहीनः विषयासक्तः राजा दण्डं पालयितुं न शक्नोति। अतः राजा सदा शुचिः सत्यव्रतः तथा शास्त्रानुसारी च भवेदिति मनुस्मृतौ सम्यक् प्रतिपादितम्। अतः पालकः सदा धर्मरक्षणपरः त्रिकरणशुद्धिमान् च भवेदिति सुशासनव्यवस्थायाः मूलम्। पक्षपातराहित्यमेवेति मनुना प्रतिपादितम्[5]।

1.1.4.पालकेन अभ्यसनीयाः विद्याः

पुरा काले वेदाध्ययनं त्रैवर्णिकानाम् अपरिहारतया करणमासीत्। अद्यापि मनुना दर्शितासु राजविद्यासु ये ये अंशाः प्रतिपादिताः ते इदानीन्तनैः शासकैरपि अभ्यसनीयाः। धनादिविषये रूपभेदेऽपि शासनप्रयोगे मौलिकस्वरूपं पुरा इदानीं च तुल्यरूपमेव भवति।

---

[3]मनुस्मृतिः7.11

[4]मनुस्मृतिः7.18

[5]मनुस्मृतिः 7.26-34

CC BY

कुल्लूकभट्टः तासां विद्यानां स्वरूपं प्रयोजनञ्च मन्वर्थमुक्तावल्यां व्याख्यातवान्। अतः तद्व्याख्यास्वरूपम् प्रतिपाद्यते।

त्रैविद्येभ्यस्त्रयी विद्या दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकी चात्मविद्या वार्तारम्भाश्च लोकतः॥

त्रैविद्येभ्यः इति। त्रिवेदीरूपविद्याविद्भ्यः त्रिवेदीमर्थतो ग्रन्थतश्चाभ्यासेन ब्रह्मचर्यदशायामेव वेदग्रहणात्समावृत्तस्य च राज्याधिकारादभ्यासार्थोऽयमुपदेशः। दण्डनीतिं चार्थशास्त्ररूपाम् अर्थयोगक्षेमोपदेशिनीं पारम्पर्यातत्वेन नित्यां तद्विद्भ्योऽधिगच्छेत्। तथा आन्वीक्षिकीं तर्कविद्यां भूतप्रवृत्तिप्रयुक्त्युपयोगिनीं ब्रह्मविद्यां चा अभ्युदयव्यसनयोः हर्षविषादप्रशमनहेतुं शिक्षेत। कृषिवाणिज्यपशुपालनादिवार्तां तदारम्भात् धनोपायार्थां तदभिज्ञकर्षकादिभ्यः शिक्षेत्[6]।

1.1.5.शासकेन वर्जनीया दोषाः

इन्द्रियैराकृष्टः शासकः विषयासक्तः अधर्मपरश्च भूत्वा प्रजाः नश्यति स्वयं च नष्टो भवति। कामेन दश दोषाः क्रोधेन अष्टौ दोषाश्च भवन्ति। अतः शासकः सदा व्यसनरहितो भवेत्।

कामेन मृगयासक्तिः, अक्षक्रीडासक्तिः, दिवास्वप्नः, निन्दा, स्त्रीव्यसनं, मदः, नृत्यगीतावाद्येषु अत्यासक्तिः, वृधाटनम् इति दश दोषाः भवन्ति। नृत्यं गीतं वादिभिमिति संहतान्यपि व्यसनानि त्रीणि पृथक् परिगणितानि एतेषु आसक्तः शासनकार्याणि द्रष्टुं न उत्सहते।

व्यसनस्य च मृत्योश्च व्यसनं कण्टमुच्यते।
व्यसन्यधोऽद्यो व्रजते स्वर्यात्यव्यसनी मृतः॥[7]

2.मन्त्रिणो लक्षणम्

स प्रतिबन्धमर्थम् अर्थमधिगन्तुं सहायवान् राजा एव प्रभवति। अत एव प्राक्तनकालादारभ्य मन्त्रिणां प्राधान्यम् अधिकतया शासनव्यवस्थायां दृश्यते। मन्त्रिशब्दः मत्रि गुप्तालोचने[8] इति चुरादि धातोः निष्पन्नः। अतः यत्र रहस्यनिर्णयः कार्यः तत्र उत्तमानां सहायं स्वीकृत्य राजा कार्येषु वर्तेत। अत एव धिया सचिवः सहायकः मन्त्री भवति। राज्याङ्गेषु मन्त्री प्रधानम्। मन्त्री कुलक्रमागतः शास्त्रपण्डितः शूरः, लक्ष्यसाधने समर्थः, उत्तमकुलसञ्जातः भवेत्। एवंविधाः उत्तमाः सप्तमाष्टौ वा राज्ञः समीपे भवेयुः।

---

[6]मनुस्मृतिव्याख्या 7.43

[7]मनुस्मृतिः 7.53

[8]अमरकोशः 2-8-4 मन्त्री धी सचिवोऽमात्यः

2.1. दूतः

सन्धिविग्रहादि षाड्गुण्यसाधकः दूतः करणीयः। सोऽपि मन्त्रितुल्यः भवेत्। सर्वशास्त्रविशारदः परेषां मनोभावज्ञः उपधाशुद्धश्च भवेत्। एवम् आकृतिरपि तस्य गम्भीरा अपेक्षिता। मन्त्रिणि केवलं दण्डः अधीनः। कोशं राष्ट्रं च राजाधीनम्। किन्तु दूतेन सन्धिः संग्रामः च सम्पद्यते इति। दूतः ताभ्यामपि समर्थो भवेत्। शत्रोः स्थानं प्रक्रियां तदिङ्गितादि ज्ञात्वा शत्रुः किं चिकीर्षतीति राज्ञे निवेदयेत्[9]।

श्रीमद्रामायणे आञ्जनेयः महाभारते च श्रीकृष्णः इव दूतः सर्वलक्षणसम्पन्नः भवेत्।

दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम्।
इंगिताकार चेष्टज्ञं शुचिं दक्षं कुलोद्भतम्॥
अनुरक्तश्शुचिर्दक्षः स्मृतिमान् देशकालवित्।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते॥[10]

2.2.राजधानी लक्षणम्

यत्र धान्यादिसमृद्धिः जलसमृद्धिः धार्मिकाणामवासः पुष्पपल्लवसमृद्धिश्च भवति, वाणिज्यादिअनुकूलो देशश्च भवति तत्र राजधानी कल्पयेत्।

जांगलं सस्यसम्पन्नमार्थप्रायमनाविलम्।
रम्यमानतसमन्तं स्वाजीव्यं देशमावसेत्॥[11]

2.3.राज्यपालनधर्मः

राज्ञा प्रथमं स्वराज्यरक्षा कार्या। इदानीमपि शासकैः स एव रक्षाप्रकारः प्राक्तनकालेऽपि दृष्टः। अतः स्वरक्षायै प्रथमं साम प्रयोज्यम्। दान भेदश्च क्वचित् न जलितो भवतः। यथा कृषीवलः स्वक्षेत्रे केदारेण समं प्ररूढं कक्षम् अपनीय सस्यरक्षां करोति तथा अन्तर्गतान् शत्रून् प्रथमं शासकः निर्मूलयेत्। अद्यकालेऽपि शासकैः बलप्रयोगेण आपद्दायिनः आतंकवादिनश्च हन्यन्ते एव। एवं कुर्वाणः शासनः अचिरात् क्षीणो भवति। राष्ट्रकर्शनेन राजाऽपि क्षीणो भवति। केषांचित् ग्रामाणां मध्ये तद्रक्षणार्थं गुल्मम् अधिवेशयेत्। अद्यतनकाले यथा कन्टोन्मेट् नाम्रा सेनानिवेशः स्थाप्यते। तद्वत् इत्यर्थः।

पौरपालने ग्रामे ग्रामाधिकारी नियोज्यः। तेषामुपरि दशग्रामाधिपः विंशतिग्रामाधिपः इति क्रमेण अधिकारिणो भवेयुः। यत्र दोषं ग्रामेशः स्वयमपनेतुं न प्रभवति तं विवादं दशेशाय विंशतीशाय निवेदयेत्। एवं क्रमेण उत्तरोत्तरनिर्णयाधिकारः (APPILATE) भवेत्।

तेषां ग्राम्याणि कार्याणि पृथग्कार्याणि चैव हि।
राज्ञोऽन्यस्सचिवः स्निग्धस्तानि पश्चेदतन्द्रितः॥[12]

---

[9]मनुस्मृतिः 7.65-67

[10]मनुस्मृतिः 7.63-64

[11]मनुस्मृतिः 7.69

[12]मनुस्मृतिः 7.110-120

CC BY

2.3.1 कोशाभिवृद्धिः लक्षणं च

राजा वणिजां विषये तद्वाणिज्यपरिशीलनं कृत्वा क्रयविक्रयमूल्यं ज्ञात्वा क्वचित् निश्चित्य लाभांशात् कस्माददीत। तद्विषये स्वकर्तव्यं व्ययभारं च समीक्ष्य करनिर्णयं कुर्यात्। वणिजः धनं गृहीत्वा तद्रक्षामपि राजा एव वहेत्। तत्र केषां वस्तूनां क्रये विक्रये च कियान् शुल्को ग्राह्यः इति स्पष्टमुक्तम्। अद्यतनकाले यथा चतुस्सोपानयुक्तं करग्रहणं भवति तद्वत् राज्ञा ग्राह्यं शुल्कांशमपि मनुः निर्णीतवान्। अद्यतनकाले वस्तुसेवा करविभागः वस्तुसेवा निमीकृत्य प्रतिशतं-पञ्चमांशं द्वादशांशम् अष्टादशांशम् अष्टाविंशाशं च करं पृथक् पृथक् गृह्णाति। तथैव राजा केभ्यः पदार्थेभ्यः कियत् शुल्कं ग्राह्यमिति मनुना निर्णयः कृतः। पशुफलहरण्ये पञ्चाशत् भागः धान्ये अष्टमः भागः भूमे स्थितिमनुसृत्य पष्टकद्वादशं वा भागः निर्णीतः। ग्रन्थौषधीषुष्पाणि इत्यादये प्रायशः षड्भागोपजीवो एव निर्णीतः।

कारकान् शिल्पिनश्चैव शूद्राश्चात्मोपजीविनः।
एकैकं कारयेत्कर्म मासि मासि महीपतिः॥[13]

2.3.2.राज्ञः कर्तव्यम्

1.स्वयं कार्यनिर्णये कुत्रचित् भ्रान्तो न भवेदिति उत्तमं मन्त्रिणं सहायकं स्वीकुर्यात्।

2.मन्त्रिषु अधिकारिषु विद्यमानेष्वपि यत्र प्रजानाम् आक्रोशः भवति स मृततुल्यः राजा भवति

3.एकान्ते यथा इतरे मन्त्रं न जानन्ति तया मन्त्रालोचनं कुर्यात्। यथा गिरेः वृष्टे अधिव्यकायां, प्रासादे, अरण्ये वा मन्त्रालोचनं कुर्यात्। यस्य मन्त्रं तृतीयो न जानाति स राजा सम्यक् प्रजाः शास्ति।

4.धर्मार्थकामाः अन्योन्यविरुद्धाः भवन्ति। तेषाम् अन्योन्य विरोधः यथा न भवति तथा सर्वेषां साधनं राज्ञः कर्तव्यम्।

5.शत्रुषु अपि पार्श्ववर्ती मध्यस्थः विजिगीषु इत्यादयो बहवो भवन्ति। प्रथमं शत्रु तस्य सहायकं ज्ञात्वा प्रतीकारं चिन्तयेत्। राज्ञा अवेक्षणीयाः द्विसन्तति कार्यप्रकाराः मनुना निरूपिताः।[14]

अपि च राज्ञः सर्वाधीन् कर्तव्यं प्रजारक्षणमेव।
क्षत्रियस्य परोधर्मः प्रजानामेव पालनम्।
निर्दिष्टफलभोक्ता हि राजः धर्मेण युज्यते॥[15]

---

[13]मनुस्मृतिः7.138

[14]मनुस्मृतिः7.149-157

[15]मनुस्मृतिः 7.144

2.3.2.जैत्रयात्राकालः

राजा स्वपराक्रमं स्थापयित्वा सर्वान् राज्ञः वशेः स्थापयितुं जैत्रयात्रां करोति स्म।

प्रथमं दौत्यं प्रयुज्य ततः षाड्गुण्यमपि अनुतिष्ठेत्।

1.सन्धिः 2. विग्रहः 3.यानम् 4.आसनं 5.द्वैधीभावः 6.संश्रयः

1.सन्धिश्च द्विविधः समानयानकर्मा, तद्विषिधश्च। आयात संयुक्तः अर्थात् लाभयुक्तः यथा भवति तदवक्ष्य कुर्यात्। यानकाले रात्रोः शत्रुम् अन्यतरं विज्ञाय येन संधाय अहं हितो अबियस्यामि त्वं ततो भिया हि इति निश्चयः। यथा उत्तरगोग्रहणे कृतवर्मा विराटस्य शत्रुः। दुर्योधनेन कृत सन्धिः सः दक्षिणगोग्रहणार्थं गतवान्। दुर्योधनः उत्तरगोग्रहणमकरोत्। अपि च सविभाज्य मध्ये त्वं इदं ग्रहाण, अहं इदं गृहणमिति अवगाहनम्।

मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः।
फाल्गुनं कथं चैत्रं वा मासौ प्रति यथा बलम्॥
अन्येष्वपि तु कालेषु यदा पश्येद् धृवं जयम्।
तदा यायाद्विगृहेयैव व्यसने चोत्थिते रिपोः॥[16]

एवं प्रकारेण धर्मशास्त्रग्रन्थेषु शासनव्यवस्था अत्यन्तसुन्दरतया वर्णिता वर्तते।

सन्दर्भग्रन्थसूची

1.श्रीमद्रामायणम्, प्रथमसर्गः, तिलक-शिरोमणि-भूषणेति टीकात्रयेणोप स्कृतम्, एकैकशः, सप्तकाण्डानि, वाल्मीकिः परिमलपब्लिकेषन्स्, 27/28, शक्तिनगर्, दिल्ली-100007,2000.

2. मनुस्मृति, उल्लूकभट्टः, बालसरस्वती बुक् डिपो एड्युकेषनल् पब्लिषर्स, कर्नूल् 518001,1928

डा.डि.रेखा
D. Rekha
M.A.,Ph.D. PDF
संस्कृतपण्डिट्
तिरुपतिः
दूरवाणि -9392965146
rekhad42@gmail.com

***

[16]मनुस्मृतिः7.182-183

CC BY

पञ्चमहापुरुषयोगानां प्रायोगिकमध्ययनम्

- मुरलिकृष्ण टि.

शोधसारः -

होराशास्त्रे निरूपितेषु राजयोगेषु अन्यतमत्वेन पञ्चमहापुरुषयोगाः विख्याताः । वराहमिहिराचार्यस्य बृहत्संहितायाः आरभ्य मानसागरीपर्यन्तमनेके दैवज्ञाः सयुक्तिकं सफलं योगानिमान् प्राहुः । लेखेऽस्मिन् होराग्रन्थस्थाः मतभेदाः प्रस्तुताः । फलनिर्णयार्थम् अवश्यं चिन्तनीयाः मननीयाश्च अंशाः विमृष्टाः । पञ्चमहापुरुषयोगसञ्जातास्सर्वे राज्यभाजः पदभाजः वा न भवन्ति । यतः होराशास्त्रमर्मज्ञाः प्रसिद्धमिदमाभाणकं सरीस्मरन्ति यद्बलतारतम्ये फलतारतम्यमिति । तदर्थमपेक्षिताः केचन विषयाः दिङ्मात्रेण जातकचिन्तनपुरस्सरं स्पष्टीकृताः ।

****

❀ उपोद्घातः

त्रिस्कन्धात्मके ज्योतिश्शास्त्रे जातकफलचिन्तनदृष्ट्या होरास्कन्धस्यास्ति अनितरसाधारणं वैशिष्ट्यम् । होरास्कन्धस्तु पूर्वार्जितशुभाशुभकर्मणः फलपरिपाकम् अभिव्यञ्जयति । फलप्रवचनायापेक्षितेषु पदार्थेषु योगाः अपि अन्यतमाः । प्रारब्धकर्मसमुद्भुतै: शुभाशुभफलै: पुरुषं ये योजयन्ति त एव योगा: इति योगस्य निर्वचनम् । एतदेवोक्तं प्रश्नमार्गकृता यथा -

ग्रहाणां स्थितिभेदेन पुरुषं योजयन्ति हि ।
फलै: कर्मसमुद्भूतै: इति योगा: प्रकीर्तिताः ॥[1] इति ।

अयं श्लोकः योजयन्तीति योगा: इति व्युत्पत्तेः अर्थं द्रढयति । योगो नाम युति:, युतिर्नाम अन्तराभाव: इति सिद्धान्तविदः अवोचन् । किन्तु युजिर्योगे धातुना निष्पन्नः योगाख्यः शब्दः ग्रहयुतिसूचकः । इमे ग्रहयोगाः सप्तविधाः भवन्ति इति प्रश्नमार्गकारः अभिप्रैति । यथा –

स्थानतो भावतः खेटैः स्थानभावनभश्चरैः ।
स्थानभावसमायोगाद्भावखेचरयोगतः ॥
योगाः स्युः षड्विधाः स्थानखेचराभ्यान्तु सप्तमः ।[2] इति ।

होराशास्त्रविदः अनेकान् ग्रहयोगान् प्रत्यपादयन् । यथा - नाभसयोगः, चान्द्रयोगः, प्रव्रज्यायोगः, राजयोगः, द्विग्रहयोगश्चेति । प्रकृते निरूप्यमाणाः पञ्चमहापुरुषयोगाः ताराग्रहाः, तेषाम् उच्चस्थानानि, लग्न-चतुर्थ-सप्तम-दशमेति केन्द्रस्थानानि च आधृत्य स्थान-भाव-नभश्चरैः (पूर्वोक्तेषु सप्तसु तृतीयः भेदः) घटन्ते ।

---

[1] प्र. मा. – ९अ. ४८श्लो.

[2] प्र. मा. – ९अ. ४९-५०श्लो.

❀ विविधेषु होराग्रन्थेषु पञ्चमहापुरुषयोगाः ।

विद्यमानेषु प्राचीनग्रन्थेषु अन्यतमायां वराहमिहिरप्रणीतायां बृहत्संहितायां पञ्चमहापुरुषलक्षणाध्यायः निरूपितः ।[3] ततोऽर्वाचीनः कल्याणवर्मा स्वरचिते सारावल्याख्ये ग्रन्थे देवकीर्तिनिरूपितान् पञ्चमहापुरुषयोगान् न्यरूपयत् ।[4] सारावल्याः सप्तत्रिंशः अध्यायः पञ्चमहापुरुषलक्षणमिति नाम्ना प्रसिद्धः ।

पण्डित-देवचन्द्र-झा-सम्पादितायाः बृहत्पाराशर्याः उत्तरार्धे पञ्चसप्ततितमेऽध्याये, वैद्यनाथकृते जातकपारिजाते राजयोगनामके सप्तमेऽध्याये, मन्त्रेश्वरप्रणीतायां फलदीपिकायां राजयोगभेदो नामके षष्ठेऽध्याये, नृसिंहदैवज्ञकृते जातकसारदीपे एकचत्वारिंशत्तमेऽध्याये, दुण्ढिराजकृते जातकाभरणे, पुदुमनसोमयाजिकृते जातकादेशमार्गेऽष्टमाध्याये, पुञ्जराजविरचिते शम्भुहोराप्रकाशस्य द्वादशेऽध्याये, अज्ञातकर्तृकायाः मानसागर्याः चतुर्थाध्याये च पञ्चमहापुरुषयोगाः विस्तरेण विमृष्टाः । बृहत्संहितायां सारावल्यां जातकसारदीपे च पञ्चमहापुरुषयोगसम्बद्धेषु विषयेषु साम्यता दृश्यते ।

पराशरः, वराहमिहिरः, कल्याणवर्मा, नृसिंहदैवज्ञः, दुण्ढिराजः, पुञ्जराजश्च योगानेतान् पृथगध्यायेषु न्यरूपयन् । किन्तु वैद्यनाथः, मन्त्रेश्वरः, पुदुमनसोमयाजी, मानसागरीकारश्च राजयोगाध्याये एतान् योगान् समावेश्य राजयोगेष्वन्यतमत्वेन पञ्चमहापुरुषयोगान् जगृहुः । दैवज्ञाः जातकावलोकनकाले राजयोगेषु अन्यतमत्वेन पञ्चमहापुरुषयोगान् सङ्गृह्णन्ति ।

❀ पञ्चमहापुरुषयोगानां लक्षणम् ।

कल्याणवर्मणः कृतौ पञ्चमहापुरुषयोगानां लक्षणमुक्तं यथा -

स्वक्षेत्रे च चतुष्टये च बलिभिः स्वोच्चस्थितैर्वा ग्रहैः
शुक्राङ्गारकमन्दजीवशशिजैरेतैर्यथानुक्रमम् ।
मालव्यो रुचकः शशोऽथ कथितो हंसश्च भद्रस्तथा ॥[5] इति ।

स्वक्षेत्रे स्वोच्चे वा स्थितैः केन्द्रङ्गतैश्च कुजादिपञ्चताराग्रहैः क्रमशः

---

[3] नायं होराग्रन्थः । किञ्च प्राप्यमाणेषु प्राचीनेषु ग्रन्थेषु पञ्चमहापुरुषयोगाः अस्यां संहितायामेवोपलभ्यन्त इत्यतः ग्रन्थोऽयं स्वीकृतः ।

[4] सारा. – ३७अ. १श्लो. – श्रीदेवकीर्तिराजा पञ्चमहापुरुषलक्षणान्नृपतीन् ।
कथयति यांस्तानहमपि कथयामि निराकुलीकृत्य ॥

[5] सारा. – ३७अ. २श्लो. । फलदीपिकायां (६अ. १श्लो.) यथा -
रुचकभद्रकहंसकमालवाः स शशक इति पञ्च च कीर्तिताः ।
स्वभवनोच्चगतेषु चतुष्टये क्षितिसुतादिषु तान् क्रमशो वदेत् ॥
जातकादेशमार्गे (८ अ. १श्लो.) यथा -
स्वोच्चस्वक्षेत्रगतैः केन्द्रस्थैः कुजबुधेड्यसितमन्दैः ।
रुचको भद्रो हंसो मालव्यः शश इति क्रमाद्योगः ॥

CC BY

रुचकादिपञ्चमहापुरुषयोगाः जायन्ते । अर्थात् कुजेन रुचकः, बुधेन भद्रः, गुरुणा हंसः, शुक्रेण मालव्यः, शनिना शशश्चेति । जातकपारिजातकारः वैद्यनाथः अमीषां योगानां लक्षणं निरूपयन् **'मूलत्रिकोणनिजतुङ्गगृहोपयाताः'**[6] इति मूलत्रिकोणस्थानमग्रहीत् । इह हि ग्रहाणां मूलत्रिकोणस्थानस्य उच्चस्वक्षेत्रेष्वन्यतमत्वात् तत्स्थानमत्यजन् प्राञ्चः ।

❀ पञ्चमहापुरुषयोगानां फलानि ।

मन्त्रेश्वरकृतायां फलदीपिकायां निरूपितानि पञ्चमहापुरुषयोगफलानि निरूप्यन्ते । तत्रादौ कुजेनोत्पद्यमानस्य रुचकयोगस्य फलमाह -

दीर्घास्यो बहुसाहसाप्तविभवः शूरोऽरिहन्ता बली
गर्विष्ठो रुचके प्रतीतगुणवान् सेनापतिर्जित्वरः ।[7] इति ।

दीर्घं मुखं, स्वपराक्रमेणाऽऽर्जितधनयुक्तः, शूरः, शत्रुनाशकः, बलयुक्तः, गर्वान्वितः, उत्तमगुणयुक्तः, सेनानायकः, जयी च भवति । बुधकृते भद्रयोगोत्पन्ने जातके एते गुणाः भवितुमर्हन्ति -

आयुष्मान् सकुशाग्रबुद्धिरमलो विद्वज्जनश्लाघितो
भूपो भद्रकयोगजोऽतिविभवश्चास्थानकोलाहलः ॥[8] इति ।

गुरुकृते हंसयोगे उत्पन्नः जातकः सज्जनैः कीर्त्यमानः, भूम्यधिपः, पादयोः करयोः वा शङ्ख-कमल-मीन-अङ्कुशादिराजचिह्नयुक्तः, सुन्दरशरीरयुक्तः, मृष्टान्नभुक्, धर्मकार्येषु प्रीतियुक्तश्च भवति । उक्तमेतद्यथा -

---

[6] जा. पा. – ७अ. (राजयोगाध्यायः), ५९श्लो. यथा -

मूलत्रिकोणनिजतुङ्गगृहोपयाता भौमज्ञजीवसितभानुसुता बलिष्ठाः ।
केन्द्रस्थिता यदि तदा रुचभद्रहंसमालव्यचारुशशयोगकरा भवन्ति ॥

[7] फ. दी. - ६अ. २श्लो. । जातकपारिजाते (७अ. ६०श्लो.) यथा –

जातः श्रीरुचके बलान्वितवपुः श्रीकीर्तिशीलान्वितः
शस्त्री मन्त्रजपाभिचारकुशलो राजा□□□□थवा □□तत्समः ।
लावण्यारुणकान्तिकोमलतनुस्त्यागी जीतारिर्धनी
सप्तत्यब्दमितायुषा सह सुखी सेनातुरङ्गाधिपः ॥

जातकादेशमार्गे (८अ. २श्लो.) यथा –

उत्साहशौर्यधनसाहसवान् प्रसिद्धः श्रीमन्त्रणेषु विजयी नृपवल्लभश्च ।
पित्तोल्बणो बलयुतश्चपलोऽतिरोषो जातो भवेच्च रुचके कृशमध्यगात्रः ॥

[8] फ. दी. - ६अ. २श्लो. । जातकपारिजाते (७अ. ६२श्लो.) यथा –

शार्दूलप्रतिमाननो गजगतिः पीनोरुवक्षस्थलो
लम्बापीनसुवृत्तबाहुयुगलस्तत्तुल्यमानोच्छ्रयः ।
मानी बन्धुजनोपकारनिपुणः श्रीभद्रयोगोद्भवो
राजाऽशीतिमितायुरेति विपुलप्रज्ञायशोवित्तवान् ॥

जातकादेशमार्गे (८अ. ३श्लो.) यथा –

वाग्मी पटुः पवनपित्तकफप्रधानः शास्त्रार्थविद्धृतियुतो द्विजदेवभक्तः ।
श्यामः कलासु निपुणो बहुवर्षजीवी भद्रे स्वकर्मनिरतश्च भवेत्प्रजातः ॥

हंसे सद्भिरभिष्टुतः क्षितिपतिः शङ्खाब्जमत्स्याङ्कुशै-
श्चिह्नैः पादकराङ्कितः शुभवपुर्मृष्टान्नभुग्धार्मिकः ।[9] इति ।

शुक्रकृते मालव्ययोगे जातः पुष्टशरीरी, धैर्यवान्, धनिकः, सुत-स्त्र्यादिभाग्यान्वितः, प्रत्यहं वर्धमानः, उत्तमानां वस्तूनां वाहनानां च प्राप्ता, यशस्वी, विद्वान्, प्रसन्नेन्द्रियश्च भवति । उक्तमत्र -

पुष्टाङ्गो धृतिमान्धनी सुतवधूभाग्यान्वितो वर्धनो
मालव्ये सुखभुक्सुवाहनयशा विद्वान्प्रसन्नेन्द्रियः ॥[10] इति ।

शनिकृते शशयोगे जातः सर्वजनैः श्लाघ्यः, उत्तमसेवकैः युतः, बलवान्, ग्रामाधिपः, नृपः, दुश्चारित्र्यः, परस्त्रीषु प्रीतियुक्तः, सौख्यवांश्च भवति । उक्तमेतत्फलदीपिकायां यथा -

शस्तः सर्वजनैः सुभृत्यबलवान् ग्रामाधिपो वा नृपो
दुर्वृत्तः शशयोगजोऽन्यवनितावित्तान्वितः सौख्यवान् ।[11] इति ।

एवं पञ्चमहापुरुषयोगानां फलानि कीर्तितानि ।

---

[9] फ. दी. - ६अ. ३श्लो. । जातकपारिजाते (७अ. ६३श्लो.) यथा –

रक्तास्योन्नतनासिकः सुचरणो हंसस्वरः श्लेष्मको
गौराङ्गः सुकुमारदारसहितः कन्दर्पतुल्यः सुखी ।
शास्त्रज्ञानपरायणोऽतिनिपुणः श्रीहंसयोगे गुणी
जातोऽशीतिकमायुरेति सयुगं (८४) साधुक्रियाचारवान् ॥

जातकादेशमार्गे (८अ. ४श्लो.) यथा –

अर्थधर्मसुखभाक् नृपपूज्यः श्लेष्मलो गुरुसुरद्विजभक्तः ।
सुस्वरः प्रथितकीर्तिरुदारो हंसजः सुरुचिरश्चिरजीवी ॥

[10] फ. दी. - ६अ. ३श्लो. । जातकपारिजाते (७अ. ६४श्लो.) यथा –

स्त्रीचेष्टो ललिताङ्गसन्धिनयनः सौन्दर्यशाली गुणी
तेजस्वी सुतदारवाहनधनी शास्त्रार्थवित्पण्डितः ।
उत्साहप्रभुशक्तिमन्त्रचतुरस्त्यागी परस्त्रीरतः
सप्तत्यब्दमुपैति सप्तसहितं (७७) मालव्ययोगोद्भवः ॥

जातकादेशमार्गे (८अ. ५श्लो.) यथा –

गीतप्रियो रजतरत्नपरिच्छदस्त्रीसद्वस्त्रभूषणयुतो विषयोपभोक्ता ।
रामा मनोहरवपुः कफवातशाली मालव्यजो भवति सप्ततिवर्षजीवी ॥

[11] फ. दी. - ६अ. ४ श्लो. । जातकपारिजाते (७अ. ६५श्लो.) यथा –

भूपो वा सचिवो वनाचलरतः सेनापतिः क्रूरधी-
र्धातोवार्दविनोदवञ्चनपरो दाता सरोषेक्षणः ।
तेजस्वी निजमातृभक्तिनिरतः शूरोऽसिताङ्गः सुखी
जातः सप्ततिरायुरेति शशके जारक्रियाशीलवान् ॥

जातकादेशमार्गे (८अ. ६श्लो.) यथा –

राजप्रियो देशपुराधिनाथो भक्तो जनन्यां कृषिधान्ययुक्तः ।
वातोल्बणश्यामकृशाङ्गयष्टिः शशोद्भवः स्या त्परशाठ्यवेदी ॥

CC BY

❀ पञ्चमहापुरुषयोगाः न केवलं लग्नात् अपि तु चन्द्रादपि !

पञ्चमहापुरुषयोगान् न केवलं लग्नादेव, चन्द्रादपि गणयेत् । एषु योगेषु एकस्मिन् योगे जातः भाग्यवान्, योगद्वये नृपतुल्यः, योगत्रये राजा, योगचतुष्टये नृपेन्द्रः, योगपञ्चके सति जातः चक्रवर्ती स्यादित्यवदत् मन्त्रेश्वरः -

लग्नेन्द्वोरपि योगपञ्चकमिदं साम्राज्यसिद्धिप्रदम् ।
तेष्वेकादिषु भाग्यवान् नृपसमो राजा नृपेन्द्रोऽधिकः ॥[12] इति ।

❀ पञ्चमहापुरुषयोगानां फलनिर्णये चिन्तनीयाः विषयाः के?

अथ च रविचन्द्रयोः बलाबलं संवीक्ष्य पञ्चमहापुरुषयोगेषु जातानां वापुषिकगुणाः (रविणा) , मानसं बलं (चन्द्रेण) च चिन्तयेत् । यतो हि वराहस्त्वाह यथा-

सत्त्वमहीनं सूर्याच्छारीरं मानसञ्च चन्द्रबलात् ।
यद्राशिभेदयुक्तावेतौ तल्लक्षणः पुमान् ॥
तद्धातुमहाभूतप्रकृतिद्युतिसत्वरूपाद्यैः । [13] इति ।

रविचन्द्रयोः बलाबलनिर्णयार्थं ताभ्यां प्राप्तान् षड्वर्गान् समाकलयेत् । तत्र च **रक्तश्यामो भास्करो गौर इन्दुः**[14], **मधुपिङ्गलदृग्**[15], **शिखिभूखपयोमरुद्गणानां वशिनः**[16], **स्नाय्वस्थ्यसृगित्यादि**[17] होरावचनैः महापुरुषयोगोत्पन्नानां शरीरस्य कान्ति-सत्त्व-धात्वादिकं चिन्तयेत् । इति भट्टोत्पलः आह । तन्नाम पुरुषस्य गुणावगुणान् होराशास्त्रोक्तनियमानुगुणं युक्त्या चिन्तयेत् ।

❀ पञ्चमहापुरुषयोगानां बलतारतम्ये फलतारतम्यम् !

पञ्चमहापुरुषयोगानां फलनिर्णये विचारणीयाः अंशाः बहवस्सन्ति । तत्र

१. रविचन्द्रौ बलाधिकौ स्याताम् । -

पञ्चमहापुरुषयोगाजानां जातके रविचन्द्रयोः बलाधिक्यस्थितावेव तद्योगफलानुभवः, अन्यथा सङ्कीर्णाः पुरुषाश्चिन्त्याः । यतस्तदुक्तम् आचार्येण मिहिरेण संहितायां यथा - **अबलरवीन्दुयुतैस्तैः सङ्कीर्णा लक्षणैः पुरुषाः** ।[18] इति । बलरहितेन्दुरविभ्यां महापुरुषयोगे जातानां सङ्कीर्णपुरुषाणां पृथङ्नामानि अदात् वराहो यथा -

---

[12] फ. दी. – ६अ. ४श्लो. उत्तरार्धम्

[13] बृ. सं. – ६८अ. ३-४श्लो.

[14] बृ. जा. – २अ. ४श्लो.

[15] बृ. जा. – २अ. ८श्लो.

[16] बृ. जा. – २अ. ६श्लो.

[17] बृ. जा. – २अ. ११श्लो.

[18] बृ. सं. – ६८अ. ४श्लो.

पश्चापरे वामनको जघन्यः कुब्जोऽथवा मण्डलकोऽथ साची ।
पूर्वोक्तभूपानुचरा भवन्ति सङ्कीर्णसंज्ञाः शृणु लक्षणैस्तान् ॥[19]

भद्रस्य वामनकः, मालव्यस्य जघन्यः, हंसस्य कुब्जः, रुचकस्य मण्डलकः, शशस्य साची इति सङ्कीर्णलक्षणयुक्ताः पुरुषाः जायन्ते । एते च रुचकादिमहापुरुषाणाम् अनुचरास्तिष्ठन्ति । न तु राज्यभाजः भवन्ति ।

२. बलरहितयोः रविचन्द्रयोः महापुरुषयोगसम्भवे राजपदव्यलाभः ।

सारावलीकारः सिद्धान्तेऽस्मिन् बद्धादरः दरीदृशीति । अत्र प्रमाणं यथा -

बलरहितेन्दुरविभ्यां युक्तैर्भौमादिभिर्ग्रहैर्मिश्राः ।
न भवन्ति महीपाला दशासु तेषां सुतार्थयुताः ॥[20] इति ।

रविचन्द्रयोः बलरहितयोः भौमादिग्रहैरुत्पन्नाः पञ्चमहापुरुषयोगाः राजपदवीं न प्रयच्छन्ति । किन्तु जातकः योगकारकस्य दशायां राजभिः अनुभूयमानानि सुत-धनादिसुखानि लभते ।

३. पञ्चमहापुरुषयोगभङ्गयोगः राजपदव्यलाभश्च ।

केचिद्योगा राजयोगस्य भङ्गाः[21] इति वैद्यनाथस्य वचनम् । नृसिंहदैवज्ञस्तु यथाह –

राजयोगाः समाख्यातास्तेषां भङ्गश्च दारुणः ।
परीक्ष्य यत्नतः प्राज्ञः फलं ब्रूयाद्बलाबलात् ॥[22] इति ।

अनेन राजयोगस्य सद्भावे तद्भङ्गोऽपि सूक्ष्मतया अवलोक्यः । अवीर्यैः योगकारकग्रहैः स्वप्नचिन्तास्वेव फलपरिपाकः । रुचकादिमहापुरुषयोगानां भङ्गयोगोऽयमित्याह मानसागरीकारः -

केन्द्रोच्चगा यद्यपि भूसुताद्या मार्तण्डशीतांशुयुता भवन्ति ।
कुर्वन्ति नोर्वीपतिमात्मपाके यच्छन्ति ते केवलसत्फलानि ॥[23]

कुजादिग्रहाः केन्द्रोच्चस्थाः सन्तोऽपि चन्द्रसूर्याभ्यां युतास्तर्हि योगाः भज्यन्ते । अर्थात् योगकर्तृष्वन्यतमस्य रविचन्द्रयोर्योगे, योगकारकदशायां राजपदवीमप्राप्य केवलं धन-कीर्ति-सुखादिशुभफलानि अनुभूयन्ते । चन्द्रकलानाडीत्यभिधानयुक्ते देवकेरले उक्तं यथा -

जीवे शनियुते दृष्टे मालवीयोगभङ्गवान्
भृगुरुच्चफलं व्यर्थं ग्रहच्छिद्रेण कर्षितः ।[24] इति ।

---

19 बृ. सं. – ६८अ. ३१श्लो.

20 सारा. - ३७अ. २८श्लो.

21 जा. पा. – ६अ. १श्लो.

22 जा. सा. – ४२अ. २३श्लो.

23 मा. सा. – ४ अ. १९श्लो. । शम्भुहोराप्रकाशे १२अ. २०श्लो. यथा –

केन्द्रोपगा यद्यपि भूसुताद्या मार्तण्डशीतांशुयुता भवन्ति ।
कुर्वन्ति नोर्वीपतिमात्मपाके यच्छन्ति ते सत्फलमेव पुंसाम् ॥

24 दे. के. - २खण्डः, १अंशः. २७श्लो.

CC BY

महापुरुषयोगे मालव्ययोगकारकः शुक्रः । तस्योच्चराशिः मीनः, तदधिपः गुरुः । गुरोः नीचराशिः मकरः, तदधिपः शनिः । एवं गुरुशन्योः योगः अथवा गुरुणा शनिना च दृष्टे शुक्रे सति भृगोः उच्चफलं व्यर्थं भवति । तदा महापुरुषयोगस्य भङ्गः राजपदव्यलाभश्च ।[25]

समस्तखेटेषु च उच्चराशौ स्थितेषु नीचांशगतेषु तेषु ।
महीशपुत्रोऽपि रसाधिपश्च भिक्षाशनो मुख्यदिगम्बरः स्यात् ॥[26] इति ।

अतः उच्चराशिस्थाः ग्रहाः नीचांशमप्राप्ताश्चेत् प्रबलाः भवन्ति । अथ च -

स्वोच्चे नीचांशके दुःखी नीचे स्वोच्चांशगे सुखी ।
स्वांशे वर्गोत्तमे भोगी राजयोगो भविष्यति ॥[27] इति ।

अतोऽनेन स्वांशे वर्गोत्तमे वा विद्यमानः ग्रहः पदव्या सह शुभानि फलानि प्रयच्छति ।

४. महापुरुषयोगजे अन्येषां ग्रहाणां का प्रसक्तिः ?

महापुरुषयोगोत्पन्ने जातके रविचन्द्रयोः बलेन क्रमशः शारीरिकं मानसञ्च बलं द्रष्टव्यमित्युक्तमेव । भौमादयोऽन्ये ग्रहाः अपि गुणप्रकर्षे कारणीभूताः । तदुक्तमिह –

भौमात् सत्त्वं गुरुता बुधात् सुरेज्यात् स्वरः सितात् स्नेहः ।
वर्णः सौरादेषां गुणदोषैः साध्वसाधुत्वम् ॥[28] इति ।

भौमात् महापुरुषयोगोत्पन्नस्य सत्त्वं, पराक्रमश्च, बुधात् परिपुष्टता, गुरुतः स्वरः, शुक्रात् निर्मलत्वम्, शनेः शरीरकान्तिश्च चिन्तनीया । तन्नाम इमे ग्रहाः सत्वादिगुणानां कारकाः स्युः । ग्रहे बलवति तदुक्तसत्त्वादिगुणानां पुष्टिः, निर्बले तदुक्तगुणानां हानिश्च जातके ऊह्या ।

❀ जातकचिन्तनम् –

ए. आई. डि. एम्. के. पक्षस्याध्यक्ष्यं तमिलुनाडुराज्यस्य मुख्यमन्त्री पदञ्चावाप्नोत् जयललिता । एषा 24 Feb 1948 तमे वर्षे, 14-34 समये, पूर्णिमायां तिथौ, मघानक्षत्रे, कर्णाटकस्य मैसूरुसमीपस्थे मेलुकोटे नामके स्थाने जनिमलभत । एतस्याः जातकमवलोक्यताम् । मिथुनलग्नात्सप्तमे केन्द्रे स्वक्षेत्रस्थः (चन्द्रात्पञ्चमस्थः स्वक्षेत्रस्थश्च।) गुरुः हंसयोगस्य कारकः । लग्नाद्दशमे उच्चङ्गतः शुक्रः मालव्ययोगस्य कारकः



---

25 अयं भङ्गयोगः न तथा प्रसिद्धः । अत्र युक्तिः का इति चेत् योगकारकग्रहस्य उच्च उच्चराश्यधिपस्य नीचराशेः अधिपस्य च मिथः युतिः, योगकारकग्रहे दृष्टिश्च राजयोगस्य युक्त्या पञ्चसु योगेषु राजयोगभङ्गं चिन्तयेत् ।

26 दे. के. - २खण्डः, १अंशः. २८श्लो.

27 दे. के. - २खण्डः, १अंशः. २९श्लो.

28 बृ. सं. – ६८अ. ५श्लो. । सारावल्याम् (३७अ. ३श्लो.)–

महीसुतात् सत्वमुदाहरन्ति गुरुत्वमिन्दोस्तनयाद्गुरोश्च ।
स्वरः सितात्स्नेहमतोऽनुवर्णं बलाबलैः पूर्णलघूनि चैषाम् ॥ इति ।

।[29] एवं पञ्चमहापुरुषयोगेषु लग्नात् द्वौ योगौ, चन्द्रादेकः योगश्च । रविचन्द्रौ योगस्यास्य बलवृद्धौ हेतुभूतावेव स्तः । अतः एषा तमिलुनाडुराज्यस्य मुख्यमन्त्रीपदं विविधेषु कालेषु ५२३८ दिनानि अध्यतिष्ठत् ।[30] पदाधिष्ठितकालस्य विवरणमधः प्रदीयते यथा –

पदाधिष्ठितकालः		दशा[31]	अन्तर्दशा	प्रत्यन्तर्दशा (विदशा)	उपदशा	प्राणदशा[32]
तः	पर्यन्तम्					
२४-०६-१९९१	१२-०५-१९९६	कुजः	बुधः	शुक्रः	बुधः	बुधः
१४-०३-२००१	२१-०७-२००१	राहुः	शनिः	शुक्रः	बुधः	गुरुः
०२-०३-२००२	१२-०५-२००६	राहुः	शनिः	राहुः	चन्द्रः	राहुः
१६-०५-२०११	२७-०७-२०१४	राहुः	चन्द्रः	शुक्रः	राहुः	शनिः
२३-०५-२०१५	२२-०५-२०१६	गुरुः	शनिः	बुधः	राहुः	राहुः
२३-०५-२०१६	०५-१२-२०१६ (मरणम्)	गुरुः	शनिः	बुधः	राहुः	गुरुः

---

29 जातकरचनायां 'दिव्यचक्षु' इति एन्ड्रोय्ड्-तन्त्रांशः उपयुक्तः । लग्नाद्दशमे शुभग्रहः लग्नकृतामलायोगकारकः । सूक्ष्मं फलचिन्तनमत्र न विहितम् । प्रकृतलेखस्य परिपुष्टये अपेक्षिताः अंशाः अत्र व्याख्याताः ।

जैमिनिसूत्रोक्तः राजयोगोऽप्यत्र दरीदृशीति । जातकचिन्तने केवलमेकस्य योगस्य फलनिर्देशापेक्षया संवादफलानि दृढतराणीत्यतः तदिह किञ्चित्प्रस्तूयते । **जन्मकालघटिकास्वेकदृष्टासु राजानः (जैमिनिसूत्रम् – १-३-२४)** इति सूत्रानुसारेण जन्मलग्नं होरालग्नं घटिकालग्नञ्च केनचिदेकेन ग्रहेण दृष्टञ्चेत् राजयोगः इति नियमः । अत्र जन्मलग्नं मिथुनम्, होरालग्नं तुला, घटिकालग्नं कन्या, भावलग्नं मिथुनञ्च । एतेषु सर्वेषु लग्नराशिषु जैमिन्युक्तप्रकारेण ग्रहाणां दृष्टिरस्ति । **तेष्वेकस्मिन् न्यूने न्यूनम् (जैमिनिसूत्रम् – १-३-२६)** इति नियमानुसारेण दृष्टौ न्यूनता नास्ति । अतः बलीयान् राजयोगः । **सर्वेषां चैव पाके (१-२-१२१)** इति नियमानुगुणं चरादिदशाप्राप्तौ फलानुभव इति जैमिनिः ।

30 विकिपीडियातः प्राप्तः दत्तांशः ।

31 कोष्ठके प्रदत्तः दशान्तर्दशादिकालः पदारोहणकालेन सम्बद्धः । **कर्मलग्नयुतपाकदशायां प्रबलस्य दशायां वा राज्यलब्धिः । शत्रुनीचग्रहयातदशायां छिद्रसंश्रयदशा** वक्तव्येति नियमः वराहस्य – बृहज्जातकम् - ११अ. १९श्लो.। पदारोहणकालिकदशादिस्थित्यनुसारेण दशाकारकग्रहाः कर्मस्थानेन लग्नस्थानेन च योगेन दृष्ट्या वा सम्बद्धाः । तथ चैतेषु कालेषु जातकस्यास्याष्टकवर्गे बिन्द्वाधिक्यक्षेत्रे गोचरग्रहाणां संवादो विधेयः येन फलोक्तिः स्फुटतरा भवतीति ज्योतिर्विज्ञानिनां भणितिः ।

32 **दशा चान्तर्दशा चैव विदशोपदशा तथा । प्राणाख्या च फलं तासां वदेच्छास्त्रानुसारतः ॥** इति विंशोत्तरीदशायाः नियमः । प्राणदशायाः सूक्ष्मदशा इति नामान्तरमस्ति ।

CC BY

❀ उपसंहारः -

पञ्चमहापुरुषयोगानां प्राबल्यं दौर्बल्यञ्च सम्यगवलोक्यैव फलं निर्दिशेद्दैवज्ञः । योगकारकग्रहाणां विशिष्टफलप्राप्तिः दशायामेवेति होराशास्त्रीयः नियमः । अत्र बृहज्जातकोक्तिर्यथा - **स्वां स्वां दशामुपगताः स्वफलप्रदाः स्युः** ।[33] इति । अथवा जातकपारिजातोक्तवत् -

यस्य योगस्य यः कर्ता बलवान् जितदृग्युतः ।
अधियोगादियोगेषु स्वदशायां फलप्रदः ॥ [34] इति ।

पूर्वोक्तवत् पञ्चसु महापुरुषयोगेषु प्रबलयोगकर्तुः ग्रहस्य दशायामन्तर्दशायां वा राज्यप्राप्तिः अन्यथा केवलं धनप्राप्तिः, सुखप्राप्तिश्च भवतीत्यादेश्यम् । वराहस्तु राजयोगफलावाप्तेः कालं निरूपयन् **"कर्मलग्नयुतपाकदशायां राज्यलब्धिरथवा प्रबलस्य"**[35] इत्यभिमतं प्रास्तौत् । अतः दशाफलनिर्णयार्थं कर्मलग्नयोस्संवादः अपि श्रेयसे ।

बलहीनाः ग्रहाः सङ्कीर्णलक्षणयुतान् जनयन्तीत्यतः ते राजानुचरास्तिष्ठन्ति सुखभाजश्च जायन्ते । उक्तं किल यथा -

सङ्कीर्णाः स्युर्न नृपा दशासु तेषां भवन्ति सुखभाजः ।
रिपुगृहनीचोच्चच्युतसत्पापनिरीक्षणैर्भेदाः ॥[36]

शत्रुक्षेत्र-नीचक्षेत्र-पापग्रहादिभिः दृष्टाः युक्ताः वा योगकारकाः निर्बलाः ग्रहाः दशान्तर्दशायां पदभ्रष्टता-राज्यहरणाद्यशुभफलानि जनयन्ति ।[37]

सङ्केताक्षराणि लेखोपयुक्तग्रन्थाश्च

1. बृ. सं. – वराहमिहिरकृता बृहत्संहिता (तृतीयभागः) – सं. & व्या. – आचार्यनागेन्द्रपाण्डेयः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, मुद्रणम् - २००८
2. सारा. – कल्याणवर्मकृतः सारावली – व्या. - सोमेश्वरनाथ झा – भारतीय बुक् कार्परेशन्, ५८२४, न्यू चन्द्रवल्, जवाहर नगर, दिल्ली-११०००७, मुद्रणम् – २००८
3. जा. सा. – नृसिंहदैवज्ञकृतः जातकसारदीपः (भागद्वये) – सं. & व्या. – रंजन पब्लिकेशन्स्, १६,

---

[33] बृ. जा. – ८अ. २३श्लो. । जातकाभरणे राजयोगाध्याये (६७ श्लो.) यथा -

राज्योपलब्धिर्दशमस्थितस्य विलग्नगस्याप्यथवा दशायाम् ।
तयोरलाभे बलशालिनो वा सद्राजयोगो यदि जन्मकाले ॥

[34] जा. पा. – ७अ, राजयोगः, ६६श्लो.

[35] बृ. जा. – ११अ. १९श्लो.

[36] बृ. सं. – ६८अ. ६श्लो.

[37] रिपुगृहनीचोच्चच्युतसत्पापनिरीक्षणैर्भेदाः – इत्यस्याशयः देवकेरले स्पष्टीकृतः । तच्च पूर्वमेव लेखेऽस्मिन् सङ्गृहीतः ।

अंसारी रोड्, दरियागञ्ज, नई दिल्ली-११०००२, मुद्रणम्-२००९
4. फ. दी. – मन्त्रेश्वरविरचिता फलदीपिका – व्या. हरिशङ्करपाठकः, चौखम्बा सुरभारती प्रकाशन, गोपालमन्दिरलेन, वाराणसी-२२१००१, मुद्रणम्-२०१५
5. जा. पा. – वैद्यनाथविरचितः जातकपारिजातः – व्या. मातृप्रसादपाण्डेयः, चौखम्बा संस्कृत संस्थान, गोपालमन्दिरलेन, वाराणसी-२२१००१, मुद्रणम्-२०१३
6. मा. सा. – मानसागरी – व्या. मधुकान्त झा, चौखम्बा विद्याभवन, वाराणसी-२२१००१, मुद्रणम्-२०१३
7. जा. आ. – जातकाभरणम् - सं. & व्या. – पण्डित अच्युतानन्द झा, चौखम्बा अमरभारतीप्रकाशनम्, गोपालमन्दिरलेन, वाराणसी-२२१००१, मुद्रणम्-२००८
8. प्र. मा. - प्रश्नमार्गः – आचार्यगुरुप्रसादगौड, चौखम्बा सुरभारती प्रकाशन, गोपालमन्दिरलेन, वाराणसी-२२१००१, मुद्रणम्-२०१३
9. बृ. पा. हो. – बृहत्पाराशरहोराशास्त्रम् – सं. & व्या. – दैवज्ञ पण्डित देवचन्द्र झा, चौखम्बा प्रकाशन, गोपालमन्दिरलेन, वाराणसी-२२१००१, मुद्रणम्-२०१५
10. शं. हो. – शम्भुहोराप्रकाशः - सं. & व्या. – पण्डित अच्युतानन्द झा, चौखम्बा संस्कृत सीरीज् आफीस्, गोपालमन्दिरलेन, वाराणसी-२२१००१, मुद्रणम्-२००५
11. दे. के. – देवकेरलम्/चन्द्रकलानाडी (II Vol.) – Translated by R Santhanam, Sagar Publications, Ved Mansion, 72, Janpath, New Delhi-110001, Edition-1990

डा मुरलिकृष्ण टि.

Muralikrishna .T

ज्यौतिषप्राध्यापकः,

केन्द्रीयसंस्कृतविश्वविद्यालयः,

राजीवगान्धीपरिसरः, शृङ्गेरी, कर्णाटकम्

mktsha@gmail.com

***

CC BY

प्रयोजनेन सहितं लक्षणीयं न युज्यते - निदर्शनव्याख्यादृशा परिशीलनम्

- एम्. सुदर्शनचिपळूणकरः

सारांशः - काव्यप्रकाशस्य द्वितीयोल्लासे तावत् मम्मटाचार्यः वाच्यलक्ष्यव्यङ्ग्यान् त्रीन् अर्थान् निरूप्य वाचकलाक्षणिकव्यञ्जकान् त्रीन् शब्दान् प्रतिपादयति। अनन्तरं च अभिधां निरूप्य **मुख्यार्थबाधे तद्योगे** इत्यादिकारिकया लक्षणां प्राह मम्मटः। अनन्तरं च **लक्षणा तेन षड्विधा** इत्यनया कारिकया लक्षणायाः षड्विधत्वं सङ्गमयति। तत्र हि उपादानलक्षणा, लक्षणलक्षणा, सारोपा, साध्यवसाना इतीमे चत्वारो भेदाः शुद्धायां लक्षणायाम्। सारोपा, साध्यवसाना इति गौणीलक्षणायाः विधद्वयम्। इत्थं षड्विधा लक्षणेति मम्मटमतम्। अनन्तरं च **यस्य प्रतीतिमाधातुम्** इत्यादिकारिकया व्यञ्जनां निरूप्य अभिधावादिनां, लक्षणावादिनां च मतं पूर्वपक्षत्वेन उपस्थापयति। तत्र च **हेत्वभावान्न लक्षणा** इति कारिकया व्यञ्जनाव्यापारजन्यार्थप्रतीतिः लक्षणया भवितुं नार्हतीति, लक्ष्यं न मुख्यं नाप्यत्र बाधो इत्यनया कारिकया तत्समन्वयनप्रकारं च उपस्थापयति मम्मटः। तत्र हि व्यञ्जनया प्रतीयमानः प्रयोजनरूपः पावनत्वादिः लक्षणयैव बोध्यते इति पूर्वपक्षः। मुख्यार्थबाधादिहेतुत्रयाभावात् लक्षणा नैव सम्भवतीति मम्मटः। पावनत्वादेः प्रयोजनस्य गङ्गातटे घोषः इत्यनेन अधिकार्थप्रतीतिरूपं प्रयोजनम् उच्यताम् इति चेत् लक्षणा फलमुद्दिश्य प्रवर्तते, न फलविशिष्टा लक्षणा। तत्र च ब्रूते – **प्रयोजनेन सहितं लक्षणीयं न युज्यते। ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्**।। इति। स्थलेऽस्मिन् काव्यप्रकाशव्याख्यानपरम्परायां व्याख्यानवैभिन्यमवलोक्यते। यथा – मुख्यार्थबाध इति पदस्य व्याख्याने माणिक्यचन्द्रप्रभृतयः अनुपपत्तिरूपम् अनुपयोगरूपं च अर्थं ब्रुवते। चण्डीदासप्रभृतयः अन्वयानुपपत्तिं, परमानन्दप्रभृतयः अन्वयानुपपत्तिं तात्पर्यानुपपत्तिं च ब्रुवते। अपि च निदर्शनकारस्य राजानकानन्दस्य व्याख्यानं मम्मटहृदयाविष्करणदृष्ट्या प्राधान्यमावहतीति विशेषः। लक्षणा तेन षड्विधा इत्यत्रापि मुख्यतया माणिक्यचन्द्र-चण्डीदास- विश्वनाथप्रभृतयः **षड्विधेति** पदस्य विलक्षणतया व्याख्यानं कृतवन्तोऽवलोक्यन्ते। अत्रापि निदर्शनकारः मम्मटोक्तान् लक्षणाभेदान् अत्यन्तं स्पष्टं प्रतिपादितवान्। अत्रायं काव्यप्रदीपकारस्य गोविन्दठक्कुरस्य मतमुल्लिख्य स्वकीयां विमतिं दर्शयति आनन्दः। **ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्** इत्यत्र प्रत्यक्षादिप्रमाणस्य घटादिर्विषयः तत्फलं प्रयोजनरूपम् , एवञ्च विषयफलयोः ऐक्यं भवितुं नार्हतीति मम्मटाशयः। अत्रापि काव्यप्रकाशव्याख्यातृषु विप्रपत्तिरवलोक्यते। निदर्शनकारस्तावत् विशदतया ज्ञानफलयोः भेदं प्रतिपादयति स्वव्याख्याने। शोधपत्रेऽस्मिन् काव्यप्रकाशस्य प्राचीनार्वाचीनव्याख्यानां मतोपस्थापनपुरस्सरं निदर्शनव्याख्याकर्तुः आनन्दस्य मतम् , व्याख्याशैली, अन्यव्याख्यानां प्रभावः इत्याद्यंशाः उपस्थाप्यन्ते।

अलङ्कारशास्त्रग्रन्थेषु मम्मटकृतः काव्यप्रकाशः नितान्तं प्राधान्यमावहति। एतदीया विषयप्रतिपादनशैली तावत् तत्पूर्ववर्त्याचार्याणां विविधवादानां यथोचितं सङ्ग्रहरूपा,

तदनन्तरग्रन्थानामाकरभूता प्रामाणिकी च विद्यते। काव्यप्रकाशसमुद्भमानन्तरमेव मम्मटात्प्राक् समुत्पन्नाः सर्वा अपि ध्वनिदूषणपरम्पराः समूलघातं निहता इति तद्ग्रन्थावलोकनेनावगम्यते। अनेनैव हेतुना विविधदार्शनिकैः ग्रन्थस्यास्य व्याख्याने प्रवृत्तम्। एवञ्च समग्रे भारते ग्रन्थस्यास्य बहूनि व्याख्यानानि समुद्भूतानि। तत्र च आदर्शव्याख्याकर्ता महेश्वरन्यायालङ्कारस्तावत् ब्रूते यत् - "काव्यप्रकाशस्य कृता गृहे गृहे टीकाः तथाप्येष तथैव दुर्गमः" इति।

निदर्शनव्याख्या, तत्कर्तुः देशकालादिपरिचयश्च

विविधासु काव्यप्रकाशव्याख्यासु काश्मीरीया निदर्शनव्याख्या अन्यतमा। अर्वाचीनाया अस्याः व्याख्यायाः कर्त्रा राजानकानन्देन निदर्शनम्, दर्शनम्, शितिकण्ठविबोधनम् इति नामभिः व्याख्येयम् उल्लिखितास्ति[1]। काव्यप्रकाशमङ्गलाचरणव्याख्यानवेलायां काश्मीरीयस्य शैवागमानुयायिनः च अस्य राजानकानन्दस्य काश्मीरशैवागमानुसारि व्याख्यानमवलोक्यते। व्याख्याया अस्या निर्माणकालस्तावत् ४७६६ तमं कलियुगाब्दम् (1665 A.D.)[2] पुष्पिकाभागावलोकनेन ज्ञायते। अपि च व्याख्यायमस्यां नैके व्याख्याकर्तारः उल्लिखिताः राजानकानन्देन। तेषु विवरणकर्ता गोकुलनाथोपाध्यायोऽपि अन्यतमः[3]। अस्य कालस्तावत् 1650-1730 A.D.। एतेन राजानकानन्दः विवरणकारानन्तरवर्ती समकालीनो वेति सिद्ध्यति। एवञ्च राजानकानन्दः १७शताब्द्यामासीदित्यत्र नास्ति सन्देहः।

व्याख्यायामस्यां राजानकानन्दस्य मम्मटहृदयाविष्करणमनीषा बहुषु स्थलेषु अवलोक्यते। अपि च काव्यप्रकाशकर्तृत्वविचारे अपि महत्त्वपूर्णः अंशः व्याख्यायाम् अस्यामुपलभ्यते। तत्र च काव्यप्रकाशस्य दशमे उल्लासे परिकरालङ्कारस्य व्याख्याने तावत् प्रोक्तमस्ति यत् -

एतावत्पर्यन्तं मम्मटाचार्याणां कृतिः। कृतः श्रीमम्मटाचार्यवर्यैः परिकरावधिः।
प्रबन्धः पूरितः शेषो विधायाल्लटसूरिणा।। अतः परमल्लटाचार्यस्य कृतिः[4] इति।

एतेन परिकरालङ्कारं यावत् मम्मटाचार्येण काव्यप्रकाशग्रन्थः प्रणीत इति, तत्पश्चात् अल्लटाचार्येण पूरित इति च ज्ञायते। न केवलं तावत्, **नियतिकृतनियमरहिताम्** इति मङ्गलाचरणस्य व्याख्याने पद्यमिदं काश्मीरशैवागममतानुगुणं व्याख्यातम् अवलोक्यते आनन्देन। एतेन अयं शैवागमसिद्धान्तप्रतिपादक इति च ज्ञायते।

लक्षणा

काव्यप्रकाशस्य द्वितीयोल्लासे आचार्यमम्मटः, "स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते[5]" इति वाचकशब्दनिरूपणसमनन्तरमेव लाक्षणिकं शब्दं तस्य भेदोपभेदकथनपुरस्सरं निरूपयति। तत्र च - "मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्। अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया[6]।। " इत्यनेन लक्षणां प्राह मम्मटः।

CC BY

अस्यायमाशयः - मुख्यार्थे बाधिते सति, तस्य मुख्यार्थस्य योगे सम्बन्धे, रूढेः अथवा प्रयोजनद्वारा येन शब्दव्यापारेण अन्यार्थस्य प्रतीतिः भवति, स: आरोपितः शब्दव्यापारः लक्षणा इति। तच्च सोदाहरणं 'कर्मणि कुशलः' इत्यादौ 'कुशान् लातीति कुशलः’ इति दर्भग्रहणादिसम्बन्धायोगात् 'गङ्गायां घोषः' इत्यादौ गङ्गादीनां घोषाद्याधारत्वासम्भवात् मुख्यार्थबाधे जाते सति 'कर्मणि कुशलः' तथा 'गङ्गायां घोषः’ इत्यत्र क्रमशः विवेचकत्वादौ, सामीप्ये च सम्बन्धे 'कर्मणि कुशलः' इत्यत्र रूढितः प्रसिद्धेः 'गङ्गायां घोषः' इत्यत्र पावनत्वादीनां धर्माणां प्रयोजनाच्च मुख्येन अमुख्योऽर्थो लक्ष्यते, स: आरोपितः सान्तरार्थनिष्ठ: शब्दव्यापारः लक्षणा इति।

लक्षणा तेन षड्विधा :

आचार्यमम्मट: लक्षणाशक्तिं विशदतया निरूपयन् 'लक्षणा तेन षड्विधा[7]' इति कारिकया लक्षणायाः षड्विधत्वं सङ्गमयति। अस्य भेदप्रतिपादनमुररीकृत्य विविधालङ्कारिकेषु तथा काव्यप्रकाशव्याख्यातृषु वैभिन्यं दृश्यते। अत्र मम्मटमतानुसारं तावत् सर्वप्रथमं शुद्धा, गौणीति लक्षणा द्विधा विभक्ता। तत्पश्चात् उपादनलक्षणा, लक्षणलक्षणा, सारोपा, साध्यवसानेति च शुद्धायाः चत्वारो भेदाः। सारोपा, साध्यवसाना इति गौणीलक्षणायाः विधद्वयम्। इत्थं षड्विधा लक्षणेति मम्मटमतम्। "अभिधावृत्तमातृका"कारः मुकुलभट्टः भिन्नप्रकारेण लक्षणाया: षड्विधत्वं निरूपयति। तन्मतानुसारं तावत् लक्षणा शुद्धा, उपचारमिश्रेति च द्विविधा। शुद्धा पुनः उपादानलक्षणा, लक्षणलक्षणा इति द्विविधा। उपचारमिश्रा च शुद्धोपचारमिश्रा, गौणोपचारमिश्रा द्विविधा। शुद्धोपचारमिश्रायां गौणोपचारमिश्रायां च सारोपा साध्यवसानेति च प्रत्येकं द्वौ प्रकारौ। कविराजविश्वनाथः साहित्यदर्पणे लक्षणाया: अशीतिप्रकारान् निरूपयति। पण्डितराज: जगन्नाथः मम्मटकृतलक्षणाविभजनमेवानुसरति। अनेन उपादानलक्षणाया: अजहत्स्वार्थेति, लक्षणलक्षणाया: जहत्स्वार्थेति च प्रयोगः कृतः।

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् :

मम्मटाचार्यः द्वितीयोल्लासे 'यस्य प्रतीतिमाधातुम्[8]' इत्यनेन व्यञ्जनाव्यापारं निरूप्य तदनन्तरञ्च अभिधावादिनां, लक्षणावादिनां च मतं पूर्वपक्षत्वेन खण्डयति। तत्र च 'हेत्वभावान्न लक्षणा[9]' इति सूत्रेण, लक्षणाव्यापारेण व्यञ्जनाव्यापारजन्यार्थप्रतीतिः भवितुं नार्हतीति ,"लक्ष्यं न मुख्यम्[10]" इत्यनेन तस्य सङ्गमनञ्च करोति आचार्यमम्मटः। तत्र च, व्यञ्जनया प्रतीयमानः प्रयोजनरूप: पावनत्वादिः लक्षणयैव बोध्यते इति पूर्वपक्षः। तत्र "मुख्यार्थबाधादिहेतुत्रयाभावात् लक्षणा नैव सम्भवतीति मम्मटः। अत्र च पावनत्वादेः

प्रयोजनस्य, 'गङ्गातटे घोष: ' इत्यनेन अधिकार्थप्रतीतिरूपं प्रयोजनम् उच्यताम् इति चेत्, लक्षणाव्यापारः फलमुद्दिश्य प्रवर्तते न तु फलविशिष्टेयं लक्षणा। तदेव निगमयति, 'प्रयोजनेन सहितं लक्षणीयं न युज्यते[11]' कुत इति चेत् 'ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्[12]' इत्यनेन मीमांसकमतं समाधृत्य समाधत्ते मम्मटः। प्रत्यक्षादेः प्रमाणस्य विषय: घटादिः। तत्फलं तु प्रयोजनरूपम्। तदेव प्रकटतेति भाट्टमीमांसकाः, संवित्तिरिति प्राभाकराः। एवञ्च विषयफलयो: ऐक्यं भवितुं नार्हतीति मम्मटाशयः।

अत्र स्थले काव्यप्रकाशव्याख्यातृषु बहुधा विप्रतिपत्तिरवलोक्यते। कुत्रचित्, वृत्तौ प्रयुक्तः 'संवित्तिः' इति शब्दः ज्ञानार्थे प्रयुक्तोऽपि दृश्यते। व्याख्यानानाम् अवलोकनेन इदं ज्ञातुं शक्यं यत् न कोऽपि व्याख्याता स्पष्टतया मम्मटहृदयमाविष्कर्तुं प्राभवदिति।

तत्र च प्राचीनव्याख्याता माणिक्यचन्द्रः इत्थं ब्रूते - "फलमिति। प्रकटत्वं भाट्टमते। संवित्तिः प्राभाकरे। प्रकटत्वं वस्तुनो धर्मः संवित्तिस्तु आत्मनः। यथा आत्मना स्वमहत्वेन व्याप्तं शरीरमेव जीवदिति व्यपदिश्यते न घटादि, तथा ध्वनिनापि। तेन 'गौर्वाहीकः' इत्यादौ सव्यङ्ग्यत्वेऽपि न काव्यता[13]" इति।।

सरस्वतीतीर्थः स्वीयबालचित्तानुरञ्जन्याम्,"प्रतिज्ञातेऽर्थे उत्तरं सूत्रं हेतुत्वेनावतारयति कुत इति। सूत्रं व्याकरोति प्रत्यक्षादेरिति। ज्ञायतेऽनेनेति ज्ञानं प्रमाणं इत्यभिप्रेत्योक्तम्। प्रत्यक्षादेरिति। भाट्टमतानुसारेण ज्ञेयधर्मः फलमित्युक्तम्। वैशेषिकमतानुसारेण संवित्तिर्ज्ञातृधर्मः फलमित्युक्तम्[14]" इति प्राह। काव्यादर्शकारः भट्टसोमेश्वरः माणिक्यचन्द्रमतमेवानुसरति। तच्च - " विषयप्रयोजनयोरत्यन्तभेदादित्याह ज्ञानस्य विषय इति। प्रत्यक्षादेर्हि प्रमाणस्य विषयो घटादिः, फलं तु प्रयोजनरूपम्। प्रकटत्वं भाट्टानां मते। संवित्तिः प्राभाकरे, अर्थाधिगतिर्वा नैयायिकादीनाम्। तदेवं प्रयोजनविशिष्टं लक्ष्यं लक्षणाया अविषय इति प्रयोजने व्यञ्जनमेव व्यापार:[15]" इति।

चण्डीदासेन तु दीपिकायाम् इत्थम् अवादि - "वस्तुतस्तु सरिद्भेद एव सङ्केतस्मृत्योर्विषयो गाह्यो न शैत्यादिः। न हि धर्मिणि सङ्केत्ये संलग्नः सर्व एव गुणादिः सङ्केत्यः। मा भूच्छैत्यादिर्गङ्गापदसङ्केत्यः। तस्माद्धेतुफलयोस्तटफलप्रतीत्योर्भिन्नकालत्वेनाभिन्नव्यापारविषयत्वमसमीचीनमेवेति सर्वथा दुर्वारो लक्षणाङ्गीकारः। तदिदं वक्ष्यति - विशेषाः स्युस्तु लक्षित इति यथाश्रुतं तु ज्ञानस्य विषयव्यतिरिक्तं फलमात्रं विवक्षितं, ज्ञेयगतं वा फलम्? आद्येऽप्यस्ति,गोस्वामिगतसन्तोषादिः। अस्तु तर्हि द्वितीयः। तथा हि उपेक्षाबुद्धिव्यतिरिक्तेन ज्ञानेन निर्विकल्पेन सविकल्पकं जन्यते, तेन च हेयोपादेयताबुद्धिः। तथा च स्वविषये तटादौ

CC BY

हानमुपादानं वेति चेन्न, प्रकृत एव व्यभिचारात् तत्पक्षेऽपि हि शैत्यादिप्रतीत्या तटादिगतं न किञ्चिज्जन्यतेऽपि तु गङ्गादिगत एव परितोषादिरित्यसङ्गतिः[16]" इति। दर्पणकारः विश्वनाथः चण्डीदासस्य इमां व्याख्यानसरणिं नाङ्गीकुरुते। तेनोच्यते "इममेव हृदिस्थमर्थं व्याप्तिदर्शनेन द्रढयति ज्ञानस्येति। हि यस्मात् फलं ज्ञेयगतम्। अयमाशयः। ज्ञानस्य खलु विषयोऽप्यन्यः ज्ञेयगतं फलं चान्यत्। तथा हि सविकल्पज्ञानेन स्वविषये घटादौ हेयोपादेयता बुद्धिरुपजन्यते तया च घटादौ हानमुपादानं वेति। अतश्च लाक्षणिकस्य तटप्रत्ययस्य ज्ञेयस्तटादिरन्यः। फलं च तन्निष्ठं शैत्यादिज्ञानमित्यन्तेन तयोः कार्यकारणतया भिन्नकालीनत्वमेव भवितुं युक्तमित्यर्थः। चण्डीदासपण्डितास्तु स्वरसतो व्याख्यानमिदमसहमाना आहुः। ज्ञानस्येति कारिकायां लाक्षणिकस्येत्यर्थः। यदि तु ज्ञानपदेन श्रूयमाणं ज्ञानसामान्यं विवक्षितं तदा ग्रन्थस्यासङ्गतिः। तथा हि यदि ज्ञानस्य फलमात्रं विषयव्यतिरिक्तं तदोमिति ब्रूमः। प्रकृतेऽपि गोस्वामिसन्तोषादेः विषयव्यतिरिक्तत्वस्योभयवादिसिद्धत्वात्। समनन्तरव्याख्यानप्रकारेण ज्ञेयगतफलस्य विषयगतव्यतिरिक्तत्वे विवक्षिते प्रकृत एव व्यभिचारः। न खलूक्तप्रकारेण हेयोपादेयताबुद्धिविषये घटादौ हानोपादानादिच्छेत्यादौ प्रतीत्या स्वविषये तटादौ किञ्चिज्जन्यते। अपि तु गोस्वामिसन्तोषादिरिति। इदमविचारिताभिधानम्[17]" इति।

साहित्यचूडामणिकारस्तु "ज्ञानस्य हि प्रत्यक्षमुखस्य नीलमुखादिगोचरः। प्रयोजनं प्राकट्यं संवित्तिर्वा। तद्वल्लक्षणाया अपि तटादिविषयः पावनत्वादिकं तु फलमिति कथं विशिष्टे लक्षणा प्राकट्यं तु विषयवर्ती धर्मः। संवित्तिस्तु विषयस्फुरणमसमनन्तरभाविन्यर्थक्रिया। दर्शनभेदप्रदर्शनाय वा शब्दः। निगमयति-विशिष्ट इति। एवमुपपादितया युक्त्या[18]" इति। श्रीविद्याचक्रवर्ती सम्प्रदायप्रकाशिन्यां, "नीलादिरिति गुणेन गुणी लक्ष्यते बाह्येन्द्रियगोचरत्वरूपविशेषप्रथनाय घटादिरित्यर्थः। फलं ज्ञानप्रयोजनम्। प्रकटता संवित्तिर्वेति विकल्पो व्यवतिष्ठते। भाट्टादयो हि प्रकटीभावलक्षणं ज्ञेयधर्मं ज्ञानफलमाहुः। वैशेषिकादयस्तु संवित्तिरूपं ज्ञातृधर्मम्। संवित्तिरनुव्यवसायः। घटज्ञानं जानामीत्यादिज्ञानविषयं ज्ञानमिति यावत्। प्रकटतैवास्तु ज्ञानफलं संवित्तिर्वा, न तु फलविषययोः सर्वथा तादात्म्यमुपपद्यत इति निष्कर्षः[19]" इति।

मधुमतीकारः रविभट्टः फलत्वस्य जन्यत्वं निराकरोति। तेनोच्यते -"यद्यपि फलत्वं जन्यत्वं यदि, तदा प्रकृतासङ्गतिः। पावनत्वादेः एतदजन्यत्वात्। ज्ञाप्यत्वं च प्रकटतादावसम्भवि। तयोः प्रत्यक्षजन्यत्वात्। तथापि जन्यत्वमेव फलत्वम्। शैत्यपावनत्वादिप्रतीतिरेव प्रकृते फलत्वात्। तस्याश्च तज्जन्यत्वात्। न चैवं पावनत्वादिफलत्वाभिधानविरोधः। प्रयोजनज्ञानविषयतया तस्यापि प्रयोजनत्वात्। शक्यज्ञानविषयतया घटादेः शक्यत्ववत्[20]" इति।

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

परमानन्दः विस्तारिकायाम् -"ज्ञानस्येत्यादि। हिर्हेतौ। वेदान्तिनये 'इदं रजतम्' इति ज्ञानेन शुक्तौ रजतत्वसम्बन्धस्येव लाक्षणिकप्रतीत्या स्वविषये तटादौ जन्यस्य पावनत्वादिवैशिष्ट्यस्य तत्पूर्वसिद्धौ लक्षणाव्यापारस्तज्जन्यप्रतीत्योर्न विषयत्वम्। स च सम्बन्धो वैज्ञानिकः, प्रतीतिकाल एव सत्त्वात्। तदाह - विषयो ह्यन्यः फलमन्यदिति। सिद्धस्य विषयत्वाज्जन्यस्य च फलत्वान्नैकत्वमिति भावः[21] " इति प्राह।

श्रीवत्सलाञ्छनः स्वीयव्याख्यायाम् इत्थं ब्रूते - "ज्ञानस्येति। यथा कारणत्वेन ज्ञानाद्विषयो भिद्यते तथा कार्यत्वेन फलमपीत्यर्थः। अन्यथा तीरत्वज्ञानपावनत्वज्ञानयोरभेदे जन्यजनकतानुपपत्तिरिति भावः। फलमिति। ननु केनोच्यते तत्फलमिति। किन्तु विशिष्टलक्षणातो विशिष्टप्रतीतिरित्युक्तमिति चेन्न। अनवबोधात्। तथा हि शक्यसम्बन्धो लक्षणा। न चात्र शक्येन गङ्गाप्रवाहरूपेण तीरस्य पावनत्वादिविशिष्टस्य एकः सम्बन्धोऽस्तीति कथं विशिष्टे लक्षणा? न च तीरत्व इव पावनत्वेऽपि तीरलक्षणातो लक्षणान्तरं स्वीकार्यं तथा च तीरत्वविशिष्टस्येव पावनत्वादिविशिष्टस्य प्रतीतिरिति वाच्यम् ...[22]"इत्यादिना। अत्र च काव्यप्रदीपकारः मम्मटसूत्रविरुद्धमेव व्याचष्टे। अत्रास्य मतानुसारं सूत्रोक्तः विषयफलयोर्भेद अयुक्तः। तेनेदमुच्यते -"ननु विषयफलयोर्भेद इति सूत्रार्थः स चायुक्तः। फलत्वं हि जन्यत्वं वा जन्यप्रतीतिविषयत्वं वा। आद्ये पावनत्वादौ तदभावः। तज्ज्ञाने विषयाद्भेद एव। अन्त्ये 'प्रत्यक्षादेर्नीलादिविषय:। फलं तु प्रकटता संवित्तिर्वा ' इति वृत्तिविरोधः। प्रकटताज्ञानस्य प्रत्यक्षजन्यत्वाभावात्। न च जन्यज्ञाप्यसाधारणमेकं साध्यत्वमस्तीति। अत्र ब्रूम: - ज्ञानस्य जनकीभूतो विषयो यथा ज्ञानादन्यस्तथा फलमपि तस्य स्वतो भिन्नम्। कारणस्येव कार्यस्यापि भिन्नकार्यत्वनियमात्। शैत्यादौ तु क्वचित्फलपदमौपचारिकं दृश्यते। तथा च लक्ष्यज्ञानमेव यदि शैत्यज्ञानं तदा प्रयोजनं न स्यादित्यर्थः। ननु लक्ष्यप्रतीतेर्न शैत्यप्रतीतिः फलम्, किन्तु शक्यसम्बन्धरूपलक्षणायाः। तथा च न किञ्चिद्दूषणमिति[23]" इति। अयञ्चाग्रे चण्डीदासमतं निराकरोति। सुधासागरकारोऽत्र परमानन्दमतमेवानुसरति।

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् इत्यत्र निदर्शनकारमतम् :

प्राचीनार्वाचीनव्याख्यातृणां मतभेदेषु विद्यमानेषु सत्सु सूत्रार्थसमन्वयदृशा अर्वाचीनस्य व्याख्याकर्तुः राजानकानन्दस्य मतमपि नितान्तं प्राधान्यं भजते। स च निदर्शनव्याख्यायाम् अस्याम् इत्थं ब्रवीति - "हि यस्माद्धेतोः। ज्ञानस्य ज्ञायतेऽनेनेति व्युत्पत्त्या करणभूतस्य लक्षणानाम्नो ज्ञानस्याऽन्यस्तटादिः विषयः। अन्यच्च शैत्यादिफलं कार्यम्। पूर्वापरीभावेन परशो: कालतो भेदात्। न हि कार्यकारणयोरैक्यं यथा छिदा करणस्य परशोः काष्ठादिर्विषयः तच्छिदा फलम्। न च विषयफलयोरैक्यं स्वरूपतो भेदादिति भावः। एतदेव विवृणोति प्रत्यक्षेति। इदं नीलमित्यत्र यथा नीलरूपविषयस्य परं प्रत्युपदेशेन तत्प्रकटनस्य

CC BY

संवित्तेः स्वात्मनि तत्सस्यकारिच्छेदस्य वा फलस्यान्योन्यं भेद एव, न त्वभेद इत्यर्थः[24]” इति। इत्थमत्र प्राचीनार्वाचीनकाव्यप्रकाशव्याख्यातृषु 'ज्ञानस्य विषयो ह्यन्यः' इति सूत्रेऽस्मिन् विषयफलयोः भेदाभेदविषये महती विप्रतिपत्तिः दृश्यते। एवञ्च लक्षणानिरूपणप्रसङ्गे विभिन्नासु काव्याप्रकाशव्याख्यासु मतवैभिन्यम् अवलोक्यते। अपि च निदर्शनव्याख्यावलोकनेन इदं ज्ञायते यत् काव्यप्रकाशव्याख्यापरम्परायां राजानकानन्दस्य योगदानं सुमहद्विद्यत इति।

पादटिप्पण्यः

1. काव्यप्रकाशनिदर्शनम्/प्रथमः उल्लासः/पुष्पिकाभागः
2. काव्यप्रकाशनिदर्शनम्/दशमपरिच्छेदः/पुष्पिकाभागः
3. काव्यप्रकाशनिदर्शनम् / मङ्गलाचरणव्याख्या
4. काव्यप्रकाशनिदर्शनम् / दशमः उल्लासः परिकरालङ्कारव्याख्या
5. काव्यप्रकाशः २.८
6. तत्रैव २.९
7. काव्यप्रकाशः २-१२
8. काव्यप्रकाशः २-१४
9. तत्रैव २-१५
10. तत्रैव २-१६
11. तत्रैव २ २७
12. तत्रैव २ १८
13. सङ्केतः पृ. सं. ३६१
14. बालचित्तानुरञ्जनी पृ. सं. ३६१
15. काव्यादर्शः पृ. सं. ३६२
16. दीपिका पृ. सं. ३६३
17. दर्पणः पृ. सं. ३६५
18. साहित्यचूडामणिः पृ. सं.३६६
19. सम्प्रदायप्रकाशिनी पृ. सं. ३६६
20. मधुमती पृ. सं. ३६७
21. विस्तारिका पृ. सं. ३६७
22. सारबोधिनी पृ. सं. ३६८
23. काव्यप्रदीपः पृ. सं. ३६९
24. काव्यप्रकाशनिदर्शनम् / द्वितीय उल्लासः/ लक्षणाप्रकरणम्

सन्दर्भग्रन्थाः

1. काव्यप्रकाशः – म्म्मटः बालबोधिनीव्याख्योपेतः – परिमलप्रकाशनम् -2012
2. काव्यप्रकाशः – मम्मटः- Ed.by डा.ज्योत्स्ना मोहन – नाग प्रकाशक, दिल्ली 1997
3. ध्वन्यालोकः – आनन्दवर्धनः - चौखम्बा विद्याभवन वाराणसी, 2009
4. साहित्यदर्पणः – विश्वनाथः – चौखम्बा संस्कृत संस्थान, वाराणसी 2001
5. अभिधावृत्तमातृका – मुकुलभट्टः- चौखम्बा प्रकाशन वाराणसी 1973
6. एस्.वि.रङ्गरामानुजाचार्युलु - काव्यप्रकाशहृदयप्रकाशः - राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति – 2011
7. जोशी ठाकुर दत्त - भारतीय काव्यशास्त्र मे लक्षणा - बुक ट्रेसर, जोधपुर -1989
8. त्रिपाठी राधावल्लभ - संस्कृत काव्यशास्त्र और परम्परा - प्रतिभा प्रकाशन, देहली -2004
9. डा.शर्मा बालकृष्ण - काव्यप्रकाश का दार्शनिक धारातल - प्रतिभा प्रकाशन, देहली -1997
10. Cahill Timothy C.- An Annotated Bibliography of the Alamkarasastra - Varanasi – 2001
11. De Sushil Kumar-Aspects of Sanskrit Literature- Delhi – 2003
12. Krishnamachariar M - History of Classical Sanskrit Literature -Delhi-1983

****

डा. एम्. सुदर्शनचिपळूणकरः

Dr.M.Sudarshan Chiplunkar

Assistant Professor, School of Linguistics and Literary Studies,

Chinmaya Vishwavidyapeeth, Chinmaya Eswar Gurukula Campus,

Adi Sankara Marg, Veliyanad, Ernakulam, Kerala – 682313

chiplunkarsudarshan@gmail.com

***

CC BY

भारतीयदर्शन में अद्वैत और अद्वय

- शशिकान्त द्विवेदी

शोधसार -
वेदान्तशास्त्र के ग्रन्थों एवं बौद्ध दर्शन के ग्रन्थों में अद्वैत एवं अद्वय शब्द का प्रयोग समान अर्थ में पाया जाता है। किन्तु व्याकरण दृष्टि से, सन्दर्भ दृष्टि से तथा महापुरूषों की प्रयोग दृष्टि से इन दोनों शब्दों के अर्थों में कुछ भेद प्रतीत होता है। किन्तु पथिकृत् पूर्वाचार्यों ने दोनों शब्दों का प्रयोग समान अर्थ में क्यों किया है। शब्दों पर विचार करते हैं तो देखते हैं कि महर्षि पाणिनि के दो सूत्र हैं- 'संख्याया अवयवे तयप्' तथा 'द्वित्रिभ्यां तयस्यायज् वा' इन दोनों सूत्रों के द्वारा 'द्वौ अवयवौ अस्य' इस विग्रह में क्रमश: तयप् तथा तयप् को अयच् करके द्वयम् शब्द बनता है। जिसका अर्थ होता है दो अवयवों वाला। फिर इससे नञ् समास करके न द्वयम् ऐसा विग्रह करके अद्वयम् शब्द बनता है। जिसका अर्थ होता है- जिसमें दो अवयव न हो। ये दो अवयव कौन से हें। यह भी स्पष्ट किया जाएगा। इसी प्रकार अद्वैत शब्द की भी व्युत्पत्ति है। जैसे- द्वाभ्यां प्रकाराभ्याम् इतं प्राप्तम् इति द्वीतं, द्वीतमेव द्वैतं, न द्वैतम् अद्वैतम्। अर्थात् द्वैत का अभाव। इस अद्वयता की व्याख्या करते हुए भाष्यकार आचार्य शङ्कर रज्जू-सर्प आदि दृष्टान्त देते हुए कहते हैं कि प्राण आदि अनन्त असत् अविद्यमान भावों की कल्पना का भी आधार अद्वय सत्स्वरूप आत्मा ही है। इस प्रकार अद्वय अद्वैत तथा अद्वितीय इन तीन शब्दों के तीन अर्थ बनते हैं – अद्वय का अर्थ अवयव द्वयरहित, अद्वैत का अर्थ प्रकारद्वय रहित और अद्वितीय का अर्थ पूरकद्वयरहित। इन सभी पर प्रस्तुत निबन्ध में विचार किया गया है।

वेदान्तशास्त्र के आकर ग्रन्थों एवं बौद्ध दर्शन के आकर ग्रन्थों में अद्वैत एवं अद्वय शब्द का प्रयोग समान अर्थ में पाया जाता है। किन्तु व्याकरण दृष्टि से, सन्दर्भ दृष्टि से तथा महापुरूषों की प्रयोग दृष्टि से इन दोनों शब्दों के अर्थों में कुछ भेद प्रतीत होता है। किन्तु पथिकृत् पूर्वाचार्यों ने दोनों शब्दों का प्रयोग समान अर्थ में क्यों किया है। इसमें कोई हेतु लक्षित नहीं हो रहा है।

जैसा कि योगवाशिष्ठ में ज्ञान के उत्तम अधिकारी के लिए तत्त्व का जो प्रतिपादन है, उसका सार है अद्वयता। द्रष्टा-दर्शन-दृश्य का नानात्व इस ब्रह्माद्वयता को बाधित नहीं करता क्योंकि इन सब कल्पनाओं के भी मूल में एकमात्र वही तत्त्व विराजमान है, उसके अतिरिक्त किसी की भी संभावना ही नहीं है। एकमात्र ब्रह्म ही तत्त्व है जो आद्यन्त से रहित, विभाजन खण्डन से रहित, अव्यय, केवल, शान्त, अपने आप में स्थित है। जगत्, जीव, ईश्वर एवं उनके विविध व्यवहार सभी कुछ तत्त्वतः एकमात्र ब्रह्म या आत्मा ही हैं। जैसा कि कहा है–

'परं ब्रह्मैव तत्सर्वमजरामरमव्ययम्।' [1]
'सर्वमेकमनाद्यन्तमविभागमखण्डितम्।'[2]
न जगन्नापि जगती शान्तमेवाखिलं स्थितम्।
ब्रह्मैव कचति स्वच्छमित्थमात्मात्मनात्मनि।।[3]
केवलं केवलाभासं सर्वसामान्यमक्षतम्।[4]
कर्मैव देहो ननु देह एव चित्तं तदेवाहमितीह जीवः।
स जीव एवेश्वरचित् स आत्मा सर्वः शिवस्त्वेकपदोक्तमेतत्।।[5]
यदिदं किंचिदाभोगि जगज्जालं प्रदृश्यते।
तत्सर्वममलं ब्रह्म भवत्येतद् व्यवस्थितम्।।[6]
ब्रह्माहं त्रिजगद् ब्रह्म त्वं ब्रह्म खलु दृश्यभूः।
द्वितीया कलना नास्ति यथेच्छसि तथा कुरु।।[7]

ऐसे 'सर्वं खल्विदं ब्रह्म' दर्शन में उस ब्रह्म की अद्वयता के साधक पृथक् तर्क दिखाने की आवश्यकता ही नहीं अतएव अवकाश तथा प्रवृत्ति ही नहीं। अन्य की संभावना के लेश के भी अभाव में स्वतः सिद्ध एक ही अद्वितीयता भी स्वतः सिद्ध ही मानी गई।

परम वस्तु की इस अद्वैत-संप्रदाय-सिद्ध अद्वयता पर क्यों उठाने का विशेष अभिक्रम-माण्डूक्यकारिका में भी नहीं हुआ, केवल उस अद्वयता का प्रतिपादन अवश्य विशेष आग्रह पूर्वक किया गया, कि वस्तुतः जो वस्तु है वह सर्वथा अद्वय है, अर्थात् एक ही है, उसके साथ कोई दूसरा नहीं है। जैसा कि कहते हैं –

'मायामात्रमिदं द्वैतमद्वैतं परमार्थतः'।[8] और भी
'अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते'।[9]

क्योंकि उसके अतिरिक्त और कुछ है ही नहीं इसलिए अन्य की कल्पना भी उठते ही कह दिया गया कि जो कुछ जाति के समान चल के समान तथा वस्तु के समान प्रतीत होता है, वह मुख्यतः अज, अचल और अवस्तु अद्वितीय परम अर्थ ही है। इसी से उस तत्त्व की सर्वात्मकता अर्थात् 'उससे पृथक् कुछ न होना, यदि कुछ भी होने की संभावना भी है तो वह ब्रह्म ही है' कही गयी है। जैसा कि –

'जात्याभासं चलाभासं वस्त्वाभासं तथैव च।
अजाचलमवस्तुत्वं विज्ञानं शान्तमद्वयम्'।।[10]

इस अद्वयता के साधन में उत्पत्ति के सदृश प्रतिपादन माण्डूक्यकारिका में यही है कि तत्त्व अद्वय न हो तो जगत् का होना कल्याणकारी नहीं रहता। वास्तव में तो द्वैत और अद्वैत दोनों ही भाव परमतत्त्व को स्पर्श नहीं करते किंतु असद्भावों की अपेक्षा अद्वैतभाव ही मंगलमय है। जैसा कि –

भावैरसद्भिरेवायमद्वयेन च कल्पितः।
भावा अप्यद्वयेनैव तस्मादद्वयता शिवा।।[11]

श्रुतियों ने भी नानात्व की, द्वैत की भी निंदा ही की है। वस्तुतः तो नानात्व की कोई स्थिति है ही नहीं, कोई भी वस्तु न तो ब्रह्म से पृथक् है न अपृथक्। अतः ब्रह्म की अद्वयता सिद्ध है। जैसा कि कहा है –

नात्मभावेन नानेदं न स्वेनापि कथंचन।
न पृथङ् नापृथक् किंचिदिति तत्त्वविदो विदुः।।[12]
जीवात्मनोरनन्यत्वमभेदेन प्रशस्यते।
नानात्वं निन्द्य यच्च तदेवं हि समंजसम्।।[13]

इस अद्वयता शिवा की व्याख्या करते हुए भाष्यकार आचार्य शङ्कर रज्जू-सर्प आदि दृष्टान्त देते हुए कहते हैं कि प्राण आदि अनन्त असत् अविद्यमान भावों की कल्पना का भी आधार अद्वय सत्स्वरूप आत्मा ही है। अतः समस्त कल्पना की आश्रयभूता होने से और अपने स्वरूप से अद्वय का कभी व्यभिचार न होने से कल्पना अवस्था में भी अद्वयता ही मंगलमयी है। आधार रहित कल्पना सम्भव भी नहीं और केवल कल्पना भयकारिणी होने से अमङ्गल है। अद्वयता अभयरूपा होने से मङ्गलमयी है। जैसा कि- "यथा रज्ज्वामसद्भिः सर्पधारादिभिरद्वयेन च रज्जुद्रव्येण सतायं सर्प इयं धारा दण्डोयमिति वा रज्जुद्रव्यमेव कल्पयत एवं प्राणादिभिरनन्तैरसद्भिरेवाविद्यमानैः, न परमार्थतः .... सर्वविकल्पास्पदभूतेनायं स्वयमेवात्माकल्पितः। ते च प्राणादिभावा अप्यद्वयेनैव सतात्मना विकल्पिताः। न हि निरास्पदा काचित् कल्पनोपलभ्यते, अतः सर्वकल्पनास्पदत्वात् स्वेनात्मनाद्वयस्याव्यभिचारात् कल्पनावस्थायामप्यद्वयता शिवा"।[14]

परमाचार्य गौडपाद का उद्देश्य माध्यमिकवाद का खण्डन था, अतः द्वैतात्मक सब कुछ को असत्कल्पना करते हुए कल्पना के आधार रूप से सत् अद्वय तत्त्व की स्थापना की। उस स्थापना को स्पष्ट एवं दृढतर बनाया आचार्य शंकर के युक्तिपूर्ण भाष्य ने। सर्प के सदृश रज्जु की कल्पित ही क्यों न हो ऐसी शून्यवादी की शंका का निराश करते हुए अधिष्ठान की सत्ता स्थापित की। जैसा कि – 'विकल्पपाक्षयेऽविकल्पिततत्वादेव सत्त्वोपपत्तेः'।[15]

स्वयं आचार्य शङ्कर ने भी परमतत्त्व की अद्वयता की सिद्धि के लिए अभिक्रम पूर्वक युक्ति-विस्तार नहीं किया, उपनिषद् भाष्यों में अद्वैत प्रतिपादक श्रुतियों की व्याख्या में अत्यंत संक्षेप एवं सरलता से ही अद्वयता की उपपत्ति दी है। छान्दोग्योपनिषद् भाष्य में 'एकमेवाद्वितीयम्' की व्याख्या में 'एक' होने की उपपत्ति यही कही गई कि उस तत्व के कार्यवर्ग में आया हुआ भी दूसरा कोई नहीं था अतः वह एक ही था। विभिन्न कार्यों के कारण रूपमृतिका से अतिरिक्त, कोई दूसरी वस्तु नहीं थी अतः वह अद्वितीय था। मिट्टी से घड़ा आदि बनने में उस मिट्टी का नाना आकारों में परिणत करने वाला कुम्हार आदि निमित्त कारण लोक में देखा जाता है वैसे ही इस जगत् सृष्टि के मूल में एकमात्र सत् से भिन्न सत् का सहकारी रूप कोई अन्य पदार्थ भी रहा होगा - ऐसी आशंका को हटाने के लिए कहा गया, कि वह अद्वितीय था, अर्थात् उससे भिन्न कोई दूसरी वस्तु थी ही नहीं। जैसा कि – 'एकमेवेति, स्वकार्यपतितमन्यन्नास्ती-त्येकमेवेत्युच्यते। अद्वितीयमिति, मृद्व्यतिरेकेण, मृदो यथाऽन्यद्घटाद्याकारेण परिणमयितृकुलालादिनिमित्तकारणं दृष्टं तथा सद्व्यतिरेकेण सतः सहकारिकारणं द्वितीयं वस्त्वन्तरं प्राप्तं प्रतिषिध्यतेऽद्वितीयमिति। नास्य द्वितीयं वस्त्वन्तरं विद्यत इत्यद्वितीयम्'।[16]

'एक' और 'अद्वितीय' शब्द सत् के साथ समानाधिकरण है, यह कहने में व्यञ्जना से यह भी कहा जाता है कि 'सत्' का 'अद्वितीय एक' होना स्वतः सिद्ध है, सत् की सिद्धि ही एकत्व और अद्वितीयत्व की भी सिद्धि है। जैसा कि – 'एकमेवाद्वितीयमित्येतौ च सच्छब्देन समानाधिकरणौ तथेदमासीदिति च।[17]

'आसीत्' शब्द से शङ्का सम्भावित हुई कि सृष्टि से पूर्व, नाना 'इदम्' के आविर्भाव के पूर्व ही वह तत्त्व अद्वितीय था - इसका निरास करते हुए कहा गया कि विकार-वाणी के आश्रित तो नामरूप ही हैं, सत्य तो मृत्तिका ही है, सत् ही सत्य है और वह एक ही है। जैसा कि – 'सदेव सत्यमिति श्रुतेः। एकमेवाद्वितीयं परमार्थत इदं बुद्धिकालेऽपि'।[18]

बृहदारण्यकभाष्य में भी 'एक' की व्याख्या में उपपत्ति 'द्वितीय का अभाव' ही दी गई। द्वितीय का अविद्या से ही है और स्वरूप में अविद्या है ही नहीं, सुषुप्ति में भी द्रष्टव्य द्वितीय का अभाव होने से द्रष्टा अद्वय है तो स्वरूपतः तत्त्व का अद्वैत स्वतः सिद्ध है। जैसा कि कहते हैं – 'सलिल इव सलिल एको द्वितीयस्याभावात्। अविद्यया हि द्वितीयः प्रविभज्यते, सा च शान्तात्र अत एकः। द्रष्टा दृष्टेरविपरिप्लुतत्वादात्मज्योतिःस्वभावायाः, अद्वैतो द्रष्टव्यस्य द्वितीयस्याभावात्'।[19]

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

मंडन मिश्र ने शब्दब्रह्मवादी भर्तृहरि के सिद्धांत[20] (शब्द का नित्य रूप ही ब्रह्म है, वही सृष्टि का मूल तत्त्व है जगत् उसी का विवर्त है) का आकार लेकर शब्दाद्वैत के रूप में अद्वय ब्रह्म का प्रतिपादन किया है। ब्रह्मसिद्धि के मंगलाचरण में 'एकं' 'अक्षरं' कहा गया है। वह अक्षर निश्चय ही नादब्रह्म का संकेतभूत प्रणव है। प्रणवविषयक श्रुतियों की व्याख्या के प्रसंग में मंडन ने यही कहा है कि समस्त जगत् वाङ्मय है, प्रणव ही उसका आदिप्रश्रवण है, वही ब्रह्म है जो अक्षर, अभय, एक व अद्वय तत्त्व है। अवधारणा अर्थात् निश्चय बोधक 'एव' तथा 'अद्वितीय' शब्दों के पुनः पुनः प्रयोग से श्रुति ब्रह्म में सभी प्रकार के भेद का अभाव कहती है, कोई भेद न रहना ही अभेद है, भेद का रहना अनेक वस्तुओं के रहने पर निर्भर है। वस्तु के नानात्व का श्रुति बलपूर्वक निषेध करती है अतः परम तत्त्व अद्वय है।[21]

सुरेश्वराचार्य ने ब्रह्म के अर्थ में ही बहुधा आत्मा व संवित् शब्द का प्रयोग किया है। नैष्कर्म्यसिद्धि में कहा है कि आत्मा का अद्वितीयत्व आत्मा होने से ही सिद्ध है, द्वितीय का न होना ही इसमें हेतु है।[22] दृश्यमान द्वैत वस्तुतः है या नहीं इसका निरूपण नहीं हो सकता, अतः परमार्थतः अद्वैत ही होना सिद्ध है।[23]

आचार्य सुरेश्वर ने बृहदारण्यकभाष्यवार्तिक के मङ्गलाचरण में नमस्य को 'एकं' व 'निर्विभागं' विशेषण देते हुए कहा है कि उस तत्त्व का कोई वास्तविक भेद नहीं है क्योंकि किसी भी प्रमाण से भेद की सिद्धि नहीं होती, क्योंकि वह विभु है, नित्य है, कहीं से भी व्यावृत्त नहीं अर्थात् कभी भी किसी भी वस्तु को लेकर यह नहीं कहा जा सकता कि यह ब्रह्म नहीं है। जैसा कि कहा है –

> निर्भागं सकलाभिधानमननव्यापारदूरस्थितम्।
> वन्दे नन्दितविश्वमव्ययमजं भक्त्या तमेकं विभुम्।।[24]

उसी ग्रन्थ में 'सलिल एको दृष्टाद्वैतो'[25] के भाष्य के व्याख्यान में कहा है कि 'कार्य कारण भाव से रहित होने के कारण, अविद्याध्वंस के पश्चात् केवल आत्मा ही रह जाने के कारण, वह सलिल के समान शुद्ध है, अतः विजातीय भेद से रहित है। वह शुद्ध तत्त्व बदर, कपित्थ, आम आदि वृक्षों की भाँति स्वतः भी अनेक सुखा वाला नहीं है। अतः स्वागत एवं सजातीय भेद से भी रहित है, इसीलिए एक रस है, एक है। यह 'एक' शब्द एक संख्यावाचक नहीं क्योंकि ब्रह्म-स्थिति में संख्या कुछ हो ही नहीं सकता। अतः किसी भी प्रकार का द्वितीय पदार्थ वहां ना होने से ही वह अद्वितीय है। जैसा कि कहा गया है –

> स्वतोऽवबोधमात्रत्वात् कुतो विद्यादिसम्प्लुतिः।
> तस्मात् सलिलवच्छुद्धः कार्यकारणहानतः।।
> न कपित्थादिवत्तत्त्वं स्वतोऽनेकस्वभावकम्।

उक्त्वा सलिलवत् तस्मादेक इत्यब्रवीच्छ्रुतिः।।
सजातीयनिषेधो वा ह्येकशब्देन भण्यते।
सलिलोक्त्या विजातीयसम्बन्धो हि निवारितः।।
एकशब्दो न संख्यार्थः संख्येयासम्भवादिह।
अद्वितीयार्थतैवातो द्वितीयार्थनिषेधतः।।
सदेवेत्यादिना चास्य तथा सत्यविरुद्धता।।[26]

ब्रह्म शब्द का अर्थ कहा है कि सामान्य तथा विशेष रूपों से रहित, न कहीं अनुगत, न कहीं से व्यावृत्त वस्तु को ही श्रुति ने ब्रह्म शब्द से अभिधा वृत्ति से कहा है। इसी से उसका अद्वयत्व या द्वैत से अस्पष्ट होना सिद्ध होता है। जैसा कि कहते हैं –

अव्यावृत्ताननुगतं निःसामान्यविशेषतः।
ब्रह्मेति मुख्यवृत्त्येह वस्तु श्रुत्याऽभिधीयते।।[27]

योगवाशिष्ठकार एवं परमाचार्य गौडपाद, भर्तृहरी, एवं मंडन मिश्र तथा आचार्य शंकर एवं सुरेश्वराचार्य के ब्रह्मैकत्व सम्बन्धी प्रतिपादनों में तीन दृष्टि सरणीयाँ हैं। पहली दृष्टि है- 'सर्वम् ब्रह्म एव' (सब कुछ केवल ब्रह्म ही है, रूप कार्य समाख्या का भेद भी वस्तुतः अविद्यमान ही है) दूसरी दृष्टि है – 'इदम्' का विलय होने पर 'सर्वं ब्रह्म एव'। 'इदम्' अर्थात् जगत विवर्तरूप भले हो, किन्तु उसकी सर्वथा अविद्यमानता अभिप्रेत नहीं। स्फोटाद्वैत में भी स्फोट के जनकों या निमित्तभूत या आलंबनभूत अक्षरों की विद्यमानता को अवकाश नहीं। तीसरी दृष्टि है- 'इदं बुद्धिकालेऽपि सर्वं ब्रह्म एव'। इसमें भी किसी भी स्तर की प्रतीति की अवहेलना न करते हुए ही तात्विक अद्वैत की संयुक्तिक एवं व्यवहारानुकूल स्थापना है।

रामाद्वय ने वेदान्तकौमुदी में 'तात्त्विकाद्वैतविधुरं सद् वस्तु अद्वैतम्'[28] ऐसा अद्वैततत्त्व का लक्षण करते हुए भावाद्वैत का समर्थन किया है। उसी प्रसंग में कहा गया है कि श्रुति के अनुसार जिसको जानने से सब कुछ जाना जाता है, वही अद्वैत है। यहाँ उस एक ब्रह्म को जानने का अर्थ नानात्मक प्रपञ्च को ही विशेष रूप से जानना नहीं है, अपितु 1 जिसके जाने पर समस्त जगत् (द्वैत) विज्ञात-दग्ध-ज्ञात रूप से उपलक्षित ब्रह्म ही हो जाता है, जगत् का भान रहता ही नहीं, तथा 2 अध्यस्त (भ्रम के कारण आरोपित) का अत्यन्तिक (वास्तविक) रूप तो क्या है नहीं कहा जा सकता, अतः अधिष्ठान ही उसका वास्तविक रूप है यह निश्चित है, उसे जान लेने पर एन्द्रजालिक की माया के परे एन्द्रजालिक का स्वयं रूप जान लेने के समान अध्यस्त का वास्तविक रूप जाना जाता है, और वह अद्वैत ही है। जैसा कि कहा है-

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

'यस्मिन् विज्ञाते सर्वं विज्ञातं भवति तदद्वैतम् इति श्रौतं लक्षणम्। ……. सर्वं जगत् विज्ञातं दग्धं ज्ञातत्वोपलिक्षतं ब्रह्मैव प्रपञ्चदाहं इति स्वीकारात्। अध्यस्तस्यान्तिकनिरूपणादधिष्ठानमेव तदाकारेण दृढमिति तद्विज्ञाने दर्शितरूपान्तरैन्द्रजालिकवत् परमरूपेण तस्य विज्ञातत्त्वं वा भवति इति विवक्षितम्'।[29]

वेदान्तकौमुदी के इस प्रतिपादन में विज्ञान के दो अर्थ ध्वनित हो रहे हैं - विशेष रूप से ज्ञात तथा विपरीत ज्ञात या दग्ध। इस से 'यस्मिन् विज्ञाते सर्वं विज्ञातं भवति' ऐसा फलितार्थ निकलता है। यह प्रपञ्चप्रविलयवाद पूर्वाचार्यों अर्थात् शङ्कराचार्य एवं सुरेश्वराचार्य को अभिमत नहीं, क्योंकि उनके लिए तो जगद्विषयक ज्ञानस्तर भी पारमार्थिक अद्वैत का बाधक नहीं – 'इदं बुद्धिकालेऽपि सर्वं ब्रह्म एव'।

नृसिंहाश्रम में अद्वैतदीपिका में 'यत्रान्यत् श्रृणोत्यन्यद् विजानाति'[30] श्रुति के आधार पर किसी भी प्रकार से परिच्छिन्न वस्तु को अल्प, मर्त्य, निन्दित व सुखरहित कह कर जो सर्वथा अपरिच्छिन्न है वही आत्मतत्त्व है, अतः वह अद्वय ही है - ऐसा कहा है।[31]

नृसिंहाश्रम ने वेदान्ततत्त्वविवेक में ब्रह्म शब्द से धात्वर्थ रूप से कथित वृहत्व का पर्यवसान अद्वय तत्त्व में ही होना बताया है। कहा है कि यह वृद्धि नदी के बाढ़ के समान अनेक अवयवों का उपचय नहीं है, न हीं बृहत्त्व आकाश के परिणाम जैसा है, क्योंकि ब्रह्म तो 'निष्कल' व 'अस्थूल' है।[32] बृह् धातु से कही जाने वाली वृद्धि या बृहत्त्व का यहाँ (ब्रह्म शब्द में) अर्थ है त्रिविध परिच्छेद से रहित होना, तथा सर्वात्मक होने के योग्य होना।[33]

अब शब्दों पर विचार करते हैं तो देखते हैं कि महर्षि पाणिनि के दो सूत्र[34] हैं- 'संख्याया अवयवे तयप्' तथा 'द्वित्रिभ्यां तयस्यायज् वा' इन दोनों सूत्रों के द्वारा 'द्वौ अवयवौ अस्य' इस विग्रह में क्रमश: तयप् तथा तयप् को अयच् करके द्वयम् शब्द बनता है। जिसका अर्थ होता है दो अवयवों वाला। फिर इससे नञ् समास करके न द्वयम् ऐसा विग्रह करके अद्वयम् शब्द बनता है। जिसका अर्थ होता है- जिसमें दो अवयव न हो। ये दो अवयव कौन से हें। यह अभी स्पष्ट किया जाएगा। इसी प्रकार अद्वैत शब्द की भी व्युत्पत्ति है। जैसे- द्वाभ्यां प्रकाराभ्याम् इतं प्राप्तम् इति द्वीतं, द्वीतमेव द्वैतं, न द्वैतम् अद्वैतम्। अर्थात् द्वैत का अभाव। बृहदारण्यकोपनिषद्भाष्यवार्त्तिक में यही बात कही गयी है- 'द्विधेदं द्वैतभित्या हुस्तदमाबोऽद्वैतमुच्यते'[35] श्री मधुसूदन सरस्वती जी ने अपने ग्रन्थ सिद्धान्तबिन्दु में यही कहा है- 'न विद्यते द्वैतं द्विधाभावो यत्र तदिति'। अर्थात् – यत्र द्विधाभाव: प्रकारद्वयं नास्ति – तत्त्वमसि, अयमात्मा ब्रह्म, अहं ब्रह्मास्मि, प्रज्ञानं ब्रह्म इत्यादिवाक्यैरखण्डार्थस्यैकस्यैवार्थस्य प्रतीतिस्तदद्वैतम्। इसी प्रकार अद्वितीय शब्द भी है। द्वयो: पूरणम् इस विग्रह में इस अर्थ में

श्री पाणिनि सूत्र द्वेस्तीय:[36] से तीय प्रत्यय करने पर द्वितीय शब्द बनेगा और न द्वितीयम् ऐसा विग्रह करके नञ् समास करके अद्वितीयम् शब्द बनेगा।

इस प्रकार अद्वय अद्वैत तथा अद्वितीय इन तीन शब्दों के तीन अर्थ बनते हैं – अद्वय का अर्थ अवयव द्वयरहित, अद्वैत का अर्थ प्रकारद्वय रहित और अद्वितीय का अर्थ पूरकद्वयरहित। इस प्रकार 'एकमेवाद्वितीयं ब्रह्म' इस वाक्य का वाक्यगत 'एकम्' 'एव' तथा 'अद्वितीयम्' इन तीनों पदों से मिलाकर अद्वितीयोपलक्षित सजातीयविजातीयस्वगतभेदशून्य ब्रह्म ऐसा अर्थ किया जाता है।

अभी जो अद्वयम् का अवयवद्वयरहित अर्थ किया गया है। उसमें अवयवद्वय ये हैं- सत्यद्वय ग्राह्यग्राहकरूप चित्त तथा चैत्तिक। क्योंकि बौद्धमत में चित्त तथा चैत्तिक दो ही पदार्थ हैं। जैसा कि लड़्कावतारसूत्र[37] में कहा गया है चित्तमात्र मिदं सर्वं द्विधा चित्तं प्रवर्तते। ग्राह्यग्राहकभावेनात्मात्मीयं न विद्यते। (यहाँ पर आत्मा का अर्थ चित्त किया गया है।) ये दो सत्य माध्यमिक कारिका[38] में 'द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना। लोकसंवृति सत्यं च सत्यं च परमार्थत:'। इसी प्रकार तत्त्वसंग्रह[39] में भी कहा है – 'प्रकृत्या भास्वरे चित्ते द्वयाकारकलड्किते'। गौडपादाचार्य की माण्डूकयकारिका[40] इसका परिचय इस प्रकार से दिया गया है – 'चित्तस्पन्दितमेवेदं ग्राह्यग्राहकमद्वयम्'। अभिसमयालड़्क में लिखा है कि – 'प्रज्ञापारमिता ज्ञानमद्वयं सा तथागत:'। इसकी व्याख्या में श्री हरिभद्र लिखते हैं – 'एवमभिधत्ते प्रज्ञाया धर्म विचारलक्षणाया पारमिता मुख्य बुद्धो भगवान् मायोपमं ज्ञानम् अद्वयम्'।

उपरिलिखित इन दोनों सत्यों लोकसंवृति सत्य एवं पारमार्थिक सत्य को परिकल्पित परतत्र तथा परिनिष्पन्न शब्दों से भी कहते हैं। परिकल्पित एवं परतत्र सत्य को संवृतिसत्य के अन्तर्गत करते हैं तथा परिनिष्पन्न सत्य को परमार्थसत्य के अन्तर्गत करते हैं।[41] तथा प्रमाणवार्त्तिक[42] में भी इन दोनों सत्यों की व्याख्या की गयी है। संवृति का अर्थ अज्ञान किया गया है। संवृति अर्थात् समन्तात् वरणम् = आवरणम्। जो सभी तरफ से ढक दें वह संवृति है। अज्ञान संवरण करता है। अत: अज्ञान को संवृति कहते हैं। संवृति सत्य के विषय में स्वातन्त्रिक माध्यमिक प्रासड्किमाध्यमिक सौत्रान्तिक स्वातन्त्रिक तथा योगाचार स्वातन्त्रिक आदि के मतों में अनेक मतभेद हैं।

इन दोनों सत्यों को छोडकर सर्वोत्तम निर्विकल्पज्ञान प्राप्त कराना ही महात्मा बुद्ध का उद्देश्य था। जैसा कि महायानसूत्रालंकार में कहा है – 'द्वयग्राहकविसंयुक्तं

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

लोकोत्तरमनुत्तमम् निर्विकल्पं मलापेतं ज्ञानं स लभते पुन:'। इस प्रकार इन दोनों सत्यों के निषेध में ही अद्वयपद की सार्थकता है। ये ही ज्ञान के दो अवयव हैं – संवृति सत्य तथा परमार्थ सत्य और इन दोनों अवयवों से निवृत्त होना अद्वय है। इसीलिए बौद्ध विद्वान् कोशकार अमरसिंह ने कहा है – 'षडभिज्ञो दशबलोऽद्वयवादी विनायक:[43]। इस पर भानु जी दीक्षित व्याख्या करते हैं – 'अयमद्वयं वदत्यवश्यम्'। फिर इस पर क्षीरस्वामी जी बोलते हैं – 'अद्वयं विज्ञानाद्वैतं वदत्यवश्यम्'।

इस प्रकार व्याकरण की दृष्टि से व्युत्पत्ति के अनुसार तथा अद्वय तथा अद्वैत शब्द के सिद्धान्त के अनुसार इन शब्दों के वाच्यार्थ में भेद स्पष्ट है। किन्तु शंकरवेदान्त एवं बौद्धदर्शन में इन दोनों का व्यवहार पर्यायवाची के रूप में किया गया है। जैसे – छान्दोग्योपनिषद्[44] के शांकरभाष्य में – 'परमार्थं सद् अद्वयं ब्रह्म'। श्रीमद्भागवत[45] में कहा गया है – 'वदन्ति यत् तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'। इसी प्रकार नैष्कर्म्य सिद्धि में[46] कहा है कि 'तदेतदद्वयं ब्रह्म निर्विकारं कुबुद्धिभि:। जात्यन्धगजदृष्ट्येव कोष्टिश: परिकल्प्यते'। उधर बौद्ध विद्वान् चन्द्रकीर्ति माध्यमिककारिका की व्याख्या में कहते हैं – 'न वयं नास्तिका:। अस्तित्वनास्तित्वद्वयनिरासेन तु वयं निर्वाणपुरगामिनमद्वैतपथं विद्योतयाम:'।

एक मत में एक ही तत्त्व है वही परम सत्य है वह है सजातीय विजातीय स्वगत भेद शून्य ब्रह्म जो अद्वितीय अद्वैत है। दूसरे मत में सांवृतिक सत्य तथा पारमार्थिक सत्य इस द्वय से रहित शून्य ही सब कुछ है और शून्य भी कुछ नहीं है शून्यतादृष्टि भी अपराध है जो है वह सर्वोपरम सर्वोपशम शिव है। वही अद्वय है। इस प्रकार अद्वैत तथा अद्वय शब्दों के अर्थ में भेद प्रतीत होने पर भी महामनीषी आचार्यों ने इन दोनों का एक दूसरे के पर्यायरूप में प्रयोग किस प्रयोजन से किया है। यह साधारण बुद्धि से समझना कठिन है।

सन्दर्भ ग्रन्थ

1. योगवाशिष्ठ, वाल्मीकि, पाण्डुरंग जीवाजी निर्णय सागर प्रेस बम्बई, 1937
2. माण्डूक्यकारिका, गौडपाद, गीताप्रेस गोरखपुर, 1942
3. छान्दोग्योपनिषद् भाष्य, शंकराचार्य, गीताप्रेस गोरखपुर, 1942
4. बृहदारण्यकोपनिषद् भाष्य, शंकराचार्य, गीताप्रेस गोरखपुर,1942
5. वाक्यपदीयम्, भर्तृहरि, क.अ.सुब्रह्मण्य अय्यर, डेक्कन कालेज पूना, 1966
6. ब्रह्मसिद्धिः, मण्डन मिश्र, गवर्नमेन्ट प्रेस, मद्रास 1937

7. नैष्कर्म्यसिद्धिः, सुरेश्वर, ओरयन्टल रिसर्च इन्सटीट्यूट पूना 1925
8. बृहदारण्यकभाष्यवार्तिक, सुरेश्वर, आनन्दाश्रम संस्कृत ग्रन्थावलि 16 पूना
9. वेदान्तकौमुदी, रामाद्वय, मद्रास विश्वविद्यालय 1955
10. अद्वैतदीपिका, श्रीनृसिंहाश्रम, खेलाडी लाल ऐण्ड सन्स, काशी 1939
11. वेदान्ततत्त्वविवेक तत्त्वविवेकदीपन सहित, नृसिंहाश्रम, ओरियन्टल सं. इन्स्टीट्यूट मैसूर विश्वविद्यालय 1955
12. तत्त्वसंग्रह, शांतरक्षित, बडौदा 1926
13. अभिधर्मकोश, वसुबन्धु, काशी प्रसाद जायसवाल रिसर्च इन्स्टीट्यूट पटना 1967
प्रमाणवार्त्तिक, धर्मकीर्ति, किताब महल प्रयाग 1943

---

[1] योगवासिष्ठ 3/4/68

[2] योगवासिष्ठ 3/84/26

[3] योगवासिष्ठ 3/13/51

[4] योगवासिष्ठ 3/114/16

[5] योगवासिष्ठ 3/65/13

[6] योगवासिष्ठ 6/1/11/16

[7] योगवासिष्ठ 6/1/49/23

[8] माण्डूक्यकारिका 1/17

[9] माण्डूक्यकारिका 3/18

[10] माण्डूक्यकारिका 4/45

[11] माण्डूक्यकारिका 2/33

[12] माण्डूक्यकारिका 2/34

[13] माण्डूक्यकारिका 3/13

[14] माण्डूक्यकारिका भाष्य 2/33

[15] माण्डूक्यकारिका भाष्य 2/32

[16] छान्दोग्योपनिषद् भाष्य 6/2/1

[17] छान्दोग्योपनिषद् भाष्य 6/2/1

[18] छान्दोग्योपनिषद् भाष्य 6/2/2

[19] बृहदारण्यकोपनिषद् भाष्य 4/3/32

[20] अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। वाक्यपदीयम् 1/1/1

[21] अक्षरमिति शब्दात्मतामाह, विशेषेण सामान्यस्य लक्षणात्। .... तदेतद् विशुद्धत्वं नित्यत्वमेकत्वं चाकाशकल्पे ब्रह्मण्यकल्पते ब्रह्मसिद्धि पृ. 16-19

[22] आत्मनोऽप्यद्वितीयत्वमात्मत्वादेव सिध्यति। नैष्कर्म्यसिद्धि 2/96

[23] स्वतःसिद्धात्मचैतन्यप्रतिबिम्बिताविचारितसिद्धिकात्मानवबोधोत्थेतरेतरस्वभावापेक्षसिद्धत्वात् स्वतश्च असिद्धेरनात्मनो द्वैतेन्द्रजालस्य। न स्वयं स्वस्य नानात्वं नावगत्यात्मना यतः। नोभाभ्यामप्यतस्मिद्धमद्वैतं द्वैतबाधया। नैष्कर्म्यसिद्धि 2/112

[24] बृहदारण्यकभाष्यवार्तिक 1/1/1

CC BY

---

25 बृहदारण्यकोपनिषद् 4/3/32

26 बृहदारण्यकभाष्यवार्तिक 4/3/1798-1800-3

27 बृहदारण्यकभाष्यवार्तिक 4/3/1815

28 वेदान्तकौमुदी पृ. 85

29 वेदान्तकौमुदी पृ. 88

30 छान्दाग्योपनिषद् 7/24/1

31 अद्वैतदीपिका पृ. 18-19

32 वेदान्ततत्त्वविवेक पृ. 517

33 बृहिधातुर्हि वृद्धिमभिधत्ते, वृद्धिश्चात्र स्वरूपोपचय, स च सर्वात्मतायोग्यतैवेति त्रिविधपरिच्छेदशून्यं ब्रह्मशब्दाभिधेयं लक्ष्यम्। तत्त्वविवेकदीपन पृ. 517

34 अष्टाध्यायी, पाणिनि सूत्र 5/2/42, 5/2/43

35 बृहदारण्यकोपनिषद्भाष्यवार्तिक 4/3/1807

36 अष्टाध्यायी, पाणिनि सूत्र 5/2/54

37 लङ्कावतार सूत्र 3/1/21

38 माध्यमिककारिका 24/8

39 तत्त्वसंग्रह 25/38

40 माण्डूक्यकारिका 4/72

41 अभिधर्मकोश 6/4

42 प्रमाणवार्त्तिक 2/3

43 अमरकोश 1/1/14

44 छान्दग्योपनिषद् 8/1/1

45 श्रीमद्भागवत् 1/2/11

46 नैष्कर्म्यसिद्धि 2/29

डॉ.शशिकान्त द्विवेदी

Dr. Shashikant Dwivedi

असि. प्रोफेसर, (वरिष्ठ), वैदिकदर्शन विभाग

काशी हिन्दू विश्व विद्यालय,वाराणसी 221005,उत्तरप्रदेश

drshashikantdwivedi@gmail.com

***

भावतत्त्वविचारः

- **अशोककुमारशतपथी**

शोधसारः -

शोधसारः - काव्यशास्त्रे यावदेव काव्यतत्त्वानां पर्यालोचनं क्रियते तावदेव तस्मिन् नूतनानां तत्त्वानामाविर्भावः। यथा ध्वन्यालोककारेणोक्तं यत् - "सहस्रशो हि महात्मभिरन्यैरलङ्कार- प्रकाराः प्रकाशिताः प्रकश्यन्ते च"।[1] तथैव सर्वेषां काव्यतत्त्वानां विकासः जायते। मुनयो विभिन्ना मतयो विभिन्नेति न्यायेन काव्यतत्त्वविषयेऽपि मतान्यनेकानि वर्तन्ते। तथापि खण्डनमण्डनपरम्परामनुसृत्य आलङ्कारिकैराचार्यैरनेकानि काव्यशास्त्राणि विरचितानि। तेषु अलङ्कारग्रन्थेषु नानाविधानि काव्यतत्त्वानि पर्यालोचितानि। पुनः तेषु काव्यतत्त्वेषु अन्यतमं तत्त्वं वर्तते भावः। सः भावः कदाचित्काव्यस्यात्मारूपेण स्थित्वा काव्यस्य काव्यत्वं सम्पादयति। तर्हि को भाव इति शङ्कायां काव्यशास्त्रप्रणेतृणां मतान्युपस्थापनीयानि।

कुञ्ची-शब्दाः –भावः,चित्तवृत्तिः,रतिः, व्यभिचारी, अञ्जितः,रसः,व्यञ्जकः, भावध्वनिः।

भाव इति कथनेन भू-सत्तायामितिधातोः घञि प्रत्यये सति भावशब्दस्य व्युत्पत्तिः। भूयत इति भावः, स च चित्तवृत्तिविशेषः;चित्तस्य काचित् वृत्तिर्भवति, मनसि या स्थितिर्भवति, यस्या चित्तवृत्तेः सत्ता मनसि वर्तते सा चित्तवृत्तिः भाव इत्युच्यते। स च भावः व्यभिचारिभावत्वेन स्वीक्रियते। नाट्यशास्त्रकारः निगदति भावविषये- "किं भवन्तीति भावाः, किं वा भावयन्तीति भावाः। उच्यते- वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावा इति"।[2] आचार्यमम्मटानुसारं "रतिर्देवादिविषया व्यभिचारी तथाञ्जितः" भावः प्रोक्तः। आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया, कान्ताविषया तु व्यक्ता शृङ्गारः।[3] यदि व्यभिचारिभावः अञ्जितो नाम व्यञ्जितः भवति अर्थात् व्यङ्ग्यरूपेण प्रतीयते तदानीं सोऽपि भावपदवाच्यः भवति। काव्यप्रकाशे उदाहरणान्यपि संक्षेपेण प्रदर्शितानि। देवविषया रतिर्यथा-

कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम्।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते॥[4]

मुनिविषया रतिर्यथा-

हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्॥[5]

गुरुविषया रतिर्यथा-

भवसागरबान्धववाद्विपेन्द्रप्रपदक्षालनवारितो विशिष्टम्।
भवसागरवैरिवन्दनीयं गुरुपादोदकमेव केवलं नः॥[6]

नृपविषया रतिर्यथा-

सङ्कल्पेऽङ्कुरितं द्विपत्रितमथ प्रस्थानवेलागमे
मार्गे पल्लवितं पुरं प्रविशतः शाखान्तरैरावृतम्।
प्रादुर्भाविनि दर्शने मुकुलितं श्रीकर्णदृष्टे त्वयि
प्रोफुल्लं फलितं च सम्प्रति मनो राज्यद्रुमेनाद्य मे॥[7]

पुत्रादिविषया रतिर्यथा-

एह्येहि वत्स रघुनन्दन पूर्णचन्द्र चुम्बामि मूर्धनि चिराय परिष्वज्ये त्वाम्।
आरोप्य वा हृदि दिवानिशमुद्वहामि वन्देऽथ वा चरणपुष्करकद्वयं ते॥[8]

काव्यप्रकाशटीकाकारः वामनभट्टझलकीकरः अपुष्टां रतिमपि भावरूपेण स्वीकरोति । "कान्ताविषया तु व्यक्ता शृङ्गारः" इति वृत्तिवाक्यस्य टीकायां लिखति-

तेन देवादिविषया सर्वप्रकारा, कान्तादिविषयाऽपि अपुष्टा रतिः, हासादयश्च अप्राप्तरसावस्थाः, विभावादिभिः प्राधान्येनाञ्जितो व्यञ्जितो व्यभिचारी च भावः प्रोक्तः भावपदाभिधेयः कथित इति सूत्रार्थः।[9]

अपि च, व्यक्ता इत्युक्ते तेन मतेन- प्राधान्येन विभावादिभिः पुष्टाः इत्यर्थः। तेन अङ्गभूतायाः अनुभावादिभिः अपुष्टायाश्च न रसत्वं, किन्तु भावत्वमेव इति।

शोधपत्रस्योपक्रमे वाक्यमेकमुदीरितं- स भावः कदाचित् काव्यस्य आत्मारूपेण स्थित्वा काव्यस्य काव्यत्वं सम्पादयति,साहित्यदर्पणकारः काव्यलक्षणनिर्णयावसरे वृत्तिवाक्ये लिखति-"रस्यते इति रसः इति व्युत्पत्तियोगात् भावतदाभासादयोऽपि गृह्यन्ते ।"[10] भावस्य उदाहरणरुपेण तत्र प्रथमपरिच्छेदे विश्वनाथः तस्य पितामहानुजस्य पद्यमेकमुपस्थापयति-

भावो यथा महापात्रराघवानन्दसान्धिविग्रहिकाणाम्-

यस्यालीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मण्डलं
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी ।
क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलम्बासुरो
ध्याने विश्वमसावधार्मिककुलं कस्मैचिदस्मै नमः॥[11]

पुनः तृतीयपरिच्छेदेऽपि भावविषये दर्पणकारेण विशदालोचनं कृतम्। यद्यपि भावः रसाद्भिन्नः तथापि भावे रसनधर्मयोगित्वं वर्तते। अतः भावादिषु रसत्वमुपचारः भवति। भावलक्षणं विश्वनाथानुसारं यथा-

सञ्चारिणः प्रधानानि देवादिविषया रतिः।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते॥[12]

अर्थात् प्रधानतया निर्वेदादि सञ्चारिभावाः व्यक्ताः भवन्ति, पुनः देवादिविषयकः अनुरागः तथा च उपादानस्याभावे उद्बुद्धाः स्थायिभावाः भावाः भवन्तीति विश्वनाथकविराजस्याभिप्रायः। उद्बुद्धमात्रस्थायिभावः एव अपुष्टारतिः। उदाहरणं यथा-

हरस्तु किञ्चित् परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे विम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥[13]

अत्र पार्वतीविषया भगवतः शङ्करस्य रतिः अपुष्टा वर्तते।

भावं विहाय रसस्य स्थितिर्न भवति, रसं विना भावस्य स्थितिर्न सम्भवति। उक्तञ्च साहित्यदर्पणे-

न भावहीनोऽस्ति रसो न भावो रसवर्जितः।
परस्परकृता सिद्धिरनयो रसभावयोः॥[14]

एवं विधिना यदि सूक्ष्मेक्षिकया पर्यालोच्यते तर्हि यद्यपि भावानां स्थितिः रसप्रतीत्यन्तर्गता भवति तथापि यथा भृत्यविवाहकाले राजा तदनुगः भवति तथैव कदाचित् व्यभिचारिभावाः अपि रसापेक्षया आपाततः प्रधानरूपेण अभिव्यक्ताः भवन्ति। तत्रोदाहरणं यथा-

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती॥[15]

अत्र व्यभिचारी भवति अवहित्था ।

अवहित्थायाः लक्षणम् यथा -

भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसक्त्यन्यथावभाषणविलोकनादिकरी ।।[16]

कुमारसम्भवे नारदहिमालययोः पार्वतीपरिणयविषयकसंवादसमये समीपवर्तिन्याः पार्वत्याः क्रियावर्णनकमिदमुदाहरणम् । अत्र पद्मगणनव्याजेन तदनुमोदने स्वहर्षं जुगोप । तथा च आत्मपरिणयसंलापश्रवणेन मुखादिविकाररूपहर्षाकारस्य लज्जावशात् लीलापद्मपत्रगणनच्छलेन संवरणात् पार्वत्या अवहित्था ।

अत्र एका शङ्का उदेति - यथा प्रपानकरसे सर्वेषां घटकानां मिश्रणं भवति । तथैव रसाद्यववोधे विभावादीनां सर्वेषामेकीकरणं भवति । तर्हि सञ्चारिणः पार्थक्याभावात् कथं प्रधानतया अभिव्यक्तिर्भवतीति । तत्र विश्वनाथः शङ्कामिमां निराकरोति स्वभाषया -

यथा मरीचखण्डादेरेकीभावे प्रपानके ।
उद्रेक कस्यचित्क्वापि तथा सञ्चारिणो रसे ।।[17]

यथा प्रपानके खण्डमरीचादेः मेलने सत्यपि कुत्रापि कस्यचिदेकस्य खण्डनस्य मरीचस्य वा तारतम्यता अनुभूयते तथैव सञ्चारिणः उद्रेकः काव्यबन्धवैचित्र्यात् प्राधान्येन जायते ।

रसगङ्गाधरकारः पण्डितराजजगन्नाथः खण्डनमण्डनपरम्परामनुसृत्य किञ्चिद्भिन्नप्रकारेण भावध्वनिं निरूपयति । सर्वप्रथमं पण्डितराजः वादिनां मतमुपस्थापयति । यद्यत्र वादिनः भावस्य लक्षणकरणे वदेयुः - "विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वमिति ।" तर्हि तन्न समीचीनम् ।अत्र जगन्नाथेनोद्भावितः कश्चित् दोषः । कोऽसौ दोषः । सः प्रकटयति - "रसकाव्यवाक्ये अतिव्याप्त्यापत्तेः" । रसकाव्यवाक्यमित्युक्ते रसध्वनियुक्तकाव्यस्य वाक्यानि तानि वाक्यानि विभावानुभावाभ्यां भिन्नानि भवन्ति प्रत्युत रसव्यञ्जकान्यपि । रसकाव्यवाक्यानि भावपदवाच्यानि न भवेयुः । अत्र

(cc) BY

अतिव्याप्तिदोषस्यारोपः । यद्युच्यते - रसव्यञ्जकास्त्वर्थाः भवन्ति, न शब्दाः । अतः शब्दोच्चारणे वाक्ये भावलक्षणम् अतिव्याप्तिदोषाय कथम् इति शङ्काया निराकरणे जगन्नाथस्योत्तरं यथा - "अर्थद्वारा शब्दस्यापि व्यञ्जकत्वात्" ।।[18] उक्तं खलु साहित्यदर्पणे -

शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः ।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ।।[19]

कथनस्य तात्पर्यमिदं - यद्यपि अर्थद्वारा रसबोधो भवति, तथापि अर्थद्वारा शब्दस्यापि ग्रहणं जायते । अतः साधूक्तं जगन्नाथेन - "अर्थद्वारा शब्दस्यापि व्यञ्जकत्वात् ।"

पुनः वादिनः आक्षिपन्ति - अर्थद्वारा शब्दस्य रसव्यञ्जकत्वं न स्वीक्रियते । द्वारान्तर-निरपेक्षत्वात् । अत्र वादिनामयमभिप्रायः यत् - "यः साक्षाद्रसस्य व्यञ्जकः स एव व्यञ्जकः भवतु, यदि अन्येन केनापि द्वारा स (अर्थः) व्यञ्जकत्वं लभते तन्न स्वीकर्त्तव्यम् । जगन्नाथानुसारम् अत्र असम्भवदोषः अर्थात् लक्षणमिदं भावस्य कदापि न भवति । यतः भावस्य व्यञ्जकत्वं भावनाद्वारैव भवति । अतः भावनायामतिव्याप्तिः भवेत् ।

पुनः यदि तत्र "शब्दभिन्नत्व" इति शब्दः विशेषणरूपेण युज्यते तथापि न निस्तारः । यतः या भावना शब्दाद् भिन्ना तत्रातिव्याप्तेः प्रसङ्गः भवेत् । एवमपि भावध्वनिस्थलेषु यः भावः प्रधानतया अभिव्यज्यते तत्र रसव्यञ्जकत्वाभावात् अव्याप्तिदोषस्यागमनम् । पुनः यद्युच्यते भावध्वनेः अन्तिमे रसस्यापि बोधः भवतु । परन्तु जगन्नाथः स्वविरोधं प्रदर्शयन् कथयति -

"तत्रापि च प्रान्ते रसोऽभिव्यज्यते इति न वाच्यम् । भावध्वनिविलोपप्रसङ्गात्"

यदि भावध्वनिस्थलेषु प्रान्ते अर्थात् भावध्वनिप्रतीत्यनन्तरं रसध्वनिः व्यज्यत इति स्वीक्रियते तर्हि भावध्वनेः उच्छेदः भविष्यतीति रसगङ्गाधरकारस्य चिन्ता । पुनः वादिनः यदि तर्कयन्ति -"भावध्वनिस्थलेषु भावस्य चमत्काराधिक्यत्वात् भावध्वनिः । भवतु नाम परन्तु तत्र रसाभिव्यक्तेः चारुता नास्तीत्यस्मात् कारणात् तत्काव्ये भावध्वनेर्व्यवहारः"। अत्रापि दोषः। "चमत्काररहितरसव्यक्तौ मानाभावात्" - 'शुष्करसः' कथनवत् एषः तर्कः । रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते ।

अस्तु ! यदि पुनः भावध्वनिस्थले परिशेषे रसाभिव्यक्तिर्भवतीति स्वीक्रियते तथापि वादिभिः यल्लक्षणं कृतं तन्न समीचीनम् । यतः देश-काल-वयोऽवस्थादि अनेक पदार्थघटिते काव्यवाक्यार्थे तस्य अतिव्याप्तिर्भवति । कारणं देशकालवयोऽवस्थादियुक्ते काव्यवाक्यार्थे विभावानुभावभिन्नत्वं रसव्यञ्जकत्वं च वर्तेते ।।

केचन पुनः यदि भावस्य लक्षणान्तरमुपक्षिपन्ति यथा - रसाभिव्यञ्जकत्वे सति, चर्वणाविषयीभूतत्वे च सति, चित्तवृत्तित्वमेव भावस्य लक्षणमस्तु, अत्र भावादिचर्वणायामतिव्याप्तिवारणाय चित्तवृत्तेः विशेषणरूपेण चर्वणाशब्दः प्रयुक्तः ।

अत्र जगन्नाथः मतमिदं खण्डयति । यदि एवं भवति तर्हि

कालागुरुद्रवं साहालाहलवद् विजानती नितराम् ।

अपि नीलोत्पलमालां, बाला व्यालावलिं किलामनुते ।।[20]

अत्र नायिकायाः विप्रलम्भः स्फुटः । काव्ये यत् वर्णितं तत् चित्तवृत्त्यन्तर्गतम् । कालागुरुद्रवे विषस्य चिन्तनं ज्ञानस्य विषयः । यदि पूर्वोक्तलक्षणं भावस्य भवति तर्हि कालागुरुद्रवम् इत्यादिषु रसध्वनिस्थलेषु भावः भवेत् । अतः एतदपि न समीचीनम् ।

यदि भावः अखण्डोपाधियुक्तत्वेन स्वीक्रियते तदपि न समीचीनम् । मानाभावात् । तदनन्तरं जगन्नाथः भणति -विभावादिव्यज्यमान-हर्षाद्यन्यतमत्वं तत्त्वम् ।यदाहुः- व्यभिचार्यञ्जितो भावः इति ।।

---

[1]ध्वन्यालोकः, प्रथमोद्योतः,पृष्ठम् 18, गङ्गासागर राय, चौखम्भा संस्कृत भवन, वाराणसी, प्रथम संस्करण,2004.

[2]नाट्यशास्त्रम्, सप्तमाध्यायः,प्रथम भाग, पृष्ठम् 337,रविशंकर नागर, के. एल. जोशी, परिमल पब्लिकेशन्स, दिल्ली,चतुर्थसंस्करण,2012.

[3]काव्यप्रकाशः, चतुर्थोल्लासः, कारिका 35.

[4]उत्पलाचार्यप्रणीतपरमेश्वरस्तोत्रावली,13/17.

[5]शिशुपालवधम्,1/26

[6]काव्यप्रकाशस्य झळकीकरटीकायाम्, पृष्ठम्120, परिमल पब्लिकेशन्स, दिल्ली, प्रथम संस्करण,1917, पुनर्मुद्रित संस्करण,2008.

[7]श्रीधरदासप्रणीतम् सदुक्तिकर्णामृतम्,1423.

[8]महावीरचरितम्,1/46

[9]काव्यप्रकाशस्य झळकीकरटीकायाम्, पृष्ठम्118, परिमल पब्लिकेशन्स, दिल्ली, प्रथम संस्करण,1917, पुनर्मुद्रित संस्करण,2008.

[10]साहित्यदर्पणः, प्रथमपरिच्छेदः,कारिका 3

[11]साहित्यदर्पणः, पृष्ठम् 20, शालिग्राम शास्त्री, मोतीलाल बनारसीदास, दिल्ली, नवम संस्करण,1977.

[12]साहित्यदर्पणः, तृतीयपरिच्छेदः,कारिका 260

[13]कुमारसम्भवम्,3/67

[14]साहित्यदर्पणः, पृष्ठम् 124, शालिग्राम शास्त्री, मोतीलाल बनारसीदास, दिल्ली, नवम संस्करण,1977.

[15]कुमारसम्भवम्,6/84

[16]साहित्यदर्पणः, तृतीयपरिच्छेदः,कारिका 158

[17]साहित्यदर्पणः, तृतीयपरिच्छेदः,कारिका 261

[18]रसगङ्गाधरः, प्रथममाननम्,पृष्ठम् 289, चौखम्भा विद्याभवन, वाराणसी, पुनर्मुद्रित संस्करण,2006.

[19]साहित्यदर्पणः, द्वितीयपरिच्छेदः,कारिका 18

[20]रसगङ्गाधरः, प्रथममाननम्, पृष्ठम् 292, चौखम्भा विद्याभवन, वाराणसी, पुनर्मुद्रित संस्करण,2006.

डॉ. अशोककुमारशतपथी

Dr. Ashok Kumar Satapathy,

Assistant Professor, Department of Sanskrit & Prakrit Languages,
University of Lucknow,Uttar Pradesh, Bhārat (India) 226007.
asatapathy36@gmail.com

***

CC BY

मनुस्मृतौ इन्द्रियसंयमः

- पूजा आचार्य

शोधसारः -

'स्मृति'शब्दस्यार्थः स्मरणम्[1]। वेदे यत्तत्त्वं संकेतरूपेण वर्त्तते स्मृतिस्तस्य विशदीकरणं करोति। भगवता मनुना विरचिता मनुस्मृतिः एकमुल्लेखयोग्यं स्मृतिशास्त्रम्।

इन्द्रियसंयमः नाम किम् ? षड्रिपूणां वर्जनेन एकादशेन्द्रियाणां विधिपूर्वकं नियन्त्रणं विषयान् प्रति एतेषामिन्द्रियाणाम् आसक्तेः त्यागः इति इन्द्रियसंयमः । इन्द्रियाणां सुसंयतव्यवहारमाध्यमेन मनुष्यः जितेन्द्रियः भवति। एतादृशी स्थितिः इन्द्रियाणां परमानन्दमयावस्था भवति। केन प्रकारेण वयमिन्द्रियाणां नियन्त्रणं कर्त्तुं शक्नुमः तदुपायः मनुस्मृतौ स्पष्टरूपेण द्वितीयसप्तमाध्याययोः परिचर्चितोऽस्ति। इन्द्रियसंयमेन मनुष्यस्य निष्ठायाः का पराकाष्ठा अधिगम्यते सैवात्र चर्चाविषयः। इदानीन्तकाले समाजव्यवस्थायै अस्य का उपयोगीता इति पत्रेऽस्मिन् निवेदयिष्यते।

मनसि अपरः एकः प्रश्नः उद्भासते यत् अस्माकं जीवने अस्य इन्द्रियजयस्य प्रयोजनं किम् ? दुःखमयोऽयं संसारः। अस्य दुखस्य निवृत्तेः हेतुः इन्द्रियजयः । मनुसंहितायाः सप्तमाध्याये राजधर्माणां चर्चा वर्त्तते। तत्र पुण्यशीलानां राज्ञामन्यतमं कर्तव्यमिन्द्रियजयः। जितेन्द्रियराजा प्रजाः कुशलतया नियन्त्रयति[2]।

मनुस्मृतौ पूर्वाचार्यैः एकादशेन्द्रियाणि स्वीकृतानि[3]। कार्यस्वरूपतः दशेन्द्रियाणि द्विधा विभज्यन्ते[4]। बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च। यथा- श्रोत्रं त्वक् चक्षुः जिह्वा नासिका इति पञ्च बुद्धीन्द्रियाणि तथा च वाक् पाणिः पादः पायुः उपस्थमिति पञ्च कर्मेन्दियाणि। एकादशमिन्द्रियरूपेण मनः परिचीयते[5]। एतेषामिन्द्रियाणां विषयेभ्यः निर्विरोधः तथा सुसंयतरूपेण तस्य प्रयोगः इन्द्रियजयः । इन्द्रियसंयमे मनसः भूमिका विशेषतया वर्त्तते। मनसः गुणः सङ्कल्पात्मकः। मनः तस्य सङ्कल्पात्मकगुणेन पञ्च ज्ञानकर्मेन्द्रियाणि नियन्त्रयति। अतः मनोजेता सरलतया दशेन्द्रियाणि संवरयति[6]।

---

[1]संस्कारमात्रजन्यं ज्ञानं स्मृतिः ।

[2]इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम्। जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः।। (मनु.7/44)

[3]एकादशेन्द्रियाण्याहुर्यानि पूर्वे मनीषिणः। तानि सम्यक्प्रवक्ष्यामि यथावदनुपूर्वशः।।(मनु.2/89)

[4]बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्वशः। कर्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्ष्यते।।(मनु.2/91)

[5]एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्। (मनु.2/92)

[6]यस्मिञ्जिते जितावेतौ भवतः पञ्चकौ गुणौ।।(मनु.2/92)

कौटिल्यविरचितार्थशास्त्रे प्रथमाधिकरणस्य विनयाधिकरणनाम्नः तृतीयप्रकरणस्य षष्ठाध्याये इन्द्रियजयविषयस्य चर्चा प्राप्यते। कौटिल्यस्याभिमतेन शब्द-स्पर्श-रूप-रस-गन्धेभ्यः भोग्यविषयेभ्यः पञ्चकर्मेन्द्रियाणामविरोधस्य प्रवृत्तिः इन्द्रियजयः[7]।

इन्द्रियाणामस्थिरतायाः कारणं षड्रिपुसमूहः। यथा कामक्रोधलोभमानमदमात्सर्यम्। षड्रिपूणां वर्जनेन इन्द्रियजयः सम्भवः[8]। षड्रिपूणां नियन्त्रणं विनयेन भवति। विद्यया विनयभावः आगच्छति[9]। मनुस्मृतौ भगवता मनुना विनीतराजानामुल्लेख कृतः। सर्वज्ञनारायणस्य मते विनयशब्दस्यार्थः इन्द्रियजयस्योपायः। राजा आत्मसंयमार्थं ब्राह्मणस्य समीपे विनयशिक्षाभ्यासं च करोति। यदि विनीतराजा अरिषड्वर्गेण वशीभूतः न भवति तर्हि कदापि स विनष्टो न भवति[10]। अविनयात् बहवः राजानः विनष्टा भवन्ति। मनुस्मृतौ तथार्थशास्त्रे उदाहरणतया बहूनां राज्ञामुल्लेखोऽस्ति। एतयोः शास्त्रयोः राज्ञां नामसु किञ्चित् सादृशं न दृश्यते। राजा वेनः आत्माभिमानमदगर्वैर्विनाशं प्राप्नोति। नहुषः तथा पेजवनपुत्रः सदा गर्वक्रोधभ्यां, सुमुखो लोभाद्, निमिः हर्षाद्विनाशं प्राप्तवन्तः[11]। इन्द्रियाणां विषयान् प्रति आसक्तिः काम इति । इन्द्रियनिग्रहमाध्यमेन मनुष्यः कामवर्जने सक्षमो भवति। विषयस्य कामना कदापि न संयता भवति। सा पूर्वापेक्षया सर्वदा वर्धते। यथा घृतेनाग्निर्निर्वापो न भवति भूयोऽपि अभिवर्धते[12]। विषयभोगिविषयत्यागिनोः विषयवासनाविहीनजनः प्रशंसनीयो भवति[13]। इन्द्रियः स्वभावतो विषयान् प्रति आकृष्टो भवति। विषयस्य नश्वरज्ञानादिमाध्यमेन तेभ्यो निवृत्तिः सम्भवति[14]।

भोजवंशीयनृपो दाण्डक्यस्तथा विदेहाधिपतिः करालः ब्राह्मणकन्यां प्रति कामनावशीभूतौ भूत्वा स्वबान्धवेन राष्ट्रेण च सह अनश्यः[15]। गर्गसंहितायां दुर्योधनेन एकस्य देवस्य कथामुल्लिखति यः तं परिचालयति[16]। सैव देवः कामः। कामनां प्रति वशीभूतो भूत्वा मनुष्यश्चालितो भवति। विषयस्य चिन्तनादासक्तिः जायते। आसक्तेः कामना जायते। तद्

---

[7]कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेषु अविप्रतिपत्तिरिन्द्रियजयः।(अर्थशास्त्रम्)

[8]कामक्रोधलोभमानहर्षत्यागात् कार्यः। (अर्थशास्त्रम्)

[9]विद्याविनयहेतुरिन्द्रियजयः। (अर्थशास्त्रम्)

[10]तेभ्योऽधिगच्छेद्विनयं विनीतात्मापि नित्यशः। विनीतात्मा हि नृपतिर्न विनश्यति कर्हिचित्।। (मनु.7/39)

[11]वेनो विनष्टोऽविनयान्नहुषश्चैव पार्थिवः। सुदाः पैजावनश्चैव सुमुखो निमिरेव च।। (मनु.7/41)

[12]न जातु कामः कामनामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते।। (मनु.2/94)

[13]यश्चैतान्प्राप्नुयात्सर्वान् यश्चैतान्केवलांस्त्यजेत्। प्रापणात्सर्वकामानां परित्यागो विशिष्यते।।(मनु.2/95)

[14]इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम्। (मनु.2/93)

[15]यथा दाण्डक्यो नाम भोजः कामात् ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश करालश्च वैदेहः। (अर्थशास्त्रम्)

[16]जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः। केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि।।
(गर्ग.अश्वमेधपर्व. 50/36)

कामना यदा प्रतिहतं भवति तदा क्रोधं जायते। क्रोधात् मूढता भवति। मूढतायाः कारणात् स्मृतिभ्रष्टो भवति। स्मृतिभष्टेन बुद्धिनाशो भवति तथा बुद्धिनाशाद् विनाशो भवति[17]। सर्वप्राचीनं दर्शनं सांख्यदर्शनम्। तत्र प्रथमकारिकायां दुःखत्रयस्य विषये चर्चा वर्तते। यथा आध्यात्मिकमाधिभौतिकमाध्यात्मिकञ्च। आध्यात्मिकदुख्यस्य द्विधा भेदः। शारीरं मानसञ्च। एतद् मानसदुःखं कामादिकारणेन सञ्जायते[18]।

क्रोधेन बुद्धिनाशो भवति। अतो मनुष्यः स्वस्य बुद्धेः सदुपयोगं सफलतया कर्तुं न शक्नोति। यथा जनमेजयो ब्राह्मणानां तथा तालजङ्घो भृगोरुपरि कोपवशाद् विनष्टौ जातौ[19]।

लोभात् इलानन्दनः ऐलः (पुरूरवाः) तथा सौवीरराजः अजविन्दुः चतुर्वर्णातिरिक्तं धनमपहृतवन्तौ । अतस्तौ विनष्टौ अभवताम्[20]।

अभिमानवशाद् रावणः परस्त्रीम् अपहृतवान् तथा दुर्योधनो राज्यस्य अंशमात्रमपि पाण्डवेभ्यो न दत्तवान्। अतस्तौ विनष्टौ जातौ[21]।

मदान्नृपो डम्वोद्धवस्तथा हैहयदेशस्याधिपतिः अर्ज्जुनः विनष्टौ भवतः[22]।

हर्षवशाद् वातापिः इत्यासुरः अगस्त्यर्षेरुपरि आक्रमणं कृतवान्। अपि च वृष्णिसंघो द्वैपायनर्षिं बारम्बारमाक्रमणं कृतवान्। तौ विनाशं प्राप्तवन्तौ[23]।

विनयात् पृथुस्तथा मनुः राज्यं लभेते। कुबेरः धनैश्वर्यं प्राप्तवान्। अपि च विश्वामित्रो ब्राह्मणत्वं प्राप्तवान्[24]। अर्थशास्त्रे वर्णितम् अस्ति यज्जामदग्नस्य पुत्रोऽम्बरीषस्तथा नाभागो दीर्घकालं यावत् पृथीव्यां भोगं कृतवन्तौ[25]। मनुसंहितायाः सप्तमाध्याये व्यसनस्य उल्लेखो वर्तते। व्यसनस्यार्थः विषयान् प्रति अत्याधिकमासक्तिः। व्यसनमु- त्पत्त्यानुसारं द्विविधम्। यथा कामजः क्रोधजश्च। कामप्रवृत्तेः जातानि व्यसनानि दश तथा क्रोधात् जातानि व्यसनानि अष्टविधानि[26]। दुरन्तोऽपि व्यसनस्य एकमन्याभिधानम्। मृगया द्यूतक्रीडा दिवानिद्रा परदोषोद्धाटनमथवा परनिन्दा स्त्रीष्वासक्तिः सुरापानं नृत्यगीतवाद्येष्वत्यासक्तिः

17ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायत। सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते।। क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः। स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति।। (गीता.2/62-63)

18मानसं काम- क्रोध-लोभ-मोह-भयेर्ष्या-विषाद-विषयविशेषादर्शननिवन्धनम्। (वाचस्पति मिश्र,सांख्यकारिका.1/1)

19कोपाज्जनमेजयः ब्राह्मणेषु विक्रान्तः,तालङ्घश्च भृगुषु । (अर्थशास्त्रम्)

20लोभादैलश्चातुर्वर्ण्यमत्याहारयमानः, सौवीरश्चाजविन्दुः। (अर्थशास्त्रम्)

21मानात् रावणः परदारानप्रयच्छन्, दुर्योधनो राज्यांशं च। (अर्थशास्त्रम्)

22मदाद् डम्वोद्धवः भूतावमानी, हैहयश्चार्ज्जुनः। (अर्थशास्त्रम्)

23हर्षात् वातापिरगस्त्यमत्यासादन्,वृष्णिसंङ्घश्च द्वैपायनमिति। (अर्थशास्त्रम्)

24पृथुस्तु विनयाद्राज्यं प्राप्तवान् मनुरेव च। कुवेरश्च धनैश्वर्यं ब्राह्मण्यञ्चैव गाधिजः।।(मनु.7.42)

25शत्रुषड्वर्गमुत्सृज्य जामदग्न्यः जितेन्द्रियः। अम्बरीषश्च नाभागो वुभुजाते चिरं महीम्।। (अर्थशास्त्रम्)

26दश कामसमुत्थानि तथाष्टौ क्रोधजानि च। व्यसनानि दुरन्तानि प्रयत्नेन विवर्जयेत्।। (मनु.7/45)

वृथा भ्रमणानि च कामजव्यसनानि यानि शास्त्रनिषिद्धानि[27]। अज्ञातदोषोद्घाटनमथवा कर्णे कथनं दुःसाहसः द्रोहः ईर्ष्या (अन्यस्य गुणासहनभावः) असूया (गुणेषु दोषोद्घाटनम्) अर्थदूषणं वाग्पारुष्यं दण्डपारुष्यं च क्रोधजानि व्यसनानि[28]। एतानि व्यसनानि राजभिर्वर्जनीयानि। कामजव्यसनेनासक्तराजा धर्मार्थाभ्यां विच्युतो भवति तथा क्रोधजव्यसनात् प्राणवियोगोऽपि भवति[29]। स्मृतिशास्त्रविदां मतेन एतद् व्यसनद्वयं लोभाज्जायते[30]।

सुखाद्युपलब्धये विशेषसाधनस्यातिन्द्रियमनसः श्रेष्ठभूमिका वर्तते। मनः श्रोत्रादीन्द्रियाणि स्वविषये प्रवर्तयति। अतो मनसः नियन्त्रनेन इन्द्रियसंयतः सम्भवति। शुक्लयजुर्वेदस्य शिवसङ्कल्पसूक्ते मनोदेवतायाः स्तुतिर्दृश्यते। एष मनोऽज्ञानस्यान्धकारं दूरीभूतं कृत्वा आत्मदर्शनाय मार्गमुन्मोचयति। इन्द्रियाणि बाह्यज्ञानस्य प्रकाशकानि भवन्ति[31]। तन्मनो जनमुपासनायज्ञयोः प्रेरयति। मनः सामान्यज्ञानस्य तथा विशेषज्ञानस्य साधनं तथा धैर्यस्य स्वरूपम्। मनो विना किञ्चिदपि कर्म सफलं न भवति। ऋग् -यजुः-सामानि सर्वज्ञानस्याधारभूतानि। रथनाभौ अरा इव सर्वविधं ज्ञानं मनसि केन्द्रीभूतं भवति[32]।

इन्द्रियेषु मनः श्रेष्ठं भवति । तस्मात् श्रेष्ठा बुद्धिः। बुद्धेर्महत्तत्त्वं श्रेष्ठं भवति । सर्वस्मात् माया श्रेष्ठा भवति[33]। सुसारथिः यथा अश्वान् नियन्त्रयति तथा मनसो नियन्त्रणं कर्तव्यम्[34]। मनुसंहितायां वर्णनं वर्तते यद् रथे आरुह्यमानः सारथिः अश्वसमूहं यथा नियन्त्रयति तथैव विद्वान् चित्ताकर्षकविषयेभ्यः इन्द्रियसमूहं नियन्त्रयति[35]।

कठोपनिषदि श्रेयोमार्गस्य तथा प्रेयोमार्गस्य वर्णना वर्तते। श्रेयो ब्रह्मविषयकपराविद्या। प्रेयः कर्मविषयकापराविद्या। एतयोः द्वयोर्मार्गयोः फलं सन्दर्भेऽस्मिन्नुपलभ्यते। अत्र जीवात्मा देहरूपरथे आरोही एव। बुद्धिरेव तस्य सारथिः।

---

[27]मृगयाऽक्षो दिवा स्वप्नः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाट्या च कामजो दशको गणः।। (मनु.7/47)

[28]पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजं च पारुष्यं क्रोधोजोऽपि गणोऽष्टकः।। (मनु.7/48)

[29]कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः। वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ।। (मनु.7/46)

[30]द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः। तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ।। (मनु.7/49)

[31]यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु।। (शुक्लयजुः. 34/1)

[32]यस्मिन्नृचः साम यजूँषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः। यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ।। (शुक्लयजुः. 34/5)

[33]इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम्। सत्त्वादधि महानात्मा महतोऽव्यक्तमुत्तमम्।। (कठ. 2/3/7)

[34]सुसारथिरश्वानिव यन्मनुष्यान् नेनीयतेऽभीशुभिर्वाजिन इव। हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु।। (शुक्लयजुः. 34/6)

[35]इन्द्रियाणां विचरतां विषयेष्वपहारिषु। संयमे यत्नमातिष्ठेद्विद्वान् यन्तेव वाजिनाम्।। (मनु.7/88)

CC BY

मनस्तस्य प्रग्रहम्[36]। रथस्य अश्वा इन्द्रियरूपेण परिकल्पिताः सन्ति। अत्र शरीरेन्द्रियमनःसंयुक्त आत्मा एव भोक्ता[37]। यदि बुद्धिरविवेकी भूत्वा विक्षिप्तमनसा रथं परिचालयति तर्हि सा हयरूपाणामिन्द्रियाणां नियन्त्रणे असमर्था भवति। परन्तु कुशलबुद्धिसारथिः समाहितमनसा इन्द्रियाश्वान् आयत्ताधीनान् करोति। विवेकसम्पन्ना बुद्धिः सुसारथिरिव संयतमनसा शुचिः भवति तथा स्वस्य लक्ष्यमधिगच्छति[38]।

वेदान्तसारग्रन्थे मनसः नियन्त्रणस्योपायो वर्णितोऽस्ति। षट्सम्पत्तिः माध्यमेन तस्य नियन्त्रणं भवति। अतः प्रश्नो जायते शमादिषट्कसम्पत्तिः का। श्रवण-मनन-निधिध्यासनसंयुक्तं ज्ञानस्यानुकुलमात्मविषयमतिरिच्यान्यविषयेभ्यो मनसो निवृत्तिः शमः[39]। मनो बहिरिन्द्रियाणि परिचालयति। मनसः संवरणेन इन्द्रियाणां रूपरसादिबाह्यविषयेभ्यः संवरणं भवति। अतः शमो नाम मनसः संयमः। अतः परं बाह्येन्द्रियाणां ब्रह्मसाधनानुकुलविषयान् विनान्यविषयेभ्यो निवृत्तिर्दमः[40]। बहिरिन्द्रियाणां चक्षुकर्णादीन्द्रियाणां संयमो दमः। शमदमाभ्यां बहिरिन्द्रियाणां बाह्यविषयेभ्यो नियन्त्रणं कृत्वा ब्रह्मविषये एकाग्रं कर्तुं शक्यते। पूर्वाभ्यासं विस्मृत्य यदेन्द्रियाणि तथा मनो बाह्यविषयान् प्रति आकर्षितं न भवति तदा तत्प्रयत्न उपरतिः। अपि च सन्यासाश्रमे शास्त्रविहितानां कर्माणां विधिपूर्वकं परित्याग उपरतिरिति[41]। बाह्यविषयान् प्रति य उदासीनो भवति तस्य तितिक्षास्तीति वक्तुं शक्यते। यं मानापमानसुखदुःखशीतोष्णप्रेमघृणादयः कोऽपि विषयो प्रभावयितुं न शक्नोतीत्यर्थः[42]। तितिक्षावस्थायां जना अनात्मविषयान् परित्यज्य आत्मविषये मनो निवेशयन्ति। निगृहीतस्य मनसः श्रवणादौ तथा तदुपकारकविषयेषु एकाग्रकरणं समाधानम्[43]। गुरूपदिष्टेषु वेदान्तवाक्येषु विश्वासः श्रद्धा[44]। क्रमानुसारेणैतेषां प्रयत्नानामवलम्बनेनेन्द्रियजयः सम्भवः।

पातञ्जलयोगसूत्रे दुःखस्य पारिभाषिकशब्दरूपेण क्लेशस्य वर्णनोपलभ्यते। अत्र पतञ्जलिः पञ्चक्लेशस्य उल्लेखं करोति। यथा अविद्या अस्मिता रागः द्वेषः अभिनिवेशश्च[45]।

---

[36]आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च। (कठ 1.3.3)

[37]इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।। (कठ 1.3.4)

[38]यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यस्माद्भूयो न जायते।। (कठ 1.3.8)

[39]शमस्तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः। (वेदान्तसारः 13)

[40]दमो बाह्येन्द्रयाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम्। (वेदान्तसारः 13)

[41]निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरणमुपरतिरथवा विहिताणां कर्मणां विधिना परित्यागः। (वेदान्तसारः 13)

[42]तितिक्षा शीतोष्णादिद्वंन्द्वसहिष्णुता। (वेदान्तसारः 13)

[43]निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्। (वेदान्तसारः 13)

[44]गुरूपदिष्टव्दान्तवाक्येषु विश्वासः श्रद्धाः। (वेदान्तसारः 13)

[45]अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्चक्लेशाः। (योग. 2.3)

वस्तुनः मिथ्याज्ञानं विपर्ययः[46]। एकस्य वस्तुनः उपरि अन्यवस्तुन आरोप इत्यर्थः । पञ्चक्लेश एव पञ्चविपर्ययः[47]। अविद्या भ्रमात्मकाज्ञानम्। अविद्या भवति अस्मितादेः क्लेशानां प्रसवभूमिः[48]। अस्मिता भवति मोहेनात्मबुद्धिरथवाहंभाव इति । रागः आसक्तिः। द्वेषः ईर्ष्यापरायणता। अभिनिवेशो मरणाद् भयम्। एतेभ्यः क्लेशेभ्यः सूक्ष्मस्थूला वृत्तयो जागरिता भवन्ति। एते क्लेशाः कामादिप्रवृत्तेर्जाताः[49] येषां विनाशो ध्यानेन सम्भवः[50]। समाधिसाधने क्लेशक्षीणकरणं क्रियायोगस्य च प्रयोजनं भवति[51]। अतः प्रश्नो भवति क्रियायोगः कः। क्रियायोगः तपस्या स्वाध्यायः ईश्वरप्रणिधानञ्च[52]। यदि क्रियायोगः सम्यग्रूपेणानुष्ठितो भवति तर्हि तद् समाधिं प्रति नयति। दग्धबीजं यथा प्रसवक्षमताविच्युतो भवति तथा योगज्ञानाग्निना क्लेशानां दहनं भवति[53]। परन्तु क्लेशानां विनाशो भवति समाधिमाध्यमेन।

समाधिः द्विविधा - सम्प्रज्ञातसमाधिः असम्प्रज्ञातसमाधिः च । विचारः वितर्कः आनन्दः अस्मितानुगतहेतुः सम्प्रज्ञातसमाधिः[54]। अनुशीलात्मकाभ्यासात् पूर्वं चित्तवृत्तिनिरोधस्य साक्षात्-कारणं तथा संस्कारमात्रं यत्रावशिष्टं भवति सः असम्प्रज्ञातसमाधिः[55]। यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः एतानि अष्टाङ्गानि क्रमानुसारं पालनेन असम्प्रज्ञातसमाधेरार्जनं सम्भवति। चित्तवृत्तेर्निरोधो योगः। असम्प्रज्ञातसमाध्यर्थं योगः प्रयोजनम्।

बृहदारण्यकोपनिषदि मैत्रेयी-याज्ञवल्क्ययोः कथोपकथनं वर्णितमस्ति। याज्ञवल्क्यः मैत्रेयीं वदति यत् सर्ववस्तूनां कामाय सर्वं प्रीतियुक्तं न भवति परन्तु आत्मनः कृते सर्वं प्रियं भवति[56]। मनुष्यः सर्वकर्माणि स्वस्य सुखाय करोति। श्रुतिरात्मकामी-पुरुषान् आप्तकामः निष्कामो वेति पदेन प्रशंसति[57]। आत्मदर्शनेन सर्वाणि वस्तूनि ज्ञातानि भवन्ति[58]।

---

[46]विपर्ययो मिथ्याज्ञानमतद्रुपप्रतिष्ठम्। (योग. 1.8)

[47]क्लेशा इति पञ्च विपर्यया इत्यर्थः। (व्यासभाष्यम्, योग. 2.3)

[48]अत्राविद्या क्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनां चतुर्विधविकल्पितानां प्रसूप्ततनुविच्छिन्नोदाराणाम्। (व्यासभाष्यम्, योग. 2.4)

[49]तत्र पुण्यापुण्यकर्माशयः कामलोभमोहक्रोधप्रसवः। (वाचस्पति मिश्र., योग. 2.12)

[50]ध्यानहेयास्तद्वृत्तयः। (योग. 2.11)

[51]समाधिभावनार्थः क्लेशतनूकरणार्थश्च। (योग. 2.2)

[52]तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः। (योग. 2.1)

[53]प्रतनूकृतान् क्लेशान् प्रसंख्यानाग्निना दग्धबीजकल्पान् अप्रसवधर्मिणः करिष्यतीति । (व्यासभाष्यम्, योग. 2.2)

[54]वितर्कविचारानन्दाऽस्मितारूपानुगमात् सम्प्रज्ञातः। (योग. 1.17)

[55]विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः। (योग. 1.18)

[56]न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति। (बृ.उ. 2.4.5)

[57]अथ अकामयमानाः यः अकामः निष्काम आत्मकामः। (बृ उ. 4.4.6)

CC BY

दुःखस्य विनाश इन्द्रियसंयमेन भवति। दुखस्य कारणज्ञानाय मनुष्यः शास्त्राध्ययनं कुर्यात्[59]। विविधशास्त्रे दुःखस्य विविधपरिभाषा वर्तते। परन्तु एक एव उपायरिन्द्रियजयः। इन्द्रियाणां नियन्त्रणसाधनेन षड्-रिपूणामुपरि जयः इन्द्रियजयः। इन्द्रियजयेन मनुष्यो मान-सम्मान-शीतोष्णादीनामुपरि जयं लभते। मनसो भावना मनस्यवधारणं न इन्द्रियजय इति। विषयभोगस्य भावना यदि मनसि न आगच्छति तर्हि तदभ्यास इन्द्रियजय इति। मनसो नियन्त्रणमाध्यमेण इन्दियसंयतिः भवति। अभ्यासस्य वैराग्यस्य च माध्यमेन मनसो नियन्त्रणं सम्भवति[60]। वारंवारं विषयस्य चिन्तनेन मनसि कामक्रोधादयो भावनाः सक्रिया भवन्ति। तस्याचिन्तनमभ्यासः।

सन्दर्भग्रन्थाः

मूलग्रन्थाः

1. अर्थशास्त्रम्, अनिल-चन्द्र-वसु, संस्कृत-बुक्-डिपो, कलिकाता, पुनर्मुद्रण 2011।
2. कठोपनिषद्, स्वामी जुष्टानन्द, उद्बोधन-कार्यालय, कलिकाता, नवम-पुनर्मुद्रण।
3. गीता-प्रबोधनी, स्वामी-रामसुखदास, गोरक्षपुर-गीताप्रेस, कलिकाता, 2013।
4. तर्कसंग्रहः, नारायणचन्द्र गोस्वामी, संस्कृत पुस्तक भाण्डार, कलिकाता, तृतीयसंस्करण।
5. मनुसंहिता, उपेन्द्रनाथ-मुखोपाध्याय-सम्पादित, श्रीसतीशचन्द्र-मुखोपाध्याय-प्रकाशित, वसुमती साहित्य मन्दिर, चतुर्थ
6. संस्करण।
7. पातञ्जल-योगदर्शन, स्वामी-भर्गानन्द-द्वारा-अनूदित, उद्बोधन-कार्यालय, कलिकाता, 2018।
8. वेदान्तसारः,लोकनाथः चक्रवर्ती,पश्चिमवबङ्ग-राज्य-पुस्तक-पर्षत्, कलिकाता।
9. बृहदारण्योपनिषद् (चतुर्थाध्यास्य चतुर्थपञ्चमब्राह्मणम्), झरणा भट्टाचार्य, संस्कृत पुस्तक भाण्डार, कलिकाता,
10. द्वितीयप्रकाश 1999।
11. सांख्यतत्वकौमुदी, नारायणचन्द्र-गोस्वामी, संस्कृत पुस्तक भाण्डार, कलिकाता,तृतीयप्रकाश।

---

[58]आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्। (बृ.उ. 4.5.6)

[59]एवं हि शास्त्रविषयो न जिज्ञास्येत यदि दुःखं नाम जगति न स्यात्, सद्वा न जिहासितम्, जिहासितं वा अशक्यं समुच्छेदम्। (वाचस्पति
मिश्र, सांख्य. 1)

[60]अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते। (गीता. 6.35)

आनुषङ्गिकग्रन्थः

12. Chaubey, Braj Bihari. *The New Vedic Selection*, BharatiyaVidya Prakashan, Baranasi,2013.

पूजा आचार्य

PUJA ACHARYA

विशिष्टाचार्यच्छात्रा, स्नातकोत्तरवेदविभागः

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः, पुरी 752003

VILL – PARULIA, P.O.+P.S. – NARAYANGARH,
DIST- PASCHIM MEDINIPUR,
STATE – WEST BENGAL, PIN- 721437,
acharyapuja90@gmail.com

***

CC BY

याज्ञवल्क्योक्तः (प्रदेशस्य) सीमाविवादः

- शि.त्यागराजः

शोधसारः -

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ (याज्ञवल्क्यस्मृतिः १.३)

इति याज्ञवल्क्योक्तरीत्या पुराणानि, तर्कविद्या, मीमांसा, मन्वादिप्रोक्तानि धर्मशास्त्राणि, वेदाङ्गानि षडिति एभिः उपेताः चत्वारो वेदाः इति आहत्य धर्मज्ञानावाप्तये चतुर्दश हेतवः वर्तन्ते। तदर्थस्तु पुरुषार्थसाधनोपाया इमे इति। एतेषु सर्वदा सर्वत्र उपकारं कुर्वन्ति धर्मशास्त्रग्रन्थाः। मनुरारभ्य नैके महर्षयः वेदनिहितान् धर्मोपदेशान् सुष्ठु अवगम्य कदाचित् पद्यरूपेण, कदाचित् सूत्ररूपेण, कदाचिच्च वाक्यरूपेण अस्मभ्यं शास्त्रग्रन्थत्वेन ददुः। त एव ग्रन्थाः मनुस्मृत्यादिनामभिः गीयन्ते। तेषु अन्यतमोऽयं स्मृतिग्रन्थः याज्ञवल्क्यस्य। अत्र पूर्वोक्तरीत्या नैके धर्मोपदेशाः वर्तन्ते। तत्रापि विशिष्य राजधर्मप्रकरणे सीमाविवादविषये महर्षिणा नैके विचाराः प्रतिपादिताः। अद्यत्वे विश्वे बहुषु देशेषु अस्मिन्नेव विचारे महान् विवादः जायते। परं पश्यन्तु तदात्व एव महर्षिः याज्ञवल्क्यः सीमानिर्णयविषये जायमानानां समस्यानां समाधानानि, कथं ग्रामस्य देशस्य वा सीम्नः निर्णयं कुर्याद्राजा, चिह्नरहितेषु स्थलेषु कथं वा सीम्नः निर्णयः कर्तव्य इत्येतेषु विषयेषु नैकानि प्रमाणानि प्रदर्श्य सीमाविवादविषये अस्मान् सम्यगबोधत्। यद्यपि क्वचित् ग्रामद्वयसंबन्धिनः सीम्नः विषये महर्षिः विचारं प्रत्यपादयत्तथाऽपि तमेवांशं स्वीकृत्य देशद्वयसंबन्धिनः सीम्नः विषयेऽपि निर्णयं स्वीकर्तुं शक्यते इत्येव भाति। तत्र कारणं व्याख्यातॄणां वचनानि। तद्यथा आदौ -

सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः।
गोपाः सीमाकृपाणाः ये सर्वे च वनगोचराः॥
नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमैः।
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिताम्॥

(याज्ञवल्क्यस्मृतिः, सीमाविवादप्रकरणम् (९) १-२ श्लोकौ)

इति। पद्यार्थः - ग्रामद्वयसंबन्धिनः क्षेत्रद्वयसंबन्धिनः जनपदद्वयसंबन्धिनः वा सीम्नः विवादे सामन्ताः (समन्ताद्भवाः), वृद्धाः, गोपालकाः, सीमाकृपाणाः, व्याधादयश्च सीमानं नयेयुः इति। निष्कृष्टार्थस्तु - एतैः निर्दिष्टस्थलं यावदाप्तरूपेण स्वीकृत्य सीम्नः निर्णयं कुर्यात्। किञ्च एभिः सामन्तादिभिः प्रदर्शितैः स्थलादिप्रकाशाप्रकाशरूपैः लिङ्गैः नृपः सीम्नः निर्णयं कुर्यात्। आभ्यां पद्याभ्यां सीमा-विवादविषये विचारं प्रस्तौति महर्षिः। अत्र व्याख्यावेलायां विज्ञानेश्वराचार्यः स्वीयमिताक्षराख्यायां टीकायां सीमा क्षेत्रादिमर्यादा, सा चतुर्विधा इत्युक्त्वा जनपदसीमा, ग्रामसीमा, क्षेत्रसीमा, गृहसीमा इति चतुर्विधमपि निर्दिशति। अनेन ज्ञायते यत् सूक्ष्मात् स्थूलं प्रति इत्येनं सिद्धान्तम् आधारीकृत्य ग्रामयोः, जनपदयोः, देशयोः वा सीमाविवादविषये निर्णयः महर्षिप्रोक्तप्रकारेण सुष्ठु कर्तुं शक्य इति। एवं चिह्नरहितेषु

स्थलेष्वपि कथं सीम्नः निर्णयं कुर्यादित्यपि प्रोवाच। सर्वेऽपि ते विचाराः विस्तृतरूपेण शोधपत्रे निरूपिताः।।

उपोद्घातः

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥[1]

इति याज्ञवल्क्योक्तरीत्या पुराणानि, तर्कविद्या, मीमांसा, मन्वादिप्रोक्तानि धर्मशास्त्राणि, वेदाङ्गानि षडिति एभिः उपेताः चत्वारो वेदाः इति आहत्य धर्मज्ञानावाप्तये चतुर्दश हेतवः वर्तन्ते। तदर्थस्तु पुरुषार्थसाधनोपाया इमे इति। एतेषु सर्वदा सर्वत्र उपकारं कुर्वन्ति धर्मशास्त्रग्रन्थाः। मनुरारभ्य नैके महर्षयः वेदनिहितान् धर्मोपदेशान् सुष्ठु अवगम्य कदाचित् पद्यरूपेण, कदाचित् सूत्ररूपेण, कदाचिच्च वाक्यरूपेण अस्मभ्यं शास्त्रग्रन्थत्वेन ददुः। त एव ग्रन्थाः मनुस्मृत्यादिनामभिः गीयन्ते। तेषु अन्यतमोऽयं स्मृतिग्रन्थः याज्ञवल्क्यस्य। अत्र पूर्वोक्तरीत्या नैके धर्मोपदेशाः वर्तन्ते। तत्रापि विशिष्य व्यवहाराध्याये सीमाविवादविषये महर्षिणा नैके विचाराः प्रतिपादिताः। अद्यत्वे विश्वे बहुषु देशेषु अस्मिन्नेव विचारे महान् विवादः जायते। परं पश्यन्तु तदात्व एव महर्षिः याज्ञवल्क्यः सीमानिर्णयविषये जायमानानां समस्यानां समाधानानि, कथं ग्रामस्य देशस्य वा सीम्नः निर्णयं कुर्याद्राजा, चिह्नरहितेषु स्थलेषु कथं वा सीम्नः निर्णयः कर्तव्य इत्येतेषु विषयेषु नैकानि प्रमाणानि प्रदर्श्य सीमाविवादविषये अस्मान् सम्यगबोधत्। यद्यपि क्वचित् ग्रामद्वयसंबन्धिनः सीम्नः विषये महर्षिः विचारं प्रत्यपादयत्तथाऽपि तमेवांशं स्वीकृत्य देशद्वयसंबन्धिनः सीम्नः विषयेऽपि निर्णयं स्वीकर्तुं शक्यते इत्येव भाति।

विषयविस्तारः

याज्ञवल्क्यमहर्षिः स्वीयसंहितायां व्यवहाराध्याये सीमाविवादप्रकरणम् इति पृथगध्याये सीमायाः विषये नैकान् विषयान् प्रत्यपादयत्। तदर्थः प्रकरणेऽस्मिन् सीमाविवादनिर्णयः, सीमाविवादनिर्णये साधनानि, सीमायाश्चातुर्विध्यम्, सीमालिङ्गानि, ज्ञातृचिह्नाभावे निर्णयप्रकार इत्यनेके विषयाः पूर्ववर्तिनां महर्षिणाम् अभिप्रायानुसारं सुष्ठु प्रतिपादिताः वर्तन्ते इति।

---

[1] याज्ञवल्क्यस्मृतिः १.३

CC BY

अ.सीमाविवादे निर्णयः

महर्षिणां वचनानुगुणं सीमायां षोढा विवादः सम्भवेत्।

(१) आधिक्ये (२) न्यूनतायाम् (३) अंशे (४) अस्तिनास्तित्वे (५) अभोगभुक्तौ (६) इयं मर्यादा वा इयं वा

इत्येवंप्रकारेण षोढा विवादः जायेत। एवं विवादे सञ्जाते -

सीम्नो विवादे क्षेत्रस्य सामन्ताः स्थविरादयः।
गोपाः सीमाकृपाणाः ये सर्वे च वनगोचराः॥
नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमैः।
सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिताम्॥[2]

इत्याभ्यां पद्याभ्याम् आदौ सीमाविवादनिर्णयविषये प्रत्यपादयत्। पद्यार्थः - ग्रामद्वयसंबन्धिनः क्षेत्रद्वयसंबन्धिनः जनपदद्वयसंबन्धिनः वा सीम्नः विवादे सामन्ताः, वृद्धाः, गोपालकाः, सीमाकृपाणाः, व्याधादयश्च सीमानं निश्चिनुयुरिति। सामान्ताः के इति पृष्टे - समन्ताद्भवाः सामन्ताः इति सामान्योत्तरम्। किञ्चिन्निष्कृष्टतया वक्तव्यं चेत् कात्यायनाचार्याणां वचनानि स्मर्तव्यानि भवन्ति। यथा -

ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम्।
गृहं गृहस्य निर्दिष्टं समन्तात्परिरभ्य च।।[3] इति।

एवञ्च चतसृषु दिक्षु यः ग्रामः परिवृतः वेष्टयित्वा स्थितः स ग्रामस्य सामन्तः। तथा च सामन्ताः, वृद्धाः, गोचारकाः, सीमासन्निहितक्षेत्रकर्षकाः, वनचारिण इति एतैः प्रदर्शितैः प्रकाशाप्रकाशरूपैः लिङ्गैः राजा सीमानिर्णयं कुर्यात्। कानि प्रकाशरूपाणि लिङ्गानि, कानि च अप्रकाशरूपाणि लिङ्गानि इति पृष्टे - सीमावृक्षादयः प्रकाशरूपाणि, भस्मादीनि अप्रकाशानि। अस्मिन् प्रसङ्गे मन्वाचार्याणां वचनानि स्मरणीयानि।

अश्मनोऽस्थीनि गोबालांस्तथा भस्म कपालिकाः।
करीषमिष्टकाङ्गारान् शर्करा वालुकास्तथा।।
यानि चैवंप्रकाराणि कालाद् भूमिर्न भक्षयेत्।
तानि सन्धिषु सीमाया अप्रकाशानि कारयेत्।।[4] इति।।

आ.सीमाभेदः

क्षेत्रादिमर्यादा इति गीयामाना सीमा चतुर्विधा भवति।

अ. जनपदसीमा
आ. ग्रामसीमा
इ. क्षेत्रसीमा
ई. गृहसीमा इति।

---

[2] याज्ञवल्क्यस्मृतिः, सीमाविवादप्रकरणम् (९), १-२ श्लोकौ

[3] कात्यायनस्मृतिः, सीमाविवादः, श्लोकसंख्या ७३६

[4] मनुस्मृतिः ८.२५०-२५१

इयमेव सीमा पुनः पञ्चलक्षणा भवति। ताश्च ध्वजिनी, मत्स्यिनी, नैधानी, भयवर्जिता तथा राजशासननीता इति। वृक्षादीनां प्रकाशत्वेन ध्वजतुल्यत्वात् वृक्षादिलक्षिता ध्वजिनी इति कथ्यते। मत्स्यशब्देन स्वाधारजलं लक्ष्यते। तथा च सलिलवती सीमा मत्स्यिनी इत्यभिधीयते। निखाततुषाङ्गारादीनां निखातत्वेन निधानतुल्यत्वात् तद्वती नैधानी इति कथ्यते। अर्थिप्रत्यर्थिनोः परस्परसम्प्रतिपत्त्या निर्मिता भयवर्जिता इत्युच्यते। ज्ञातृचिह्नाभावे राजेच्छया निर्मिता सीमा राजशासननीता इति दीयते।।

इ. चिह्नरहितावस्थायां सीमानिर्णयप्रकारः

यदि पूर्वोक्तानि चिह्नानि न सन्ति, यदि वा विद्यमानानि अपि चिह्नानि लिङ्गालिङ्गतया संशययुक्तानि भवन्ति तस्याम् अवस्थायां कथं वा सीमानिर्णयः कर्तव्य इत्यपि प्रत्यपादयत्। तद्यथा -

सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशाऽपि वा।
रक्तस्रग्वसनाः सीमां नयेयुः क्षितिधारिणः।।[5] इति।

चिह्नरहितावस्थायां सामन्ताः (समन्ताद्भवाः), समग्रामाः, रक्तस्रग्विनश्च सीमां प्रदर्शयेयुः। समग्रामा इत्यनेन समसंख्याकाः प्रत्यासन्नग्रामीणाः ग्राह्याः। ते च चत्वारः, अष्टौ, दश इति समसंख्यायामेव स्युः। रक्तस्रग्वसना इत्यनेन रक्तमाल्यवस्त्रवन्तः निर्दिष्टाः। एते चिह्नरहितायामवस्थायां सीमानं प्रदर्शयेयुः। प्रसङ्गेऽस्मिन् मन्वाचार्याणां वचनमपि स्मर्तव्यम्। तद्यथा -

साक्ष्यभावे च चत्वारो ग्रामाः सीमान्तवासिनः।
सीमाविनिर्णयं कुर्युः प्रयता राजसन्निधौ।।[6] इति

तथा च चिह्नरहितावस्थायां सीमानिर्णये एते सामन्तादय एव साक्षिणः भवन्ति। राज्ञा पृष्टाः एते सामन्तादयः ऐकमत्येन समस्ताः सीमां निर्णयेयुः। तैः निर्णीतां सीमाम् अर्थात् तैः प्रदर्शितसकललिङ्गयुक्तां साक्ष्यादिनामान्विताञ्च अविस्मरणार्थं पत्रे समारोपयेत् राजा। किञ्च यदा पुनः समन्तप्रभृतयः साक्षिणः न सन्ति, चिह्नान्यपि न सन्ति तदा **अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्तिता**[7] इत्युक्तरीत्या सामन्तादीनां वा वृक्षादीनां लिङ्गानां वा अभावे राजैव सीमायाः धर्मविद्भवति। तदर्थः स एव सीमायाः निर्णयं कुर्यादिति।

ई. सीमातिक्रमणे दण्डविधिः

---

[5] याज्ञवल्क्यस्मृतिः, सीमाविवादप्रकरणम् (९) श्लोकसंख्या ३

[6] मनुस्मृतिः ८.२५८

[7] याज्ञवल्क्यस्मृतिः, सीमाविवादप्रकरणम् (९) श्लोकसंख्या ४

यद्यपि अस्मिन् प्रसङ्गे आचार्येण सीमामतिक्रम्य परकीयक्षेत्रस्य हरणविषये विचारः उपस्थापितः तथाऽपि पूर्वोक्तरीत्या एनमंशं मनसि निधाय एनमेव दण्डविधिं यथायोग्यं ग्रामादिसीमातिक्रमणेऽपि कर्तुं शक्यते।

मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा।
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः।।[8]

इत्येवं क्षेत्रादिव्यवच्छेदिकायाः भूमेः (सीमायाः) अतिक्रमणे अर्थात् तस्याः बहिः कर्षणे यथाक्रमम् अधममध्यमोत्तमाः दण्डाः कार्याः। कीदृशः दण्ड देय इत्यत्र मन्वादीनि शास्त्राणि प्रमाणानि। यदा स्वीयभ्रान्त्या परकीयक्षेत्रम् (गृहादिकम्) अपहरति तदा द्विशतो दमः दण्डरूपेण वेदितव्यः। यदा सर्वमपि अपहरति तदा उत्तमः दण्डः प्रयोक्तव्यः। कोऽयम् उत्तमदण्ड इति चेत् -

वधः सर्वस्वहरणं पुरान्निर्वासनाङ्कने।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः।।[9]

इत्युक्तरीत्या पुराद्बहिः प्रेषणम्, अङ्गच्छेद इत्येवं सर्वतो वधोऽपि अपराधानुगुणं विधेयः।।

उपसंहारः

अद्यत्वे इव पुरा देशयोः मध्ये सीमाविवादः तथा प्रचुरतया नासीत्। किन्तु विरल आसीदित्यस्मात् कारणात् बहुषु धर्मशास्त्रग्रन्थेषु प्रायः ग्रामद्वयसंबन्धिन्याः सीमायाः, क्षेत्रद्वयसंबन्धिन्याः सीमायाः, गृहद्वयसंबन्धिन्याः सीमाया विषये एव विचारः प्रस्तुतः वर्तते। अत्रापि याज्ञवल्क्यस्मृतौ पूर्वोक्तविषयान् अतिरिच्य क्षेत्रविषये, सेतुकूपादिविषये किञ्चित्प्रतिपादितं वर्तते। तथाऽपि स्वीकृतम् उद्देश्यं मनसि निधाय आधुनिके यस्मिन् विषये अर्थात् सीमानिर्णयविषये देशयोः मध्ये विवादः जायते तस्मिन् विषये निर्णयं कर्तुम् याज्ञवल्क्यादिभिः महर्षिभिः प्रोक्तान् इमान् उपयान् आधारत्वेन स्वीकृत्य तत्र आधुनिके यानि परिवर्तनानि अपेक्षितानि तानि यथायोग्यं यथाधर्मञ्च विधाय तानि समाधानानि उपयोक्तव्यानि। यद्यपि अस्मद्ग्रन्थेषु क्वचिदेव परिवर्तनानि अपेक्षितानि तथाऽपि इदं सुदृढं वक्तुं शक्नुमः यदस्माकं धर्मशास्त्रग्रन्थाः बहुषु जीवनोपयोगिविषयेषु वास्तविकं तत्त्वं ज्ञातुं, समस्यानां समाधानञ्च अन्वेष्टुं नितरां साहाय्यं विधास्यन्ति इति शम्।।

***

---

[8] याज्ञवल्क्यस्मृतिः, सीमाविवादप्रकरणम् (९) श्लोकसंख्या ६

[9] याज्ञवल्क्यस्मृतिः, सीमाविवादप्रकरणम् (९) श्लोकसंख्या ६ (व्याख्या)

उपयुक्तग्रन्थसूची

1. याज्ञवल्क्यस्मृतिः, महर्षिः याज्ञवल्क्यः, विज्ञानेश्वरस्य मिताक्षराख्यया व्याख्यया उपेता, जगन्नाथ रघुनाथ घारपुरे इत्येभिः संशोधिता, The collections of Hindu Law Texts, Girgaum, Bombay, 1914.
2. याज्ञवल्क्यस्मृतिः, महर्षिः याज्ञवल्क्यः, मित्रमिश्रस्य वीरमित्रोदयाख्यया तथा विज्ञानेश्वरस्य मिताक्षराख्यया व्याख्यया उपेता, पण्डित नारायणशास्त्री इत्येभिः संशोधिता, चौखम्बा सीरीज आफीस, वाराणसी, १९३०.
3. मनुस्मृतिः, आचार्यः मनुः, श्रीमत्कुल्लूकभट्टविरचितया मन्वर्थमुक्तावल्यख्यया व्याख्यया समेता, विट्ठलशर्मणा संशोधिता, निर्णयसागरमुद्रणालयः, मुम्बई, १८८७.
4. कात्यायनस्मृतिः, महर्षिः कात्यायनः, पी.वि.काने महाशयानाम् टिप्पणीसहिता, ओरियन्टल् बुक् एजन्सी, १८९५.

डॉ. शि.त्यागराजः

Dr.Thiagarajan S

Assistant Professor,

Department of Oriental studies and Research,

SASTRA Deemed University, Thanjavur, Tamilnadu

shiva.thiyaga@gmail.com

***

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

रस तथा कविसमय में वर्ण-निर्धारण का औचित्य

- रेखा अग्रवाल

शोधसार -

आचार्य भरत ने 'दृश्यकाव्य' की विवेचना के सन्दर्भ में 'नाट्य रस' का विवेचन किया था जो कालान्तर में काव्यशास्त्र का प्रमुख विचारणीय विषय बन गया। विभाव–अनुभाव-संचारी भावों से सम्पन्न स्थायी भावों का आस्वादन करते हुए सहृदयरंजन रस का आनन्द लेते हैं।

प्राचीन आचार्यों ने रस के वर्ण और देवता निरूपित किये हैं, सम्भवतः इसी आधार पर अमूर्त भावों तथा पदार्थों यथा – यश का रूप शुक्ल, अपयश का कृष्ण, प्रताप का रक्तोष्ण इत्यादि के वर्ण–निर्धारण ने कविसमय में भी स्थान प्राप्त कर लिया। काव्यशास्त्रीय परम्परा में 'कविसमय' एक पारिभाषिक शब्द है जिसका सामान्य अर्थ है - कवियों का आचार या सिद्धान्त। कविसमय की परम्परा भी अत्यन्त प्राचीन है। शास्त्र के सिद्धान्त व्यवस्थित होने लगे उससे बहुत पहले से ही 'कविसमय' सहृदयों और काव्यपारखियों के बीच काव्य के प्रचलित मानदण्डों के रूप में जाना जाने लगा था।

आचार्यों का रस तथा कवियमय के वर्ण–निर्धारण में क्या दृष्टिकोण रहा होगा? उनके द्वारा रस, भाव आदि अमूर्त पदार्थों का वर्ण-निर्धारण किस आधार पर तथा किस भावना से किया गया होगा? इन्हीं सब बिन्दुओं का विश्लेषण तथा विवेचन शोधात्मक दृष्टिकोण से प्रस्तुत शोध-पत्र में करने का प्रयास किया गया है।

कुंजी शब्द - नाट्यशास्त्र, रस, रस के वर्ण, कविसमय, शृंगार, वीर, यश, अपयश, वर्ण-निर्धारण।

रस तथा कविसमयगत भावों के वर्ण-निर्धारण का औचित्य देखने से पूर्व संक्षेप में रस तथा कविसमय को जान लेना आवश्यक है।

रस – 'रस' शब्द रस् धातु से अच् प्रत्यय जोड़ने पर बनता है। जिसका सामान्य अर्थ है – आनन्द देने वाली वस्तु से प्राप्त होने वाला सुख या स्वाद। इसकी व्युत्पत्ति ‘रस्यते आस्वाद्यते इति रसः' के रूप में की गई है। जिसका अर्थ है जो आस्वादित किया जाये अथवा जिसका आस्वाद लिया जाये वही रस है।

रस सदैव व्यंग्य रूप होता है, यह रस का स्वरूपगत वैशिष्ट्य है। रस वाच्य की सामर्थ्य से आक्षिप्त अवश्य होता है परन्तु वह साक्षात् शब्द व्यापार का विषय नहीं होता। जिस प्रकार नाना पदार्थों से तैयार किये हुए व्यंजन से रस की प्राप्ति होती है। उसी प्रकार विभाव, अनुभाव, संचारी भावों से सम्पन्न स्थायी भावों का आस्वादन करते हुए सहृदयरंजन रस का आनन्द लेते हैं।[1] प्रथम आस्वाद की प्रक्रिया स्थूल है और दूसरे की सूक्ष्म।

कविसमय – काव्यशास्त्रीय परम्परा में 'कविसमय' एक पारिभाषिक शब्द है जिसका सामान्य अर्थ है "कवियों का आचार या सिद्धान्त।" काव्यशास्त्र में तो कविसमय एक विशिष्ट अर्थ रखता है जिसका तात्पर्य बोध कवियों की प्रचलित परम्परा के रूप में किया जाता है। कविसमय को परिभाषित करते हुए राजशेखर ने कहा है "अशास्त्रीयमलौकिकं च परम्परायातं यमर्थमुपनिबध्नन्ति कवयः स कविसमयः ।[2]

अर्थात् अशास्त्रीय, अलौकिक तथा केवल परम्परा से प्रचलित जिस अर्थ का कविजन उल्लेख करते हैं वह कविसमय है। कवि के स्वातंत्र्य को स्वीकार करने पर ही ‘कविसमय' की धारणा आकार लेती है, जिसकी मूल भावना यही है कि कवि को उसी की दृष्टि, प्रतिभा और सन्दर्भो के बीच समझा जाये न कि व्यक्तिगत सिद्धान्तों और आग्रहों का उस पर आरोप करते हुए।

[1] विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः । – ना.शा., 6/ पृ.सं.-228

[2] काव्यमीमांसा, अध्याय-14

CC BY

काव्यशास्त्री परम्परा में रस - सिद्धांत के वर्णन प्रसंग में रसों के वर्ण का निर्धारण किया गया है। इसी प्रकार कविसमय में भी आचार्यों को अमूर्त भावों तथा पदार्थों का वर्ण–निर्धारण करते हुए देखा सकता हैं।[3]

रस तथा कविसमय में वर्ण-निर्धारण -

प्राचीन आचार्यों ने रसों के वर्ण और देवता निरूपित किये हैं। समस्त चराचर जगत् त्रिगुणात्मक है, सांख्यदर्शन में इसका विशेष रूप से प्रतिपादन किया गया हैं।[4] मनस् भी त्रिगुणात्मक प्रकृति से प्रोद्भूत होने के कारण त्रिगुणात्मक है और तदनुसार प्रकृति भी त्रिगुण विकारों से युक्त है अर्थात् वह सात्विक राजस और तामस है। साहित्याचार्यों ने रसों को भी इन गुणों से उत्पन्न मनोविकारों से युक्त देखा और उनके अलग-अलग अधिदेवता का त्रिगुणों में से किसी एक की प्रधानता अथवा मिश्रण के अनुसार वर्णन किया है। यद्यपि काव्य के रस अमूर्त हैं इसलिए रसायन शास्त्र के द्रव्यों की तरह वर्ण आदि की दृष्टि से अवलोकित नहीं किए जा सकते, फिर भी आचार्यों ने अपने संस्कारी दृष्टिकोण से रसों का वर्ण निरूपण किया है।

भरतमुनि ने चार रस प्रधान माने हैं – शृंगार, रौद्र, वीर, वीभत्स और इनसे उत्पन्न ये चार रस हैं – हास्य, करुण, अद्भुत, भयानक।[5] इन्हीं आठ रसों के वर्ण तथा देवता का निरूपण भी भरतमुनि ने किया है।[6]

	रस	वर्ण	अधिदेवता
1.	शृंगार	श्याम	विष्णु
2.	हास्य	श्वेत/सित	प्रमथगण
3.	करुण	कपोत	यम
4.	रौद्र	रक्त	रुद्र

3 काव्यमीमांसा, अध्याय-14-16

4 सत्त्वादीनामेतद्धर्मत्वं तद्रूपत्वात् । – सांख्यसूत्र, 6/38

5 श्यामो भवति शृंगार: सितो हास्यः प्रकीर्तितः ।
कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः ।।
गौरो वीरस्तु विज्ञेयः कृष्णश्चैव भयानकः ।
नीलवर्णस्तु वीभत्सः पीतश्चैवाद्भुतः स्मृतः ।। – ना.शा., 6/43-44

6 श्रृंगारो विष्णुदैवत्यः .... ब्रह्मदैवतः।। – ना.शा., 6/45-46

5.	वीर	गौर	महेन्द्र
6.	भयानक	कृष्ण	कालदेव
7.	वीभत्स	नील	महाकाल
8.	अद्भुत	पीत	ब्रह्म

सम्भवतः इसी आधार पर अमूर्त भावों तथा पदाथों के वर्ण-निर्धारण ने कविसमय में भी स्थान प्राप्त कर लिया।[7] यथा -

1) यश, कीर्ति, हास तथा पुण्य का वर्ण शुक्ल/धवल मानना।

2) अपयश तथा पाप को कृष्ण/मलिन वर्ण का मानना।

3) क्रोध तथा अनुराग को रक्त (लाल) वर्ण का मानना।

4) प्रताप को रक्तोष्ण मानना।

नाट्यशास्त्र में भरतमुनि ने वर्ण या रंगों का बड़ा वैज्ञानिक वर्णन किया है। उनके मत के अनुसार मूलरूप में प्रधान या स्वाभाविक वर्ण चार हैं - 1. सित/उज्ज्वल 2. पीत 3. नील 4. रक्त। इन चार वर्णों मिश्रण से अन्य अनेक वर्णों का विधान किया गया है -

1.	सित + नील	=	कपोत वर्ण
2.	सित + लाल	=	पाटल/गुलाबी वर्ण
3.	सित + नील	=	कपोत वर्ण
4.	पीत + नील	=	हरा/हरित वर्ण
5.	नील + लाल	=	कषाय वर्ण
6.	पीत + लाल	=	गौर वर्ण

इनके अतिरिक्त भी दो या दो से अधिक वर्णों के मिश्रण से अनेक रंग (वर्ण) बनाये जा सकते हैं।[8]

रंगों के मानसिक प्रभाव होते हैं जिनका मानवीय भावनाओं से सम्बन्ध होता है और वर्ण उनको उद्वेलित करने की शक्ति रखते हैं। इस प्रकार रंग में वह गुप्त उर्जा (Energy) होती है, जो एक अनन्त गतिशीलता प्रदान करती है।[9]

आचार्य परम्परा ने अमूर्त भावों और रसों को मूर्तरूप में रूपायित करने के लिए

---

[7] असतो गुणस्य निबन्धनं, यथा – यशोहासप्रभृतेः शौक्ल्यम्, अयशसः पापप्रभृतेश्च कार्ष्णम्, क्रोधानुरागप्रभृतेश्च रक्ततत्वम् । – काव्यमीमांसा, अध्याय-15

[8] नाट्यशास्त्रम्, 23/75-80

[9] रूपप्रदकला के मूलाधार, पृ.सं.-20

CC BY

विविध वर्णों का आश्रय लिया है। जिनके पीछे मनोवैज्ञानिक तथा सांस्कृतिक कारण विद्यमान रहे हैं। इनको समझने के लिए प्रत्येक रस तथा भाव के वर्ण निर्धारण को विस्तार से जानने का प्रयास करते हैं।

1) शृंगार का वर्ण श्याम तथा अनुराग को लाल बताना -

इस परम्परा में शृंगार का वर्ण श्याम माना गया है और कविसमय में अनुराग को लाल वर्ण का माना गया है। कालिदास ने इन्दुमती द्वारा अज के गले में डाली गई स्वयंवर माला में लगी रोली को साक्षात् अनुराग के रूप में उपमित किया है -

सा चूर्णगोरं रघुनन्दनस्य धात्रीकराभ्यां करभोपमोरूः।
आसज्जयामास यथाप्रदेशं कण्ठे गुणं मूर्त्तमिवानुरागम् ।।[10]

शृंगार में एक-दूसरे के प्रति अनुराग होना आवश्यक है। शृंगार के स्थायी भाव रति का अमरबीज प्रेम है – यही रति का सर्वस्व है। प्रेम का तात्पर्य है एक विशिष्ट भाव-बंधन। यही प्रेम क्रमश: स्नेह, मान, प्रणय, राग, अनुराग और भावरूपों में परिणत होता चलता है।[11]

अनुराग राग की विकासावस्था है, जब अनुराग बढ़ते–बढ़ते यावदाश्रयवृत्ति हो जाता है और स्वसंवेद्य चमरावस्था को प्राप्त होकर प्रकाशित होता है, तब उसे भाव कहते हैं।[12] राजा दुष्यन्त के शकुन्तला में प्रेम-रंजित हृदय की स्थिति को अनुराग द्वारा प्रकट करते हुए कालिदास ने कहा है -

"कण्टकितेन प्रथयति मय्यनुरागं कपोलेन।"[13] अर्थात् अपने रोमांचित कपोल द्वारा मुझ पर अनुराग प्रकट कर रही है।

अनुराग की महाभावदशा शृंगार है। नायक-नायिका की उभयनिष्ठ रति असाधारण सुख को उत्पन्न करती है, जो सत्त्वगुण से उद्भुत है इसीलिए सत्त्वगुण के अधिष्ठाता विष्णु को इसका देवता माना गया है। विष्णु के श्यामवर्ण के आधार पर शृंगार का श्याम वर्ण उचित प्रतीत होता है।

आचार्य भरत के वर्ण–निर्धारण का दृष्टिकोण तो इससे भी अधिक सूक्ष्म था। 'श्याम' शब्द 'श्यैङ् गतौ' धातु से 'मक्' प्रत्यय करने पर बनता है। जिसकी व्युत्पत्ति 'श्यायते मनो

---

10 रघुवंशम्, 6/83

11 स्यात् – दृढेयं रतिः प्रेमा प्रोद्यन्स्नेहः क्रमादयम् ।
स्यान्मानः प्रणयो रागोऽनुरागो भाव इत्यपि ।। – उज्ज्वलनीलमणि:, पृ.सं.-416

12 अनुरागं स्वसंवेद्यदशां प्राप्य प्रकाशितः ।
यावदाश्रयवृत्तिश्चेद् भाव इत्यभिधीयते।। – उज्ज्वलनीलमणि:, पृ.सं.-459

13 अभिज्ञानशाकुन्तलम्, 3/12

यस्यात्' की गई है।[14] जिससे 'मन की गतिशीलता' यह अर्थ प्राप्त होता है। शृंगार में मन, प्रेम-स्नेह-मान-प्रणय-राग अनुराग में उत्तरोत्तर गतिशील रहता है।

शृंगार आकर्षक एवं हृद्य होने के कारण श्याम वर्ण तो है ही उसके भीतर जीवन की मूलचेतना काम की दीप्ति के दर्शन भी होते हैं जो मानव के शरीर, मन, बुद्धि में प्रतिष्ठित हैं एवं जिसका विराट एवं पारमार्थिक रूप शृंगार रस में उदित होता है।

इस प्रकार शृंगार की प्रारम्भिक अवस्था अनुराग में मन राग से युक्त होता है अतः अनुराग 'लाल' (रक्त) वर्ण का माना गया एवं मन की उत्तरोत्तर गतिशीलता तथा भाव को पूरी तरह प्रकट करने की सामर्थ्य के कारण शृंगार को 'श्याम वर्ण' का मानना आचार्य की सूक्ष्म दृष्टि का द्योतक है।

2) हास्य रस को सित वर्णी तथा कविसमय में हास का शुक्ल वर्ण[15] -

कादम्बरी में बाणभट्ट ने चूने की सफेदी को अमृत के समान धवल शिव अट्टहास से उपमित करते हुए कहा है -

"पशुपतिलास्यक्रीडेव सुधाधवलाट्टहासा।" -कादम्बरी, पृ.स. 160

सित अथवा शुक्ल वर्ण स्वच्छता, उज्ज्वलता तथा शुभ्रता का प्रतीक माना जाता है।[16] हास्य में चित्त का विकास होता है, हृदय में प्रसन्नता का अनुभव होता है, नेत्र कुछ विकसित हो जाते हैं और उनमें चमक तथा कभी-कभी अश्रु भी आ जाते हैं जो सात्विक प्रभाव के कारण ही होता है। इसीलिए हास जैसे अमूर्त भाव को शुभ–सात्विक प्रभाव के आधार पर तथा चित्त की प्रसन्नता, पवित्रता, उज्ज्वलता और निर्मलता के आधार पर सित अथवा शुक्ल (धवल) वर्णी कहा गया है।

2) करुण का वर्ण कपोत -

करुण रस को कपोत वर्णी मानने का तात्पर्य है कि इसके आश्रय की बाह्य अभिव्यंजना (अनुभाव) कपोत वर्ण के समान होगी। मलिन स्वतः कोई वर्ण नहीं होता इसलिए कपोत के उदाहरण द्वारा मलिनता का प्रकटीकरण किया गया है, कपोत की भावभंगिमा आदि से यहाँ कोई प्रयोजन नहीं है। किसी एक के पाप कर्म से किसी दूसरे को शोक उत्पन्न होता है, पाप को मलिन वर्ण कहा गया है।[17]

---

14 शब्दकल्पद्रुम – 5, पृ.सं.-146

15 यशोहासप्रभृतेः शौक्ल्यम् । - काव्यमीमांसा, अध्याय-15

16 रूपप्रदकला के मूल आधार, पृ.सं.-21

17 मालिन्यं व्योम्नि पापे। – साहित्यदर्पणम्, 7/24

CC BY

आचार्य भरत ने शोकदृष्टि का मनोवैज्ञानिक वर्णन करते हुए कहा है – शिथिल पलक, जलपूर्ण नेत्र, अवरुद्ध नेत्र तारे तथा अश्रुओं से मलिन मुख कान्ति, इस प्रकार मन्दसंचारिणी दीनता प्रकट करने वाली शोक-दृष्टि कही जाती है।[18]

शोक दृष्टि के उपर्युक्त वर्णन द्वारा करुण रस के आश्रय की मलिनवर्णता स्पष्टतः चित्रित हो जाती है। अत: मलिन वर्णिय कपोत के प्रतीक द्वारा शोकभाव को सुग्राह्य रूप प्रदान किया गया है।

4) रौद्र रस तथा क्रोध भाव का वर्ण रक्त (लाल) -

रौद्र रस तथा कविसमय में क्रोध को रक्तवर्णी माना गया है। जानकीहरण महाकाव्य में राज्यसभा में आये बालिपुत्र अंगद के वचनों से क्रुद्ध राक्षसों के वर्णन प्रसंग में कवि द्वारा कुम्भ राक्षस के क्रोध से लाल हुए नेत्रों को लाल-कमल को हराने वाला बताते हुए कहा गया है -

रक्तपद्मरुचिहारि कराग्र प्रस्थितालि कुलरोचिषि कुम्भः ।
न्यस्यसि स्म भुजवर्तिनि मन्दं ज्याभिघातकिणवत् र्मनिचक्षुः ।। – 15/35

क्रोध रजोगुण से उत्पन्न है और उपनिषद् में रजोगुण को लोहित (लाल) वर्ण का कहा गया है।[19] कलाशास्त्री उत्तेजना (Excitment), क्रोध (Anger) तथा आवेग (Passion) को लाल वर्ण का मानते हैं।[20] अर्थात् तीव्र भावनाओं का प्रकटीकरण इस रंग के माध्यम से माना गया है। रौद्र रस के वर्णन में क्रोध के सात्विक भावों में मुख तथा नेत्र को लाल वर्ण बताया जाता है।[21] नासापुट फड़कने लगते हैं, इस भाव के अनुभव काल में अधिक प्राणवायु तथा प्राणशक्ति की आवश्यकता होती है जिससे रक्त तीव्र गति से शरीर के ऊपरी भाग की ओर दौड़ने लगता है।[22] इस प्रकार रौद्र रस के आश्रय के उपर्युक्त अनुभावों तथा क्रोध के रजोगुण प्रधान होने के आधार पर इसका लाल वर्ण कहना तर्क संगत प्रतीत होता है।

5) वीर रस का वर्ण गौर -

पीत तथा लाल वर्ण के मिश्रण से गौर वर्ण का निर्माण नाट्यशास्त्र में उल्लिखित है। आचार्य भरत द्वारा वीर रस को गौर वर्ण का माना गया है। गौर वर्ण को स्वर्ण अर्थात् हेम के वर्ण का माना गया है।[23] स्वर्ण लालिमा लिए पीताभा युक्त होता है तथा वह अपनी शुद्धता,

---

18 अर्धस्रस्तोत्तरपुटा रुद्धतारा जलाविला।
मन्दसंचारिणी दीना सा शोके दृष्टिरिष्यते ।। – ना.शा., 8/55

19 काम एष क्रोध एष रजोगुणसमुद्भवः । – गीता, 3/37

20 रूपप्रदकला के मूलाधार, पृ.सं.-20

21 रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः । – सा.द., 3/231

22 संचारी भावों का शास्त्रीय अध्ययन, पृ.सं.-322

23 हेमवर्णोऽयं समुदाहृतः । – साहित्यदर्पणम्, 3/232

गुरुता और चमक के कारण श्रेष्ठ माना जाता है।[24] वीर रस का स्थायी भाव उत्साह राग-द्वेष से शून्य होने पर चित्त की उत्कर्षता का द्योतक होने से सत्त्व गुण प्रधान है। अतः इस आधार पर वीर को गौर वर्ण का मानना उचित तथा तर्कसंगत प्रतीत होता है।

6) यश तथा पुण्य को शुक्ल अथवा धवल मानना -

वीर रस चार प्रकार का माना जाता है – दानवीर, धर्मवीर, युद्धवीर तथा दयावीर।[25] संसार में दान, धर्म, दया तथा देश की रक्षार्थ किये गये युद्ध से प्राप्त कीर्ति तथा यश चारों दिशाओं में उज्वल प्रकाश की तरह फैल जाता है। धर्म का ही दूसरा नाम पुण्य भी है।[26] प्रकाश, श्वेत-शुक्ल तथा उज्वल है। अतः इसी आधार पर यश, कीर्ति तथा पुण्य भी शुक्ल माने गये हैं। वीर को गौर वर्ण का माना गया है। कोश ग्रन्थों में गौर, शुक्ल, धवल, शुभ्र, श्वेत पर्यायवाची के रूप में प्रयुक्त हुए हैं।[27] तथा यश, कीर्ति तथा पुण्य, वीर के ही भेदों के परिणाम हैं अतः इसी आधार पर इन्हें शुक्ल और धवल वर्ण का कहा गया। गौर वर्ण की अपेक्षा शुक्ल और धवल वर्ण द्वारा किसी भी वस्तु के उजलेपन तथा श्वेतिमा की प्रतीति अधिक सुगमता से होती है।

किरातार्जुनीयम् में दुर्योधन के दान-दाक्षिण्यादि गुणों द्वारा अपने निर्मल यश की अभिवृद्धि का वर्णन ऐसा ही उदाहरण है।[28]

7) अपयश, पाप तथा दुर्गुणों का वर्ण कृष्ण मानना -

यश, कीर्ति आदि के विलोमभाव अपयश, पाप तथा दुर्गुणों को श्वेतेतर कृष्ण वर्ण का माना गया है। अमरकोष में पाप तथा दुर्गुणों को कलुषित, दुष्कृत तथा कल्मष कहा गया है।[29] बुरे कर्म करने वाले को अपयश प्राप्त होता है जिससे वह भर्त्सना व अपमान का भागीदार बनता है अतः इसी आधार पर अपयश आदि को कृष्ण वर्ण का मानना उचित है। उदाहरण स्वरूप कवि श्रीहर्ष ने प्रभात का वर्णन करते हुए आकाश के नीले वर्ण में उसके द्वारा शरणागत (अन्धकार) की रक्षा न करने से कालिमा रूप अपयश की उद्भावना की है -

शरणमिलितध्वान्तध्र्वासिप्रभाऽऽदरधारद् ।
गगनशिखरं नीलत्येकं निजैर्यशोभरैः ।।[30]

---

24 वीररस का शास्त्रीय विवेचन, पृ.सं.-30, 31

25 स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् । – सा.द., 3/234

26 स्याद्धममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः । – अमरकोष: 1/4/24

27 अमरकोष: 1/4/23

28 तथाऽपि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः । – किरातार्जुनीयम्, 1/8

29 अमरकोषः, 1/4/23

30 नैषधीयचरितम्, 19/31

CC BY

8) भयानक रस का वर्ण कृष्ण -

कलाशास्त्र में कृष्ण-वर्ण 'भय' का द्योतक माना गया है।[31] भयानक रस का स्थायी भाव भय है। जो कि रोमांच, कम्पन, स्वेद आदि अनुभावों से प्रतीतिगम्य होता है।[32] कम्प से वेग की प्रबलता द्योतित होती है जिसे शरीर संस्थान संभाल नहीं पाता और मांसपेशियों में रक्त संचार की गति धीमी पड़ जाती हैं।[33] भय में विवर्णता भी देखी जाती है, भय दुःखजनक, क्षोभात्मक होने से पाप तुल्य है। साहित्यदर्पण में पाप को मलिन अर्थात् काला कहा गया है।[34] अतः इन्ही आधारों पर भयानक रस को कृष्ण वर्णी मानना तर्कसंगत है।

9) वीभत्स का नील वर्ण -

वीभत्स रस के विभाव कंकाल, श्मशान, भस्म आदि का सेवन महाकाल करते हैं। वीभत्स रस के देवता महाकाल को माना गया है, इनके वर्ण के आधार पर वीभत्स का वर्ण नील अर्थात् धूम्रवर्ण माना गया है।[35] गंदे रुधिर, मांस मज्जा आदि के सड़ जाने पर उनका वर्ण नीला हो जाता है। कलाशास्त्र में दुःख, मानसिक अवसाद, उद्विग्नता के प्रकटीकरण के लिए नीला वर्ण माना गया है।[36] सांस्कृतिक व्यवहार में भी नीला रंग अशुभ का द्योतक माना जाता है, किसी भी शुभ कार्य में प्रायः नीले वर्ण के वस्त्रादि का प्रयोग वर्जित माना गया है।[37] इन्हीं सब आधारों पर वीभत्स का वर्ण नीला कहा गया है, जिससे उसकी अशुभता, उससे उत्पन्न मानसिक दुःख उद्विग्नता आदि का स्पष्ट रूप से ग्रहण होता है।

10) अद्भुत रस का पीत वर्ण -

पीत वर्ण को भारतीय आचार-विचार में अत्यन्त पुनीत माना गया है, इसलिए हरिद्रा का प्रयोग प्रत्येक शुभ कार्य में अपरिहार्यतः स्वीकृत रहा है। विद्या - बुद्धि के रूप में बृहस्पति को मान्यता प्राप्त है। बृहस्पति का रत्न पीताभ (पुखराज) है तथा उनके निमित्त प्रदान की जाने वाली पूजन साम्रगी के पीतवस्त्र तथा पीतवर्णी प्रसादी प्रमुख हैं।

रंग विज्ञान में पीला रंग 'उष्णरंग' (Warm colour) माना गया है क्योंकि यह रंगपट्ट (स्पेक्ट्रम) की बांयी ओर पड़ता है। फेरे महोदय ने डायनेमोनोटर के द्वारा यह प्रदर्शित किया

---

31 रूपप्रदकला के मूलाधार, पृ.सं.-21

32 नाट्यशास्त्रम्, 1/पृ.सं.-339

33 संचारी भावों का शास्त्रीय अध्ययन, पृ.सं.-323

34 भयस्य दुःखजनकता पापतुल्यत्वात् .... कृष्णवर्णः | - सा. द., 3/235, कुसुमप्रतिमा टीका

35 महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णम् । – सा.द., 3/239, लक्ष्मी टीका

36 रूपप्रद कला के मूलाधार, पृ.-20

37 वीभत्स रस और हिन्दी साहित्य, पृ.सं.-212

है कि उष्णरंग अधिक उत्तेजक होता है।[38]

कलाशास्त्र की मान्यता है कि पीले रंग से चमक, प्रसन्नता, प्रफुल्लता का अनुभव होता है और प्राणी को जीवन की नवीनता का बोध होता है।[39] 'चमक' में आकस्मिकता और चमत्कार दोनों ही हैं और 'विस्मय' भी सुखद या प्रफुल्लताजनक भाव है।[40] इस प्रकार पीत वर्ण स्वभावतः ही अद्भुत के अनुकूल प्रतीत होता है।

11) प्रताप को रक्तोष्ण मानना -

प्रताप शब्द 'तप संतापे' धातु से प्रकृष्ट भाव में घञ् प्रत्यय करने पर बना है।[41] प्रताप में कोश (धन, खजाना) तथा दण्ड (दमन, सैन्यबल) द्वारा प्रखर तेज और प्रभाव निहित होता है।[42] तेज के प्रसिद्ध प्रतीक अग्नि और सूर्य माने गये हैं। इनकी प्रकृति उष्ण होती है। अग्नि के प्रज्वलनकाल में काष्ठ लाल अंगारों में परिवर्तित हो जाता है। इस आधार पर अग्नि को भी रक्तवर्णीय माना जाता है। सूर्य भी लाल रंग का तेजः पुंज है। जिस प्रकार सूर्य अपने प्रखर रूप में सबको तपाता है और अग्नि वस्तुओं का भक्षण करने लगती हैं उन्हें अपने में समा लेती है उसी प्रकार प्रतापी जन सभी को तप्त करता है, कोश तथा दण्ड की सहायता से अपने राज्य का विस्तार करता है, इसीलिए सूर्याग्नि स्वरूप वाले प्रताप को रक्तोष्ण कहा गया है। उदाहरण स्वरूप बाणभट्ट का कथन द्रष्टव्य है -

"जयति ज्वल्त्प्रतापज्वलनप्राकारकृतजगद्रक्षः .... ।।"[43]

निष्कर्ष -

प्रकृति की हर दृश्यमान वस्तु का अपना एक वर्ण होता है, इन वर्णों की संवेदना हम सबको होती है। रंगों का अध्ययन विविध रूपों में किया जाता रहा है। यह एक ऐसा विषय है जिसका प्रत्यक्ष-अप्रत्यक्ष रूप से अनेक विषयों से सम्बन्ध है, विशेषतः शरीरविज्ञानवेत्ता (Physiologist), रसायनशास्त्र वेत्ता (Chemist) तथा मनोविज्ञान वेत्ता (Psychologist) का इस विषय से घनिष्ठ सम्बन्ध है।

---

38 Studies in Aesthetic Perception, Indian Journal of Psychology, March and June, 1942

39 रूपप्रद कला के मूलाधार, पृ.सं.-21

40 कला के दार्शनिक तत्व, डॉ. चिरंजीलाल झा, पृ.सं.-38

41 (i) वैयाकरणसिद्धान्तकौमुदी, उत्तरार्द्ध, सूत्र संख्या – 985
(ii) पूर्वोक्त, उत्तरकृदन्त-3/3/24, "भावे" 3/3/18

42 (i) अमरकोष: - 2/8/20,
(ii) शब्दकल्पद्रुम – 3/पृ.सं.-252

43 हर्षचरितम, 1/23

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

शरीर विज्ञान के आधार पर इस बात का ज्ञान होता है कि आँखों की संरचना किस प्रकार की है और हमें रंगों की संवेदना कैसे होती है? रसायनशास्त्री रंग-द्रव्यों से परिचित होता है तथा रंगों के विषय निर्माण में एवं उसके उपयोग आदि के सम्बन्ध में जानकारी देता है तथा मनोविज्ञान के आधार पर रंगों के मानसिक प्रभावों का विश्लेषण किया जा सकता है।

हमारी कल्पना और भावना को रंग अपने-अपने गुण-धर्म के आधार पर उत्तेजित और प्रशमित करते हैं। मनोविज्ञान का अध्ययन जिस समय प्रारम्भ भी नहीं हुआ था उस समय आचार्य भरत ने अर्मूत भावों को मूर्तायित करते हुए इनके वर्ण का निर्धारण किया जो उनकी सूक्ष्म कल्पना शक्ति और उच्च वैज्ञानिक दृष्टिकोण का द्योतक है। इसी आधार पर संस्कृत काव्य–परम्परा तथा अन्य परवर्ती साहित्य में भी यश आदि अर्मूत भावों को मूर्त रूप देने के लिए कविसमय परम्परा में वर्णों का निर्धारण किया गया।

सन्दर्भ-ग्रन्थ-सूची -

1. अमरकोषः, अमरसिंह, सम्पा-पं. हरगोविन्द शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, 2008
2. उज्ज्वलनीलमणिः, रूपगोस्वामी, पं. दुर्गाप्रसाद शर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 1985
3. काव्यमीमांसा, राजशेखर, चौ. सं. सीरिज ऑफिस, बनारस सिटी, 1991
4. जानकीहरणमहाकाव्यम्, कुमारदास, सम्पा. – श्रीकृष्णदास, मित्र प्रकाशन प्रा.लि., इलाहाबाद, 1966
5. नाट्यशास्त्रम्, भरतमुनी, चौ. सं. संस्थान, वाराणसी, 1922
6. रूपप्रद कला के मूलाधार, डॉ. एस. के. शर्मा एवं डॉ. आर. ए. अग्रवाल, लॉयल बुक डिपो, मेरठ, 1972
7. वीर रस का शास्त्रीय विवेचन, बटेकृष्ण, सरस्वती मन्दिर, जतनबर, बनारस, 1956
8. शब्दकल्पद्रुम, भाग-5, राधाकान्तदेव बहादुर, नाग पब्लिशर्स, दिल्ली, 1987
9. साहित्यदर्पणम् (8 टीकायें), विश्वनाथ, प्रो. योगेश्वरदत्त शर्मा पराशर, नाग पब्लिशर्स, 1999
10. संचारी भावों का शास्त्रीय अध्ययन, डॉ. रघुवीरशरण, श्री लालबहादुर शास्त्री केन्द्रिय संस्कृत विद्यापीठ, दिल्ली, 1973

डॉ॰ रेखा अग्रवाल
Dr. Rekha Agarwal
सहा॰ आचार्या, श्री दि॰ जै॰ आ॰ संस्कृत महाविद्यालय,
बनस्थली विद्यापीठ, जिला - टोंक, (राज॰) 304022
jiya06.agarwal@gmail.com

***

"प्राची प्रज्ञा" (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

वैदिक वाङ्मय में पर्यावरण-चिन्तन

- हरीश

शोधसार -

पर्यावरण शब्द परि+आवरण के संयोग से निष्पन्न है, जिसका अर्थ है ---जो चारों ओर से आवृत्त अथवा आच्छादित करे। पृथिवी पञ्च महाभूतों एवं वृक्ष-वनस्पतियों एवं पशु-पक्षियों से व्याप्त होने के कारण --- ये सभी तत्व पर्यावरण के अभिन्न अङ्ग हैं। इन स्थावर-जङ्गम के अतिरिक्त सम्पूर्ण ब्रह्माण्ड को चारों ओर से आच्छादित करने वाला पदार्थ या तत्व-समूह पर्यावरण है।

पर्यावरण प्रकृति का पर्याय है। वैदिक ऋषियों ने पर्यावरण को प्रदूषित होने से बचाने के लिये कुछ निर्देश व विधान प्रस्तुत किये थे, परिणामतः प्रकृति भी मनुष्य की परम्परा थी। प्रकृति के अङ्गों-उपाङ्गों को देवता रूप में मानने की परम्परा वैदिक काल की विशेषता थी ---

अग्निर्देवता वातो देवता, सूर्यो देवता चन्द्रमा देवता, वसवो देवता रुद्रा देवता, ऽऽदित्या देवता मरुतो देवता, विश्वेदेवा देवता, बृहस्पतिर्देवतेन्द्रो देवता, वरुणो देवता ।।[1]

पञ्चमहाभूतों की उपासना वैदिक ऋषियों के चिन्तन-प्रक्रिया का मूलाधार था। सभी पञ्चतत्वों को मातृ एवं पितृ तुल्य स्तुत्य माना गया। पर्यावरण-संरक्षण की दृष्टि से इन सभी का संक्षिप्त वर्णन इस प्रकार है ---

1. पृथ्वी-संरक्षण ---- वैदिकी भारतीय संस्कृति में तो प्रातः काल पृथिवी पर चरण-स्पर्श से पूर्व क्षमा-याचना की जाती है --- **समुद्रवसने देवी पर्वतस्तनमण्डिते विष्णुपत्नीनमस्तुभ्यं पादस्पर्श क्षमस्व माम्।** अथर्ववेद के 12वें काण्ड का प्रथम सूक्त भूमि सूक्त है, जिसमें कुल 63 मन्त्र हैं। इस सूक्त के ऋषि अथर्वा व देवता भूमि है। इस सूक्त में पृथ्वी को स्पष्ट रूप से माता कहा गया है-- **माता भूमिः पुत्रोऽहं पृथिव्याः।**[2] जन्म से मृत्यु पर्यन्त मनुष्य का सम्बन्ध पृथ्वी से रहता है। पृथ्वी माता का भाँति सभी प्राणियों को आश्रय प्रदान कर, भेद-भाव रहित होकर, सभी को धारण कर, भरण-पोषण के लिए अन्न व जल देती है।

---

[1] यजुर्वेद – 14.20

[2] अथर्ववेद – 12.1.12

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

भूमि, पत्र-पुष्प-फल-वनस्पतियों व वृक्षादि को उत्पन्न कर अपने महनीय गुणों से समग्र प्राणियों को धारण करती है। हमारे पूर्वजों और वीरों की भाँति हमें भी इसकी सुरक्षा व स्तुति-गान करना चाहिए। रत्न-प्राप्ति व अन्न-प्राप्ति हेतु उत्खनन व कृषि-कर्म से भी इसे क्षति नहीं होनी चाहिए ---

यत् ते भूमे विखनामि क्षिप्रं तदपि रोहतु।
मा ते मर्म विमृग्वरि मा ते हृदयमर्पिपम् ।।[3]

राष्ट्र व मातृभूमि की रक्षा हेतु हम मन-वचन-कर्म से कृत-सङ्कल्प रहें। सभी प्राणियों की नीरोगता भूमि की अनुकूलता पर आश्रित है, अतः सेवाधर्म से युक्त होकर हम पृथिवी का संरक्षण करें –

उपस्थास्ते अनमीवा अयक्ष्मा अस्मभ्यं सन्तु पृथिवि प्रसूताः।
दीर्घं न आयुः प्रतिबुध्यमाना वयं तुभ्यं बलिहृतः स्याम ।।[4]

2. जल-संरक्षण -- सृष्टि का आरम्भ जल से माना गया है। क्षीर-सागर में शयन करते हुए विष्णु की नाभि-कमल से चतुर्मुख ब्रह्मा व ब्रह्मा से प्रथम मानसी व पश्चात् मैथुनी-सृष्टि का प्रादुर्भाव हुआ।

भारतीय मनीषा में जल वह तत्व है जिसे किसी भी शुभ कार्य को आरम्भ करने से पूर्व हाथ में लेकर सङ्कल्प किया जाता है। बाह्य शुचिता जल पर आश्रित है। चाहे माङ्गलिक कार्यों का शुभारम्भ हो अथवा पितरों का तर्पण, सभी जल पर आश्रित है।

वेद में जल के लिए 'आपः', 'पर्जन्यः' व 'नद्यः' शब्दों का प्रयोग है। जल जीवन का आधार है। इसी से अग्नि की उत्पत्ति होती है। ऋग्वेद में जल को 'विश्वभेषजी' विशेषण द्वारा इसे रोगनिवारक मानकर जल-चिकित्सा के रूप में इसका मण्डन किया गया है ---

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा।
अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः ।।[5]

'अमीवचातनीः' पद से जल को रोग के कारणों का नाश करने वाला कहा गया है –

आप इद्वा उ भेषजीरापो अमीवचातनीः।
आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ।।[6]

नदियों का जल सूर्यकिरणों के सम्पर्क में आने से छनकर शुद्ध होता है व मेघरूप में पृथिवी पर वर्षण करता है। सूर्य जल को पवित्र करता है तथा शुद्ध व पवित्र जल उत्तमोत्तम यज्ञादि

---

3 अथर्ववेद – 12.1.35

4 अथर्ववेद – 12.1.62

5 ऋग्वेद – 1.23.20

6 ऋग्वेद – 10.137.6

कार्यों को सिद्ध कर हमारी उन्नति में सहायक होते हैं। हिमपर्वतों पर नदियों और झरनों में बहने वाली दिव्य जलधाराएँ अन्ततः समुद्र में विलीन होती हैं व इनका उपयोग हृदय की जलन को दूर करने वाली भेषज में किया जा सकता है, अतः जल वैद्यों में उत्तम वैद्य है - '**भिषजां सुभिषक्तमाः**' ।[7]

विश्वामित्र-नदी-संवाद में यह कामना की गयी है कि नदियों के तटों पर सदा यज्ञ होते रहें व कृषक सदैव उत्तम खेती करने में संलग्न रहें। इसी मन्त्र में '**अघन्या**' पद के द्वारा पानी के दुरुपयोग को उनकी हिंसा बताया गया है ---

उद्व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत ।
मादुष्कृतौ व्येनसाघ्न्यौ शूनमारताम् ।।[8]

तैत्तिरीयारण्यक में पृथिवी पर उपलब्ध जल स्रोतों को दूषित पदार्थों के प्रदूषण से मुक्त कर जलसंरक्षण का सन्देश दिया गया है -- '**नाप्सु मूत्रपुरीषं कुर्यात्**' ।[9]

3. **वृक्ष-संरक्षण --** ऋग्वेद में ओषधि के रूप में वृक्ष-वनस्पति की महिमा का वर्णन कर व शुद्ध वायु के द्वारा लालन-पालन करने के कारण, 'माता (अम्ब)' के समान आदरणीय माना गया है। अनन्त ओषधियाँ व अपरिमित उत्पत्ति-स्थल होने से, इन्हें 'शतक्रत्वः' उपाधि से विभूषित किया गया है ----

शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमं मे अगदं कृत--।।[10]
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे ।
सनेयमश्वं गां वास आत्मानं तव पूरुष ।।[11]

यजुर्वेद में वृक्ष-संरक्षण हेतु उपासक की पृथिवी से प्रार्थना है कि वह किसी भी स्थिति में पृथिवी पर उगने वाली ओषधियों एवं वनस्पतियों की जड़ों को नष्ट न करे एवं यज्ञ व पशुओं के भोजन के निमित्त वृक्षों का समूल उन्मूलन न करे। द्युलोक से पुनः वृष्टि से यथावत् हरियाली की कामना की गयी है। जो पृथिवी पर उगने वाली वनस्पतियों के प्रति हिंसावृत्ति द्वारा क्षति पहुँचाते हैं, ऐसे वृक्षविरोधियों के प्रति सविता देवता से प्रार्थना की गयी है कि उन्हें कभी पाश-बन्धन से मुक्ति न मिले ---

पृथिवी देवयजन्योषध्यास्ते मूलं मा हिंसिषं व्रजं गच्छ गोष्ठानं
वर्षतु ते द्यौर्बधान देव सवितः परमस्यां पृथिव्यां शतेन

---

[7] अथर्ववेद – 6.24.2

[8] ऋग्वेद – 3.33.13

[9] तैत्तिरीय आरण्यक --1.26.7

[10] ऋग्वेद – 10.97.2

[11] ऋग्वेद – 10.97.4

पाशैर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ।।[12]

वस्तुतः वृक्षादि वनस्पतियों का अस्तित्व उनकी हरितिमा के रूप में है, अतः रक्षक देवता रूप वृक्ष-संरक्षण की भावना द्वारा ही वनस्पति-जगत् की हरितिमा संरक्षणीय है ----

अविर्वै नाम देवतर्तेनास्ते परीवृता ।
तस्या रूपेणेमे वृक्षा हरिता हरितस्रजः ।।[13]

4. वायु-संरक्षण --- पर्यावरण में सर्वत्र प्राण रूप में व्याप्त होने से, वायु देवों की आत्मा है। इसके दो रूप हैं --- '**द्वाविमौ वातौ**' ।[14] इन दोनों में से शुद्ध वायु आरोग्यता व बल प्रदान करता है एवं द्वितीय स्वास्थ्य के लिए हानिकारक है। यज्ञानुष्ठान वायुमण्डल को सुगन्धित, पवित्र और सुखकारी बनाता है।

वायु कर्मशीलता व शक्ति का प्रतीक है। ऋग्वेद में वायु को अद्वितीय और अपूर्व गुण सम्पन्न होने से इसे 'अपूर्व्य' विशेषण से मण्डित किया गया है। सब देवों में श्रेष्ठ होने के कारण वायु देव सोम रसों को पीने के प्रथम अधिकारी हैं। इसके अतिरिक्त वायुदेव निष्पाप और विशेषरूप से यज्ञकर्म में संलग्न रहने वाले यजमान अथवा ऋत्विजों की हवि भी स्वीकार करते हैं, अतः यज्ञकर्ताओं की गायें स्वयं ही उनके लिए दूध देती हैं ----

त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः
पीतिमर्हसि सुतानां पीतिमर्हसि ।
उतो विहुत्मतीनां विशां ववर्जुषीणाम्
विश्वा इत् ते धेनवो दुह्र आशिरं धृतं दुह्रत आशिरम् ।।[15]

वायुदेव सभी देवों के हितसम्पादक होने से 'विश्वदेव्यः' और जल को नाश से बचाने के कारण 'अपाम् नपात्' हैं। सबके रक्षक हैं क्योंकि सभी का जीवन वायु पर प्रतिष्ठित है। अतः वायुदेव आत्मीय, पूजनीय और संरक्षणीय हैं ---

प्र नः पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये ।
आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतम् ।।[16]

वायु सभी प्राकृतिक शक्तियों में सर्वोपरि और प्राण रूप होने से सभी मानवीय शक्तियों में प्रधान होने से, 'देवों का आत्मा' है। सभी प्राणियों में वह गर्भ के समान प्राणरूप में भीतर

---

[12] यजुर्वेद -- 1.25

[13] अथर्ववेद – 10.8.31

[14] ऋग्वेद – 10.137.2

[15] ऋग्वेद – 1.134.6

[16] ऋग्वेद -- 10.92.13

विद्यमान रहता है। स्वच्छन्द गति से विचरण करने के कारण बिना रोक-टोक के प्रविष्ट हो सकता है। रूप-रहित होने से इसका स्वरूप प्रत्यक्ष नहीं, किन्तु शब्द-नाद से श्रव्य है ---

आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः।
घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ।।[17]

शुद्ध वायु आरोग्यता प्रदान कर आयु की वृद्धि कर ओषधि के समान हितकारी है। यह सुखकारी व आनन्ददायी होने से 'मयोभु' व रोगों की शान्ति द्वारा कल्याणकारी होने से 'शंभु' है ---

वात आ वातु भेषजं शंभु मयोभु नो हृदे।
प्र ण आयूँषि तारिषत् ।।[18]

इस प्रकार पर्यावरण में वायु देव सतत प्रेरणा के स्रोत हैं। पर्यावरण में वायु-संरक्षण हेतु प्रभूत मात्रा में वृक्षारोपण अनिवार्य है।

5. ध्वनि-प्रदूषण --- ध्वनि भावाभिव्यक्ति का सशक्त माध्यम है। इसके अतिरिक्त प्राकृतिक पदार्थों, भौतिक उपकरणों व यन्त्रों आदि से भी ध्वनियाँ उत्पन्न होती हैं। आवश्यकता से अधिक, कर्कश व तीव्र ध्वनियाँ पर्यावरण को प्रदूषित करती हैं व मानवीय चेतना पर प्रतिकूल प्रभाव डालती हैं। पर्यावरण की शुद्धि हेतु वैदिक ऋषियों ने ध्वनियों के उचित व सन्तुलित रूप पर विचार किया है। मौन भाव को धारण कर, एकान्त वास व शान्त-प्रदेश में वास से ध्वनि-प्रदूषण से मुक्ति सम्भव है। पर्वत-उपत्यकाओं व नदियों के समीपवर्ति प्रदेश शान्त, शीतल और पवित्र होने से, ध्वनि-प्रदूषण से मुक्त होने के कारण, बौद्धिक उत्कर्ष के लिये अनुकूल पर्यावरण प्रदान करते हैं ---

उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम्।
शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ ।।[19]–
उपह्वरे गिरीणां सङ्गमे च नदीनाम्।
धिया विप्रो अजायत ।।[20]

अथर्ववेद में 'सर्वशान्ति' के सन्देश के माध्यम से प्रार्थना की गयी है कि सामर्थ्यशालिनी वाणी के द्वारा ही हम शान्तिरूप सुख और प्रसन्नता को प्राप्त कर सकें। वाणी के द्वारा होने वाले अनर्थ ध्वनिप्रदूषण का निमित्त बनते हैं व सम्यक् वाणी द्वारा ही इसका निदान सम्भव है ---

शान्तानि पूर्वरूपाणि शान्तं नो अस्तु कृताकृतम्।

---

17 ऋग्वेद – 10.168.4

18 ऋग्वेद – 10.186.1

19 ऋग्वेद – 10.136.3

20 यजुर्वेद - 26.15

CC BY

शान्तं भूतं च भव्यं च सर्वमेव शमस्तु नः ।।[21]
इयं या परमेष्ठिनी वाग्देवी ब्रह्मसंशिता ।
ययैव ससृजे घोरं तयैव शान्तिरस्तु नः ।।[22]

अस्तु, यजुर्वेद में उपासक 'सर्व' से सर्वविध शान्ति की प्रार्थना करता है, जिसमें तीनों लोकों, जल, ओषधियों, वनस्पतियों, समस्त देवताओं, ज्ञान व शान्ति से भी शान्ति की कामना की गयी है —-

द्यौः शान्तिरन्तरिक्षँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः
शान्तिरेव शान्तिः सा मा शान्तिरेधि ।।[23]

सन्दर्भ-ग्रन्थ-सूची

1. **ऋग्वेद संहिता** – (सम्पादक) पं0 श्रीराम शर्मा आचार्य व भगवती देवी शर्मा, ब्रह्मवर्चस, शान्तिकुञ्ज, हरिद्वार, उत्तर प्रदेश, पञ्चम आवृत्ति 1997.
2. **यजुर्वेद संहिता** – (सम्पादक) पं0 श्रीराम शर्मा आचार्य व भगवती देवी शर्मा, ब्रह्मवर्चस, शान्तिकुञ्ज, हरिद्वार, उत्तर प्रदेश, पञ्चम आवृत्ति 1997.
3. **सामवेद संहिता** – (सम्पादक) पं0 श्रीराम शर्मा आचार्य व भगवती देवी शर्मा, ब्रह्मवर्चस, शान्तिकुञ्ज, हरिद्वार, उत्तर प्रदेश, पञ्चम आवृत्ति 1997.
4. **अथर्ववेद संहिता** – (सम्पादक) पं0 श्रीराम शर्मा आचार्य व भगवती देवी शर्मा, ब्रह्मवर्चस, शान्तिकुञ्ज, हरिद्वार, उत्तर प्रदेश, पञ्चम आवृत्ति 1997.
5. **संस्कृतपाठ्यसंकलन**, डॉ. शशि तिवारी, विद्यानिधि प्रकाशन, दिल्ली, 2005.

डॉ.हरीश,
Dr. Harish
सहायक-प्राध्यापिका, संस्कृत-विभाग, किरोड़ीमल महाविद्यालय,
दिल्ली विश्वविद्यालय, दिल्ली - 110 007
dr.ms.harish@gmail.com

***

[21] अथर्ववेद –- 19.9.2

[22] अथर्ववेद –- 19.9.3

[23] यजुर्वेद – 36.17

वैदिकशिक्षणप्रणाल्याः महिलाशिक्षणे क्रियान्वयस्य समीक्षात्मकमध्ययनम्

- श्रीनेहलः एन. दवे

शोधसारः -

वैदिक्रशिक्षाप्रणाल्याः उद्देश्यानाम् अनुसन्धानं कृत्वा महिलाशिक्षणे वैदिकशिक्षाप्रणाल्याः यः प्रभावः आसीत्, तस्य विहङ्गावलोकनमत्र दरीदृश्यते। वैदिकशिक्षणप्रणाल्याः अनुमानितः कालखण्डः २६०० ई.पू. तः ५०० ई. पू. मन्यते। वैदिकशैक्षिकप्रणाल्याः वैदिकयुगस्य जनानां विभिन्नजातीनां, वर्गाणां च कस्याश्चित् विचारधारायाः अनुमानं प्राप्यते। प्राचीनकाले भारतस्य शिक्षणस्य विभिन्नप्रणालीनां विकासः आसीत्। बालकाः, बालिकाः च गुरुकुलेषु अध्ययनं कुर्वन्ति स्म। तेषां वास्तव्येन आध्यात्मिकविकासः कीदृशः आसीत् इति महिलशिक्षणस्य उदाहरणैः सह उपस्थाप्यतेऽत्र।

सङ्केतशब्दाः (Keywords)

वैदिकशिक्षाप्रणाली, वैदिकशिक्षणप्रणाली, वैदिकशिक्षणप्रणाल्याः संस्कृतसाहित्येन सह तादात्म्यम्, महिलाशिक्षणे वैदिकशिक्षणप्रणाल्याः अंशाः, Vedic Education System, Vedic Education System and Sanskrit literature.

भूमिका (Introduction)

वैदिकशिक्षणप्रणाल्याः विषये सर्वभारतीयाः विस्तारेण जानीयुरेव। यतः वैदिकगणितं, वेदाः, योगः, दर्शनं, तर्कः इत्यादिनां विषयाणाम् अध्यापनकाले सर्वत्र वैदिकपरम्परायाः उल्लेखः भवति। परन्तु आहत्य वैदिकशिक्षणप्रणाल्याः प्रारूपं कीदृशम् आसीत्, तस्य प्रारूपस्य पृष्ठे किं चिन्तनम् आसीत्, वैदिकशिक्षणप्रणाल्याः कारणेन तस्मिन् काले कीदृशः समाजः आदर्शभूतः परिकल्पितः आसीच्च इत्येतेषु विषयेषु दीपप्रकाशं पातयितुं प्रयासः क्रियतेऽत्र। ततश्च महिलाशिक्षणस्थानि उदाहरणानि निश्चयेन वैदिकशिक्षणप्रणाल्याः क्रियान्वयस्य सार्थकतां प्रदर्शयन्ति। यथा – महाकाव्येषु प्रदर्शितमहिलाशिक्षणस्य उदाहरणेषु आध्यात्मिकविकासे महिला-पुरुषयोः अभेदः, समानाधिकारश्च उपस्थापितः वर्तते इत्यादयः अनेकेषु महिलाशिक्षणांशेषु वैदिकशिक्षणप्रणाल्याः क्रियान्वयं प्रदर्शयिष्यते।

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

शोधोद्देश्यानि (Objectives)

प्रकृतमिदमध्ययनं वैदिकशिक्षणप्रणाल्याः, साहित्यशास्त्रस्थानां महिलाशिक्षणांशानां च वर्णनात्मकम् अनुसन्धानं, विशिष्टाध्ययनात्मकम् अनुसन्धानं च वर्त्तते।

- प्राचीनभारतीयशैक्षिकप्रणाल्याः विषये सामान्यविचारस्य उपस्थापनं, तत्र मुख्यतया वैदिकशिक्षणप्रणाल्याः विषये विवरणदानम् ।
- वैदिकशिक्षणप्रणाल्याः उद्देशानां परिचयः भवेत्।
- वैदिकयुगीनसमाजस्य विभिन्न-जातीनां, वर्गाणां च शिक्षणप्रणालीसन्दर्भे व्यवहाराभ्यासकरणम्।
- वैदिकशिक्षणप्रणाल्याः महिलाशिक्षणे प्रभावः, क्रियान्वयनं च ज्ञायते।

शोधप्रविधिः (Research Methodology)

प्रकृतमिदमध्ययनं वर्णनात्मकमनुसन्धानं, विशिष्टाध्ययनात्मकमनुसन्धानं च वर्त्तते।

प्राचीनशिक्षणप्रणाल्याः पृष्ठभूमिः –

वैदिकशिक्षणप्रणाल्याः उद्देश्यानां चर्चायाः पूर्वं प्राचीनशिक्षणप्रणाल्याः ऐतिहासिकपृष्ठभूमेः सन्दर्भे चर्चा अनिवार्या भवति। भारतस्य प्राचीनशिक्षणस्य विभिन्नानां प्रणालीनां विकासः तस्य कालस्य परिवर्त्यमाणानाम् आवश्यकतानाम् आधारेण जातः आसीत्, यः महोपहारत्वेन मन्यते। प्राचीनभारते शिक्षणाध्ययनस्य विभाजनं मुख्यत्रयाणाम् अवधीनाम् अन्तर्गततया भवितुम् अर्हति। ते अवधयः सन्ति – वैदिककालः, ब्राह्मणिककालः, बौद्धकालश्च।

वैदिकशिक्षणप्रणाल्याः प्रारूपम् –

वैदिककालः भारतीयसभ्यतायाः जन्मतः आरभ्यते, यः २६०० ई.पू. समीपे मन्यते। वैदिककालीनशिक्षणप्रणाल्याः मुख्याधारः ऋग्-यजुर्-साम-अथर्व-चतुर्षु वेदेषु आसीत्। यद्यपि वेदानाम् उदयकालस्य विषये विभिन्नानि मतानि सन्ति, परन्तु सर्वैः एतत् तथ्यं स्वीकृतम् अस्ति यत्, वेदाः विश्वस्य प्राचीनतमाः ग्रन्थाः सन्ति,[1] ततोधिकं ते एव भारतीयानां जीवनदर्शनस्य मूलस्रोतसः आसन् इति। वेदानाम् अध्ययनात् जनः न केवलं जीवनदर्शनस्य अपि तु प्राचीनभारतीयसंस्कृतेः सम्पूर्णतारतम्यस्य ज्ञानं प्राप्नोति स्म। [2]

---

[1] The Power of the Dharma: An Introduction to Hinduism and Vedic Culture, By Stephen Knapp, iUniverse Inc. – New York Lincoln Shanghai, page – 45, ISBN-13: - 978-0-595-39352-7

[2] संस्कृतशिक्षणसमीक्षणम्, इन्दिराचरण पाण्डेय, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९२, पृ. ९५-१००

•वेदशब्दस्य अर्थः –

विद् सत्ये (चुरादिगणः) – अत्र तेषां सर्वेषां विशेषगुणानां समुच्चयः अस्ति, ये मानवजीवनस्य भौतिक-आत्मिक-आवश्यकतानां संतुष्ट्यै आवश्यक-साधनरूपाः सन्ति, ते कस्यापि जनस्य पूर्णविकासाय आवश्यकाः भवन्ति। एतस्य अनुसारं मानवजीवनस्य वास्तविकविशेषता व्यक्तिगतशक्तेः अन्वेषणे निर्भरते, अतः विद्यार्थिजीवनस्य ब्रह्मचर्यं प्रथमचरणं भवति, यत्र सः ब्रह्मचारी इति उच्यते। व्यक्तिगत-अद्भुत-सामग्रीणाम् आवश्यकता अग्रिमचरणे भवति, यत्र पुरुषः गृहस्थी इति उच्यते। जीवनस्य ब्रह्मचर्यचरणं मानवजीवनस्य कुञ्जी अस्ति, एतस्मिन् चरणे एव गरिमा, भविष्यत्कालीन-जीवनस्य महिमा आधारितः भवति – एवं सत्यमेव प्रमुखोपकरणं स्वीक्रियते, एतत् जीवन-निर्माणाय उल्लेखनीयं प्रमुखतन्त्रं भवति।

विद् लाभे (तुदादिगणः) – अत्र ब्रह्माण्डे तेन तत्त्वेन सह योजनं भवति, यस्मिन् प्राणी उदारस्य, सार्वभौमस्य च अस्तित्वस्य सर्वोच्चोर्जया सह स्वस्य लौकिकजीवनं पूर्णं कर्तुम् इच्छति। जीवनस्य प्रथमचरणस्य कालावधौ प्राप्ता प्रबुद्धता जनस्य द्वितीयचरणे अर्थात् गृहस्थाश्रमे सहायकी भवति। अनेन विश्वेन सह भावनात्मक-आत्मियतां विकसयितुं साहाय्यं भवति, ततश्च दिव्यब्रह्माण्डीय-आत्मनः एकं विहङ्गं दृश्यं प्राप्यते।

विद् विचारणे (रुधादिगणः) – एषः धातुः जनस्य बौद्धिक-मानसिक-विकासस्य सूचकः अस्ति। यदा जनः क्लान्तः भूत्वा भौतिक-सुख-सुविधासु अधिकम् आनन्दम् अनुभवति, तदा सः पुनः शक्तिना सह सामञ्जस्य-स्थापनस्य आवश्यकताम् अनुभवति। अतः एतस्मिन् चरणे सः स्वस्य विचारैः, उपायैः च आत्मचिन्तनपूर्वकं जीवनं निर्मातुं साहाय्यं प्राप्नोति।

विद् ज्ञाने (अदादिगणः) – अत्र जनः जन्मसिद्धं ज्ञानं, मुक्तेः ज्ञानं च प्राप्नोति। कस्यापि जनस्य चतुर्थचरणे वैराग्यः आरभते, यदा सः स्वस्य विकस्यमाणेन दृष्टिकोणेन सर्वशक्तिमता ईश्वरेण सह बध्वा प्रेम प्राप्तुं शक्नोति, अन्ते परमगतिं प्राप्तुं सः सफलः भवति च।

एवं वेदशब्दस्य अर्थेभ्यः एषः निष्कर्षः भवितुम् अर्हति यत्, "जीवने आध्यात्मिकप्रगतिं प्राप्तुं पद्धतीनां, साधनानां च ज्ञानमेव वेदः इति। अतः वेदस्य विषयवस्तु धर्मस्य, ब्रह्मणः च उपस्थापनं करोति। धर्मः मनुष्यजीवनस्य कल्याणं सुनिश्चितं करोति, ब्रह्म च सृष्टकारणभूतं तत्त्वम् उक्तमस्ति।

वैदिकशिक्षणप्रणाल्याः उद्देशानि –

वैदिककाले शिक्षणस्य कश्चन आदर्शवादी आधारः आसीत्, यस्मिन् धार्मिकता, आध्यात्मिकता, व्यक्तित्वविकासः, चरित्रनिर्माणं, कस्यचित् स्वस्थसमाजस्य, स्वस्थराष्ट्रस्य च

CC BY

विकासाय कस्यचित् दृष्टिकोणस्य निर्माणं च अन्तर्भवति।[3] वैदिकशिक्षणे शिक्षायाः निम्नप्रमुख-उद्देश्येषु अवधानं कृतमस्ति, यथा – शारीरिकविकासः, मानसिकविकासः, नैतिकानाम्, आध्यात्मिकानां च क्षमतानां विकासः, सांस्कृतिकमूल्यानां विकासः, व्यावसायिकदक्षतायाः विकासः, सहजप्रवृत्तीनाम् उदात्तीकरणं, चरित्रविकासः च।

शारीरिकविकासः – वैदिकयुगस्य जनानां मतम् आसीत् यत्, सशक्तशरीरे सशक्तमनः तिष्ठति इति। एषः विचारः एव वर्तमान-अभिभावक-शैक्षिकप्रणाल्याः मुख्यसिद्धान्तः अपि अस्ति। एवं सशक्तशरीरं सांसारिकैः सह धार्मिककार्येभ्यः अत्यावश्यकम् आसीत्। एतदुद्देश्यं पूरयितुमेव विद्यार्थिभ्यः पञ्चविंशतिवर्षाणाम् आयुःपर्यन्तं ब्रह्मचर्यपालनं (केचन द्वात्रिंशवर्षाणि यावत् ब्रह्मचर्यपालनं कुर्वन्ति स्म), कठोरजीवनशैल्याः पालनम्, अनुशासितजीवनपद्धितीनां पालनं च अनिवार्यम् आसीत्। तैः सर्वैः व्यावहारिकाणि कार्याणि करणीयानि भवन्ति स्म। यथा – आयुधानां याचना, यज्ञाय ईन्धनकाष्ठानाम् एकत्रीकरणम्, आश्रमस्य पशूनां, सहपाठिनां च अनुरक्षणं, कृषिकार्यं च। एवं विद्यार्थिनः शारीरिकविकासः साधितः भवति स्म।

मानसिकविकासः – मानसिकः उत बौद्धिकः विकासः शारीरिकविकासेन सह एव भवति स्म। गुरोः विचाराणां श्रवणं, चर्चा, ध्यानं च मानसिकविकासाय अतीव महत्त्वपूर्णम् आसीत्। ज्ञानस्य स्थितिः कस्यापि मानसिकविकासाय अत्यावश्यकी मन्यते स्म। श्रुतेः, स्मृतेः च ज्ञानेन सह चतुर्णां वेदानां ज्ञानं मनुष्यस्य विस्तारक्षमताम् अवर्धयत।[4]

नैतिकानाम्, आध्यात्मिकानां च क्षमतानां विकासः – नैतिकशिक्षा जनस्य आचरणं प्रभावयति। केवलं नैतिकनिर्देशः कस्यापि आचरणे परिष्कारं कर्तुं न प्रभवति। अतः योग्याचरणाय ब्रह्मचर्यस्य पालनम् आवश्यकं मन्यते स्म। धर्मः सर्वदा भारतीयानां जीवनस्य आकारं निश्चेतुं प्रमुखभूमिकाम् अवहत, यस्य अद्यापि यथार्थता दरीदृश्यते।[5] वैदिकशिक्षणप्रणाल्याः अध्ययनेन ज्ञायते यत्, शिक्षा स्वोद्देश्यस्य, सामग्र्याः च सन्दर्भे धर्म-आध्यात्मिकतयोः आधारिता भवेत् इति विचारधारा आसीत् इति। धर्मस्य अध्ययनात् नैतिकविकासः, ततश्च आध्यात्मिकविकासः भवति। शिक्षकः धर्मानुगामी भवति स्म, यस्मात् तस्य विद्यार्थिनः बोधं स्वीकृत्य अग्रे परिपार्टिं नयन्ति स्म। कस्यापि विद्यार्थिनः आध्यात्मिक-विकासाय धर्मोपदेशः, पूजा, ध्यानं च आवश्यकघटकाः आसन्।

सांस्कृतिकमूल्यानां विकासः – वैदिकशिक्षा प्रदर्शयति स्म यत्, शिक्षितजनैः जीवनस्य विभिन्न-क्षेत्रेषु सहकारितापूर्वकम्, उत्साहपूर्वकं च स्वकर्तव्यानां पालनं करणीयम् इति। अतः

---

[3] समाजसेवा, Volume 26, Directorate of Panchayat and Social Welfare, 1983, page - 42

[4] उच्चशिक्षा मनोविज्ञान, आर.पी.पाठक, डॉलिंग किंडरस्ले (इण्डिया) प्रा. लि., २०११, E-ISBN – 9789332504295, पृ. ५-६

[5] आधुनिक भारत में राजनैतिक विचार, थॉमस पन्थम एवं केनेथ एल डॉयच्च, Sage Bhasha, विभागः - ६

सहकारितायाः, बन्धुत्वस्य, धैर्यस्य, सहिष्णुतायाः च अभ्यासः गुरुकुलेषु उत आश्रमेषु विद्यार्थिभिः, शिक्षकैः च भवति स्म।[6] वैदिकशिक्षायां ज्ञानस्य, कौशलस्य च माध्यमेन संस्कृतेः परिरक्षणाय आश्रमेषु सामुदायिकतया विशिष्टसंस्कृतेः, धार्मिक-अनुष्ठानानां च प्रदर्शनं भवति स्म, ये विद्यालयानां माध्यमेन सफलतया पारम्परिकतया, स्वाभाविकतया च प्रसारं प्राप्तवन्तः।

व्यावसायिकदक्षतायाः विकासः – वैदिकयुगे प्रत्येकं विद्यार्थिनः स्वभविष्यज्जीवने पालनीयेभ्यः व्यवसायेभ्यः प्रशिक्षिताः भवन्ति स्म, येन ते सामाजिकतया कुशलाः, उपयोगिनः भवेयुः। आश्रमेषु कृषेः, शिल्पस्य च अभ्यासः भवति स्म। विद्यार्थी सर्वकार्याणि व्यावहारिकरूपेण करोति स्म, यानि मुख्यजीवनकार्यस्य निर्माणं कुर्वन्ति स्म। तेन सह पशुपालनं, पक्षिपालनं, सर्पपालनं च तेषां दैनन्दनप्रवृत्तिषु अन्तर्भवति स्म। खगोलविज्ञानस्य, नृत्यस्य, सङ्गीतस्य च व्यावसायिकदक्षतापूर्वकम् अध्यापनं भवति स्म।[7]

सहजप्रवृत्तेः उदात्तीकरणम् – वैदिकशिक्षायाः मतम् आसीत् यत्, मनुष्यस्य मूलस्वभावेन सहजः अस्ति। सः वस्तुतः वृत्तीनां दासः अस्ति, या तस्य मानसे अन्तर्निहिता भवति। यदा सः स्वेद्रियैः ग्रसितः भवति, तदा सः बहुधा अपमार्गं गच्छति। अतः शिक्षणस्य उद्देश्यं सहजप्रवृत्तिषु, भौतिकवादिप्रवृत्तिषु च नियन्त्रणं स्थापयितुं ताभ्यः सहजप्रवृत्तिभ्यः उदासीनभावोत्पादनस्य आसीत्, ये जनाः आध्यात्मिकविश्वे नियन्त्रणं स्थापयितुं शक्नुयुः।

चरित्रविकासः – चरित्रविकासोऽपि वैदिकशिक्षणस्य प्रमुखोद्देशः आसीत्। एषः विकासः विद्यार्थिभ्यः अनुशासितजीवनस्य उचित-वातावरणं प्रदाय सिद्धः भवति स्म। वैदिकशिक्षणस्य इदमुद्देश्यं स्वसहभागिभिः सह आत्म-संयमस्य, आत्मविश्वासस्य, सहानुभूतेः, सहयोगस्य, प्रेम्णः, सहायकमुल्यानां च विकासं करोति स्म। एतादृशात् विकासात् स्वतः एव सम्पूर्णचरित्रस्य निर्माणं भवति स्म। [8] [9]

उक्तानि वैदिकशिक्षणस्य सर्वाणि उद्देश्यानि द्वयोः वर्गयोः विभक्तानि भवेयुः। तात्कालिक-उद्देश्यस्य वर्गः, अन्तिमोद्देश्यस्य वर्गश्च। तात्कालिकोद्देशस्य वर्गस्थानि उद्देश्यानि जनानां वास्तविकजीवनस्य आवश्यकतायै सज्जतायाः भागत्वेन भवन्ति स्म, एवञ्च अन्तिमोद्देश्यस्य वर्गस्थानि उद्देश्यानि मोक्षस्य प्राप्तेः शिक्षायाः अन्तिमलक्ष्यस्य सज्जतायाः भागत्वेन भवन्ति स्म।

---

[6] मॉर्डन गुरुकुल – परवरिश के मेरे प्रयोग, सोनाली बेन्द्रे बहल, प्रभात प्रकाशन, विभाग – २, पाठ - २

[7] भारतीय सङ्गीत शिक्षण प्रणाली एवं उसका वर्तमान स्तर, मधुबाला सक्सेना, हरियाणा साहित्य अकादमी, १९९०, पृ. ४६, ५३

[8] Philosophical and Sociological Principles of Education, R.P. Pathak, Pearson Education India, Page - 46

[9] History of Indian Education, Ram Nath Sharma, Shubhi Publications, 2006, Page - 30

cc BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

वैदिकशिक्षणप्रणाल्याः महिलाशिक्षणांशेषु क्रियान्वयः –

संस्कृतकाव्येषु, संस्कृतनाटकेषु च वैदिकशिक्षणप्रणाल्याः महिलाशिक्षणेषु क्रियान्वयं दरीदृश्यते। अनेन वैदिकशिक्षणस्य पुरुषवत् महिलासु अपि समानतया प्रभावितः भवति स्म इति स्पष्टतया सिद्धं भवति। अतः अत्र काव्यादिसाहित्येषु उल्लिखितानि कानिचन उदाहरणानि प्रस्तुयन्ते।

अध्यात्मशिक्षणे महिलापुरुषयोः अभेदः –

आलोक्य चक्षुषा रूपं धातुमात्रे व्यवस्थितः।
स्त्री वेति पुरुषो वेति न कल्पयितुमर्हसि॥४२॥
स चेत् स्त्रीपुरुषग्राहः क्वचिद्विद्येत कश्चन।
शुभतः केशदन्तादीन्नानुपस्थातुमर्हसि॥४३॥
नापनेयं ततः किञ्चित् प्रक्षेप्यं नापि किञ्चन।
द्रष्टव्यं भूततो भूतं यादृशं च यथा च यत्॥४४॥
एवं ते पश्यतस्तत्त्वं शश्वदिन्दियगोचरम्।
भविष्यति पदस्थानं नाभिध्यादौर्मनस्ययोः॥४५॥[10]

अर्थात्, नेत्राभ्यां रूपं दृष्ट्वा पृथ्वीप्रभृतिभिः पञ्चतत्त्वैः निर्मितः एषः देहः अस्ति इत्यत्रैव स्वध्यानं केन्द्रितं करणीयम्। एषा स्त्री, एषः पुरुषः वा इति कल्पना न करणीया एव॥४२॥ एषा स्त्री अस्ति, एषः पुरुषः अस्ति – यदि एतादृशः भावः कुत्रचित् विद्यते, तर्हि केशाः, दन्ताः इत्यादिषु त्वया तस्य रूप-सौन्दर्यं न द्रष्टव्यम्॥४३॥ तत्र किमपि योजनीयं, न च किमपि दूरं कर्चव्यंय़ तस्य प्राणिनः स्वरूपम् एव द्रष्टव्यं यत्, सः कीदृशः अस्ति? कथमस्ति? केन प्रकारेण अस्ति? इति॥४४॥ एवं निरन्तरं तासां दृष्टिगोचरतत्त्वानां दर्शनं कुर्वतः तव मनसि सन्तापः स्थानं स्वीकर्तुं न शक्ष्यति॥४५॥

कुमारसम्भवे पार्वत्याः वेदाध्ययनस्य सन्दर्भः –

कृताभिषेकां हुतजातवेदसं त्वगुत्तरासङ्गवतीमधीतिनीम्।
दिदृक्षवस्तामृषयोऽभ्युपागमन् न धर्मवृद्धेषु वयः समीक्ष्यते॥[11]

अर्थात् – पवित्रजलात् स्नानं कुर्वती, अग्नौ होमं कुर्वती, वल्कलधारणं कुर्वती, वेदादीनाम् अध्ययनं कुर्वती च एतस्याः पार्वत्याः दर्शनाभिलाषिणः ऋषयः अपि तत्र समागच्छन्ति स्म। धर्मवृद्धानां विषये वयसः प्राधान्यं न भवति।

विभिन्नस्रोतसि महिलाशिक्षणस्य क्रियान्वयः –

---

[10] सौन्दरानन्दमहाकाव्यं, सर्गः – १३, श्लो.

[11] कुमारसम्भवम्, सर्गः – ५, श्लो. १६

महाभाष्यकार-पतञ्जलिना वैदिकशिक्षणस्य महिलाशिक्षणे क्रियान्वयस्य सङ्केताः दत्ताः सन्ति। यत्र तेन महिलाक्षणान्तर्गततया पठ्यमाणानां, पाठ्यमामानां च विषयाणाम् उल्लेखः कृतः अस्ति–

लोके अभिरूपायोदकमानेयम् अभिरूपाय कन्या देयेति,

न चानभिरूपे प्रवृत्तिरस्ति, तत्र अभिरूपतमायेति गम्यते।[12]

भाष्यकारः स्वसूत्रेषु अध्यापिका-पदस्य उल्लेखं करोति। मीमांसायाः काशकृत्स्नाशाखायाः विदुषी "काशकृत्स्ना" इतिपदधारिणी आसीत्। गुरुकुलेषु आचार्या-उपाध्याया इत्यतयोः पदयोः आरूढा विदुषी भवति स्म।(४/१/४९) वेद-शाखानाम् अध्यापिका "कठी", "बहुवची" च पदधारिणी उक्ता।(४/१/६३) शक्त्यास्त्रस्य सञ्चालने पारङ्गता महिला "शाक्तिकी" इतिपदं प्राप्नोति स्म। महिलानां छात्रावासस्य मुख्यपदे "छात्रिशाला नियुक्ता भवति स्म।(६/२/८६) अद्यत्वे शिक्षणम् इत्युक्ते भाषायाः ज्ञानं, प्रौद्योगिक्याः ज्ञानं, सूचनायाः ज्ञानं च मन्यते, परन्तु वैदिककाले **'अमृत'**-प्रौद्योगिकी[13] शिक्षणस्य प्रसिद्धिः आसीत्। अत एव वैदिकनार्यः ब्रह्मवादिनीभिः भवितुं प्रायतन्त। अतः ब्रह्म बोधयति उत ब्रह्मविषये वदति इति ब्रह्मवादिनी उक्ता। महिलानाम् अध्ययने प्रवृत्तिः पुरुषवदेव आसीत्।[14] महिलाः ब्रह्मचर्यपालनं कुर्वन्ति स्म - **"ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्"।**[15]

---

[12] महाभाष्यम्, अध्यायः १, पादः – ४ (साधकतमं करणम् इत्यस्य (१-४-४२) सूत्रस्य व्याख्याकाले पतञ्जलिः करणस्य स्पष्टतायै उदाहरणत्वेन एतत् वदति।)

[13] येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहि। बृहदारण्यकोनिषद्, अध्यायः - २ चतुर्थब्राह्मणः, श्लो. ३

[14] Till about the beginning of the Christian era Upanayana or the ceremonial initiation into Vedic studies was as common in the case of girls as it was in the case of boys. (The Position of Women in Hindu Civilization From Prehistoric Times to the Present Day – by Anant Sasashiv, Altekar, Ch. 7, Page. 9-10, ISBN – 81-208-0324-8)

[15] अथर्ववेदः, काण्डः – ११, सूक्तम् – ७, मन्त्रः – १८

शोधनिष्कर्षः (Conclusion)

वैदिकशिक्षणप्रणाल्यां मानवीयविकासस्य सम्पूर्णं चित्रं स्पष्टं दरीदृश्यते।

- वैदिकशिक्षणप्रणाल्यां वेदः मानवीयमूल्यानां मुख्यस्रोतः आसीत्।
- शारीरिकविकासः, मानसिकविकासः, नैतिकानाम्, आध्यात्मिकानां च क्षमतानां विकासः, सांस्कृतिकमूल्यानां विकासः, व्यावसायिकदक्षतायाः विकासः, सहजप्रवृत्तीनाम् उदात्तीकरणं, चरित्रविकासः च इति वैदिकशिक्षणस्य उद्देशानि आसन्।
- अध्यात्मादिषु वैदिकशिक्षणोद्देश्यानि महिलाशिक्षणे अपि समानतया प्रभावितानि भवन्ति स्म। एतत् सौन्दरानन्दमहाकाव्यस्य, कुमारसम्भवस्य, वेदानां च उदाहरणैः स्पष्टं भवति।

सन्दर्भग्रन्थसूची (Bibliography)

1. History of Indian Education, Ram Nath Sharma, Shubhi Publications, 2006
2. Philosophical and Sociological Principles of Education, R.P. Pathak, Pearson Education India
3. The Position of Women in Hindu Civilization From Prehistoric Times to the Present Day – by Anant Sasashiv, Altekar, ISBN – 81-208-0324-8
4. The Power of the Dharma: An Introduction to Hinduism and Vedic Culture, By Stephen Knapp, iUniverse Inc. – New York Lincoln Shanghai ISBN-13: -978-0-595-39352-7
5. अथर्ववेदः, गीताप्रेस
6. आधुनिक भारत में राजनैतिक विचार, थॉमस पन्थम एवं केनेथ एल डॉयच्च, Sage Bhasha
7. उच्चशिक्षा मनोविज्ञान, आर.पी.पाठक, डॉलिंग किंडरस्ले (इण्डिया) प्रा. लि., २०११, E-ISBN – 9789332504295
8. कुमारसम्भवम् – sa.wikisource.org/कुमारसम्भवम्
9. बृहदारण्यकोनिषद्, गीताप्रेस
10. भारतीय सङ्गीत शिक्षण प्रणाली एवं उसका वर्तमान स्तर, मधुबाला सक्सेना, हरियाणा साहित्य अकादमी, १९९०
11. महाभाष्यम्, गीताप्रेस
12. मॉर्डन गुरुकुल – परवरिश के मेरे प्रयोग, सोनाली बेन्द्रे बहल, प्रभात प्रकाशन

13. संस्कृतशिक्षणसमीक्षणम्, इन्दिराचरण पाण्डेय, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९९२
14. समाजसेवा, Volume 26, Directorate of Panchayat and Social Welfare, 1983
15. सौन्दरानन्दमहाकाव्यम् - "विमला"-संस्कृत-हिन्दीव्याख्योपेतं, व्याख्याकारः – आचार्य जगदीशचन्द्र मिश्र, प्रकाशकः – चौखम्बा सुरभारती प्रकाशन, वारणसी, संस्करणं– २०१० ई.

श्रीनेहलः एन. दवे (143)
Mr. Nehal Narendrakumar Dave
विद्यावारिधि-शोधच्छात्रः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः
nehaldca08@gmail.com

***

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

वैदिकसाहित्ये महाव्रतं कर्म

- रणजीतकुमारः

वैदिकसाहित्ये गवामयनसत्रस्य उपान्त्यदिने अनुष्ठेयस्य महाव्रतस्य विषये विस्तरेण वर्णनं वर्तते। तत्र

सहिंतासु - तैत्तिरीयकाठकसहिंतयोः,
ब्राह्मणेषु - तैत्तिरीय-ताण्ड्य-ऐतरेयब्राह्मणेषु,
आरण्यकेषु - ऐतरेय-शांखायनारण्यकयोः,
श्रौतसूत्रेषु च - शांखायन-आपस्तम्ब-कात्यायनश्रौतसूत्रेषु

स्व स्व शाखाधर्माः उक्ताः सन्ति। अतःएतेषां समग्राध्ययनेन महाव्रतस्य स्वरूपं स्पष्टं भवति। महाव्रतं गवामयनसत्रस्य उपान्त्ये दिने आचर्यते। सायणाचार्यः ऐतरेयारण्यकस्य भाष्ये आदौ लिखति-

गवामयनमित्युक्ते सत्रे संवत्सरात्मके।
उपान्त्यमस्ति यदहस्तन्महाव्रतनामकम्। ।[1]

गवामयनसत्रस्य विषये संक्षेपेण लिख्यते।

<u>गवामयनसत्रम्</u>

श्रौतकर्मसु स्वल्पकालसाध्याग्निहोत्राद् आरभ्य सहस्रसंवत्सरसाध्यानाम् कर्मणां यज्ञानां वा उल्लेखः वेदशाखासु ब्राह्मणग्रन्थेषु श्रौतसूत्रेषु च उपलभ्यते। गोपथब्राह्मणे -

अग्निर्यज्ञं त्रिवृतं सप्त-तन्तुम्[2]

मन्त्रस्य निर्देशपूर्वकं २१ प्रकाराणां यज्ञानां वर्णनम् उपलभ्यते। ३ × ७ = २१

१. सप्त पाकयज्ञाः। २. सप्त हविर्यज्ञाः। ३. सप्त सोमयज्ञाः। गवामयनसत्रं सोमयागेषु अन्तर्निहितं भवति। सोमयागाः चतुर्विधाः भवन्ति।

१. एकाहयागः। २. अहीनयागः। ३. साद्यस्क्रयागः। ४. सत्रयागः। यस्य सोमयागस्य अनुष्ठानम् एकस्मिन् दिने सम्पन्नं भवति सः एकाहः सोमयागः उच्यते। दिवसद्वयम् आरभ्य एकादशदिनानि यावत् क्रियमाणः यागः अहीनयागः कथ्यते। त्रयोदशदिनेभ्य आरभ्य सहस्रं वर्षाणि यावत् क्रियमाणः यागः सत्रयागः उच्यते। द्वादशदिनेषु सम्पत्स्यमानः सोमयागः अहीनयागः सत्रयागः वा उच्यते।[3]

एकाहयागः, अहीनयागः, सत्रयागः, इत्येताः संज्ञाः सुत्यदिवसान् आधारीकृत्य भवन्ति। एकाहे सुत्यदिवसस्तु एकः एव भवति परन्तु आनुषङ्गिकाः इष्टयः सोमाभिषवश्च सुत्यदिवसात् पूर्वं दिनचतुष्ट्ये आचर्यन्ते। अतः दिवसानाम् आहत्य संख्या पञ्च भवति। एवम् एकाहसोमयागस्य अनुष्ठानं पञ्चसु दिवसेषु भवति, परञ्च यस्मिन् सोमयागे सङ्कल्पाद् आरभ्य अवभृथपर्यन्तं क्रियमाणानि सर्वाणि अपि कर्माणि एकस्मिन् दिने सम्पन्नानि भवन्ति, सः साद्यस्क्र यागः उच्यते। तत्र एकाहक्रतूनां प्रकृतिः अग्निष्टोमः वर्तते। द्विरात्रादीनाम् अहीनयागानां प्रकृतिः अहीनात्मकद्वादशाहः वर्तते। त्रयोदशाहादिसत्राणां प्रकृतिः सत्रात्मकद्वादशाहः वर्तते। संवत्सरे वा ततोऽधिके काले क्रियमाणानां सोमयागानां प्रकृतिः

गवामयननामकं सत्रयागः वर्तते। गवाम् अयनम्-गवामयनम्। अत्र गो शब्दस्य अर्थः अस्ति - सूर्यः/सूर्यरश्मयः/पृथ्वी। यथोक्तं निरुक्ते-

आदित्योऽपि गौरुच्यते।
सर्वेऽपि रश्मयो गाव उच्यन्ते।
गौरिति पृथिव्या नामधेयम्। [4]

अतः गवामयनं नाम सूर्यस्य सूर्यरश्मीनां पृथिव्याः वा वार्षिकं परिभ्रमणम्। सूर्यरश्मीनाम् आवर्षं स्थितीनां प्रदर्शनम् एतस्य सत्रस्य अनुष्ठानैः क्रियते।

सत्रारम्भः-

कात्यायनश्रौतसूत्रानुसारं सत्रस्य आरम्भः

१. **फाल्गुनी पौर्णमासे**। २. **चैत्र्याम्**। ३. **चतुरहे वा पुरस्तात्पौर्णमास्याः**। ४. **माघी वा क्रयश्रुतेः**। [5]

अर्थात् अस्य यागस्य आरम्भः माघकृष्णाष्टम्यां, फाल्गुनशुक्लैकादश्यां, फाल्गुनपौर्णमास्यां, चैत्रपौर्णमास्यां, वा कर्तुं शक्यते। अस्मिन् क्रतौ द्वादशदीक्षाः, द्वादश– उपसद् तथा च ३६१ सुत्यादिवसाः भवन्ति। एवम् अयं यागः ३८५ दिवसेषु पूर्णं भवति। सुत्यादिवसानां त्रिधा विभागः वर्तते। पूर्वपक्षः, मध्यमपक्षः, उत्तरपक्षः। पूर्वपक्षे तथा च उत्तरपक्षे १८०–१८० सुत्याःभवन्ति। द्वयोः पक्षयोः मध्ये एकः विषुवान् दिवसः भवति। गवामयनसत्रस्यदिवसानां संक्षिप्तसारणी अग्रे प्रदर्श्यते –

पूर्वपक्षः (आरम्भिका षट् मासाः)[6]		
प्रथमं दिनम्	प्रायणीयम् (अतिरात्रम्)	१ दिनम्।
द्वितीयं दिनम्	चतुर्विंशम् (उकथ्यम्)	१ दिनम्।
प्रथममासात् पञ्चमासं यावत् प्रतिमासम्	४ अभिप्लव षडहः[7] +१ पृष्ठ्य षडहः-	१५० दिनानि।
षष्ठः मासः	त्रयोऽभिप्लवाःषडहाः - एकः पृष्ठ्यषडहः- अभिजित्संज्ञकोऽग्निष्टोमसंस्थः- त्रीणि स्वरसामसंज्ञकानि- (आरम्भिकदिनद्वयं योजयित्वा एकः मासः पूर्णः)।	१८ दिनानि। ६दिनानि। १ दिनम्। ३ दिनानि। <u>१८० दिनानि।</u>
मध्यदिवसः		
विषुवान् दिवसः		१ दिनम्।

उत्तरपक्षः		
सप्तमः मासः-	त्रयःस्वरसामानः- एकः विश्वजिदग्निष्टोमः- एकःपृष्ठ्यःषडहः- त्रयोऽभिप्लवाःषडहाः- **(अन्तिमदिनद्वयं योजयित्वा एकः मासः पूर्णः)**	३ दिनानि। १ दिनम्। ६ दिनम्। १८ दिनानि। (३०) दिनानि।
अष्टमात् मासात् एकादशं मासं यावत् प्रतिमासम्-	एकः पृष्ठ्यःषडहः+४अभिप्लवषडहाः-	१२० दिनानि।
द्वादशः मासः-	३ अभिप्लवाःषडहाः - १ गोष्टोमः- १ आयुष्टोमः- द्वादशाहान्तर्गताः दशाहाः-	१८ दिनानि। १ दिनम्। १ दिनम्। १० दिनानि।
उपान्त्यमहः-	**महाव्रतम् (अग्निष्टोमः) -**	**१ दिनम्।**
अन्तिमाहः-	उदयनीयम् (अतिरात्रः)	१ दिनम्। **१८० दिनानि।**

एवं पूर्णः योग १८० दिनानि पूर्वपक्षः +१ मध्यपक्षः +१८० उत्तरपक्षः=३६१ दिनानि। 8

महाव्रतनिर्वचनम् –

इन्द्रो वै वृत्रं हत्वा महानभवद्यन्महानभवत्तन् -
महाव्रतमभवत्तन्महाव्रतस्य महाव्रतत्वम् इति। [9]
१. महान् भवति अनेन व्रतेन इति महाव्रतम् ,
२. महतो देवस्य व्रतमिति महाव्रतम् ,
३. महच्च तद्व्रतमिति महाव्रतम्। । [10]

महाव्रते सवनत्रयं भवति तत्र -

प्रातः सवनम्

महाव्रतस्य दिने प्रातःसवने होत्रा शंसनीययोः आज्यशस्त्रयोः काम्याज्याशस्त्राणां च वर्णनं एतरेयशाङ्खायनारण्यकयोः विस्तरेण प्राप्यते।

आज्यशस्त्रम् -

महाव्रतदिवसे **"अग्निं नरो दीधितिभिः"**[11] इति पञ्चविंशत्यृचं सूक्तं विश्वजिति विशेषविधानाद्वैकृतम् एकमाज्यं कुर्यात्। [12]

काम्याज्यशस्त्राणि-१. समृद्धिप्राप्तये "प्र वो देवायाग्नय " इति। [13] सप्तर्चं सूक्तं ऐतरेयारण्यके विहितम्।

२. पुष्टिफलाय " विशो विशो वो अतिथिम् "[14] इति सूक्तं पञ्चदशर्चम्।

३. कीर्तिफलाय " अबोध्यग्निः समिधा जनानाम् "[15] इति द्वादशर्चंसूक्तं विहितम्।

४. प्रजापशुकामार्थं " होताजनिष्ट चेतन "[16] इति सूक्तं कुर्यात्।

५. अन्नाद्यफलाय " अग्निं नरो दीधितिभिररण्योः "[17] इति पञ्चविंशत्यृचम् आज्यशस्त्रमवगन्तव्यम्।

उपर्युक्तानि पञ्च अपि कामाज्यशस्त्राणि एतरेयारण्यके प्रथमाध्याये खण्डद्वये वर्णितानि।

६." विशो विशो वा अतिथिम् "[18] इति द्वादशर्चम् आज्यम्। द्वादश वै मासाः संवत्सरः संवत्सरस्यैवाप्त्यै। [19]

७. " अग्निं नरो दीधितिभिररण्योः "[20] इत्येतत् पञ्चविंशत्यृचम् उपशंसति।

पञ्चविंशो हि स्तोमः। तद् वै शस्त्रं समृद्धं यत् स्तोमेन संपद्यते। [21]

प्रउगशस्त्रम् –

एवम् आज्यशस्त्रनिरूपणानन्तरं वैश्वदेवग्रहणाद् पूर्वं होत्रा शंसनीयेप्रउगनामके शस्त्रविषये छन्दोविशेषमाश्रित्य विचार्यते। प्रउगशस्त्रं सप्तभिः तृचैः सम्पन्नं भवति। [22] तत्र ब्राह्मणसिद्धानि मतानि प्रदर्श्यन्ते-

"१. गायत्रं प्रउगं कुर्यादित्याहुस्तेजो वै ब्रह्मवर्चसं गायत्री तेजस्वी ब्रह्मवर्चसी भवतीति।

२. औष्णिहं प्रउगं कुर्यादित्याहुरायुर्वा उष्णिगायुष्मान्भवतीति।

३. अनुष्टुभं प्रउगं कुर्यादित्याहुः क्षत्रं वा अनुष्टुप् क्षत्रस्याप्त्या इति।

४. बार्हतं प्रउगं कुर्यात् इत्याहुः श्रीर्वै बृहती श्रीमान्भवति इति।

५. पाङ्क्तं प्रउगं कुर्यात् इत्याहुः अन्नं वै पङ्क्तिः अन्नवान् भवति इति।

६. त्रैष्टुभं प्रउगं कुर्यात् इत्याहुः वीर्यं वै त्रिष्टुप् वीर्यवान् भवति इति।

७. जागतं प्रउगं कुर्यात् इत्याहुः जागता वै पशवः पशुमान् भवति इति। "[23]

एवं सप्तमतानि उक्त्वा ऐतरेयारण्यके प्रथमस्य मतस्य समर्थनं कुर्वता कथितम् यत्–

"तदु गायत्रमेव कुर्याद्ब्रह्म वै गायत्री ब्रह्मैतदहर्ब्रह्मणैव तद्ब्रह्म प्रतिपद्यते। "

अर्थात् महाव्रतदिवसे गायत्री-प्रउगम् एव कुर्यात् यतोहि गायत्री ब्रह्म वर्तते तथा च महाव्रतस्य दिनमपि ब्रह्म एव वर्तते, अतः गायत्रीरूपब्रह्मणा महाव्रतरूपिब्रह्मणः प्राप्तिः भवति।

ऋग्वेदे तावत् विद्यमानेषु बहुषु गायत्रीछन्दस्केषु माधुच्छन्दसं गायत्रीछन्दस्कं प्रउगं द्रष्टव्यम्। तद् तावत् " वायवायाहि "[24] इत्यादिकं मन्त्रजातं वर्तते। त्रैष्टुभः प्रउगः। इन्द्रस्यैवैतच्छन्दो यत् त्रिष्टुप्। तद् एनं स्वेन छन्दसा समर्धयति। "कुविद् अङ्ग नमसो ये वृधासः" इति वायव्यं महद्वद् वृधवत्।

cc BY

माध्यन्दिनसवनम्।

मरुत्वतीयशस्त्रम्।

प्रउगशस्त्रे समाप्ते सति माध्यन्दिनसवनस्य आरम्भे होता मरुत्वतीयशस्त्रम् आरभते।

" आ त्वा रथं यथोतय "[25] इति तृचः प्रतिपत् प्रारम्भरूपः। तथा च " इदं वसो सुतमन्ध " इति तृचः अनुचरः। तृचौ प्रशंसति **" ऐकाहिकौ रूपसमृद्धौ बहु वा एतस्मिन्नहनि किञ्च किञ्च वारणं क्रियते शान्त्या एव शान्तिर्वै प्रतिष्ठैकाहः शान्त्यामेव तत्प्रतिष्ठायामन्ततः प्रतितिष्ठन्ति प्रतितिष्ठति य एवं वेद येषां चैवं विद्वानेतद्धोता शंसति " इति**[26]।

प्रतिपदनुचरतृचयोः पश्चात् **इन्द्र नेदिय एदिहि** तथा च **प्रसूतिरा शचीभिर्ये त उक्थिनः**[27] इत्येतयोः पाठः भवति। उक्थिनशब्दत्वात् इदं दिनं पूर्णं मन्यते।

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थम्[28] अस्य उच्चारणेन एतत् दिनम् उक्थशस्त्रेण युक्तत्वात् समृद्धं वर्तते। महाव्रतदिवसस्य स्वरूपम् इन्द्रःमन्यते।

"अग्निर्नेता स वृत्रहेति वार्त्रघ्नमिन्द्ररूपमैन्द्रमेतदहरेतस्याह्नो रूपम् "[29]।

एतत् दिनमपि इन्द्रस्य वर्तते तथा च इन्द्रः एव अस्य दिवसस्य स्वरूपं वर्तते।

निष्केवल्यशस्त्रम्

माध्यन्दिनसवने मरुत्वतीयं शस्त्रं समाप्य होता सदसः प्राक्द्वारात् निर्गत्य उत्तरं प्रति गत्वा आग्नीध्रे आहुतित्रयं ददाति तथा च मार्जालीयवेद्यां दश आहुतीः अर्पयति। आग्नीध्रः उत्तरे तथा च मार्जालीयवेदी दक्षिणं प्रति निर्मीयते। दशसु आहुतिषु अन्तिमाम् आहुतिं चतुर्धा विभज्य मार्जालीयाग्नेः उत्तरभागे स्थापयित्वा प्रथमाः नव आज्याहुतीः मार्जालीयाग्नौ पूर्वस्मात् , उत्तरदिशः अथवा प्रागुदक् द्वारात् प्रददाति। एतासु आहुतिषु विनियुक्ताः मन्त्राः केवलम् ऐतरेयारण्यकस्य पञ्चमे आरण्यके उपलभ्यन्ते।

मार्जालीयाग्नौ आहुतिप्रदानानन्तरं होता मार्जालीयसमीपे पूर्वाभिमुखं भूत्वा आदित्यम् उपासते। सूर्ये पश्चिमायां दिशि गते सति स्वयमपि पश्चिमाभिमुखं भवति। आदित्यं स्वकर्मणि गमनाय इदं मधु इदं मधु इदं मधु इति उक्तवा आमन्त्रयति। आदित्य देवस्य उपासनानन्तरं जलपूर्णघटैः युक्ताः दास्यः मार्जालीयाग्नेः प्रदक्षिणां कुर्वत्यः स्व दक्षिणेन हस्तेन उरुं ताडयन्त्यः कथयन्ति – **" इदं मधु इदं मधु "**। दासीनां मधुरं गानं प्रकटयति यत् घटगतं जलं न साधारणम् अपितु आदित्यदेवस्य प्रियं पेयं मधु वर्तते। सम्भाव्यते यत् अस्मिन् प्रसङ्गे आदित्यस्य उपासना तत्पश्चात् दासीभिः घटानाम् उत्थापनम् आदित्यद्वारा जलस्य वाष्पीकरणं तत्पश्चात् वृष्टिद्वारा पृथिवीं प्रति प्रेषणं सङ्केतयति। तै. सं. अनुसारं दास्यः पृथ्वीं स्वपादैः ताडयन्ति तस्य फलं यत् यजमानः सामर्थ्यं प्राप्नोति। दासीभिः उरुताडनं प्रजाप्राप्तिं सूचयति। श्रोणीं प्रजननाय निघ्नन्ति[30]। सम्भवतः ऊरोः प्रजननेन्द्रियस्य निकटस्थत्वात् सन्ततिनिमित्तं ऊरू ताडयन्ति इत्येतस्य प्रयोगः दर्शितः अस्ति। कीथ महोदयानाम् अनुसारं ऊरू ताडयन्ति इत्यनेन दुष्प्रभावाणां समाप्तेः तथा च उर्वरत्ववृद्धेः भावः स्पष्टः भवति। [31]

होतुः महदुक्थेन सम्बन्धितं महाव्रतमेव एतस्य दिनस्य महत्त्वपूर्णम् अङ्गं वर्तते। महदुक्थचित्याग्नेः पक्षिणः अवयवैः साकं वर्णनं वर्तते। पक्षी तु निश्चयेन सूर्यपक्षी वर्तते यतोहि आरण्यके अयं **सुपर्णोऽसि गरुत्मान** नाम्ना सम्बोधितः अस्ति।

पञ्च सामानि गायत्र, रथन्तर, बृहत्, भद्र, राजन, क्रमशः शिरस्, दक्षिणपक्ष, उत्तरपक्ष, पुच्छ, आत्मा कथितानि। संहितासु महाव्रतस्य सन्दर्भे अग्निः पक्षिरूपः न कथितः।

अध्वर्युणा स्तोत्रे उक्ते सति दास्यः घटजलम् उत्तरवेद्यां , मार्जालीयाग्नौ , तथा च अवशिष्टं जलं अन्तर्वेद्यां प्रक्षिपन्ति। मार्जालीयाग्नेः प्रदक्षिणानन्तरं होता यूपस्य पूर्वभागे स्थितायाः चित्याग्नेः समक्षं पश्चिमाभिमुखः उत्तिष्ठन् शिरः उपासते – **नमस्ते गायत्राय यत्ते शिरः**। दक्षिणे स्थितायाः मार्जालीयाग्नेः , चित्याग्नेः पूर्वं दिशं गत्वा पुनः दक्षिणदिशि उत्तराभिमुखी तिष्ठन् अग्नेः दक्षिणपक्षस्य उपासनां कुर्वन् कथयति – **नमस्ते राथंतराय यस्ते दक्षिणः पक्षः।** पश्चिमदिशि स्थितम् अग्निपुच्छं पारं कृत्वा पूर्वाभिमुखी सन् उपासते – **नमस्ते बृहते यस्त उत्तरः पक्षः।** चित्याग्नेः पश्चिमदिशि पूर्वाभिमुखी पुच्छस्य उपासनां कुर्वन् कथयति – **नमस्ते भद्राय यस्ते पुच्छं यास्ते प्रतिष्ठा।** पुच्छस्य दक्षिणभागे पूर्वाभिमुखी सः आत्मानम् उपासते – **नमस्ते राजनाय यस्त आत्मा।**

चित्याग्नेः उपासनाकरणानन्तरं होतुः कक्षे प्रवेशात् पूर्वमेव अध्वर्युः प्रेङ्खं सम्पादयति। प्रेङ्खे द्वे फलके स्याताम्। **द्वे एव स्याताम् द्वौ वा इमौ लोकावद्धातमाविव दृश्येते य उ एने अन्तरेण आकाशः सोऽन्तरिक्षलोकस्तस्माद्द्वे एव स्याताम्, इति।** प्रेङ्खाय फलकं उदुम्बरमयम् अथवा पलाशमयं भवति यतोहि उदुम्बरम् अन्नं भवति। अतः अन्नप्राप्तये फलके उदुम्बरमये भवेताम्। **औदुम्बरे स्यातामूर्ग्वा अन्नाद्यमुदुम्बर ऊर्जोऽन्नाद्यस्यावरुद्धयै।** द्वयोः फलकयोः सन्धानार्थं काष्ठस्य अग्रिमः भागः सूक्ष्मः भवति। पूर्वस्मात् पश्चिमप्रेङ्खस्य विस्तारः प्राणमात्रं तथा च उत्तरतः दक्षिणप्रेङ्खस्य विस्तारः निमुष्टिकमात्रं भवति। पृथिव्याम् उत्तरं दक्षिणं च प्रति स्तम्भद्वयं स्थापयित्वा होतृस्थानं परितः यजमानमुखपरिमितं वीवधनामकं काष्ठं स्थाप्यते। प्रेङ्खस्य फलकं परितः छिद्राणि कृत्वा दर्भरज्जुभिः दृढतया बन्धनं क्रियते। प्रेङ्खः भूमेः मुष्टिमात्रं उर्ध्वं भवेत् यतोहि अन्नं मुष्टिद्वारा निर्मीयते तथा च मुष्टिद्वारा एव गृह्यते अतः अन्नप्राप्तये प्रेङ्खः भूमेः मुष्टिमात्रम् उपरि भवेत्।

मुष्टिमात्रे स्यादेतावता वै सर्वमन्नाद्यं क्रियत एतावता सर्वमन्नाद्यमभिपन्नं तस्मान्मुष्टिमात्र एव स्यात्। होता उदुम्बरनिर्मितां शततन्तीवीणां प्राणापानव्यानवृत्तीनां रक्षायै त्रिवारम् उन्मार्जयति। तदनन्तरं भूः, भुवः, स्वः व्याहृतीनां पाठं करोति। वसुः गायत्रीछन्दसा , रुद्रः त्रिष्टुप्छन्दसा , आदित्यः जगतीछन्दसा तथा च विश्वेदेवाः अनुष्टुभ्छन्दसा प्रेङ्खम् अधिरोहन्ति। तदनन्तरं होता प्रेङ्खे उपविशति। अत्र अष्टवसुभिः सह गायत्रीपादस्य अष्टाक्षराणां , एकादशरुद्रैः सह त्रिष्टुप्पादस्य एकादशाक्षराणां , द्वादशादित्यैः सह जगतीपादस्य द्वादशाक्षराणां संयोगः दर्शनीयः वर्तते। उद्गाता उदुम्बरनिर्मितायाम् आसन्द्याम् उपविशति। अध्वर्युः दर्भासने उपविशति। तैत्तिरीयसंहितायामपि इत्थमेव वर्णितम्। **आसन्दीमुद्गाताऽऽरोहति साम्राज्यमेव गच्छति प्लेङ्खं होता नाकस्यैव पृष्ठं रोहन्ति कूर्चौ अध्वर्युः ब्रध्नस्य एव विष्टपं गच्छन्ति एतावन्तो हि देवलोकाः।** [32] होता उक्थवीर्यस्य उच्चारणं करोति। यजमानः ब्राह्मणेभ्यः अत्यधिकम् अन्नं ददाति। राजपुत्रः चर्मणः वेधं करोति। भूमिदुन्दुभि उपरि आघातः क्रियते। [33] यजमानपत्न्यः काण्डवीणां वादयन्ति। स्त्रीणाम् उपस्थितिः सक्रियता च एतस्य महाव्रतस्य लोकप्रियतां प्रकटयति। पशूनां मैथुनं

CC BY

कार्यते। पशवः कृषौ सहायकाः भवन्ति। एतेन अनुमीयते यत् महाव्रतस्य उद्देश्यं कृषिः तथा च पशु समृद्धिः वर्तते। ब्रह्मचारिपुंश्चल्योः सम्प्रवादः भवति। मन्त्रैः ऋषभः विश्वकर्मणे दीयते। ऋषभः प्रजननशक्तेः प्रतीकः वर्तते। विश्वकर्मणा सह तस्य सम्बन्धः विश्वकर्मणः द्वारा सृष्टेः उत्पत्तिं द्योतयति।

एतदनन्तरं होता निष्केवल्यशस्त्रस्य प्रारम्भं करोति। निष्केवल्यशस्त्रस्य प्रारम्भः **तदिदास भुवनेषु ज्येष्ठम्**[34] मन्त्रेण क्रियते। निष्केवल्यशस्त्रे तदिदास –मन्त्रः नदं व ओदतीनाम्[35] नद् लिङ्गकमन्त्रेण मिश्रितः कथितः। निष्केवल्यशस्त्रं तदैव पूर्णं मन्यते यदा त्रिष्टुभ् (तदिदास) अनुष्टुभ् (नदं व) अनयोः सम्मिश्रणं क्रियते। यतोहि पुरुषः स्वात्मानं स्त्रिया सह एव पूर्णं मनुते[36]। **तदिदास भुवनेषु ज्येष्ठम्** सूक्ते नव मन्त्राः सन्ति तथा च प्राणाः अर्थात् विशिष्टानि अङ्गानि अपि नव एव सन्ति। द्वौ स्तनौ , द्वे नेत्रे , द्वौ कर्णौ , द्वौ नासारन्ध्रौ , एकं मुखम्। [37]

तां सुते[38] सूक्ते षड् मन्त्राः सन्ति। एतेषां पाठेन षण्णाम् ऋतूनां प्राप्तिर्भवति। षळृचं भवति पञ्चपदा पङ्क्तिः पङ्क्तिर्वा अन्नमन्नाद्यस्यावरुद्धयै। **भूयः इद्वावृधे वीर्याय**[39] सूक्ते पञ्च मन्त्राः सन्ति। पङ्क्ति पञ्चपदा वर्तते तथा च पङ्क्तिः अन्नं वर्तते। अतः अन्नप्राप्तये एतेषां पञ्च मन्त्राणाम् उच्चारणं क्रियते। **नृणामु त्वा**[40] तृचस्य पाठेन त्रयाणां लोकानां प्राप्तिः भवति।

निष्केवल्यशस्त्रं पक्ष्याकारं कथितम्। पक्ष्याकारस्य निष्केवल्यशस्त्रस्य शरीरस्य मध्यभागः **"तदिदास भुवनेषु ज्येष्ठम्"** अनेन निरूपितं वर्तते। एतदनन्तरं सूददोहस्य पाठः (वा अस्य सूददोहसः)[41] भवति। यथा प्राणवायुः शरीरस्य सर्वाणि अवयवानि योजयति तथैव सूददोहाः मन्त्राः अपि शस्त्रभागस्य सर्वाणि मध्यदेहग्रीवादि अवयवानि योजयति। **प्राणौ वै सूददोहाः प्राणेन पर्वाणि संदधाति**। [42] मध्यशरीरस्य मन्त्राणाम् उच्चारणानन्तरं ग्रीवामन्त्राणां पाठः भवति। एते त्रयः मन्त्राः उष्णिक् छन्दसि सन्ति। एते पञ्चमारण्यके पठिताः सन्ति। निष्केवल्यशस्त्रस्य शिरस्मन्त्राणाम् उपासना गायत्रीछन्दसि क्रियते शिरोगायत्र्योरग्रत्वसाम्यात्। शिरोभागमन्त्राः प्रजापतये सन्ति। एतदनन्तरं सूददोहस्य पाठः भवति।

शिरोभागस्य मन्त्राणाम् उच्चारणानन्तरम् विजवमन्त्राणां पाठः भवति। ग्रीवायाः अधस्तना अस्थिविशेषाः विजवः कथ्यन्ते। विजवमन्त्राः विराट्छन्दसि वर्तन्ते। विराट् अन्नं वर्तते। **अन्नं हि विराळन्नमु वीर्यं।** एते मन्त्राः अपि पञ्चमे आरण्यके पठिताः। अन्नप्राप्तये एते पठ्यन्ते। एतदनन्तरं सूददोहस्य पाठः भवति।

पक्ष्याकारस्य निष्केवल्यशस्त्रस्य प्रथमतया दक्षिणपक्षः वर्ण्यते। दक्षिणपक्षस्य मन्त्राः रथन्तरसामेन सह सम्बन्धिताः सन्ति। एतस्मिन्दक्षिणे पक्षे शतमृचः सम्पद्यन्ते। एतस्यापि विस्तरेण वर्णनं षष्ठे अध्याये क्रियते। एतदनन्तरं सूददोहस्य पाठः भवति। इत्था हि सोमः [43] मन्त्रः पङ्क्तौ पठ्यते।

निष्केवल्यशस्त्रस्य उत्तरपक्षः बृहत्सामेन सम्बन्धितः वर्तते। एतस्यापि विस्तरेण वर्णनं षष्ठे अध्याये क्रियते। एतदनन्तरं सूददोहस्य पाठः भवति। **इन्द्रो मदाय वावृधे** [44] मन्त्रः पङ्क्तौ पठ्यते।

" **अभि त्वा शूर** " आरभ्य " **इत्था हि सोम** " पर्यन्तं १०१ मन्त्राः सम्पन्नाः भवन्ति। वसिष्ठमुनिः एतान् स्वसामर्थ्येन सम्पन्नान् कृतवान् अतः एते वसिष्ठप्रासाहः कथ्यन्ते। " **त्वामिद्धि हवामहे** " आरभ्य " **इन्द्रो मदाय वावृधे** " यावत् १०२ मन्त्राः सम्पन्नाः भवन्ति। भारद्वाजमुनिः एतान् स्वसामर्थ्येन सम्पन्नं कृतवान् अतः एते भारद्वाजप्रासाहः कथ्यन्ते। दक्षिणपक्षस्य स्तुतिः पञ्चदशस्तोमेन तथा च उत्तरपक्षस्य स्तुतिः सप्तदशस्तोमेन क्रियते।

निष्केवल्यशस्त्रस्य पुच्छभागस्य २१ मन्त्राः द्विपदभद्रसोमेन सम्बद्धाः सन्ति। **इमा नु कं भुवना**[45] सूक्तस्य पञ्च ऋचाः तथा च **आयाहि वनसा** [46]सूक्तस्य चतसृभिः ऋग्भिः नव मन्त्राः सम्पन्नाः भवन्ति। एतेषां विस्तरेण वर्णनं षष्ठे अध्याये क्रियते। एतदनन्तरं ९ द्विपदाः सामवेदे सन्ति। **एष ब्रह्मा** इत्यादि तिसृणां द्विपदां वर्णनम् ऐतरेयारण्यके वर्तते। एतदनन्तरं सूददोहस्य पाठः भवति।

निष्केवल्यशस्त्रे पक्षिणः भोजनरूपे गायत्रीबृहत्युष्णिगां समूहाः सन्ति। गायत्र्याः २४० मन्त्रैः पृथिव्यां यशकीर्तिधनधान्यादीनां प्राप्तिः भवति। बृहतीछन्दसः २४० मन्त्रैः अन्तरिक्षे यश-कीर्ति-धनादीनां प्राप्तिः भवति। उष्णिक्छन्दसः २४० मन्त्रैः द्युलोके यशोधनादीनां प्राप्तिः भवति। त्रिरावृत्या एते (२४० × ३=७२०) मन्त्राः ७२० भवन्ति। एतेन वर्षस्य ३६० दिवसान् ३६० रात्रीः प्रति सङ्केतः क्रियते यतोहि शाङ्खायनारण्यके अपि एतादृशः एव उल्लेखः वर्तते। वशनामकेन ऋषिणा दृष्टं एकविंशत्यृचात्मकं वशनामकं सूक्तं पक्ष्याकरस्य निष्केवल्यशस्त्रस्य उदरभागः कथितः। **त्वाऽवतः**[47] आरभ्य **सनितः सुसनितः**[48] पर्यन्तं वश नामकं सूक्तं कथितम्। ततः सूददोहा एकेत्येवमेकविंशतिसङ्ख्या। मानवशरीरस्य उदरे अपि अवयवानां संख्या एकविंशतिः कथिता। **ता एकविंशतिर्भवन्त्येकविंशतिर्हि ता अन्तरुदरे विकृतयः।**

उदरभागशंसनानन्तरं शस्त्रपक्षिणः ऊरुभागं विधत्ते। इन्द्रः अग्निश्च ऊरू मन्येते यतोहि इन्द्राग्नी सर्वेभ्यः बलिष्ठौ स्तः। " **इन्द्राग्नी वै देवानामोजिष्ठौ बलिष्ठौ** "। [49]

निष्केवल्यशस्त्रस्य समापनं " **योनिष्ट इन्द्र सदने अकारि** "[50] वसिष्ठ सूक्तेन कृतं वर्तते यतोहि वसिष्ठः (वस् निवासार्थके) सर्वेषाम् अतिशयनिवासहेतुः वर्तते। **वासिष्ठेन परिदधाति वसिष्ठोऽसानीति।** [51] एतस्य सूक्तस्य समापनेन सह एव माध्यन्दिनं सवनं समाप्तं भवति।

निष्केवल्यशस्त्रस्य समाप्ते सति होता उक्थदोहस्य पाठं करोति। उक्थदोहमन्त्राः केवलं पञ्चमे आरण्यके सन्ति , अतः तेषां विषये षष्ठे अध्याये वर्ण्यते। अध्वर्यु आहुतिना पूर्णं पात्रं तथा च त्रीणि अतिग्राह्य पात्राणि आनयति। **आहरत्यध्वर्युरुक्थपात्रमतिग्राह्यांश्चमसांश्च।** [52] (यथैव होता भोजनं पश्यति तथैव प्रेङ्खादवरोहति पूर्वदिशं प्रति। " **भक्षं प्रतिख्याय होता प्राङ्प्रेङ्खादवरोहति** "। एतस्य वर्णनं पञ्चमे आरण्यके अस्ति

सायंसवनम्

वैश्वदेवशस्त्रम् –

सायंसवने वैश्वदेवशस्त्रस्य तथा च अग्निमारुतशस्त्रस्य वर्णनं वर्तते। तृतीयं सवनं वैश्वदेवसवनं कथ्यते। **वैश्वदेवं वै तृतीयसवनम्।** [53] वैश्वदेवसमृद्धये **तत्सवितुर्वृणीमहे**[54] क्रमशः

CC BY

प्रतिपदनुचरौ तृचौ स्तः। ततः परं (ऋ. ४.३६., ४.५३., १.८९., १.१८५., १.१६४., १.४१.) सूक्तानां पाठेन महाव्रतं पूर्णं भवति।

आग्निमारुतशस्त्रम् –

वैश्वदेवशस्त्रानन्तरं होत्रा आग्निमारुतशस्त्रस्य आरम्भे क्षेमप्राप्तिहेतवे (ऋ. ३.२., ५.५५., १.९९., १.९४.) सूक्तानि पठ्यन्ते। एवं महाव्रतस्य दिनं सम्पन्नं भवति। महाव्रतस्य समाप्ते सति प्रेङ्खः पात्राणि च समीपस्थे जले प्रक्षाल्यन्ते। आसनानि च अग्नौ क्षिप्यन्ते।

ग्रन्थान्तरेषु अपि महाव्रतस्य शब्दान्तरैः स्वशाखायाः प्रतिपाद्यविषयानुसारं अनेन प्रकारेण एव वर्णनं वर्तते। तत्र संहितासु तैत्तिरीयसंहितायां सर्वप्रथमं महाव्रतस्य वर्णनं वर्तते। काठकसंहितायामपि संक्षेपेण वर्णनं प्राप्यते। तत्रोक्तं यत् विविधानां साम्नामुच्चारणेन विविधानाम् इच्छानां पूर्तिः भवति। **क्रोश**नामकसामद्वारा **अपगतसामर्थ्य**स्य प्राप्तिः भवति। **ऋद्धि**नामकसामद्वारा। **समृद्धि**प्राप्तिः भवति। **प्रजापतिहृदय**नामकसामद्वारा **प्रजापतौ प्रीतिः** भवति। **श्लोकानुश्लोक**नामकसामद्वारा **कीर्तिं** प्राप्नोति। पञ्चदशस्तोमस्य रथन्तरसाम्नि स्तुतिः कर्तव्या यतोहि पञ्चदशद्वारा इन्द्रियाणि प्राप्नोति। सप्तदशस्तोमस्य बृहत्साम्नि स्तुतिः कर्तव्या यतोहि सप्तदशस्तोमः प्रजाप्राप्तौ सहायकः भवति। एकविंशस्तोमस्य भद्रसाम्नि स्तुतिः कर्तव्या। पञ्चविशस्तोमद्वारा प्रजापतेर्प्राप्तिर्भवति। पञ्चविंशतिस्तोत्रान्विते पञ्चविंशस्तोमे ऋत्विक् पञ्च स्तोत्राणि उत्थाय पञ्च उपविश्य पठति। सत्रस्य समाप्तौ यजमानः हर्षेण उच्चैः ध्वनिं करोति। **उत्क्रोदं कुर्वते यथा बन्धनानमुमुचाना उत्क्रोदं कुर्वत इषमूर्जमात्मन्दधाना।** [55] महाव्रतस्य उद्देश्यं अन्नाप्रजास्वर्गादि वर्तते॥

टिप्पण्यः

1 ऐतरेयारण्यकम् १.१ मङ्गालचरणम् ७ सायणभाष्यम्, १९९२

2 गोपथ ब्रा. पूर्वभागः १.१२

3 द्वादशाहः सत्रमहीनश्च –का. श्रौ.सू. १२.१.४ श्रीविद्याधर व्याख्या।

4 निरूक्तम् २.२

5 कात्यायनश्रौतसूत्रम् अ.१३ क. १ सू. ३,४,५,८

6 कात्यायनश्रौतसूत्रम् अ.१३ क.२ सू. ३-८

7 षडहः नाम षट्सु दिवसेषु क्रियमाणं कर्म।

8 (का. श्रौ. सू. १३.१.२.-२१.)

9 ऐ.आ. १.१.१

10 तै. ब्रा. १.२.६.१.

11 ऋ• ७.१.१.

12 ऐ• आ• १. १. १.

13 ऋ• ३. १३. १.

14 (ऋ• ८. ७४. १.)

15 (ऋ• ५.१. १.)

16 (ऋ• २. ५. १.)

17 (ऋ• ७. १. १.)

18 ऋ• ८. ७४. १-१२

19 शा• आ• १

20 ऋ• ७. १.

21 शा• आ• १

22 ऋ• १. २. १-९, १. ३. १-१२

23 एतरेयारण्यकम्-१.१.३.

24 (ऋ० १. २. १.)

25 (ऋ ० ८. ६८. १–३.)

26 ऐ० आ० १. २. १.

27 ऋ० ८. ५३. ५,६

28 (ऋ १. ४०. ५.)

29 ऐ०आ०१.२. १.

30 का. सं. १३. २०

31 The beating of thighs is a remnant of more serious effort to expel evil influences and promote fertility.

32 तै. सं. ७. ५. ८. २७

33 दुन्दुभीन्तसमाघ्नन्ति परमा वा एषा वाग्या दुन्दुभौ परमामेव वाचमवरुन्धते। तै. सं. ७. ५. ९.

34 ऋ. १०. १२०. १.

35 ऋ. ८. ६९. २.

36 पुरुषो जायां वित्त्वा कृत्स्नतरमिवाऽऽत्मानं मन्यते। ---- ऐ.आ. १.३.५.

37 नव वै प्राणाः (नाभेरूर्ध्वं नव प्राणा द्वौ स्तन्यौ सप्त मूर्धनि)। -- ऐ. ब्रा. १८.२.

38 ऋ.१०.५४. १.

39 ऋ. ६. ३०.

40 ऋ. ३. ५१. ४.

41 ऋ. ८. ६९. ३.

42 ऐ. आ. १. ४. १.

43 ऋ. १. ८०. १.

44 ऋ. १. ८१. १.

45 ऋ. १०. १५७.

46 ऋ. १. १७२

47 ऋ. ८. ४६. १.

48 ऋ. ८. ४६. २०.

49 तै. ब्रा. ३. ७. ८.

CC BY

---

50 ऋ. ०७. २४. १.

51 ऐ. आ. १. ५. २.

52 ऐ. आ.५ .३. २

53 तै. सं. ७. ५. ६.

54 ऋ. ५. ८३. १.

55 तै. सं. ७. ५. ९.

डॉ. रणजीतकुमारः
Dr. Ranajeet Kumar
सहायक-आचार्यः, संस्कृतविभागः
केन्द्रीयविश्वविद्यालयः हिमाचलप्रदेशः धर्मशाला।
ranjeetsharma56@gmail.com

***

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

शब्दानुशासनशास्त्रे सादृश्यतत्त्वविचारः

- शम्पा पालः

शोधसारः -

तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वं सादृश्यम्'। सादृश्यं नाम तुल्यत्वं समानरूपत्वं वेति। अर्थात् सादृश्यं यस्यास्ति स सदृशः। सदृशस्य भावः सादृश्यम्। शास्त्रेषु बहुत्रैव सादृश्यतत्त्वसम्बन्धीयाः सिद्धान्ताः अस्माभिः परिलक्ष्यन्ते। षड्विधेषु पाणिनीयसूत्रेषु अन्यतमानाम् अतिदेशसूत्राणां सादृश्यमूलकत्वम्। अविद्यमानधर्मप्रापकं सूत्रम् अतिदेशसूत्रम्। आरोपबोधकजनकः अतिदेशः। अतिदिश्यन्ते तुल्यतया विधीयन्ते कार्याणि येन सः अतिदेशः। लोके सादृश्यवाचकानां यथेवादिशब्दानां, वतिप्रत्ययस्य वा प्रयोगे साक्षाद् अतिदेशः अवगम्यते। अत्यन्तभिन्नयोः अग्निमाणवकयोः, गोवाहीकयोश्च अभेदान्वयानुपपत्त्या अग्निसदृशो माणवकः, गोसदृशो वाहीक' इत्यर्थः प्रतीयते। कर्मधारयसमासघटितानि सूत्राणि सर्वाणि सादृश्यमूलकानि। तद्भिन्नत्वे सति तद्गतोभूयो धर्मवत्त्वम् नाम सादृश्यम्। एतदपि सत्यं यत् सादृश्यबोधकं वाक्यमेव अतिदेशवाक्यमिति वक्तुं शक्यमिति। अर्थात् व्याकरणशास्त्रस्य ये्षु सूत्रेषु सादृश्यतत्त्वं विद्यते नाम, तेषां स्थालिपुलाकन्यायेन सादृश्यत्त्वविचारो हि मदीयः आशयः।

किं नाम सादृश्यतत्त्वम्

सादृश्यं नाम तुल्यत्वं समानरूपत्वं वेति। अर्थात् सादृश्यं यस्यास्ति स सदृशः। सदृशस्य भावः सादृश्यम्। सादृश्यं नियतरूपेण प्रतियोगिनम् अनुयोगिनञ्च अपेक्षते। ननु को नाम प्रतियोगी कश्च अनुयोगीति चेदुच्यते – यस्य सादृश्यं, स प्रतियोगी तथा च सादृश्यं यत्र, सः अनुयोगी। यथा – 'चन्द्रवत् मुखम्'। चन्द्रस्य सादृश्यं मुखे अस्तीति कृत्वा सादृश्यस्य प्रतियोगी चन्द्रः तथा च अनुयोगी तावत् मुखम्। सिद्धान्तमुक्तावल्ल्यां सादृश्यलक्षणम् उपलभ्यते – 'तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वं सादृश्यम्' इति। अत्र तच्छब्देन सादृश्यस्य प्रतियोगी अवबुद्ध्यते। 'चन्द्रवन्मुखम्' इत्यत्र तच्छब्दार्थः चन्द्रः। मुखं चन्द्राद् भिन्नवस्तु परं मुखे चन्द्रगत-आह्लादकत्वादिधर्मो विद्यते इति कृत्वा तत्र चन्द्रसादृश्यम् अस्ति। शास्त्रेषु बहुत्रैव सादृश्यतत्त्वसम्बन्धीयाः सिद्धान्ताः अस्माभिः परिलक्ष्यन्ते।

अतिदेशसूत्राणां मूलं हि सादृश्यतत्त्वम्

CC BY

षड्विधेषु पाणिनीयसूत्रेषु अन्यतमानाम् अतिदेशसूत्राणां सादृश्यमूलकत्वम्। अविद्यमानधर्मप्रापकं सूत्रम् अतिदेशसूत्रम्। आरोपबोधकजनकः अतिदेशः। अतिदिश्यन्ते तुल्यतया विधीयन्ते कार्याणि येन सः अतिदेशः। अतीत्युपसर्गपूर्वकात् ''दिश-अतिसर्जने इति धातोः भावे घञि अतिदेशशब्दः निष्पद्यते। अति अतिक्रम्य, देशः उद्देशः बोधनम् अतिदेशः इत्युच्यते। यथा गवि विद्यमानानां जाड्यमान्द्यादिधर्माणां स्वविषयं गामतीत्य अन्यत्र वाहीके बोधनं क्रियते 'गौर्वाहीकः' इति वाक्येन। एवमन्यत्र विद्यमानानां धर्माणाम् अन्यत्र अतिदेशनम् अतिदेशो भवति। सादृश्यबोधकवाक्यम् अतिदेशवाक्यम् इत्यपि वक्तुं शक्यते। यथा 'चन्द्र इव मुखम्' इत्यादौ चन्द्रभिन्ने मुखे चन्द्रगतवर्तुलत्वाह्लादकत्वादिभूयो धर्मसम्बन्धः बोध्यते इति।

लोके सादृश्यवाचकानां यथेवादिशब्दानां, वतिप्रत्ययस्य वा प्रयोगे साक्षाद् अतिदेशः अवगम्यते। यथा- 'गौरिव गवयो वर्तते, यथा गौस्ततथा गवयः, गोसदृशो गवयः, गोवद्गवयो वर्तते' इत्यादिषु प्रयोगेषु यथेवादिशब्दानां प्रयोगाद् गोसादृश्यम्' गोगतधर्मातिदेशो गवये साक्षात्प्रतीयते। क्वचित्तु यथेवादिशब्दाप्रयोगे अपि वाच्यार्थानुपपत्त्या सादृश्यार्थः लक्ष्यते। यथा अग्निर्माणवकः, गौर्वाहीकः इत्यादौ। अत्र अत्यन्तभिन्नयोः अग्निमाणवकयोः, गोवाहीकयोश्च अभेदान्वयानुपपत्त्या अग्निसदृशो माणवकः, गोसदृशो वाहीक' इत्यर्थः प्रतीयते।

पाणिनीये 'स्थानिवदादेशऽनल्विधौ'[1] इत्यादीनि अतिदेशसूत्राणि। अल्वृत्तिधर्माश्रये भिन्ने कार्ये कर्तव्ये आदेशः स्थानिवत् स्थानिना तुल्यं भवति इत्यर्थकेन स्थानिवदादेशोऽनल्विधौ इति सूत्रेण आदेशे अविद्यमानस्य धर्मस्य स्थानितः तत्र प्रापणं क्रियते। यथा राम + ङे इत्यत्र ङे प्रत्ययस्य 'ङेर्यः'[2] इत्यनेन सूत्रेण। य इत्यादेशे राम + य इति जाते, यादेशे यञादित्वस्य सत्त्वेऽपि सुप्त्वाभावात् अदन्तस्याङ्गस्य दीर्घः स्यात् यञादौ सुपि परे इत्यर्थकेन 'सुपि च'[3] इत्यनेन सूत्रेण दीर्घो न प्राप्नोति। अतः राम + य इत्यत्र प्रकृतसूत्रेण ङेप्रत्ययवृत्तिसुप्त्वं यादेशे अतिदिश्यते। तदा स्वतो विद्यमानं यञादित्वम् आतिदेशिकं सुप्त्वं चाश्रित्य यञादिसुप्परत्वस्य सत्त्वात् सुपि च इत्यनेन सूत्रेण दीर्घप्रवृत्तौ रामाय इति रूपं भवति।

तानि अतिदेशसूत्राणि पाणिनीये द्वेधा समुपलभ्यन्ते - वतिप्रत्ययान्तघटितानि, तदघटितानि चेति। यथेवादिशब्दघटितानि तु प्रायशः न सन्ति एव। तत्र

---

[1] *अष्टाध्यायी* (१।१।५६)

[2] तदेव (७।१।१३)

[3] तदेव (७।३।१०२)

'आद्यन्तवदेकस्मिन्'[4], 'स्थानिवदादेशोऽनल्विधौ'[5], 'कर्मवत्कर्मणा तुल्यक्रियः'[6] 'तृजवत्क्रोष्टः'[7] इत्यादीनि अतिदेशसूत्राणि वत्यन्तघटितानि। 'गाङ्कुटादिभ्योऽञ्णिन्ङित्'[8], 'असंयोगाल्लिट् कित्'[9] 'गोतो णित्'[10] इत्यादीनि तु वत्यन्ताघटितानि।

समासघटितसूत्रेषु सादृश्यततत्त्वम् -

व्याकरणस्य विविधेषु सूत्रेषु सादृश्यस्य उल्लेखः अस्ति। तत्र उपमामूलककर्मधारयः समासः त्रिविधः – उपमानकर्मधारयः, उपमितिकर्मधारयः तथा च रूपककर्मधारयः। ननु को नाम कर्मधारय इति चेदुच्यते तत्पुरुष समानाधिकरणः कर्मधारय इति कर्मधारयसमासविधायकं सूत्रम्। उपमायां विषयत्रयम् अपेक्षितम् – उपमेयम्, उपमानम् साधारणधर्मश्चेति। 'उपमीयते यत् तत् उपमेयम्'। 'उपमीयते येन तत् उपमानम्'। 'उपमानोपमेययोः साधारणो धर्मः सामान्यवचनम्'।

तत्र <u>उपमानकर्मधारयविधायकं सूत्रं</u> तावत् – 'उपमानानि सामान्यवचनैः'[11]। अर्थात् उपमानवाचीनि सुबन्तानि सामान्यवचनैः सुवन्तैः सह समस्यन्ते। यथा घन इव श्यामः – घनश्यामः।

<u>उपमितकर्मधारयविधायकं सूत्रं</u> खलु 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे'[12] इति। अर्थात् विशेषेण समासेन सिद्धे विशेषस्य पूर्वनिपातार्थमिदं सूत्रम्। साधारणधर्मस्य अप्रयोगे उपमेयवाचि सुबन्तव्याघ्रादिभिः उपमानैः सह समस्यते। उदाहरणम् पुरुषः व्याघ्र इव – पुरुषव्याघ्रः। परं साधारणधर्मोल्लेखान्न हि समासः। यथा – पुरुषः व्याघ्र इव शूरः।

<u>रूपककर्मधारयविधायकं सूत्रं</u> – 'रूपकमभेदे'[13] इति। न हि एतत् पाणिनेः सूत्रम्। 'मयूरव्यंसकादिभ्यश्च' इति सूत्रेण रूपककर्मधारयः। उपमानोपमेययोः अभेदे विवक्षिते रूपकं

---

4 तदेव (१।१।२१)

5 तदेव (१।१।५६)

6 तदेव (३।१।८७)

7 तदेव (७।१।९५)

8 *अष्टाध्यायी* (१।२।१)

9 तदेव (१।२।५)

10 तदेव (७।१।९०)

11 तदेव (२।१।५५)

12 तदेव (२।१।५६)

13 सूत्रमिदं न हि पाणिनेः, परं व्याख्यासम्मतम्। पाणिनिमते एतत् मयूरव्यंसकादिवत्।

CC BY

स्यात्। यथा – मुखम् एव चन्द्रः – मुखचन्द्रः (सुन्दरः)। अत्रापि सादृश्यतत्त्वमाधारीकृत्य रूपककर्मधारयो भवति।

तत्पुरुषसमासविधायके 'पूर्व-सदृश-समोनार्थ-कलह-निपुण-मिश्र-श्लक्ष्णैः'[14] इति सूत्रे सदृशशब्देन सह तृतीयान्तपदस्य तृतीयातत्पुरुषो भवति। यथा – पित्रा सदृशः – पितृसदृशः। अपि च, अव्ययीभावसमासघटिते 'अव्ययं विभक्ति-समीप-समृद्धि-वृद्ध्यर्था-भावात्यय-सम्प्रति-शब्दप्रादुर्भाव-पश्चाद्-यथानुपूर्व्य-यौगपद्य—सादृश्य-सम्पत्ति-साकल्यान्तवचनेषु'[15] इति सूत्रे सादृश्यार्थे वर्तमानं विभिन्नम् अव्ययं सुवन्तेन सह समस्यते, स च समासः अव्ययीभावसंज्ञः स्यात्। उदाहरणं तावत् सख्या सदृशः (तुल्यम्) –ससखि। अत्रेदम् उल्लेखार्हं यत् यथा इति पदस्य चतुर्विधेष्वर्थेषु (योग्यता-वीप्सा-पदार्थानतिवृत्ति-सादृश्याः) सादृश्यम् एकतमम्। हरेः सादृश्यम् सहरि।

अष्टाध्याय्यां प्राप्तेषु सादृश्यमूलकेषु सूत्रेषु कानिचित् अधस्तात् उल्लिख्यन्ते-

1. सदृशप्रतिरूपयोः सादृश्ये (सदृश-प्रतिरूपयोः उत्तरपदयोः सादृश्यवाचिनि तत्पुरुषे समासे पूर्वपदम् प्रकृतिस्वरं भवति। पितृसदृशः। परं षष्ठीसमासार्थं च सदृशग्रहणम् इह तदलुकि षष्ठ्याः प्रयोजयति, दास्याः सदृशः इति।)
2. कर्मवत् कर्मणा तुल्यक्रियः।
3. कालोपसर्जने च तुल्यम्।
4. तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः
5. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्।
6. तुल्यास्यप्रयत्नं सवर्णम्।
7. तेन तुल्यं क्रिया चेद्वतिः (वतिप्रत्ययस्य सादृश्यार्थकत्वं तेन तुल्यं क्रिया चेद्वतिः, तत्र तस्येव इति सूत्राभ्यां बोधितम्।)
8. तेन सहेति तुल्ययोगे।
9. इवे प्रतिकृतौ।
10. तत्र तस्येव (चैत्रवत् मैत्रस्य गावः, मन्मथवदस्य सौन्दर्यम् इत्यादौ षष्ठ्यन्तेभ्यः चैत्रादिभ्यः इवार्थे वतिः। चैत्रसम्बन्धिगोसदृशाः मैत्रसम्बन्धिगावः इत्यादिरूपेण बोध्यः। चैत्रस्य गवां, मैत्रस्य गवां च बोधितं सादृश्यं समानगोमत्वेन चैत्र-मैत्रयोः सादृश्यं सूचयति।)

पूर्वोक्तेषु सर्वेषु सूत्रेषु सादृश्यमूलकत्वं विद्यते नाम। सर्वत्रैव सादृश्यमेव सूत्रार्थः। अर्थात् तद्भिन्नत्वे सति तद्गतोभूयो धर्मवत्त्वम् नाम सादृश्यं पूर्वोक्तेषु सूत्रेषु राजते। एतदपि सत्यं यत् सादृश्यबोधकं वाक्यमेव अतिदेशवाक्यमिति वक्तुं शक्यमिति शिवम्।।

---

[14] *अष्टाध्यायी* (२।१।३१)

[15] तदेव (२।१।६)

परिशीलिता ग्रन्थानुक्रमणी

✓ दीक्षितः। *वैयाकरणसिद्धान्तकौमुदी।* (सम्पा.) गोपालदत्तः पाण्डेयः। वाराणसी : चौखाम्बा सुरभारती प्रतिष्ठानम्। 2001।

✓ पाणिनिः। *अष्टाध्यायी।* (सम्पा.) तपनशङ्करः भट्टाचार्यः। कोलकाता : संस्कृत वुक् डिपो। 2006।

✓ दीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा-तत्त्वबोधिनीव्याख्यासहितः)। वाराणसी। मोतिलाल बनारसीदास। 1987 (चतुर्थो भागः)।

✓ लक्ष्मीनरसिंहः, श्रिष्टिः। *पाणिनीये अतिदेशानुशीलनम्।* तिरुपतिः। राष्ट्रियसंस्कृतविद्यापीठम्। 2008।

श्रीमती शम्पा पालः

Ms. Shampa Paul

गवेषिका, संस्कृतविभागः

वाँकुड़ा-विश्वविद्यालयः, पश्चिमवङ्गः

Shampapaul.paul@gmail.com

***

CC BY

शाब्दिकनिकाये शाब्दिकस्य अन्नम्भट्टस्य अवदानम्

- सुजित-माइतिः

शोधसारः -

व्याकरणशास्त्रस्येतिहासे व्याकरणमिताक्षरा महाभाष्यप्रदीपोद्योतनम् चेति ग्रन्थद्वयस्य प्रणेतुः शाब्दिकत्वेन अप्रसिद्धस्य ऋग्वेदीयस्य त्रैलिङ्गदेशीयस्य अन्नम्भट्टस्य परिचयोऽस्मिन् शोधप्रबन्धे यथामति यथाप्रमाणं प्रस्तूयते। एतस्य शाब्दिकस्य देशकालादिविषये पण्डितमहले मतानैक्यं वर्तते। तथापि क्वचित् तुलनात्मकाध्ययनेन क्वचित् दृढतरप्रमाणान्तराभावाद् प्रचलितमतमाधारीकृत्य अन्नम्भट्टस्य देशकालादयः निर्णीयन्ते। तस्य गुरुः क आसीदित्यस्मिन् विषयेऽपि प्राप्तानि मतानि अत्र उल्लिख्यन्ते। तस्य वैदुष्यं कीदृशम् आसीत् इत्यपि अत्र विचार्यते। अत्र शोधप्रबन्धे बहुत्र सिद्धान्तत्वेन सम्पादकस्य मिताक्षरायां कृतभूरिप्रिश्रमस्य भट्टनाथस्वामिविद्यारत्नस्य अभिमतम् अनुसृतम्। एवं तत्र तत्र ग्रन्थकारस्य विषये प्रचलितानि मतान्यपि शोधपत्रे उल्लिख्यन्ते। अन्नम्भट्टस्य कृतयोऽपि उल्लिख्यन्ते। एवं समासेन मिताक्षरायाः उद्योतनस्य च विवरणमपि वितन्यते। इत्थं 'शाब्दिकनिकाये शाब्दिकस्य अन्नम्भट्टस्य अवदानम्' इत्ययं शोधप्रबन्धः वितन्यते।

१. उपोद्घातः

पदसाधुत्वप्रतिपादकं शास्त्रं व्याकरणम्। तत्र व्युत्पत्तिप्रदर्शनेन पदानां साधुत्वं प्रतिपाद्यते। व्याक्रियन्ते व्युत्पाद्यन्ते अर्थवत्तया प्रतिपाद्यन्ते शब्दा येनेति व्याकरणमिति व्युत्पत्त्या एव व्याकरणशास्त्रस्य शब्दोपजीव्यत्वं सङ्गच्छते। षट्सु वेदाङ्गेषु मुखमिव प्रधानं भवति व्याकरणवेदाङ्गम्। अस्मिन् जगति प्रवहमानानां सर्वासामेव भाषाणां भित्तिस्वरूपं भवति व्याकरणवेदाङ्गम्। एवं संस्कृतभाषाया अपि। आवैदिककालाद् संस्कृतभाषायां यावन्ति व्याकरणानि विरचितानि तेषु चतुःसहस्रपरिमितसूत्रैः पाणिनिना विरचिता सूत्रात्मिका अष्टाध्यायी एव मूलभूता। पश्चात्काले च कात्यायनः सूत्राणामुपरि वार्तिकानि प्रणीतवान्। कालान्तरे भगवता पतञ्जलिना कात्यायनप्रणीतानां वार्तिकानामुपरि भाष्यं विरचितम्। यद् माहात्म्यातिरेकेण महाभाष्यमिति व्यवह्रियते। अतः पाणिनिर्हि सूत्रकारः, कात्यायनः खलु वार्त्तिककारः पतञ्जलिश्च भाष्यकारः। एते त्रयः मिलित्वा मुनित्रयमिति व्यवहारः। 'यथोत्तरं मुनीनां प्रामाण्यम्' इति वचनेन सूत्रकाराद् वार्तिककारस्य, वार्तिककाराद् महाभाष्यकारस्य च अधिकं प्रामाण्यं सूच्यते। इदं त्रिमुनिव्याकरणमाश्रित्य परवर्तिनि काले बहवः शाब्दिकाः व्याख्याग्रन्थान् प्रणीतवन्तः। तत्र च महाभाष्यस्य बहूनि

व्याख्यानानि दृश्यन्ते। तेषु कैयटस्य प्रदीपोऽन्यतमः। प्रदीपस्योपरि अपि बहवः व्याख्याग्रन्थाः प्रणीताः। अन्नम्भट्टेन प्रदीपस्योपरि उद्योतनम् इति नाम्ना एकः वृत्तिग्रन्थः विरचितः।

तथा इदमेव त्रिमुनिव्याकरणमुपजीव्य बहवः पण्डिताः नैकाः वृत्तीः विरचितवन्तः। व्याख्यादिशा व्याकरणस्यास्य प्रस्थानद्वयं दृश्यते। एकं सूत्रप्रस्थानं परन्तु कौमुदीप्रस्थानम्। सूत्रप्रस्थाने मूलग्रन्थस्तावत् काशिका। अन्नम्भट्टविरचिता मिताक्षरापि सूत्रप्रस्थाने अन्तर्याति। सूत्रप्रस्थाने यथानुपूर्वं सूत्राणां व्याख्या दृश्यते। कौमुदीप्रस्थाने तु बोधसौकर्याय प्रकरणदिशा सूत्राणां व्याख्या परिलक्ष्यते। कौमुदीप्रस्थानस्य मूलग्रन्थः भट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी। यद्यपि प्रस्थानक्रमेण विभागः सर्वैः न स्वीक्रियते। तथापि अष्टाध्याय्यां मिताक्षरावृत्तेः अवस्थानं कुत्र अस्तीति प्रदर्शनार्थं मया प्रस्थानक्रमेण विभागः स्वीकृतः। अतः व्याकरणशास्त्रे अन्नम्भट्टेन उद्योतनं कैयटग्रन्थव्याख्यारूपं, मिताक्षरानाम्नी पाणिनीयसूत्रवृत्तिः चेति ग्रन्थद्वयं प्रणीतम्।

२. कोऽयम् अन्नम्भट्टः

अयञ्च अन्नम्भट्टः सर्वतन्त्रस्वतन्त्रः चतुर्ष्वपि तन्त्रेषु उपादेयतमान् बहून् ग्रन्थान् व्यरचयत्। अयञ्च शिवभक्त आसीत्। तथाहि तेन महाभाष्यप्रदीपोद्योतनस्य मङ्गलश्लोके शिवं स्मरति– 'शिवयोः शाश्वतैकत्वं तनोतु शुभसन्ततिम्। निदर्शयितुमद्वैतं भजतामिव संगतम्॥' इति। तथा तर्कसंग्रहे तर्कसंग्रहदीपिकायाञ्च अन्नम्भट्टेन शिव एव भक्तः। भगवत्पादीयाद्वैतमतेऽपि तस्य दृढानुराग आसीदिति ज्ञायते। तस्मादेव कैयटकृतप्रदीपस्य मङ्गलश्लोकस्य विवरणे नैके अद्वैतसिद्धान्ता दृश्यन्ते। एवं तस्य विषये उपलब्धप्रमाणैः वंशदेशकालादिविषये विशिष्टः विमर्शः इह वितन्यते।

२.१. वंशः

अन्नम्भट्टस्य वंशविषये नास्ति कश्चन मतभेदः। अत्र प्रायशः सर्वेषां पण्डितानां मतैक्यं दृश्यते। अस्य मुख्यं कारणं तु तेन तत्कृतग्रन्थस्थपुष्पिकासु स्वस्य वंशस्य उल्लेखः कृतः। तस्मात् ज्ञायते स च श्रीराघवसोमयाजिनाम्नः कस्यचित् प्रसिद्धस्य विदुषः कुलजस्य श्रीतिरुमलार्यवर्यस्य पुत्र आसीत्।

अन्नम्भट्टस्य मिताक्षरायां प्रत्यध्यायं प्रतिपादान्ते पुष्पिकायाम्– 'इति श्रीमहोपाध्यायश्रीमद्राघवसोमयाजिकुलावतंस श्रीमद्द्वैतविद्याचार्यश्रीमत्तिरुमलार्यवर्यस्य सूनोरन्नम्भट्टस्य कृतौ व्याकरणमिताक्षरायां वृत्तौ...[1]' इत्येवं लिखितं वर्तते। तथा तत्कृतप्रदीपव्याख्यानभूतोद्यतनस्थपुष्पिकायां सुबोधिन्यादिग्रन्थान्तरपुष्पिकास्वपि मिताक्षरापुष्पिकासदृशमेव विवरणं परिलक्ष्यते। श्रीरामाख्यशास्त्रिणा ब्रह्मसूत्रस्य मिताक्षरावृत्तौ प्रास्ताविकवचने अन्नम्भट्टः कौशिकगोत्रे सम्भूत इति उल्लेखः कृतः।

तेन राघवसोमयाजिकुलोद्भवः अयम् अन्नम्भट्ट आसीदिति तस्य स्वग्रन्थपुष्पिकातः ज्ञायते। किन्तु मिताक्षरावृत्तेः सम्पादकस्य भट्टनाथस्वामिनः विद्यारत्नस्य मते कस्यचित्

1 मिताक्षरावृत्तौ प्रत्यध्यायान्ते।

CC BY

ऋग्वेदिनः कुले अन्नम्भट्टस्य जन्म अभवत्। तस्य मते अन्नम्भट्ट ऋग्वेदी आसीत्। तथाहि तेन ग्रन्थस्य स्वकीये निवदने प्रोक्तम्– 'अन्नम्भट्टेति प्रसिद्धाभिजननामान ऋग्वेदिन प्रकृते केशवपुर (केशवर) ग्रामे निवसन्ति[2]' इति। भट्टनाथस्वामिना पुनरिदमपि उल्लिखतं यत् 'परन्तु राघवसोमयाजिकुलीयाः केऽपि नाद्यावधि मया श्रुताः' इति। तत्र कारणत्वेन तेन स्वस्य मतस्य पक्षे एकम् अनुमानमपि प्रस्तुतम्। तद्यथा– 'तस्मादेवमनुमीयते अन्नम्भट्टात्पूर्वं राघवसोमयाजिनस्तत्पूर्वजस्यातिप्रसिद्धत्वात्तन्नाम्नैव वंशे व्यवह्रियते स्म, जाते च सकलजगद्विख्यातपाण्डितीप्रकर्षे तत्रभवत्यन्नंभट्टे स एव वंशस्य नामास्पदं समजानीति[3]' इति। भट्टनाथस्वामिनः मते अन्नम्भट्टः तैलङ्गदेशीय ऋग्वेदी आसीत्[4]। किन्तु अस्मिन् प्रसङ्गे तेन किमपि दृढतरं प्रमाणान्तरं न प्रदत्तम्।

२.२. पिता

अन्नम्भट्टस्य पिता तिरुमलार्यवर्य आसीदिति अन्नम्भट्टकृतग्रन्थस्थपुष्पिकातः ज्ञायते। तस्य पिता अद्वैतविद्याचार्य आसीदिति प्रसिद्धिः। युधिष्ठिरमीमांसकेन तस्य संस्कृतव्याकरणशास्त्रस्येतिहासे कस्यचित् तिरुमलस्य उल्लेखः कृतः यो महाभाष्यस्योपरि अनुपदानामिकायाः व्याख्यायाः प्रणेता आसीत्। अयञ्च तिरुमलयज्वा राघवसोमयाजिकुलावतंस आसीदिति तिरुमलयज्वकृतदर्शपौर्णमासभाष्यस्य पुष्पिकातः अवगम्यते। अयं तिरुमलः यदि अन्नम्भट्टस्य पिता स्यात्तर्हि मल्लययज्वा अन्नम्भट्टस्य पितामहो भवितुम् अर्हति। अयञ्च मल्लययज्वा चतुर्दशविद्यावल्लभ आसीत्[5]। युधिष्ठिरमीमांसकेन अनेन तिरुमलयज्वना सह अन्नम्भट्टकृतग्रन्थस्थपुष्पिकायां उल्लेखस्य तिरुमलाचार्यस्य साम्यं सम्भाव्यते। अतः विदुषां वंशे अन्नम्भट्टस्य जन्म अभवदित्यत्र नास्ति विप्रतिपत्तिः। तस्य पितृपुरुषाः यजमानत्वेन प्रसिद्धा आसन्। यतो हि कुलस्यास्य प्रवर्तकः राघवः स्वयं सोमयाजि आसीत्।

२.३. गुरुः

अस्य च गुरुः श्रीशेषवीरेश्वर आसीदिति प्रदीपोद्द्योतने विद्यमानाद् मङ्गलश्लोकाद् ज्ञायते– 'श्रीशेषवीरेश्वरपण्डितेन्द्रं शेषायितं शेषवचोविशेषे। सर्वेषु तन्त्रेषु च कर्तृतुल्यं वन्दे महाभाष्यगुरुं ममाग्र्यम्[6]॥' इति। अनेन मङ्गलश्लोकेन महाभाष्ये श्रीशेषवीरेश्वरस्य वैदुष्यं सर्वशास्त्रेषु च तस्य नैपुण्यं प्रकाश्यते। श्रीशेषवीरश्वरस्य महाभाष्यगुरुरूपेणापि प्रसिद्धिः। तस्य शेष इति विशेषणं भाष्यकारसदृशत्वेन मन्यते। अतः भाष्यकार इव सोऽपि व्याख्याने

---

2 मिताक्षरावृत्तौ निवेदने, पृ.- १।

3 निवेदने, पृ.- १।

4 तत्रैव।

5 इति श्रीमद्राघवसोमयाजिकुलावतंसचतुर्दशविद्यावल्लभमल्लय... इति संस्कृतव्याकरणशास्त्रकाइतिहासग्रन्थे। पृ- ४१३

6 महाभाष्यप्रदीपोद्योतने। पृ.- २।

स्वकीयसिद्धान्तान् प्रकटयतीति अनुमीयते। पण्डितराजस्य जगन्नाथस्य पिता पेरुभट्टोऽपि श्रीशेषवीरेश्वराद् महाभाष्यम् अधीतवानिति अवगम्यते। अयं श्रीशेषवीरेश्वरः वैयाकरणसिद्धान्तकौमुदीकारस्य भट्टोजिदीक्षितस्य गुरोः शेषकृष्णस्य पुत्र आसीत्। अन्नम्भट्टेन काश्यां व्याकरणशास्त्रस्य पाठः स्वीकृत आसीत्। काश्याम् अधीत्यैव स प्रसिद्धो बभूवेति 'काशीगमनमात्रेण नान्नम्भट्टायते द्विजः' इति अन्नम्भट्टप्रशंसारूपायाः किंवदन्तीतः ज्ञायते। किन्तु न्यायवेदान्तशास्त्राणि स कस्माद् अधीतवान् इत्यस्मिन् विषये किमपि प्रमाणं न प्राप्यते। तर्कसंग्रहस्य सम्पादकेन के.सि. मेहेन्देलेमहोदयेन ग्रन्थस्य भूमिकायां कात्यायनप्रातिशाख्यस्य व्याख्यानकर्ता समङ्गल अन्नम्भट्टस्य गुरुः आसीदिति उल्लेखः कृतः[7]। यदि समङ्गल अन्नम्भट्टस्य गुरुः स्यात् तर्हि तर्कसंग्रहकार अन्नम्भट्टः अन्यः मिताक्षराकारः अन्नम्भट्टः अपरः कश्चन इत्यपि भवितुम् अर्हति। अथवा अन्नम्भट्टः व्याकरणशास्त्रस्य पाठः शेषवीरेश्वराद् स्वीकृतः किन्तु न्यायशास्त्रं समङ्गलात् अधीतवानित्यपि ऊहितुं शक्यते। तथा चेत् तर्कसंग्रहकारः अन्नम्भट्टः मिताक्षराकारः उद्योतनकारो वान्नम्भट्टः एक एवेति स्वीकर्तुं पार्यते। सर्वत्र मङ्गलश्लोके काशीक्षेत्रसन्निधानस्य भगवतः विश्वेश्वरस्य शिवस्य वन्दनं दृष्ट्वा तथैव अनुमीयते। किन्तु सुमङ्गलः अन्नम्भट्टस्य यदि गुरुः स्यात्तर्हि अन्नम्भट्टेन वेदादीनाम् अध्ययनं सुमङ्गलात् स्वीकृतमित्यपि सम्भवना अवश्यं कर्तुं शक्या। तथा चेत् बाल्यकाले अन्नम्भट्टः सुमङ्गलसकाशात् वेदादीनाम् अध्ययनं कृतवान्। ततः काश्याम् आगत्य शेषवीरेश्वरात् व्याकरणशास्त्रम् अधीतवान्। किन्तु अन्नम्भट्टेन न्यायवेदान्तादिदर्शनशास्त्राणि कस्माद् अधीतानि इत्यस्मिन् विषये नास्ति किमपि प्रमाणम्। तत्रापि शेषवीरेश्वरः अन्नम्भट्टस्य गुरुः आसीदित्यत्र नास्ति किमपि वैमत्यम्।

३. अन्नम्भट्टस्य देशः

अन्नम्भट्टस्य देशः कुत्र आसीदित्यस्मिन् विषये मतविवादो दृश्यते। तस्य जन्मभूमिः कृष्णानदीतटे कस्मिंश्चित् ग्रामे अासीदिति किंवदन्ती। तथा भट्टनाथस्वामिनापि मिताक्षराया निवेदने उल्लिखितम्– 'अयं ग्रन्थकारः कृष्णातीरदेशस्थ इति किंवदन्ती' इति। तस्य पूर्वपुरुषाणां निवासः कोण्डविडुग्रामे आसीत्। कोण्डविडुग्राम आन्ध्रदेशस्य पश्चिमप्रान्ते विद्यते। अन्नम्भट्टः तद्देशं त्यक्त्वा केशवपुरग्रामे निवासं चकार इति जनश्रुतिः भट्टनाथस्वामिपादेनोल्लिखिता। केशवपुरग्राम आन्ध्रदेशस्य पूर्वभागे अवस्थितः। तथा च निवेदनोक्तिः– 'अन्नम्भट्टेति प्रसिद्धाभिजननामान ऋग्वेदिनः प्रकृते केशवपुर(केशवार) ग्रामे निवसन्ति। ते च पश्चात्त्य (कोण्डवीडु) देशादेवागता इति तत्रत्याः कथयन्ति[8]' इति। तत्र पुनः श्रीरामाशास्त्रिणा ब्रह्मसूत्रस्य मिताक्षराटीकायाः प्रास्ताविके आन्ध्रदेशे कृष्णानदीवतपूतः ग्रामविशेष इति निर्देशितम्। शेषराजशर्मरेग्मीमहोदयेन तर्कसंग्रहस्य व्याख्यानस्य

---

7 Tarka Sangrah edited by K.C.Mehendale, Bharat Bharati Bhandar, 1990

8 निवेदने, पृ.- १।

CC BY

भूमिकायाम् अन्नम्भट्टस्य देशः कर्णाटक इत्युल्लिखितम्। किन्तु तद्विषये तेन किमपि प्रमाणं न प्रदत्तम्। अन्नम्भट्टः कर्णाटकदेशीयः तैलङ्गदेशीयो वेति न्यायकोशकारस्य महामहोपध्यायस्य भट्टभीमाचार्यस्य अभिमतम्। तैलङ्गदेशस्य गरिकपाद नाम ग्रामे अन्नम्भट्टस्य आविर्भाव अभवदिति संस्कृतवाङ्मयकोशस्य सम्पादकेन श्रीधरभास्करवर्णेकरमहोदयेन प्रोक्तम्। अत अन्नम्भट्टस्य देशविषये विदुषां मध्ये मतविरोधो दृश्यते। तत्र कैश्चित् तैलङ्गदेशः अन्यैः कर्णाटकदेशः एकैश्च आन्ध्रदेशः अन्नम्भट्टस्य निवासत्वेन स्वीकृतः। किन्तु मिताक्षरावृत्तेः सम्पादकेन भट्टनाथस्वामिमहोदयेन निश्चितरूपेण तैलङ्गदेशीयः अन्नम्भट्टः स्वीकृतः। तस्य मते 'यावद्दृढतरं प्रमाणान्तरं नोपलभेमहि तावदुक्तदिशा त्रैलङ्गदेशीय ऋग्वेदी चान्नम्भट्ट[9]' इति निश्चेतुं शक्यते इति। अत अन्नम्भट्टः दक्षिणभारतीय आसीदिति उपर्युक्तविवेचनेन स्पष्टम्।

काशी अन्नम्भट्टस्याध्ययनदेश आसीत् इत्यस्मिन् विषये तु मतैक्यं दृश्यते। 'काशीगमनमात्रेण नान्नम्भट्टायते द्विजः' इति अन्नम्भट्टप्रशंसारूपा किंवदन्ती एवास्य मानम्। अत अन्नम्भट्टः स्वस्य जन्मभूमिं त्यक्त्वा विविधशास्त्राणाम् अध्ययनार्थं काशीम् आगतवान्। महाभाष्यप्रदीपव्याख्यानानि इति ग्रन्थस्य सम्पादकेन एम्.एस्.नरसिंहाचार्येण उपोद्घाते उद्द्योतनसन्दर्भे अन्नम्भट्टस्य विषये इत्थं उल्लेखः कृतः– 'अयं बाल्ये मन्दो भूत्वा काशीं प्राप्य कृतविद्यापरिश्रमः सर्वेष्वपि शास्त्रेषु पाण्डित्यं तथा प्राप...[10]' इति। अतः दक्षिणभारते अन्नम्भट्टस्य जन्म अभवत् किन्तु उत्तरभारते काश्याम् न्यायमीमांसाव्याकरणवेदान्तादिशास्त्रेषु भूरि अध्ययनं कृत्वा बहून् ग्रन्थान् विरच्य प्रख्यातो बभूव।

४. अन्नम्भट्टस्य कालः

संस्कृतसाहित्यस्य अपरेषां शास्त्रकृतामिव अन्नम्भट्टस्यापि कालः निश्चयेन वक्तुं नैव पार्यते। यतः तस्मिन् काले प्रायशः ग्रन्थकाराः तेषां ग्रन्थेषु स्वेषां परिचयं न दत्तवन्तः। तस्माद् अन्नम्भट्टस्य समयः कदा अस्तीत्यस्मिन् विषये अस्ति मतानैक्यम्। तथापि तस्य कालः क्रैस्तीयपञ्चदशशताब्दीति अनुमीयते। यतो हि अयम् अन्नम्भट्टः तत्त्वचिन्तामणिदीधितिव्याख्याकारात् गदाधरभट्टाचार्यात् एवञ्च सिद्धान्तमुक्तावलीरचयितुः विश्वनाथन्यायपञ्चाननाद् अर्वाचीनः अस्ति। अर्थात् अयं प्रायः जगन्नाथपण्डितराजस्य समकालिक आसीत्। के.सि.मेहेन्देलेमहोदयेन क्रैस्तीयद्वादशशताब्द्यामनन्तरम् अन्नम्भट्टस्य कालः स्वीकृतः[11]। तर्कसंग्रहस्य सम्पादकेन शेषराजरेग्मीमहोदयेन भूमिकायां सप्तदशशतब्दी अन्नम्भट्टस्य कालः अनुमितः। ब्रह्मसूत्रस्य मिताक्षरावृत्तौ सम्पादकेन श्रीरामाशास्त्रिणा

---

9 निवेदने, पृ.- १।

10 महाभाष्यप्रदीपव्याख्यानानि इत्यस्मिन् ग्रन्थे उपोद्घाते, पृ.- XVII.

11 Tarka Sangrah edited by K.C.Mehendale, Bharat Bharati Bhandar, 1990.

क्रैस्तीयसप्तदशशतकस्य पूर्वभाग एव अन्नम्भट्टस्य समयः निश्चितः[12]। तस्य मते अन्नम्भट्टः भट्टोजिदीक्षितात् न्यूनवयाः किन्तु जगन्नाथपण्डितराजाद् अधिकवयाः। अतः प्रायः तयोः समकालिकरेव आसीदिति मन्यते। तस्मादेव तयोः कालाधारेण श्रीरामाशास्त्रिणा क्रैस्तीयसप्तदशशतकपूर्वभागः अन्नम्भट्टसमयत्वेन स्वीकृतः। किञ्च संस्कृतवाङ्मयकोशस्य सम्पादकेन श्रीधरभास्कवर्णेकरेण क्रैस्तीयसप्तदशशतब्द्याः उत्तरार्ध उल्लिखितः। किन्तु युधिष्ठिरमीमांसकाचार्यस्य मते मिताक्षरायाः समयकालः १५५०-१६०० विक्रमाब्दः। अतः क्रैस्तीयषोडशशतब्द्याः पूर्वार्द्ध एव अन्नम्भट्टस्य काल आसीदिति तन्मतम्। तस्यैव मते सिद्धान्तकौमुद्याः रचनाकालः १५७०-१६५० विक्रमाब्दः। अतः मिताक्षरा वैयाकरणसिद्धान्तकौमुद्याः पूर्वं प्रणीता इति स्पष्टम्। इयञ्च वृत्तिः प्रक्रियाकौमुदीतः नवीना वैयाकरणसिद्धान्तकौमुदीतश्च प्राचीना इति निश्चयेन निर्णितम् भट्टनाथस्वामिनः तातचरणेन। तथा मिताक्षरायाः सम्पादकेन भट्टनाथस्वामिविद्यारत्नेन निवदेने तस्य तातस्याभिमतम् उल्लिख्यते– 'अयं च प्रक्रियाकौमुदीकारान्नवीनः सिद्धान्तकौमुदीकारात्प्राचीनश्चेति निश्चेतुं शक्यते इति तातचरणाः[13]' इति।

अतः अन्नम्भट्टस्य कालविषये विदुषां मध्ये मतविरोधो दृश्यते। दृढतरप्रमाणाभावत् निश्चितरूपेण अयमेव अन्नम्भट्टस्य काल आसीदिति केनापि वक्तुं न शक्यम्। अतोऽत्र अन्नम्भट्टस्य कालविषये उपलब्धानि विदुषां मतानि संगृह्य उल्लिखितानि। किञ्च अन्नम्भट्टस्य कालप्रसङ्गे सम्पादकस्य भट्टनाथस्वामिनः तातचरणस्य मतमेव अस्माभिः सिद्धान्तरूपेण स्वीक्रियते यत् स भट्टोजिदीक्षितात् प्राचीनः किन्तु रामचन्द्रमिश्रात् नवीनः आसीत्।

५. अन्नम्भट्टस्य कृतयः

नैयायिकरूपेण अन्नम्भट्टस्य बहु प्रसिद्धिः अस्ति। बालानां सुखबोधाय न्यायवैशेषिकसम्मतं तर्कसंग्रहं विरच्य संस्कृतस्य नभसि अन्नम्भट्टः ज्योतिष्कायते। न केवलं दर्शनशास्त्रे तस्य व्युत्पत्तिः आसीत् अपि तु मीमांसाव्याकरणवेदान्तेष्वपि तस्य सम्यग् अधिकारः आसीदिति तेषां तेषां शास्त्राणां तद्रचितान् ग्रन्थान् दृष्ट्वा अनुमीयते। अन्नम्भट्टेन द्वादश ग्रन्था विरचिताः इति प्रसिद्धिः। ते यथा–

1. तर्कसङ्ग्रहः (संक्षेपेन बालानां कृते रचितः न्यायग्रन्थः)
2. तर्कसंग्रहदीपिका (स्वरचिततर्कसंग्रहस्य व्याख्या)
3. न्यायपरिशिष्टप्रकाशः (न्यायभाष्यस्य व्याख्यानम्)
4. सुबुद्धिमनोहरा (तत्त्वचिन्तामणिदिधितिव्याख्या)
5. सिद्धाञ्जनाभिधा (तत्त्वचिन्तामण्यालोकव्याख्या)

---

12 प्रास्ताविके, पृ.- XXIII.

13 निवदेन, पृ.- २।

CC BY

6. मिताक्षरा (पाणिनीयसूत्रवृत्तिः)
7. महाभाष्यप्रदीपोद्द्योतनम् (महाभाष्यस्य प्रदीपव्याख्यानस्योपरि व्याख्यानम्)
8. मिताक्षरा (व्यासरचितस्य ब्रह्मसूत्रस्य वृत्तिः)
9. भेदनिरासः (अद्वैतवेदान्तशास्त्रस्य प्रकरणग्रन्थः)
10. सुबोधिनीसुधासारः (तन्त्रवार्तिकस्य टीका)
11. राणकोज्जीविनी (पूर्वमीमांसायां न्यायसुधाव्याख्या)
12. स्वरविवेकः (ग्रन्थस्य नाममात्रमेव प्राप्यते)

इत्येते अन्नम्भट्टविरचिताः द्वादश ग्रन्थाः नामतो ज्ञायन्ते।

६. शाब्दिकनिकाये अन्नम्भट्टस्य योगदानम्

यथा न्यायमीमांसावेदान्तशास्त्रेषु तस्य महत्त्वपूर्णम् अवदानं दृश्यते तथा शाब्दिकनिकायेऽपि तस्य योगदानं न्यूनमिति न बोध्यम्। व्याकरणशास्त्रे न केवलं तेन मिताक्षरावृत्तिः प्रणीता अपि तु महाभाष्यस्य कैयटकृतस्य प्रदीपस्योपि उद्द्योतनमिति व्यख्यानं विरचितम्। परन्तु तेन मिताक्षरा वृत्तिः उद्द्योनतात् प्राक् प्रणीता अस्ति। यतो हि उद्द्योतनस्य 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (अ. १.२.४५)इति सूत्रस्य व्याख्याने "'एक'सूत्रे भगवन्मतमेव सम्यगिति मिताक्षरायां प्रपञ्चितमस्माभिः[14]" इति वचनम् अस्ति। यद्यपि मिताक्षरायां 'अकथितञ्च' (अ. १.४.५१) इति सूत्रस्य वृत्तौ अन्नम्भट्टेन उक्तमस्ति "कौमुद्यां मन्थग्रहपचोऽपि संगृहीताः[15]" इति। तत्र तु कौमुद्यामित्यनेन प्रक्रियाकौमुदी एव बोद्धव्या न तु वैयाकरणसिद्धान्तकौमुदी। यतो हि मिताक्षरायां मन्थ्, ग्रह्, पच् चेत्येतेषां द्विकर्मकधातूनां साक्षात् ग्रहणं नास्ति। वैयाकरणसिद्धान्तकौमुद्यां यद्यपि मन्थ्-पच्-धात्वोः ग्रहणं लक्ष्यते। परन्तु सिद्धान्तकौमुद्यां ग्रह्धातुः प्रत्यक्षतया न गृहीतः। प्रक्रियाकौमुद्यान्तु तेषां साक्षात् ग्रहणं दृश्यते। अयं महाभाष्ये कृतभूरिपरिश्रम इत्यपि ज्ञायते। एवं महाभाष्ये कृतभूरिपरिश्रमेनान्नम्भट्टेन महत्त्वपूर्णं ग्रन्थद्वयं प्रणीय तेन शाब्दिकनिकाये स्वकीयम् विशिष्टं योगदानं विहितम्। ग्रन्थद्वयस्य संक्षेपेण विवरणमत्र वितन्यते–

६.१. व्याकरणमिताक्षरा

पाणिनिविरचितायाः अष्टाध्याय्याः उपरि अन्नम्भट्टकृता मिताक्षरा एका वृत्तिः अस्ति। वृत्तिपरम्परायाम् अन्नम्भट्टविरचिताया मिताक्षरायाः महत्त्वपूर्णं स्थानम् अस्ति। भाष्यपूर्ववृत्तिपरम्परायां याः वृत्तयः विरचिता आसन्, तासु पाणिनिविरचिता वृत्तिः, श्वोभूतिविरचिता वृत्तिः, व्याडिविरचिता वृत्तिः, माथुरीवृत्तिः, कुणिविरचिता वृत्तिश्च

14 महाभाष्यप्रदीपोद्योतने, पृ.- ५६ (खण्डम्-४)।

15 व्याकरणमिताक्षरायाम्, पृ.- ८३।

अन्यतमाः। भाष्योत्तरवृत्तिपरम्परायां काशिका-भागवृत्ति-भाषावृत्त्यादयः अन्यतमाः। अन्नम्भट्टेन विरचिता मिताक्षरापि भाष्योत्तरवृत्तिपरम्परायाम् अन्तर्याति। 'पाणिनीयमिताक्षरा' 'व्याकरणमिताक्षरा' चेति अस्याः नामान्तरम्। मितम् (स्वल्पम्) अक्षरं यस्यां (वृत्तौ) सा मिताक्षरा इति बहुव्रीहिसमासनिष्पन्ना। अतः स्वल्पाक्षरविशिष्टा वृत्तिरियम् अस्ति। अन्नम्भट्टेन अष्टाध्याय्याः सूत्रानुक्रमेण वृत्तिरियं प्रणीता। सर्वेषां पाणिनीयसूत्राणां वृत्तिः अन्नम्भट्टकृतायां मिताक्षरायां दृश्यते। सूत्रार्थप्रधानो ग्रन्थो भवति वृत्तिः। तस्मात् मिताक्षरावृत्तिरपि सूत्रार्थप्रधानग्रन्थ इति अवगम्यते। तथाहि सूत्राणाम् अर्थप्राधान्यमेव अस्यां वृत्तौ दरीदृश्यते। अस्यां वृत्तौ अन्नम्भट्टेन वृत्तिपरम्परायां ये दोषा दृष्टाः तेषां परिमार्जनस्य महती प्रचेष्टा विहिता।

६.२. प्रदीपोद्योतनम्

व्याकरणशास्त्रे अन्नम्भट्टेन पुनः कैयटकृतस्य महाभाष्यप्रदीपस्योपरि प्रदीपोद्योतनं विरचितम्। अन्नम्भट्टः कैयटव्याख्यारूपं महाभाष्यप्रदीपोद्योतनं कैयटकृतस्य महाभाष्यप्रदीपस्य तात्पर्यं प्रकटयितुं सम्पादितमित्यपि वक्तुं शक्यते। ग्रन्थादौ तेन स्वयमेव उद्देश्यं उक्तम्–

महाभाष्यप्रदीपस्य कृत्स्नस्योद्योतनं मया।
क्रियते पदवाक्यार्थतात्पर्यस्य विवेचनात्[16]॥

सरलया शैल्या तेन नातिसंक्षेपविस्तरा व्याख्येयं विरचिता। अत्र बहुत्र पूर्वाचार्याणां व्याख्यानानुसरणं दृश्यते। क्वचित् पङ्क्तिशः अनुकरणमपि दृश्यते। अन्नम्भट्टेन अत्रापि प्रत्याह्निकं पुष्पिकायां महामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतसम्भूततिरुमलाचार्यस्य सूनुत्वेन स्वस्योल्लेखः कृतः। उद्योतनस्य आदौ स श्रीशेषवीरेश्वरं स्वस्य महाभाष्यगुरुरूपेण कीर्तितवान्[17]।

७. उपसंहृतिः

चतुर्णां शास्त्राणां पण्डितः भट्टशब्देन कथ्यते। अत अन्नम्भट्ट इति नाम्नैव तस्य चतुश्शास्त्रपाण्डित्यं सूच्यते। न्यायमीमांसावेदान्तव्याकरणशास्त्रेषु तस्य वैदुष्यमेव मानम्। अन्नम्भट्टस्य कृतिषु न्यायशास्त्रस्य रचनाः सर्वाधिका दृश्यन्ते। तत्रापि न केवलं न्यायशास्त्रे तस्य नैपुण्यं किन्तु व्याकरणमीमांसावेदान्तादिषु शास्त्रेष्वपि वैदुष्यम् आसीदिति प्रतीयते। इत्थं व्याकरणशास्त्रस्येतिहासे अप्रसिद्धस्य शाब्दिकस्य अन्नम्भट्टस्य परिचयः कृतित्वञ्च अत्र शोधप्रबन्धे समासेन प्रस्तूतमित्यलं विस्तारेण।

---

16 महाभाष्यप्रदीपोद्योतने, पृ.- २।

17 तत्रैव।

CC BY

परिशीलितग्रन्थसूची

1. (1973). Mahabhasya Pradipa Vyakhanani (Vol.- I). Narasimhacharya, M.S (ed.). Pondichery: Institute Francais D'Indologie.
2. (२००१)। संस्कृत-वाङ्मयकावृहद्इतिहास (पञ्चदशखण्ड)। उपाध्याय, बलदेवः पाण्डेय, गोपालदत्तः (सम्पा.)। लखनऊ : उत्तरप्रदेशसंस्कृतसंस्थान।
3. अन्नम्भट्टः। १४१३। तर्कसंग्रहः। गोस्वामी, श्रीनारायणचन्द्रः (सम्पा.)। कलिकाताः संस्कृतपुस्तकभाण्डार।
4. अन्नम्भट्टः। १९०६। व्याकरणमिताक्षरा। स्वामी, श्रीनिवासजगन्नाथः विद्यारत्न, भट्टनाथस्वामी (संशोधकौ)। वाराणसी : चौखम्बासंस्कृतबुक्डिपो।
5. अन्नम्भट्टः। १९५०। ब्रह्मसूत्रवृत्तिः मिताक्षरा। शास्त्री, पि.एस्.रामा (सम्पा.)। माद्रास : गभर्मेन्ट ओरियेन्टाल म्यानुस्क्रिप्टस् लाइव्ररी।
6. कृष्णा। २००१। मिताक्षरावृत्तेः समीक्षात्मकमध्ययनम् (शोधप्रबन्धः)। नवदेहलीः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्।
7. मीमांसकः, युधिष्ठिरः। १९६३। संस्कृतव्याकरणशास्त्रकाइतिहास। अजमेर : भारतीयप्राच्यविद्याप्रतिष्ठान।

Sujit Maiti

सुजित-माइतिः

शोधच्छात्रः (विद्यावारिधिः)/Research Scholar (Ph.D)

पत्राचारसंकेतः– रामकृष्णमिशन्-विवेकानन्दशैक्षिकशोधसंस्थानम्, बेलुडमठः, हावडा- ७११२०, पश्चिमवङ्गः।

Ramakrishna Mission VivekanandaEducational and Research Institute
Belur Math, Howrah- 711202, W.B
sujitchotu7@gmail.com

***

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

श्रीगरुडपुराणोक्तं पार्थिवलक्षणं तत्कर्तव्यलक्षणं तद्भृत्यलक्षणञ्च

- मु.विनोदः

शोधसारः -

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अभाललोचनः शम्भुर्भगवान्बादरायणः॥[1]

इत्युक्तरीत्या भगवान् बादरायणः तिसृणां सृष्टिस्थितिलयकर्तृदेवतानां स्वरूप एव इति कथने न कापि अतिशयोक्तिः। स एव भगवान् महाभारताख्यम् अत्यद्भुतं रत्नम् अस्मभ्यं दत्वा तदपर्याप्तमिति मत्वा अष्टादशपुराणान्यपि ददौ। **पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्**[2] इति पद्मपुराणस्य वचनानुगुणं पुराणानि तात्कालिकसमाजविषये अस्मभ्यं नैकान् विषायन् बोधयन्ति। अस्तु, तेन को लाभ इति चेत्तानेव विषयानाधारीकृत्य अद्यत्वेऽपि नवसमाजस्य निर्माणं कर्तुं शक्नुमः। अत एव अद्यापि नैकेषु विषयेषु वैज्ञानिकाः संस्कृतग्रन्थान् आद्रियन्ते। तत्रापि कारणम् - **आप्तत्वं वर्तते अस्मद्ग्रन्थेषु** इति। तद्रीत्या आलोचयामश्चेत् तर्हि पुराणेभ्यः के सन्देशाः लभ्यन्ते इति प्रश्नः समुद्भवेत्। तत्र समाधानं - न केवलं भगवतः अवतारवर्णनपराणि इमानि अपि च जीवनोपयोगिनः नैकान् सन्देशान् अस्मभ्यं यच्छन्ति। तस्मिन् पथि गरुडपुराणम् अन्यतमं भवति। सामान्यतः जनेष्वयमभिप्रायः वर्तते यद्गरुडपुराणे प्रायः भगवतः श्रीविष्णोरवतारसंबन्धाः विषयाः भवेयुरिति। परं तदतिरिच्य अनेके विषयाः वर्तन्ते। यथा - आश्रमविषयसंबद्धाः विचाराः, आयुर्वेदविषयाः, धर्मशास्त्रविषया इति नैके विषयाः वर्तन्ते। एवमालोच्यमाने राजधर्मविषया अपि प्रोक्ताः वर्तन्ते। गरुडपुराणस्य प्रथमे खण्डे एकादशाधिकशततमे अध्याये नीतिसारकथनप्रसङ्गे राज्ञां धर्मा अपि प्रतिपादिताः। त एव उपदेशाः अद्यत्वेऽपि नूनम् नैकेषां नृपाणाम् उपयोगकराः भवन्ति इत्यत्र नास्ति संशयलेशः। कथं राज्यं शासनीयम् इत्यारभ्य कथं भृत्याः नियोज्या इत्येतावत् पर्यन्तम् अनेके विषयाः प्रतिपादिताः वर्तन्ते। स च अध्याय एवं प्रारभते -

पार्थिवस्य तु वक्ष्यामि भृत्यानाञ्चैव लक्षणम्।
सर्वाणि हि महीपाल सम्यङ्ग्नित्यं परीक्षयेत्॥[3] इति।

एवं राज्ञः लक्षणकथनप्रतिज्ञां विधाय अग्रे कथं राजा राज्यपालनं कुर्यादिति, **समबुद्धिः प्रसन्नात्मा सुखदुःखे समो भवेद्**[4] इति तस्य स्वभावविषये, भृत्यानां परीक्षणं कथं कर्तव्यम् इति नैकान् राजधर्मान् बोधयति। किञ्च -

यस्य पुत्राश्च भृत्याश्च मन्त्रिणश्च पुरोहिताः।
इन्द्रियाणि प्रसुप्तानि तस्य राज्यं चिरं न हि।।[5]

इत्येवमपि निर्दिश्य राजानः तथा राजसंबन्धिनः जना अपि कथं भवेयुरिति बहु बोधयति। एषु विषयेषु मुख्याः प्रकृतकाले च उपयुक्ताः ये विषयाः भवन्ति ते सर्वेऽपि सम्पूर्णे शोधपत्रे विस्तृतरूपेण प्रतिपादिताः॥

---

[1] सुभाषितरत्नभाण्डागारम्, पुटम् ३७, श्लोकः५६

[2] पद्मपुराणम् १.२.५२

[3] गरुडपुराणम्, पूर्वखण्डः १११.१

[4] गरुडपुराणम्, पूर्वखण्डः १११.२३

[5] गरुडपुराणम्, पूर्वखण्डः १११.२०

CC BY

उपोद्घातः

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अभाललोचनः शम्भुर्भगवान्बादरायणः॥[6]

इत्युक्तरीत्या भगवान् बादरायणः तिसृणां सृष्टिस्थितिलयकर्तृदेवतानां स्वरूप एव इति कथने न कापि अतिशयोक्तिः। स एव भगवान् महाभारताख्यम् अत्यद्भुतं रत्नम् अस्मभ्यं दत्वा तदपर्याप्तमिति मत्वा अष्टादशपुराणान्यपि ददौ। **पुरा परम्परां वक्ति पुराणं तेन वै स्मृतम्**[7] इति पद्मपुराणस्य वचनानुगुणं पुराणानि तात्कालिकसमाजविषये अस्मभ्यं नैकान् विषायन् बोधयन्ति। अस्तु, तेन को लाभ इति चेत्तानेव विषयानाधारीकृत्य अद्यत्वेऽपि नवसमाजस्य निर्माणं कर्तुं शक्नुमः। अत एव अद्यापि नैकेषु विषयेषु वैज्ञानिकाः संस्कृतग्रन्थान् आद्रियन्ते। तत्रापि कारणम् आप्तत्वं वर्तते अस्मद्ग्रन्थेषु इति। तद्रीत्या आलोचयामश्चेत् तर्हि पुराणेभ्यः के सन्देशाः लभ्यन्ते इति प्रश्नः समुद्भवेत्। तत्र समाधानं - न केवलं भगवतः अवतारवर्णनपराणि इमानि अपि च जीवनोपयोगिनः नैकान् सन्देशान् अस्मभ्यं यच्छन्ति। तस्मिन् पथि गरुडपुराणम् अन्यतमं भवति। सामान्यतः जनेष्वयमभिप्रायः वर्तते यद्गरुडपुराणे प्रायः भगवतः श्रीविष्णोरवतारसंबन्धाः विषयाः भवेयुरिति। परं तदतिरिच्य अनेके विषयाः वर्तन्ते। यथा - आश्रमविषयसंबद्धाः विचाराः, आयुर्वेदविषयाः, धर्मशास्त्रविषया इति नैके विषयाः वर्तन्ते। एवमालोच्यमाने राजधर्मविषया अपि प्रोक्ताः वर्तन्ते।

विषयविस्तारः

अ.राज्ञः लक्षणानि

गरुडपुराणस्य पूर्वखण्डे एकादशाधिकशततमे अध्याये नीतिसारकथनप्रसङ्गे राज्ञां धर्मा अपि प्रतिपादिताः। त एव उपदेशाः अद्यत्वेऽपि नूनम् नैकेषां नृपाणाम् उपयोगकराः भवन्ति इत्यत्र नास्ति संशयलेशः। कथं राज्यं शासनीयम् इत्यारभ्य कथं भृत्याः नियोज्या इत्येतावत् पर्यन्तम् अनेके विषयाः प्रतिपादिताः वर्तन्ते। स च अध्याय एवं प्रारभते -

पार्थिवस्य तु वक्ष्यामि भृत्यानाञ्चैव लक्षणम्।
सर्वाणि हि महीपाल सम्यङ्गित्यं परीक्षयेत्॥[8] इति।

एकः राजा सर्वान् अर्थात् प्रजाः आरभ्य राज्यघटनाः पर्यन्तं सर्वान् अपि विषयान् सुष्ठु परीक्षयेत्। किञ्च स राजा सर्वदा सत्यधर्मतत्परः स्यात्। शत्रूणां सैन्यानि जित्वा धर्मेण राज्यं पालयेत्। अत्र कश्चन दृष्टान्तोऽपि प्रदर्शितः। स च यथा मालाकारः उद्यानस्थम् एकमेकं पुष्पं विचिनोति न कदापि मूलच्छेदं करोति तथा राजाऽपि राज्यविषये सावधानेन कार्याणि संपादयेत्। कदाचिदपि विना कारणं कस्यापि हानिकारं कार्यं न कुर्यात्। किञ्च उच्यते - यथा दोग्धारः क्षीरमेव पिबन्ति न कदाचिदपि तस्य विकृतं न स्वीकुर्वन्ति तथा राजानोऽपि परराष्ट्रं बुद्धिचातुर्येण अनुभवेत् कदाचिदपि वैरं न कुर्यात्। एवमनेके उपदेशाः राजानमुद्दिश्य कृताः वर्तन्ते। स्वीयव्यवहारैः कदाचिदपि राज्यं न पीडयेत्। राजा सर्वदा धर्मे स्वीयमतिं चरेत्। यश्च राजा जनान् न पीडयति स योगैः युक्तः भवेत् व्याधिभिश्च पीडितो न भवेत्। किञ्च महीपालः

---

[6] सुभाषितरत्नभाण्डागारम्, पुटम् ३७, श्लोकः५६

[7] पद्मपुराणम् १.२.५२

[8] गरुडपुराणम्, पूर्वखण्डः १११.१

प्रजाः पुत्रवत् पालयेत्। यश्च राजा शास्त्रविवर्जितः (विद्याहीनः) स अन्धसमानः भवति। कदाचित् अन्धोऽपि चारस्य साहाय्येन द्रव्याणि पश्यति (अनुभवति) परं विद्याहीनः किमपि न द्रष्टुं प्रभवति। अपि च **समबुद्धिः प्रसन्नात्मा सुखदुःखे समो भवेद्**[9] इत्युक्तरीत्या सुखं दुःखञ्च समानरूपेणैव पश्येत्। अत्र कदाचित् प्रश्नः समुद्भवेत् दुःखे कथं वा समबुद्ध्या भवितुं शक्यमिति। तत्र पद्यमिदं समाधानं भवति -

धीराः कष्टमनुप्राप्य न भवन्ति विषादिनः।
प्रविश्य वदनं राहोः किं नोदेति पुनः शशी।।[10] इति।

अयमर्थः - यथा राहोः मुखे प्रविष्टः चन्द्रः किञ्चित्कालं कष्टमनुभूय पुनः प्रकाशते तथैव धीराः पार्थिवा अपि कष्टकाले इदमस्थिरमिति बुद्ध्या यदि भवेयुः तर्हि नूनं दुःखेन न पीडिताः भवेयुरिति।।

आ. राजसंबन्धिपुरुषाणां स्वरूपम्

न केवलं राजानः कथं भवेयुरिति प्रतिपादितम् अपि च राजसंबन्धिजनाः कथं स्युरित्यपि सुष्ठु प्रतिपादितं वर्तते। तद्यथा -

यस्य पुत्राश्च भृत्याश्च मन्त्रिणश्च पुरोहिताः।
इन्द्रियाणि प्रसुप्तानि तस्य राज्यं चिरं न हि।।[11]

इत्युक्तरीत्या यस्य राज्ञः पुत्राः, भृत्याः, मन्त्रिणः, पुरोहिताः अज्ञाः भवन्ति, यस्य च राज्ञः इन्द्रियाणि प्रसुप्तानि भवन्ति तस्य राज्ञः राज्यं चिरं न भवति इति ज्ञेयम्। इन्द्रियाणि प्रसुप्तानि इत्युक्ते तत्तदिन्द्रियैः यद्यत् धर्मयुक्ताः विषयाः ज्ञेयाः तान् ज्ञातुं यदि न प्रयतते तर्हि तस्य राज्यं नूनं नाशमाप्नोति इत्यर्थः। परं -

येनार्जितास्त्रयोऽप्येते पुत्रा भृत्याश्च बान्धवाः।
जिता तेन समं भूपैश्चतुरब्धिवसुन्धरा।।[12]

इत्युक्तरीत्या येन राज्ञा सुपुत्राः, सुभृत्याः, सुबान्धवाश्च आर्जिताः भवन्ति तेन राज्ञा समस्ताऽपि वसुन्धरा जिता इत्यर्थः।

राजसंबन्धिषु पुरुषेषु भृत्याः अन्यतमाः। तैः सह राज्ञा कथं भाव्यम्, ते भृत्याः कथं भवेयुरित्यपि सुष्ठु प्रतिपादितं वर्तते। क्षितिपतिः मानवेषु, श्रोत्रियेषु, भृत्येषु च चपलेन सञ्जातां दृष्टिं वारयेत्, मिथ्यावाक्यञ्च न वदेत्। अपि च -

कारणेन विना भृत्ये यस्तु कुप्यति पार्थिवः।
स गृह्णाति विषोन्मादं कृष्णसर्पविसर्जितम्।।[13]

इत्युक्तरीत्या यः पार्थिवः विना कारणं भृत्येषु कुप्यति स विषभुक्तमनुष्यवत् नूनम् उन्मादताम् आप्नोति। अपि च यः स्वभृत्येषु लीलां करोति स नूनं रिपुभिः परिभूयते। किञ्च

---

[9] गरुडपुराणम्, पूर्वखण्डः १११.२३

[10] गरुडपुराणम्, पूर्वखण्डः १११.२४

[11] गरुडपुराणम्, पूर्वखण्डः १११.२०

[12] गरुडपुराणम्, पूर्वखण्डः १११.२१

[13] गरुडपुराणम्, पूर्वखण्डः १११.२७

CC BY

कार्याणि सामर्थ्येन संपादयेत्। किञ्च सर्वदा भृत्येषु हुङ्कारं, भ्रुकुटीं न कुर्यात्। यः पार्थिवः विना दोषेण भृत्यान् अधर्मेण शास्ति स सुखानि भोग्यानि च नूनं त्यजेत्।

इ. भृत्यानां नियोजने अवधेयांशाः

> **भृत्या बहुविधा प्रोक्ता ज्ञेया उत्तमाधममध्यमाः।**
> **नियोक्तव्या यथार्हेषु त्रिविधेष्वेव कर्मसु।।**[14]

इति भृत्यानां वैविध्ये तेषां नियोजने च के अंशाः मनसि ध्येया इत्यपि प्रतिपादितं वर्तते। आदौ भृत्याः सम्यक् परीक्षणीयाः तदनन्तरमेव ते अर्हेषु कार्येषु नियोज्याः भवन्ति। तत्र मनुष्यस्य परीक्षणे सुप्रसिद्धं पद्यं वस्तुतः गरुडपुराणे भृत्यानां परीक्षणविषये प्रतिपादितं वर्तते। तद्यथा -

> **यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।**
> **तथा चतुर्भिः भृतकं परीक्षयेत् व्रतेन शीलेन कुलेन कर्मणा।।**[15] इति।

एवञ्च एभिः व्रत-शील-कुल-कर्माख्यैः चतुर्भिः उपायैः राजा भृत्यं परीक्षयेत्। तदनन्तरम् अर्हतानुगुणं कार्येषु नियोजयेत्। तत्र कस्य कस्मिन् कार्ये नियुक्तिः कर्तव्या इति प्रश्ने -

> **कुलशीलगुणोपेतः सत्यधर्मपरायणः।**
> **रूपवान् सुप्रसन्नश्च कोषाध्यक्षो विधीयते।।**[16]

इत्युक्तरीत्या यः शोभने कुले सञ्जातः, यः सुशीलयुक्तः, यः सुगुणोपेतः यश्च सत्यधर्मपरायणः तादृशं जनं कोषाध्यक्षत्वेन नियोजयेत्। स एव सर्वदा सत्येन धर्मेण च कोषं परिपालयेत्। एवमेव **बलाबलपरिज्ञाता सेनाध्यक्षो विधीयते**[17] इत्युक्तरीत्या यश्च बलाबलज्ञानवान् भवति तं जनं सेनाध्यक्षत्वेन नियोजयेत्। तथा यः इङ्गिताकारतत्त्वज्ञः, बलवान्, अप्रमादी, प्रमथनशीलः तं जनं प्रतीहारपदव्यां नियोजयेत्। एवं यः मेधावी, वाक्पटुः, प्राज्ञः, जितेन्द्रियः, सत्यवादी, सर्वशास्त्रेषु समदृष्टिं विदधाति तादृशं जनं लेखकपदव्यां नियोजयेत्। यश्च बुद्धिमान्, मतिमान्, यथोक्तवादी, परचित्तोपलक्षकः तादृशमेव जनं दूतत्वेन नियोजयेत्। स एव धर्माध्यक्षपदव्यां नियोज्यः यश्च समस्तानि शास्त्राणि जानाति, जितेन्द्रियो, शौर्यवीर्यगुणाभ्याम् उपेतश्च भवति। यः आयुर्वेदकृताभ्यासः तमेव वैद्यत्वेन नियोजयेत्। इमान् अतिरिच्य यः वेदवेदाङ्गतत्त्वज्ञः, जपहोमपरायणः, नित्यम् आशीर्वादपरश्च भवति स राजपुरोहितः स्यात्। तदर्थस्तु तादृशमेव जनं तस्यां पदव्यां नियोजयेदिति। एषु अवधेयांशः कश्चन वर्तते।

तदुच्यते -

> **लेखकः पाठकश्चैव गणकः प्रतिबोधकः।**
> **आलस्ययुक्तश्चेत् राजा कर्मणा वर्जयेत् सदा।।**[18]

---

14 गरुडपुराणम्, पूर्वखण्डः ११२.१

15 गरुडपुराणम्, पूर्वखण्डः ११२.३

16 गरुडपुराणम्, पूर्वखण्डः ११२.४

17 गरुडपुराणम्, पूर्वखण्डः ११२.५

18 गरुडपुराणम्, पूर्वखण्डः ११२.१३

इत्युक्तरीत्या एते लेखक-पाठक-गणक-प्रतिबोधकाः यदि आलस्ययुक्ताः दृष्टाः राज्ञा तर्हि समनन्तरमेव ते तेषां कर्मणः वर्जनीयाः भवन्ति। अन्यथा राज्यस्यैव हानिः भवेत्।

उपसंहारः

एवं गरुडपुराणे एकादशाधिकशततमे अध्याये तथा द्वादशाधिकशततमे अध्याये च न केवलं पूर्वोक्ता एव विषयाः अपि च राजा विनाकारणं जनेषु मनस्तापं न कुर्यादिति, सत्यवादी स्यात्, आपदि अपि धर्ममेवानुसरेत् इत्येवं नैके धर्मोपदेशाः राजधर्मत्वेन प्रोक्ताः वर्तन्ते। तस्मात् पौनःपुन्येन तेषाम् अध्ययनेन अधुना अपेक्षितान् परिणामांश्च विधाय यदि यथावकाशं यथाशक्ति जनेषु प्रचारयामः तर्हि जनेभ्यः अधिकारिणः, अधिकारिभ्यः मन्त्रिणः, मन्त्रिभ्यश्च राजान इति येषां कृते इमे प्रोक्ताः भवन्ति नूनं ते जनाः इमान् उपदेशान् प्राप्नुवन्ति इत्यस्मात् तदर्थं यत्नः कर्तव्य इति शम्।।

उपयुक्तग्रन्थसूची

1. संस्कृत साहित्य इतिहासः, फ्रो.वेङ्कटरमणशास्त्री, कुप्पुस्वामीशास्त्री अनुसन्धान केन्द्रम्, चेन्नै, १९९६.
2. गरुडपुराण, महर्षिः वेदव्यासः, श्रीरामशर्मा आचार्येण संपादितम्, संस्कृतिसंस्थानम्, बरेली, उत्तरप्रदेशः, १९६८.
3. गरुडपुराणम्, महर्षिः वेदव्यासः, श्रीजीवानन्दविद्यासागरभट्टाचार्येण संपादितम्, निर्णयसागरमुद्रणालयः, कलिकाता, १८९०.
4. सुभाषितरत्नभाण्डागारम्, पण्मडित नारायण राम आचार्य काव्यतीर्थ इत्येतैः संशोधितम्, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९९८.
   पद्मपुराणम्, महर्षिः वेदव्यासः, पण्डित पन्नालाल जैन साहित्याचार्येण संपादितम्, भारतीयज्ञानपीठम्, काशी, १९५९.

डा. मु.विनोदः

Dr.Vinoth M

Researcher, Department of Indology,

French Institute of Pondicherry, Puducherry

vinothiyaga@gmail.com

***

CC BY

श्रीमद्भगवद्गीता में शूद्र की परिभाषा का यथोचित आधुनिक विश्लेषण

- **अपर्णा (धीर) खण्डेलवाल**[1]
एवं
- **बलरामसिंह**[2]

शोधसार -

'जाति-विषयक भेदभाव के अङ्कुर प्रस्फुटित कहाँ से हुए', क्या हमने कभी विचार किया? शास्त्रोक्त अनुदित विचार ही समाज में विभिन्न परिस्थितियों को जन्म देते हैं। प्रस्तुत आलेख में समाज की वर्तमानस्थिति को बताने हेतु श्रीमद्भगवद्गीता के 18 वें अध्याय के 44 वें श्लोक की व्याख्या पर लगभग 40व्याख्याओं एवं टीकाओं को उद्धृत की गया है। जब सभी त्रिगुणात्मक भाव व्यक्ति में विद्यमान है, तो त्रिगुणों की प्रबलता के आधार पर व्यक्ति कर्मयोग की ओर अग्रसर हो सकता है। इस दृष्टि से उपरोक्त श्लोक का विश्लेषण करने से समाज में विसंगत परिस्थितियों एवं कुरीतियों को रोका जा सकता है॥

शोधप्रबन्ध -

प्राचीनज्ञान की आधुनिक समाज में स्थिति

वर्तमान समाज में दिन-प्रतिदिन चर्चित जातिविषयक भेदभाव की भावना की गूँज निश्चित ही विश्व के सबसे बड़े लोकतंत्र के पतन का कारण हो सकता है। वस्तुतः यह जातिविषयक भेदभाव के अङ्कुर प्रस्फुटित हुए कहाँ से क्या हमने कभी इस पर विचार किया? यदि हम इस भेदभाव का दोष अपनी प्राचीन सभ्यताओं अथवा मान्यताओं को देते हैं, तो कहीं न कहीं हम अपने ग्रन्थ अथवा शास्त्रविदित विचारों की अवहेलना करते हैं। शास्त्रोक्त विचारों को जनमानस तक सुबोध और सही प्रकार से पहुँचाने की ज़िम्मेदारी उन शास्त्रों के व्याख्याकारों तथा अनुवादकों की होती है। वास्तव में शास्त्रोक्त अनुदित विचार ही समाज में विभिन्न परिस्थितियों को जन्म देते हैं। नासमझी अथवा भेड़चालमें किये गये अनुवाद एवं व्याख्या से समाज में विसंगत परिस्थितियाँ बनती हैं, जो विभिन्न प्रकार की कुरीतियों को जन्म देती हैं। अतः समाज के सही पथप्रदर्शन एवं शिक्षा हेतु हमें अपने शास्त्रिक परम्परा को भले प्रकार से अवलोकन करना चाहिए।

यह कैसी विडम्बना है? जिस देश में उसमें रहने वाले सभी मानव 'प्रजा' माने जाते थें *'तस्मान्मानव्यः प्रजा उच्यन्ते'*[1] और बिना किसी भेदभाव के परम एकतत्त्व 'परमात्मा' से उत्पन्न कहे जाते थे, आज वही 'प्रजाजन' जाति-वर्णविषयक भेदभाव से जूझ रहे हैं। यहाँ 'परमात्मा' से अभिप्राय वैदिक चिन्तन के 'ब्रह्म' से है। औपनिषदिक दर्शन के अनुसार ब्रह्म ने

एक से अनेक होने की इच्छा की। *'एकोऽहम्बहुस्यामि'* इस वैदिक विचार से भारतीय संस्कृति को जाननेवाले चाहे इतिहासकार हो या साहित्यकार सभी भली-भाँति परिचित हैं। इस विचारधारा के प्रथमदर्शन संहिता ग्रन्थों में होते हैं, जिसे हम वर्णव्यवस्था के रूप में मानते हैं।

'ब्राह्मणोऽस्यमुखमासीद.....पद्भ्यां शूद्रो अजायत'[2]

जहाँ ब्रह्म (परमात्मा) ने अपने शरीर के विभिन्न अङ्गों से ही अपने समस्त प्रजा जन की उत्पत्ति की और उनको गुण, योग्यता, क्षमता के आधार पर विभिन्न संज्ञाओं द्वारा पुकारा। श्रीमद्वाल्मीकियरामायण के अरण्यकाण्ड के चतुर्दशसर्ग में भी इसी प्रकार का वर्णन मिलता है।

'मनुर्मनुष्याञ्जनयत्कश्यपस्य....पद्भ्यां शूद्रा इति श्रुतिः'[3]

इस सन्दर्भ में श्रीमद्भगवद्गीता में श्रीकृष्ण स्पष्टतः कहते है कि मेरे द्वारा गुण और कर्मो के आधार पर इन चार वर्णों का समूह रचा गया है।

'चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः'[4]

अतः समता-भाव की दृष्टि से जिस प्रकार शरीर के सभी अङ्ग शरीर के सुचारुकार्य-प्रणाली के लिए महत्त्वपूर्ण है, उसी प्रकार भारतीय समाज की सुचारुकार्य-शैली एवं उन्नति हेतु समाज के सभी वर्गों का विशिष्ट एवं गौरवपूर्ण स्थान है।

उपरोक्त वैदिक शिक्षा होने पर भी आज हमारे समाज में कई ऐसी परिस्थितियाँ दिखाई देती है, जिन से समाज में विसंगति झलकती है। वैदिक दर्शन के अनुसार कण-कण में ईश्वर का वास है और यही हम सब को मानना भी चाहिए फिर भी वर्णों के आधार पर हमारा सामाज बँटा-सानज़र आता है। ऋग्वेद 10.90.12 तथा श्रीमद्भगवद्गीता 4.13 से तत्कालीनसमाज में वर्णव्यवस्था के होने का ज्ञान होता है। परन्तु उस समय समाज में वर्णव्यवस्था का स्वरूप वर्तमानकाल के समान कदापि नहीं था। अतः यह चिन्तन का विषय है कि आजकी सामाजिक स्थिति में यह परिवर्तन आया कैसे? इसका मुख्य कारण है शास्त्रों की अधुरी व्याख्या। इस तथ्य को सिद्धकरने के लिए कई उदाहरण हमारे समक्ष उपलब्ध हैं परन्तु प्रस्तुत आलेख में समाज की वर्तमानस्थिति को बताने हेतु श्रीमद्भगवद्गीता के अठारहवें अध्यायके 44वें श्लोक की व्याख्या पर चर्चा की जा रही है। व्याख्याकारों द्वारा इस श्लोक की ठीक से व्याख्यान करने से आज समाज में वैदिक वर्णव्यवस्था की विपरीत तस्वीर नज़र आती है।

श्रीमद्भगवद्गीता में वर्णों की व्याख्या

वस्तुतः श्रीमद्भगवद्गीता में श्रीकृष्ण ने अठारहवें[5] अध्याय में चारों वर्णों के कर्म (करणीय कर्त्तव्य) का आधार स्वभाव से उत्पन्न गुणों को माना है। श्रीकृष्ण कहते हैं कि

CC BY

अन्तःकरण का निग्रह करना, इन्द्रियों का दमन करना, धर्मपालन के लिए कष्ट सहना, शुद्ध रहना, दूसरों के अपराधों को क्षमा करना, शरीर सहित सभी इन्द्रियों को सरल रखना, वेद तथा ईश्वर आदि में श्रद्धा रखना, शास्त्रों काअध्ययन-अध्यापन करना; ये सभी ब्राह्मण के स्वाभाविक कर्म हैं। शूरवीरता, तेज, धैर्य, चतुरता, दानदेना, स्वामिभाव; ये सभी क्षत्रिय के स्वाभाविक कर्म हैं। खेती, गोपालन, क्रय-विक्रय; ये सभी वैश्य के स्वाभाविक कर्म हैं। सब वर्णों की सेवा करना शूद्र का भी स्वाभाविक कर्म है।

हम सभी जानते है कि श्रीमद्भगवद्गीता के विश्व के सर्वप्रसिद्ध एवं लोकप्रिय ग्रन्थ होने से अधिक्तरस भी भाषाओं में उस पर अनुवाद एवं व्याख्याऐं की गई हैं, जैसे कुछ प्रसिद्ध टीकाएँ इस प्रकार मिलती है

‘*Adi Sankara, Ananda giri, Daivajnya Pandita, Dhanapati, Hanumat, Madhusudana, Nilakantha, Sadananda, Sankarananda, Sridhara, Venkatanatha, Jnaneswara, Wamana pandita, Kesava kasmirin, Ramanuja, Madhwa, Jayathirtha, Raghavendra, Rantideva, Yadava prakasa, Narayana, Bhaskara, Abhinava Gupta, Ananda Vardhana, Rajanaka, Lasakaka, Ramakantha, Vasu Gupta, Vallabha, Purusottama, Bala Gangadhara Tilak, Mahatma Gandhi, Vinoba bhave, Bhakti Vedanta Prabupada, Chidbhavananda Swamiji, Swami Sivananda, Swami Chinmayananda, Sri Sathya Sai Baba, Paramahamsa Yogananda, Sarvapalli Radhakrishnan, V.S.Ghate, Ekanath Easwaran, Sri Aurobindo, W D P Gill, Senart, G.Thibaut, F.Edgerton, Jeanne Fowler, Ithamar Theodore*’[6]।

प्रिंसटन विश्वविद्यालय के मुद्रणालय से छपि ऋचर्ड एच. डेवीस की पुस्तक ‘*The Bhagavad Gita - A Biography*’[7] **की भूमिका के पृष्ठ 8 में भी लेखक ने विश्वभर में गीता पर मिलनेवाली व्याख्याएँ और अनुवादों की चर्चा की है-** “*The brief seven-hundred-verse poem has been the subject of hundreds of written commentaries in Sanskrit and other Indian languages. It has been translated into more than seventy-five languages worldwide. In English*

alone, well over three hundred translations of the Gita have been published."|

शूद्र-कर्म व्याख्या में अनुचित अनुवाद

तत्रभवान् सकल-कविकुलमूर्धन्यस्सर्वतन्त्रप्रतिभाविशेषः श्रीमदात्रेयवेङ्कटाध्वरी अथवा वेङ्कटाचार्यः महाकविः अधिगतशास्त्रसारोऽपि लब्धभगवद्रामानुजसम्प्रदायसम्बन्धोऽपि तटस्थसहृदय-जनपिपीषया - 1. **विश्वगुणादर्शचम्प्वादि** - प्रबन्धानाम्, 2. **शृङ्गारदीपादि** - भाणग्रन्थानाम्,3. **सुभाषितकौस्तुभादि** - चाटुकाव्यानां च निर्माणेन लोके स्वकीर्तिं प्रतिष्ठापयामास[2]।

2. श्रीमदप्पयगुरोः पौत्रः रघुनाथदीक्षितस्य पुत्रः -

काञ्चीमण्डलभूषणस्य प्रशस्तयागकर्तुः कर्नाटभूभृतः श्रीकृष्णदेवरायस्य गुरुः यः पञ्च-संस्कारकर्ता, दिगन्तेषु कान्तयशः **ताताचार्यः** विद्यते। तस्य ताताचार्यस्य भगिन्याः पुत्रः अप्पयगुरुरस्ति। अयमध्वराणां वाजपेय-पौण्डरीकादीनां कर्ता विद्वन्मणिः विराजते। अस्य अप्पयगुरोः पुत्रः श्रीरघुनाथदीक्षितो नाम कविः मत्पिता (अस्य श्रीमद्वेङ्कटाध्वरिणः पिता) गुणैः वर्धते[3] - इति, तस्य रघुनाथदीक्षितस्य सुतः तर्क-वेदान्त-मीमांसा-व्याकरणानामध्येता वेङ्कटाध्वरिनामा कविः विश्वस्य गुणानाम् आदर्शमिव (प्रतिपादकमिव) चम्पूप्रबन्धं करोति[4] - इति च विश्वगुणादर्शचम्प्वाम् अयं महाकविः स्वपरिचयं वक्ति।

---

1. प्रद्युम्नानन्दीयनाटकस्य प्रथमाङ्कस्य पुष्पिकायाम् – पृ.82 इति श्रीवाजपेयसर्वपृष्ठाप्तोर्यामादियाज्यात्रेयवंशमौक्तिकीभवदप्पयाचार्यतनूभवस्य श्लेषयमकचक्रवर्तिनो रघुनाथार्य-यज्वनस्तनयेन श्रीनिवासकृपातिशयसुविदितनयेन सीताम्बागर्भसम्भवेन काञ्चीनगरवास्तव्येन वेङ्कटाचार्ययज्वना विरचिते प्रद्युम्नानन्दनाम्नि नाटके प्रथमोऽङ्कः।। - इति।
   H.C.S.L. P. 513-514. Veṅkaṭādhvarin or Veṅkaṭācārya was the son of Raghunātha and Sītāmbā of the Ātreyagotra. His grandfather Śrīnivāsa known as Appayaguru was the nephew of the great Tātācārya (Pañcamatabhañjana Tātācārya).
2. लक्ष्मीसहस्रम्, व्याख्या – रत्नप्रकाशिका, पृ. 3
3. काञ्चीमण्डलमण्डनस्य मखिनः कर्नाटभूभृद्गुरो-स्तातार्यस्य दिगन्तकान्तयशसो यं भागिनेयं विदुः। अस्तोकाध्वरकर्तुरप्पयगुरोरस्यैव विद्वन्मणेः पुत्रः श्रीरघुनाथदीक्षितकविः पूर्णो गुणैरेधते।। (विश्वगुणादर्शचम्पूः, श्लोकसंख्या 2)
4. तत्सुतस्तर्क-वेदान्त-तन्त्र-व्याकृतिचिन्तकः। व्यक्तं विश्वगुणादर्शं विधत्ते वेङ्कटाध्वरी।। (वि.गु.चं., श्लोकसंख्या 3)

एवं द्वितीय-तृतीयश्लोकयोः संक्षेपतया स्वकीयवृत्तं निवेदितं तस्मादयं श्रीमदप्पयगुरोः नप्ता, श्रीरघुनाथदीक्षितस्य च पुत्र इति ज्ञायते।

3. तातयार्यः/ ताताचार्यः - अप्पयगुरुः - अप्पय्यदीक्षितः –

सं.	विषयः
	अयम् **अप्पयगुरुः,** "कुवलयानन्द-चित्रमीमांसादिग्रन्थकर्तुः तत्रभवतः अप्पयदीक्षितात् भिन्नः"[5] - इत्यवगम्यते। यतः स **अप्पयदीक्षितो** द्रविडजातीयः, भगवतः श्रीशिवस्य परमो भक्तः, अद्वैतपक्षपाती, वैष्णवमतखण्डकश्चासीत् इति तद्वृत्ततः श्रूयते।
	किञ्च वेङ्कटपतिनामधेयस्य कस्यचिद्राज्ञः सभायां वेदान्त-धर्मशास्त्रादिविषये ताताचार्य-मतमनेन खण्डितम्। ततः प्रभृति **ताताचार्यः अप्पयदीक्षितेन** दृढतरबद्धवैर आसीत्। नैतावदेव, केनापि प्रकारेणायं हन्तव्यः इत्यपि निश्चिकाय। ततश्चैकस्मिन् समये ताताचार्येण तत्रभवन्तं दीक्षितं विपिनमार्गेण गच्छन्तं ज्ञात्वा तद्वधाय चण्डालाः प्रेषिताः, परन्तु तेन तपस्विना शिवभक्तिप्रभावः केवलं द्वेषपरवशतया नावगतः। तत एव तस्मिन्नरण्ये कश्चिद्वीरपुरुषः सहसाऽऽविर्भूय तेन चण्डालाः परिभूताः इत्यादि। अस्तु नामैतत्।
	अत्रत्योऽयम् अप्पयगुरुस्तु **ताताचार्यस्य भागिनेयः** इति निश्चीयते।
	ताताचार्यस्तु कर्नाटदेशीयस्य राज्ञः श्रीकृष्णदेवरायस्य गुरुः, परोपकाररतश्चासीत्। अनेन ताताचार्येण **सात्त्विकब्रह्मविद्याविलासः** इति प्रसिद्धो वेदान्तशास्त्रग्रन्थो व्यरचि इत्यपि श्रूयते। अयमेवाभिप्रायः विश्वगुणादर्शचम्प्वाः प्रकाशकः श्यामराय विट्ठलमहोदयः विस्तृताङ्ग्लभूमिकायाम् इत्थमभाणीत् – The name of its author is *Veṅkaṭādhvari*, or, as some of our copies read it, *Veṅkaṭācārya*. In the short account of his origin contained in the second and third verses of the work, the author gives his father's name as *Raghunāthadīkṣita* : the son of *Appaya Guru*. It is also mentioned therein that this Appaya Guru was the nephew (sister's son) of *Tātārya*, the spiritual preceptor of *Kṛṣna Rāya*, king of the *Karnāṭak*.[6] इति।

4. चतुशास्त्रपारावारपारीणः -

शास्त्रेषु वैदुष्यम्, पटीयसी काव्यनिर्माणप्रतिभा च वरदाभ्युदयचम्पूप्रबन्धे कविरसौ स्वस्य चतुश्शास्त्र-पारावारपारीणतां रसालङ्कारसरणिमादृत्य विविधकाव्यनिर्माणधुरीणतां च स्वयं **व्यायामं गमिता त्वलङ्कृतिपथे** इत्यादिना प्रकटयामास। यथा -

5. विश्वगुणादर्शचम्पूः (वि.गु.चं.), बालकृष्णशर्मा, भूमिका, पृ. 1

6. वि.गु.चं., श्यामरायशर्मा विट्ठलः, आङ्ग्लभूमिका (Introduction)।

अनल्पकल्पनाभरिते काव्यपथे इव - 1.**व्याकरणे** - महाभाष्यस्फूर्तिं, **2.तर्कशास्त्रे** - मणिसारखण्डनं, **3.मीमांसायां** - विधित्रयपरित्राणं, **4.विशिष्टाद्वैतवेदान्ते** - नयद्युमणिदीपिकां च प्रणीतवानेषः स्वीयां चतुशास्त्रपारीणतां प्राचीकशत्।

5. श्लेषयमकचक्रवर्ती -

चम्पूग्रन्थानेकान्, **नाटकानि** च त्रि-चतुराणि, लक्ष्मीसहस्र-श्रवणानन्दप्रभृतीनि च **विविधस्तोत्राणि** एतत्कर्तृकाणि पठतामस्य श्लेषयमकचक्रवर्तिबिरुदम् अन्वर्थमेवेति सहृदयानां चेतसि प्रतिभायात्। कल्पनाप्रवाहकरम्बितां विसृत्वरीं प्रतिभाम् अस्य साक्षात् अध्यक्षयद्भिः समकालिकैः पण्डितप्रवरैः अयमपि कविः सबुहमानम् उपश्लोकित इति कश्चित् मुक्तकश्लोकं श्लेषचमत्कृतं रसिका उदाहरन्ति। तद्यथा –

वेङ्कटाध्वरिणानेन जितौ गुरुफणीश्वरौ। धिषणा हीनतां प्राप्तौ जग्मतुजीवशेषताम्[7]।। इति।

अस्य पिता रघुनाथदीक्षितोऽपि श्लेषयमकचक्रवर्ति-बिरुदेन भूषित इति विश्वगुणादर्शचम्पू-प्रबन्धान्तिमगद्यादवगम्यते।

6. प्रद्युम्नानन्दनाटकाधारेण कवेः परिचयविशेषाः -

प्रद्युम्नानन्दीयनाटकस्य प्रस्तावनायां सूत्रधार-नटयोः सम्भाषणमुखेन नाटककर्त्रा वेङ्कटाध्वरिणैव स्ववंशावलीम्, जीवनगताः विशेषाश्च इत्थं व्यजिज्ञपत्।

यदनुष्ठितैः अस्तोकैः मखवरैः वैतानवपाहविः हस्तिक्षमाभृत्पतिः पुनः तां कबलनक्रीडां स्मारितः, सः श्रीमानप्पयदेशिकाध्वरिमणिः भुवि अत्रेः पवित्रे कुले शुभयशसि आविर्भूय कीर्त्या जागर्ति[8]।

अत्र यत्कृतवाजपेयमखभूवेदिप्रतिष्ठः, यूपः त्याशामण्डनकीर्तिपाण्डरजयच्छत्रैकदण्डश्रियम् वहति, अत्रिवंशस्य अभिजनं पवित्रयन् बोधाम्बुधिः, आश्रयतां भवार्णवतरिः सः **श्रीमान् श्रीश्रीनिवास** इत्याख्यः जागर्ति[9]।

यस्य **श्रीनिवासमखिनः सिंहासनस्थक्षितिपतिगुरुः उच्चैरद्भुतौदार्यधैर्यः, यतिपतिमतधुर्यः, तस्य** विमलशीलः मातुलः **भूतलोद्यत्कुमतितिमिरसूर्यः तातयाचार्यवर्यः अजनि**[10]।

---

7. लक्ष्मीसहस्रम्, व्याख्या – रत्नप्रकाशिका, पृ. 3

8. आविर्भावमुपेयिवान् शुभयशस्यत्रेः पवित्रे कुले, श्रीमानप्पयदेशिकाध्वरिमणिर्जागर्ति कीर्त्या भुवि।
अस्तोकैर्यदनुष्ठितैर्मखवरैर्हस्तिक्षमाभृत्पतिः, तां वैतानवपाहविः कबळनक्रीडां पुनस्स्मारितः।।1.5।।

9. अत्रेरत्र पवित्रयन्नभिजनं जागर्ति बोधाम्बुधिः, श्रीमानाश्रयतां भवार्णवतरिश्श्रीश्रीनिवासाभिधः।
यूपो यत्कृतवाजपेयमखभूवेदिप्रतिष्ठो वह-त्याशामण्डनकीर्तिपाण्डरजयच्छत्रैकदण्डश्रियम्।। 1.6।।

10. यतिपतिमतधुर्यो यस्य सिंहासनस्थ-क्षितिपतिगुरुरुच्चैरद्भुतौदार्यधैर्यः।
अजनि विमलशीलो मातुलो भूतलोद्यत्, कुमततिमिरसूर्यस्तातयाचार्यवर्यः।। 1.7।।

CC BY

तस्य **श्रीनिवासमखिनः** किल तनूभवः, प्रौढालङ्करणा, पवित्रपदविन्यासा, कवितास्वर्धेनुः यस्यास्यात् उदिता बहून् अर्थान् ददाति, सः गभीरध्वनिः आत्रेयान्वयजृम्भितः कविक्षीराब्धिः रघुनाथदीक्षितः सततम् अन्तर्मुकुन्दं वहन्, सारज्ञैः आराध्यते[11]।

वेङ्कटार्याध्वरिणः पिता परमप्रभया अतुलोऽकलङ्कः कृतदानश्च महाच्छविः विधूतदूषणः यथार्थनामा श्रीरघुनाथार्यमखी भुवि भाति[12]।।

तस्यैतस्य तनूभवः कविरयं त्रय्यञ्चलव्याक्रिया,
तर्कप्रौढचमत्क्रियासु निपुणो मीमांसकोत्तंसकः।
तत्तादृक्कविता सरोजसविता दत्ताशयश्श्रीपतेः,
शेषक्ष्माधरवासिनश्चरणयो-श्रीवेङ्कटार्याध्वरी।। 1.10।।

तस्य श्रीरघुनाथार्यमखिनः पुत्रः अयं कविः वेङ्कटार्याध्वरी त्रय्यञ्चलव्याक्रिया-तर्कप्रौढचमत्क्रियासु च निपुणः, मीमांसकोत्तंसकः तिरुपतिक्षेत्रनिवासी अवर्तत।

एतादृशगुणयुक्तेन तेन **वेङ्कटार्याध्वरिणा** किल निबद्धं प्रद्युम्नानन्दाभिधानमभिनवम् नाटकमभिनयद्भिरस्माभिरानन्दयितव्या परिषदेषा इति सूत्रेधारे कथिते –

तदा नटः - स्मरवधूकर्णावतंसोत्पल-स्वैरोदञ्चितशीधुपूरसुहृदः श्रीवेङ्कटार्योक्तयः विदुषां मुदे कल्पन्ते। शृङ्गारपारङ्गताः श्रीमत्तिर्मलरायपण्डितमुखाः श्रोत्रैः सुचिरं निपीय श्लाघाविलोलं शिरः दधते[13]।

किं बहुना- **एकेनैव दिनेन काव्यरचनामीष्टे विधातुं तथा**
शास्त्राणामपि शक्नुयात् कलयितुं टीकामनायासतः।
शक्तो युक्तिमहोर्मिभिश्शमयितुं दुर्वादिगर्वानलं
दासश्श्रीसखसेविनां स जयति श्रीवेङ्कटार्याध्वरी।। 1.12।।

अपि च- **अच्छलवादरणेच्छो रक्षोपायक्षमात् स रघुनाथात्।**
अतिथिजनकोमलमना जातश्श्रयते पराङ्कुशस्य स्मृतिम्।। 1.13।। इति प्रत्युत्तरयति।

ततः **सूत्रधारः -** साधु मारिष! सर्वमपि दैवानुग्रहात् साम्प्रतमुपपन्नमिति, आत्रेयकवेः दुग्धे मुग्धवधूजनाधरसुधाहङ्कारहुङ्कारिणी फणितिः सतां श्रोत्रेषु हर्षं जनयति। सभासदः

---

11. आत्रेयान्वयजृम्भितस्सततमप्यन्तर्मुकुन्दं वहन्, सारज्ञै रघुनाथदीक्षितकविक्षीराब्धिराराध्यते।
प्रौढालङ्करणा पवित्रपदविन्यासा गभीरध्वनिः, यस्यास्यादुदिता ददाति कविता स्वर्धेनुरर्थान् बहून्।। 1.8।।

12. परमप्रभयाऽतुलोऽकलङ्कः कृतदानश्च महाच्छविप्रहस्ते।
भुवि भाति विधूतदूषण-श्श्रीरघुनाथार्यमखी यथार्थनामा।। प्रद्युम्नानन्दीयम्, 1.9।।

13. कल्पन्ते विदुषां मुदे स्मरवधूकर्णावतंसोत्पल-स्वैरोदञ्चितशीधुपूरसुहृदश्श्रीवेङ्कटार्योक्तयः।
श्रोत्रैर्या सुचिरं निपीय दधते शृङ्गारपारङ्गताः, श्रीमत्तिर्मलरायपण्डितमुखाश्श्लाघाविलोलं शिरः।। 1.11।।

सारङ्गाः वयञ्च सर्वोत्तरानर्तने समर्थाः किं बहुना प्रायः अयं प्राचीनभाग्यागमः अस्मभ्यं चिरात् फलति[14] - इति नाट्यसामग्रीः ब्रवीति।

अथ वेङ्कटार्याध्वरी आत्रेयगोत्रोत्पन्नत्वात् अत्रिमहर्षि-गोत्रापत्यानां पट्टिका अस्मत्सम्पादित- प्रद्युम्नानन्दीयनाटकग्रन्थस्य भूमिकायां द्रष्टव्या[15]।

7. देशः कालश्च -

क्र.सं.	विषयः
1.	काञ्चीमण्डले अरशाणिफालाग्रहारे लब्धजनुषोऽस्य तत्रैव विद्याग्रहणादिना बाल्य-कौमारवयसी यापितवतः प्रौढां दशामारभ्य आदेहपातं काञ्च्यामेवावस्थानमिति विमर्शकजन-वचनादवगम्यते। अस्य आवासकालश्च प्रायः क्री.श. 1599-1699 मध्ये भवतीति विमर्शकाः अभ्यूहन्ते। अत एव समसामयिकत्वं, तेन सहैव कस्यचित् गुरोरन्तिके सामान्यशास्त्राध्ययनमिति च सम्भाव्यते।
2.	वेङ्कटाध्वरी नीलकण्ठदीक्षितस्य सहपाठी आसीत्। नीलकण्ठदीक्षितः अप्पय्यदीक्षित-सहोदरस्य पौत्रः आसीत्। अतः एतस्य कालः क्रीस्तोः परं 1637 वत्सरः इति वक्तुं शक्यते। एषः रामानुजस्य विशिष्टाद्वैतानुयायी वर्तते। वडघलै सम्प्रदायसम्बद्धः।
3.	अयं विश्वगुणादर्शकर्ता वेङ्कटाध्वरिनामा कविः नीलकण्ठदीक्षितसमकालीनः तत्सहाध्यायी चासीत् इति। ततश्चैवं प्रतीयते - नीलकण्ठदीक्षितः, अप्पयदीक्षितस्य पौत्रः, नारायण-दीक्षितस्य च पुत्रः आसीदिति काव्यमालाख्यमासिकपुस्तकस्य प्रथमगुच्छान्तर्गत-श्रीमदप्पयदीक्षितप्रणीतवैराग्यशतकाख्यग्रन्थस्य प्रथमश्लोकटिप्पण्यां दृश्यते। अनेन नीलकण्ठचम्पूरचयित्रा, तत्प्रारम्भे स्वकीयग्रन्थनिर्माणकालश्चापि निर्दिष्टः। तद्यथा - **अष्टात्रिंशदुपस्कृतसप्तशताधिकचतुःसहस्रेषु।** **कलिवर्षेषु गतेषु ग्रथितः किल नीलकण्ठविजयोऽयम्।।** इति। एतस्मादेवं निश्चीयते 4738 तमे वर्षे नाम ख्रिस्ताब्दं 1637 तमं भवति। एतस्मिन्नेव वर्षे नीलकण्ठचम्पूः विरचिता, तत्समकालीनश्चायं वेङ्कटाध्वरिनामा कविरासीत्, ततश्च 262 वत्सरेभ्यः प्राक् अयं विश्वगुणादर्शकर्ता कविः सुप्रसिद्धः आसीत् इति। परं च तेनायं ग्रन्थः कस्मिन् वर्षे निर्मित इति तु न याथार्थ्येन निश्चेतुं शक्यते, केवलं 262 वर्षेभ्यः प्राक्तनकालीनोऽयं ग्रन्थ इत्यनुमीयते[16]।

[14]. आत्रेयस्य कवेरुदारफणितिश्श्रोत्रेषु हर्षं सतां, दुग्धे मुग्धवधूजनाधरसुधाऽहङ्कारहङ्कारिणी।
सारङ्गाश्च सभासदो वयममी सर्वोत्तरानर्तने, प्रायः किं बहुना चिरात्फलति नः प्राचीनभाग्यागमः।। 1.14।।

[15]. प्रद्युम्न. भूमिकायाः पृ. 26-27 द्रष्टव्ये।

[16]. वि.गु.चं., श्यामरायशर्मा विट्ठलः, आङ्ग्लभूमिका (Introduction)। पृ. 1

CC BY

	"The author of the work in question *(Viśvaguṇādarśa)* was a contemporary and school-mate of ***Nīlakaṇṭhadīkṣita,*** who wrote a work called ***Nīlakaṇṭhacampū*** in 4738 of the ***Kali*** era and therefore flourished 251 years ago. The exact date when the ***Viśvaguṇādarśa*** was written cannot be given. We can only say that the author lived about 250 years ago. He lived at an ***Agrahāra*** called ***Arśanaphāl*** in the town of ***Kāñcīpura*** and was a descendant of the renowned family of ***Tātācāri,*** a ***Vaḍaghalai Vaiṣṇava,*** whose family has borne the title of ***Tātācāri*** considered to be a corruption of ***Dāsa,*** the ancestor being a great devotee of ***Tirupati Veṅkaṭaramaṇa.*** But tradition says that the name ***Tātācāri*** was given, because the Tirupati God being pleased with the devotion of the man called him ***Tātā*** (Grandfather) when he addressed him."[17] अन्यदप्यत्रत्यमुद्रितपुस्तकप्रस्तावनायां किञ्चिद्वृत्तमुपलभ्यते - अयं वेङ्कटाध्वरी काञ्चीपुरसमीपे अर्शनफल (अरशाणफालै) नाम्नि अग्रहारे प्रतिवसति स्म। वडघळै इत्याख्यवैष्णवसम्प्रदायपक्षपाति-ताताचार्यान्वयोत्पन्नश्चासीत् इति।
4.	अथास्य विश्वगुणादर्शग्रन्थस्य कालनिर्णायकं लिङ्गम् अस्मिन्नेव ग्रन्थे दृश्यते तत् - **हूणाः करुणाहीनास्तृणवद् ब्राह्मणगणं न गणयन्ति।** **तेषां दोषाः पारेवाचां ये नाचरन्ति शौचमपि।।** इत्यादि यत् हूणानां (गौरकायाङ्ग्लदेशीयानां) वर्णनादनुमीयते यत् - ख्रिस्तशतकस्य 1640 तमे वर्षेऽयं ग्रन्थो विरचित इति। कालविषयेऽपि इतोऽपि विचारः प्रवर्तनीय आसीत् इति भाति।
5.	प्रद्युम्नानन्दीयनाटकरचनाकालं तत्रैव ग्रन्थान्ते स्वयं वदति वेङ्कटाचार्यकविः - **नवसन्दर्भमात्रेयो नाटकं वेङ्कटाध्वरी।** **प्रजोत्पत्तौ प्रौष्ठपद्यां पूर्णिमायामपूरयत्।।** प्रद्यु.ना. 6.35।। इति। अयं भावः - आत्रेयगोत्रोत्पन्नः श्रीमद्वेङ्कटाध्वरी प्रजोत्पत्तिवर्षस्य प्रौष्ठपदी(भाद्रपद)-मासस्य पूर्णिमातिथौ प्रद्युम्नानन्दीयाभिधानं नव्यं नाटकम् अपूरयत् - इति। अमुमेव विषयं प्रतिपादयति G.O.M.L. **(No. 12545)** Descriptive Catalogue ----- "The work is said to have been completed by the author on

[17]. Ibid

	the full moon day of the Prauṣṭhapada month in the year Prajotpatti." इति।

8. वेङ्कटाध्वरिणः कृतयः

तत्रभवतः [18]आत्रेयस्याष्टभाषाचक्रवर्तिनो वेङ्कटाध्वरिणो ग्रन्थाः अष्टोत्तराताधिका सन्ति। एतच्च तद्वंशीयैरुक्तम् इति **श्लेष-यमकचक्रवर्ती वेङ्कटाध्वरी - तत्कृतीनामध्ययनम्** इति शोधकर्तृग्रन्थात् ज्ञायते।

शोधपत्रेऽस्मिन् उपलभ्यमानाधारैः वेङ्कटाध्वरिणः परिचयः, तस्य देशः कालश्च इत्येते विषयाः यथामति समुपस्थापिताः।। इति शम्।

अनुशीलितग्रन्थाः (Reference Books)

क्र.सं.	ग्रन्थनाम	रचयिता, सम्पादकः, प्रकाशक इत्यादि।
1.	**प्रद्युम्नानन्दनाटकम्**	श्रीमदरिशाणफालवेङ्कटाचार्यविरचितं संस्कृतप्राकृतापूर्वशब्दश्लेष-यमककथाविशेष-विचित्रितम्, तिरुमलताताचार्यसाह्येन संशोधितः, विद्यातरङ्गिणीमुद्रणशाला – महीशूरपुरी (मैसूर्) – 1883 आन्ध्रलिप्यां मुद्रितम्।
2.	**प्रद्युम्नानन्दीयनाटकम्**	श्रीमद्वेङ्कटाध्वरिविरचितं, सम्पादकः – डा. पठान् महम्मद् वलि खान्, प्रकाशकः – वनमालीप्रकाशनम्, तिरुपतिः – 517501 चलद्वाणी – 8885161850
3.	**लक्ष्मीसहस्रम्**	वेङ्कटाध्वरी, व्याख्या – रत्नप्रकाशिका, व्याख्याकारः – श्रीकृष्णब्रह्मतन्त्रपरकाल-मुनीन्द्रः, परिष्कर्ता - श्री.न.च.रघुनाथाचार्यः, प्रकाशकः – सत्सम्प्रदायपरिरक्षण-सभा, वरंगल् (आं.प्र.) - 2000
4.	**विश्वगुणादर्शचम्पूः**	श्रीवेङ्कटाध्वरिविरचिता, श्रीमन्मधुरसुब्बरायशास्त्रिणा विरचितया भावदर्पणाख्यया टीकया सनाथीकृता। मुम्बापुरस्थहायकोर्टाभिधन्यायपरिषद्वृतवकीलसंहूतिना विट्ठल-सूनुना श्यामरायशर्मणा मुम्बापुर्यां कर्णाटकाख्यमुद्रणालयेऽङ्कयित्वा प्रकाशं नीता। इसवी. 1889.
5.	**विश्वगुणादर्शचम्पूः**	महाकविश्रीमद्वेङ्कटाध्वरिविरचिता, योगीत्युपाभिध-बालकृष्णशास्त्रिविरचितपदार्थ-चन्द्रिकाटीकासहिता। बाक्रे इत्युपाह्वगङ्गाधरभट्टसूनुना महादेवशर्मणा संशोधिता। मुम्बय्यां तुकाराम जावजी इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये आयसाक्षरैर्मुद्रयित्वा प्रकाशिता। ख्रिस्ताब्दः - 1915

[18]. अत्रिमहर्षिगोत्रापत्यपट्टिका प्रद्युम्नानन्दीयनाटकस्य भूमिकायां दत्ता।

CC BY

6.	**श्लेषयमकचक्रवर्ती वेङ्कटाध्वरी - तत्कृतीनामध्ययनम्**	शोधकः – डा. जि. स्वामिनाथाचार्युलु यम्.ए., पि.हेच्.डि. (सं.), जून् 1988 परिशोधग्रन्थः।
7.	**संस्कृतसाहित्येतिहासः**	आचार्य लोकमणिदाहलः, कृष्णदास अकादमी, वाराणसी - 1999
8.	**సంస్కృత సాహిత్య చరిత్ర**	వైదికవాఙ్మయం – లౌకికవాఙ్మయం – విమర్శనాత్మకం, వేదాలజ్కార్ డా. ముదిగంటి గోపాలరెడ్డి, డా. ముదిగంటి సుజాతారెడ్డి, పొట్టి శ్రీరాములు తెలుగు విశ్వవిద్యాలయం, హైదరాబాద్ - 2002
9.	**A Descriptive Catalogue of the Sanskrit**	In the Government Oriental Manuscripts Library, Madras. By S. Kuppu Swami Sastri, M.A., Curator, Government Oriental Manuscripts Library and Professor of Sanskrit and Comparative Philology, Presidency College, Madras. Prepared under the order of the Government of Madras. **Volume - XXI - Kavyas** (Continued).
10.	**History of Classical Sanskrit Literature**	Being an elaborate account of all branches of classical sanskrit leterature with full epigraphical and Archaeological notes and references, an introduction dealing with language, Philology and Chronology and Index of Authors & works. M. Krishnamachariar, Motilal Banarsidass Publishers Private Limited, Delhi. 2004.

डा. पठान् वलि साहेब्

Dr. Pathan Vali Saheb

Guest Lecturer in Sanskrit

Sri Venkateswara Vedic University

TIRUPATI - 517 502

mahammadvalipathan@gmail.com

***

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

संस्कृतकाव्ये शकुनम्

- डॉ. हेमन्त शर्मा

शोधसारः -

भारतीयसंस्कृतिः सम्पूर्णविश्वे स्ववैविध्येन विशिष्टमेकं स्थानं स्थापयति। भारतीयसंस्कृतेः लोकव्यवहारः वा सामाजिकचेतना वा दार्शनिकचिन्तनं वा लोकरञ्जनं वा भाषिकवैविध्यं वा शास्त्रीयवैशिष्ट्यं वा इत्यादिकं सर्वं समस्तजगतितले सर्वान् आकर्षयति। भारतीयमनीषिणां गहनचिन्तनस्य सूक्ष्मान्वेषणस्य च परिणामो वर्तते शकुनशास्त्रम्। शुभाशुभसूचकानां शकुनानां व्यवहारं सम्पूर्णविश्वसंस्कृतौ दृष्टुं शक्यते। भारतीयसंस्कृतौ अपि संस्कृतसाहित्ये साहित्यशास्त्रिभिः बहुधा विन्यस्तं शकुनमिदम्। अत एव संस्कृतकाव्ये शकुनमिति विषयमधिकृत्य शोधपत्रमिदं प्रस्तूयते। प्रस्तुतशोधपत्रेऽस्मिन् विभिन्नसंस्कृतकाव्येषु प्रयुक्तानां शुभाशुभनिमित्तसूचकानां शकुनानां वर्णनं प्रस्तुतम्। वाल्मीकिरामायणं – रघुवंशं – किरातार्जुनीयं – हर्षचरितं – मुद्राराक्षसं - चम्पूरामायणम् इत्यादिषु काव्यग्रन्थेषु नाट्यग्रन्थेषु वा येषां शुभाशुभशकुनानां काव्यघटनादृष्ट्या प्रयोगः कृतः तेषामुद्धरणं शोधपत्रेऽस्मिन् दृष्टुं शक्यते।

किं शकुनमिति जिज्ञासायामुच्यते येन शुभाशुभयोः ज्ञानं स्याद् तदिति। प्रकृतौ शुभाशुभयोः ज्ञानमिदं विभिन्नप्रकारकैः संकेतैर्लक्षणैर्वा भवति। भविष्यमाणशुभाशुभघटनानां सूचना शकुनैः प्रदीयते। शकुनद्वारा मानवः भविष्ये किं शुभफलं प्राप्स्यत्यशुभफलं वा, कार्यसिद्धिर्भविष्यति न वा, कार्यसाफल्यं प्राप्स्यति न वा, लक्ष्यप्राप्तिर्भविष्यति न वेति विभिन्नप्रकारकाणां शुभाशुभज्ञानं भवति। अत एवोक्तम् –

शक्नोति शुभाशुभं विज्ञातुमनेनेति शकुनम्[1]

अनेन स्पष्टं भवति भाव्यर्थबोधकः शकुनमिति। शुभाशुभयोः मङ्गलामङ्गलयोः वा सूचनेयं क्वचिद् अङ्गादिस्फुरेण क्वचिद् पशुपक्षीजीवजन्त्वादिव्यवहारेण क्वचिद् विभिन्नप्राकृतिकघटनादिभिः प्राप्तविभिन्नप्रकारकैः संकेतैः सञ्ज्ञायते। एवं प्रकारेण विभिन्नप्रकारकैः संकेतैर्लक्षणैर्वा यज्ज्ञानं तद्सर्वं शकुनस्य विषयः। आचार्यवराहमिहिरानुसारेण शकुनन्तु जन्मान्तरकृतकर्मणः भावीफलस्य शुभाशुभयोः प्रदाता।

अन्यजन्मान्तरकृतं पापं पुंसां शुभाशुभम्।
यत् तस्य शकुनः पाकं निवेदयति गच्छताम्।। [2]

एवं प्रकारेण किं शुभं किञ्चाशुभमित्यनुमानविषयकं शकुनम्। लक्षणं संकेतं निमित्तादिकं शकुनस्यैव पर्यायाः। मङ्गलामङ्गलयोः योगे शकुनशब्दप्रयोगः नपुंसकलिङ्गे भवति। यथोक्तं मेदिनीकोशे –

शुभाशंसनिमित्ते च शकुनं स्यान्नपुंसकम्। [3]

भारतीयकाव्यपरम्परायां भाव्यर्थसूचकशकुनस्य प्रारम्भः वैदिककालादेव दृष्टुं शक्यते। ऋग्वेदस्यास्यामृचायां भाव्यमङ्गलनिवारणाय सुमङ्गलकरणाय च प्रार्थ्यते –

CC BY

मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान् वीरो अस्ता।
पित्र्यामनु प्रदिशं कनिक्रदत् सुशंगतो भद्रवाही वदेह।। [4]

अथर्ववेदेऽपि यात्राविषयकममङ्गलं संसूचितम् –

अनुहवं परिहवं परिवादं परिक्षवम्।
सर्वे मे रिक्तकुम्भान् परा तान्त्सवितः सुवः।। [5]

कौटिल्यकृतार्थशास्त्रे विजिगीषु राजा विजयस्य कृते ज्योतिर्विदैः शकुनशास्त्रज्ञैः परामर्शं गृह्णीयात्। अत्रैव युद्धार्थं दक्षिणदिक् प्रति सैनिकानां मुखम् अमङ्गलसूचकमिति –

व्यूह सम्पदा कार्तान्तिकादिश्चास्य वर्गः सर्वज्ञदैवसंयोगख्यापनाभ्यां स्वपक्षमुद्धर्षयेत्।
अदक्षिणामुखं पृष्ठतः सूर्यमनुलोमवातमनीकं स्वभूमौ व्यूहेत्। [6]

श्रीमद्भगवद्गीतायामर्जुनोऽपि अशुभनिमित्तं दर्शयन् केशवं प्रति कथयति-

निमित्तानि च पश्यामि विपरीतानि केशव[7]

वस्तुतः संस्कृतवाङ्मये शकुनस्य विभिन्नप्रकाराणां विभिन्नस्वरूपेषु प्रयोगः विद्यते। संस्कृतसाहित्येऽपि कविकृतकाव्येषु बहुविधानां शकुनानां प्रयोगः वर्तते। काव्येषु कवयः शुभाशुभोभयविधशकुनानां विन्यासं कृतवन्तः। भाव्यर्थबोधकशकुनमिदं काव्येषु विद्योतते विभिन्नार्थेषु। भविष्ये घट्यमानघटनानां संकेतात्मकं ज्ञानं काव्येष्वपि बहुविधशकुनैर्लक्षणैर्निमित्तैर्वा संजायते। आदिकाव्ये रामायणे तु बहुशः शकुनानां प्रयोगः दृश्यते। रामायणे अशोकवाटिकायां रामविरहाकुलासीता यदा स्वकीयप्राणान् त्यक्तुमिच्छति तदैव तत्समक्षे पुरानुभूतानि बहुविधश्रेष्ठशकुनानि समुपस्थितानि जातानि –

तस्या विशोकानि तदा बहूनि धैर्याजितानि प्रवराणि लोके।
प्रादुर्निमित्तानि तदा बभूवुः पुरापि सिद्धान्युपलक्षितानि।।
तस्याः शुभं वाममरालपक्ष्म राज्यावृत्तं कृष्णविशालशुक्लम्।
प्रास्पन्दतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाभिताम्रम्।।
भुजश्च चार्वाञ्चितवृत्तपीनः परार्घ्यकालागुरुचन्दनार्हाः।
अनुत्तमेनाध्युषितः प्रियेण चिरेणवामः समवेपताशु।।
गजेन्द्रहस्तप्रतिमश्चपीनस्तयोर्द्वयोः संहतयोस्तु जातः।
प्रस्पन्दमानः पुरूरुरस्या रामं पुरस्तात् स्थितमाचचक्षे।।
शुभं पुनर्हेमसमानवर्ण मीषद्ररोध्वस्तमिवातुलाक्ष्याः।
वासः स्थितायाः शिखराग्रदन्त्याः किञ्चित् परिस्त्रंसत् चारूगात्र्यिः।। [8]

त्रिजटापि स्वप्ने रावणविषयकमशुभं पश्यति –

रावणस्य सुताः सर्वे मुण्डास्तैलसमुक्षिताः।
वराहेण दशग्रीवः शिशुमारेण चेन्द्रजित्।।
उष्ट्रेण कुम्भकर्णश्च प्रयातो दक्षिणां दिशम्। [9]

अपि च –

लङ्का दृष्टा मया स्वप्ने रावणेनाभिरक्षिता।
दग्धा रामस्य दूतेन वानरेण तपस्विना।। [10]

त्रिजटा न केवलमशुभशकुनान्येव पश्यत्यपितु सा रामद्वारा शीघ्रं लङ्कामागत्य रावणविनाशं राघवविजयं तथा सीतामुक्तिविषयकानि शुभशकुनान्यपि पश्यति –

अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थिताम्।
राक्षसेन्द्रविनाशं च विजयं राघवस्य च।।
निमित्तभूतमेतत् श्रोतुमस्या महत् प्रियम्।
दृश्यते च स्फुरच्चक्षुः पद्मपत्रमिवायतम्।।
ईषद्धि हृषितो वास्या दक्षिणाया ह्यदक्षिणः।
अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते।।
करेणुहस्तप्रतिमः सव्यश्चोरुरनुत्तमः।
वेपथन् कथयती वास्या राघवं पुरुतः स्थितम्।।
हृस्वोरुक्षोऽप्रशस्तश्च परिवेषस्तु लोहितः।
आदित्ये विमले नीलं लक्ष्म लक्ष्मण दृश्यते।।
रजसा महता चापि नक्षत्राणि हतानि च।
युगन्तमिव लोकानां पश्य शंसन्ति लक्ष्मण।।
काकाः श्येनास्तथा नीचा गृध्राः परिपतन्ति च।
शिवाश्चाप्यशुभान् नादान् नदन्ति सुमहाभयान्।।
शैलैः शूलैश्च खड्गैश्च विमुक्तैः कपिराक्षसैः।
भविष्यत्यावृताभूमिमांसशोणितकर्दमा।। [11]

आर्षकाव्यमिव लौकिककाव्यजगत्यपि कवयः शिवाशिवशकुनानां विन्यासं कथाप्रसङ्गानुसारं स्वकीयेषु ग्रन्थेषु कृतवन्तः। महाकवेः अश्वघोषस्य बुद्धचरितमहाकाव्ये बुद्धजन्मसमये सर्वाणि शुभनिमित्तानि प्रकटितानि जातानि। मेघरहिताकाशाद् सपद्मचन्दनयुक्तावृष्टिः शुभनिमित्तं सूचयति –

यस्य प्रसूतौ गिरिराजकीला वाताहता नौरिव भूश्चचाल।
सचन्दना चोटलपद्मगर्भा पपात वृष्टिर्गगनादनभ्रात्।। [12]

कालिदासस्य रघुवंशमहाकाव्ये अपत्यरहितदिलीपः यदा स्वदुःखं महर्षिवसिष्ठाय निवेदयति तदैव तस्य दुःखनिवारणसूचिका नन्दिनी तत्रागच्छति। तस्याः तत्र सहसागमनं शुभनिमित्तं सूचयति। अत एव वसिष्ठः तां दृष्ट्वा कथयति –

तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत्।।
अदूरवर्तिनीं सिद्धिं राजन् विगणयात्मनः।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत्।। [13]

भोजराजस्य रामायणचम्पूकाव्ये रामजन्मसमये उच्चस्थाः पञ्चग्रहाः चन्द्रबृहस्पत्योः एकस्मिनेव युतिः च शुभनिमित्तं सूचयति –

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ।

CC BY

लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि।। 14

कालिदासस्य कुमारसम्भवमहाकाव्ये गिरिराजतनयायाः जन्मसमये सर्वाणि शुभनिमित्तानि माङ्गलिकशकुनानि च स्वतः एव समुपस्थितानि –

प्रसन्नदिक्पांसुविविक्तवातं शङ्खस्वनानन्तरपुष्पवृष्टिः।
शरीरिणं स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव।। 15

विक्रमोर्वशीयनाटके विदूषकः उर्वश्याः शारीरिकलक्षणान् दृष्ट्वैव सन्तानोत्पत्तेः सूचनां राज्ञे प्रददाति –

विदूषकः - दिष्ट्या सन्तानेव वर्धते भवान्।
अविलपयोधरांगुलवलीदल-पाण्डुराननच्छायाम्।
तानि दिनानि वपुरभूत् केवलमलसेक्षणां तस्याम्।। 16

महाकविशूद्रकविरचिते मृच्छकटिकप्रकरणे चारुदत्तस्य न्यायालयगमनप्रसङ्गे बहून्यशुभानिनिमित्तानि दृश्यन्ते–

रुक्षस्वरं वाशति वायसोऽयममात्यभृत्या मुहुराह्वयन्ति।
सव्यञ्च नेत्रं स्फुरति प्रसह्य ममानिमित्तानि हि खेदयन्ति।।
शुष्कपक्षस्थितो ध्वाङ्क्ष आदित्याभिमुखस्तथा।
मयि चोदयते वामं चक्षुर्घोरमसंशयम्।।
मयि विनिहतदृष्टिर्भिन्ननीलाञ्जनाभः स्फुरति विततजिह्वः शुक्लदंष्ट्राचतुष्कः।
अभिपतति सरोषो जिह्मिताध्मातकुक्षिर्भुजगपतिरयं मे मार्गमाक्रम्य सुप्तः।।
स्खलति चरणं भूमौ न्यस्तं न चार्द्रतमा मही स्फुरति नयनं वामो बाहुर्मुहुश्च विकम्पते।
शकुनिपरश्चायं तावद्विरौति हि नैकशः कथयति महाघोरं मृत्युं न चात्र विचारणा।।
सव्यं मे स्पन्दते चक्षुर्विरौति वायवस्तथा।
पन्थाः सर्पेण रुद्धोऽयं स्वस्ति चास्मासु दैवतः।। 17

अभिज्ञानशाकुन्तलनाटके राजा दुष्यन्तः मातलिना सह यदा मारीचिमहर्षेः आश्रमं समागच्छति तदा तस्य बाहुस्पन्दनं भाव्यर्थलाभं सूचयति –

मनोरथाय नाशंसे किं बाहो ! स्पन्दसे वृथा।
पूर्वावधीरितं श्रेयो दुःखं हि परिवर्तते।। 18

विशाखदत्तकृतमुद्राराक्षसनाटके सिद्धार्थकः पाटलिपुत्रं गच्छन् क्षपणकं दृष्ट्वा अपशकुनशङ्कां करोति अथ च तदपशकुननिवारणायसूर्यदर्शनं करोति –

सिद्धार्थकः - कथं क्षपणक आगच्छति ? यावन्मेऽशकुनभूतमस्य दर्शनं , तस्मादादित्य दर्शनेन प्रतिहन्मि। 19

तत्र क्षपणकोऽपि सिद्धार्थस्य यात्रारूपीकार्यं शकुनेन परिज्ञाय कथयति –

क्षपणकः-किमत्र ज्ञातव्यम्? एष ते मार्गादेशकुशलः शकुनः करगतो लेखश्च सूचयति। 20

महावीरचरितनाटकेऽपि माल्यवान्-त्रिजटासंवादद्वारा रावणस्य भाव्यमङ्गलस्य सूचना प्राप्यते –

(वामाक्षिस्पन्दनं सूचयन्, सव्यभम्) किं नो विधिरिह वचनेऽप्यक्षमो दुर्विपाकः। 21

अपि च त्रिजटा – कनिष्ठमातामहस्यायं नयवचनोपन्यासोऽन्यस्मिन्नेव कस्मिन्नमङ्गल एव विश्रान्तः। 22

बाणभट्टकृतहर्षचरितेऽपि शकुनशास्त्रीयचर्चा प्राप्यते। मुहुर्मुहुः स्पन्दनं विविधोत्पातानां भाव्यमङ्गलस्य च सूचनां प्रददाति –

स्फुरति च दिवानिशमकल्याणाख्यानविचक्षणमदक्षिणमक्षि। सुदारुणाश्चाक्षुद्रक्षितिपक्षयमाचक्षाणाः क्षणमपि न शाम्यन्ति पुनरुत्पाताः। प्रत्यहं राहुरविकलकायबन्ध इव कबन्धवति ब्रध्नबिम्बे घटमानो विभाव्यते। तपः करणकालकवलितानिव धूसरितसमग्रहानुद्गिरन्ति धूमोद्गारान् सप्तर्षयः। दिने-दिने दारुणा दिशां दाहा दृश्यन्ते। दिग्दाहभस्मकरणनिकर इव निपतति नभस्तारागणः। तारापतशुचैव निष्प्रभः शशी। निशि-निशि इतस्ततः प्रज्वलिताभिरुल्काभरुग्रं गृहयुद्धमिव वियति विलोकयन्ति विलोलतारकाः ककुभः। राज्यसंचारसूचकः संचारयतीव क्ष्मां क्वापि वहद्वहलरजः पटलकलिलशर्कराशकलसूत्कारी मारुतः। न कुशलमिव पश्यामि लग्नस्य। 23

भवभूतिकृतमालतीमाधवप्रकरणे भूरिवसुदेवरातापत्ययोः मालतीमाधवयोः अनयोरभिमतः पाणिग्रहः स्यादिति चिन्तयन्ती कामन्दक्याः वामाक्षिस्पन्दनमभिलषितार्थसिद्धिसूचकसुनिमित्तं सूचयति –

(वामाक्षिस्पन्दनं सूचयित्वासहर्षम्)
विवृण्वतेव कल्याणमन्तरज्ञेन चक्षुषा।
स्फुरता वामकेनापि दाक्षिण्यमवलम्ब्यते।। 24

भारविकृतकिरातार्जुनीयमहाकाव्ये द्रौपदी श्रृगालीनामशुभनिमित्तसूचकशब्दान् श्रुत्वा युधिष्ठिरं प्रति सूचयति –

पुराधिरुढः शयनं महाधनं विवोध्यसे यः स्तुतिगीतमङ्गलैः।
अभद्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः।। 25

नैषधीयचरितमहाकाव्ये हंसयात्राप्रसङ्गे करिशावकदर्शनं शुभनिमित्तात्मकमिति –

नभसः कलभैरुपासितं जलदैर्भूरितरक्षुपन्नगम्।
स ददर्श पतंगपुंगवो विटपच्छन्नतरक्षुपन्नगम्।। 26

संस्कृतकाव्यजगति विभिन्नकाव्येषु शुभाशुभनिमित्तसूचकशकुनानां विभिन्नप्रकारेण प्रयोगः नितरां वैशिष्ट्यमावर्धयति। भारतीयसंस्कृतौ शकुनशास्त्रस्यात्यधिकं महत्त्वं वर्तते। भवतुनाम न केवलं काव्येष्वपितु काव्येतरसाहित्येऽपि शकुनशास्त्रस्य तादृशः प्रयोगः नित्यमेव रोचकतामादधाति। भारतीयसंस्कृतौ शकुनशास्त्रस्य क्षेत्रं केवलं साहित्यपर्यन्तमेव सीमितं नास्त्यपितु सामान्यलोकजीवनेऽपि व्यापकप्रभावो वर्ततेऽस्य। सामान्य जनोऽपि शकुनं विजानाति तदनुसारं कार्यमपि करोति। अत एव कवयोऽपि काव्यरचनासु स्वाभाविकतामानेतुं बहुविधशुभाशुभशकुनानां प्रयोगं कृतवन्तः।।

---

1 शब्दकल्पद्रुम - 1961, पञ्चमकाण्ड पृ. 2

2 बृहत्संहिता – अध्याय 86/5 पृ. 600

3 मेदिनीकोश वान्तवर्ग – श्लोक 39 , पृ. 93

4 ऋग्वेदसंहिता – 2.42.2

5 अथर्ववेदसंहिता – 19.8.14

6 अर्थशास्त्र – अधिकरण 10, प्रकरण 150-152, अध्याय 3

7 श्रीमद्भगवद्गीता – 1.

8 रामायण – सु.का. सर्ग 29 श्लोक 2-5

9 रामायण – सु.का. सर्ग 27 श्लोक 31-32

10 रामायण – सु.का. सर्ग 27 श्लोक 38

11 रामायण – यु.का. सर्ग 23 श्लोक 3-12

12 बुद्धचरितम् – श्लोक 1.21

13 रघुवंशम् – श्लोक 1.86,87

14 चम्पूरामायण – बालकाण्ड 1.29

15 कुमारसम्भव – 1.23

16 विक्रमोर्वशीयम् – 5.8

17 मृच्छकटिकम् – श्लोक 9.10,11,12,13,15

18 अभिज्ञानशाकुन्तलम् – श्लोक 7.13

19 मुद्राराक्षस – श्लोक 5.1 उप. सिद्धा. सं.

20 मुद्राराक्षस – श्लोक 5.2 उप.क्षपणक सं.

21 महावीरचरितम् – श्लोक 6.7

22 महावीरचरितम् – श्लोक 6.8 पूर्व त्रिजटा सं.

23 हर्षचरितम्(डॉ. केशवराव मुसलगाँवकर) – श्लोक 6.3 उप., पृष्ठ 547

24 मालतीमाधवप्रकरणम् – श्लोक 1.9

25 किरातार्जुनीयम् – श्लोक 1.38

26 नैषधीयचरितम् – श्लोक 2.67

डॉ. हेमन्त शर्मा

Dr. Hemant Sharma

सहायक प्राध्यापक संस्कृत साहित्य

शास. दू.श्री.वै.स्नात.संस्कृत महाविद्यालय, रायपुर (छ.ग.)

pandit.hemant2010@gmail.com

***

"प्राची प्रज्ञा" (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

संस्कृतवाङ्मये वर्णितविज्ञानस्य उपयोगिता

- श्रीमन्तचटर्जी

शोधसारः -

आध्यात्मिक-भौतिकभेदेन संस्कृतवाङ्मयं द्विधा विभक्तम्। आध्यात्मिकविभागे वेदाङ्गानि अन्यतमानि। भौतिकविषयेषु विज्ञानं साहित्यञ्च अन्यतमतां भजेते। विज्ञाने गणितं (Mathematics), भौतशास्त्रम् (Physics), रसायनशास्त्रम् (Chemistry), जीवशास्त्रम्(Biology), उद्भिद्विद्या(Botany) चेत्यादयः परिगण्यन्ते। साहित्यञ्च दृश्य-श्रव्य-चम्पूभेदेन त्रिविधम्। विज्ञानं व्याकरणे, साहित्ये, ध्वनिविज्ञाने (Phonetics) चापि विद्यते। अस्मिन् शोधसन्दर्भे संस्कृतवाङ्मये एतेषां विज्ञानानाम् गुरुत्वं विधीयते यथामति।

कुञ्चीशब्दाः - उद्भिद्विद्या, गणितं, जीवशास्त्रं, ध्वनिविज्ञानं, पाणिनीयव्याकरणं, भौतशास्त्रं, महाभारतं, रसायनशास्त्रं, संस्कृतसाहित्यम्।

शोधपत्रम् -

'संस्कृते किं वा अस्ति?' इति बहवः संस्कृतविद्वांसः असकृत् पृच्छन्ति। यद्यपि एषः प्रश्नः भ्रममूलः, तथापि एतस्य प्रश्नस्य उत्तरं वक्तुम् असमर्थः सन् संस्कृतच्छात्रः नतशिरस्कः सन् तिष्ठति। 'संस्कृते किं नास्ति?' इति प्रतिप्रश्नं कर्तुं सामर्थ्यं नास्ति संस्कृतच्छात्रस्य। संस्कृते सर्वं शास्त्रं निहितमस्तीति विस्मृतप्राया वयम्। अत्र शोधनिबन्धे संस्कृतवाङ्मये राजमानानां एतेषां गणितादिविज्ञानानां सविस्तरं तात्पर्यं विधीयते यथाशास्त्रम्।

संस्कृते गणितस्य (Mathematics) गुरुत्वम् --

गणितशास्त्राणामुत्पत्तिविषये अस्ति वाग्विवादः पण्डितेषु। वेदाङ्गशास्त्रस्य एकस्मिन् श्लोके गणितस्य प्राधान्यं स्वीकृतं भवति-- '......वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितमि'ति। ऋग्वेदे एकतो दशपर्यन्तं , दशानां गुणिताया विविधायाः संख्यायाश्च उल्लेखो विद्यते[1]। यजुर्वेदस्य एकस्मिन् मन्त्रे एकतः परार्धपर्यन्तं संख्याया गणनं विहितम्-- 'इमा मे अग्न इष्टका धेनवः सन्त्वेका च दश च दश शतं च शतं च सहस्रं च सहस्रं चायुतं च नियुतं च नियुतं च प्रयुतं चार्वुदं च न्यर्वुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चैता मे अग्न इष्टका धेनवः

---

[1] ऋक्संहिता-१-१५-४,१-१५-१०, ८-२२-३२, ८-१-९

CC BY

सन्त्वमुद्रामस्मिल्लौँके[2]' इति। एतासां अङ्कपद्धतीनां उपयोगो लोके व्यवहारे अस्ति। एताः अङ्कपद्धतयः ३०० ईशवीयाब्दत एव भारते आसन्। प्रथम-आर्यभट्टस्य कालात्पाटीगणितं विरचितं समस्ति। भारतीयपाटीगणितं गुणन-भाग-वर्ग-वर्गमूलप्रभृतीनां विंशतेः परिकर्माणां तथा मिश्रकादिच्छायान्तानाम् अष्टानां व्यवहाराणामालोचनेन समृद्धम्। ब्रह्मगुप्तेन तदीये 'ब्रह्मस्फुटसिद्धान्ते' विंशत्यां परिकर्मसु, अष्टासु व्यवहारेषु च अभिज्ञो जनो 'गणितज्ञ' इत्यभिधया अभिहितम्--

'परिकर्म विंशतिं यः संकलिताद्यां पृथक् विजानाति।
अष्टौ च व्यवहारान् छायान्तान् भवति गणकः सः।।'[3] इति।

अपेक्षितसंख्याया वर्गमूलस्य घनमूलस्य च प्राप्त्यर्थमाधुनिके गणिते व्यवहृता पद्धतिः आर्यभटेन (४७६ईशवीयाब्दः)अन्विष्टा--

'भागं हरेदवर्गान्नित्यं द्विगुणेन वर्गमूलेन।
वर्गाद्वर्गे शुद्धे लब्धं स्थानान्तरे मूलम्।।'[4] इति।

यजुर्वेदसम्बन्धेषु श्रौतसूत्रेष्वपि यज्ञवेदिकादिनिर्माणार्थं ग्रथिते 'बौधायनशुल्बसूत्रे' (२.१२) द्वयस्य वर्गमूलं रचितम् -- 'प्रमाणं तृतीयेन वर्धयेत्, तच्चतुर्थेन, आत्मचतुस्त्रिंशेनोनेन, सविशेषः' इति। अत एव भारतीयगणितशास्त्रं वैदिकमिति निश्चप्रचं वयं वक्तुं प्रभवामः।

Π (पै) इत्यस्य मूल्यं प्रथमेन आर्यभटेन निर्णीतमभवत्। तेन निर्णीतं मूल्यं तावत् Π=३.१४१६ इति। आधुनिकं मूल्यं खलु Π=३.१४१६९२६ इति। अस्मिन् विषये आर्यभटीयः श्लोकस्तावत्--

'चतुरधिकं शतम् अष्टगुणं द्वाषष्टिस्तथा सहस्राणाम्।
आयुतद्वयविष्कम्भस्यासन्नो वृत्तपरिणाहः।।'[5] इति।

इदानीं व्यवहृतः पैथागोरस(Pythagoras)-सिद्धान्तः तस्मात् सहस्राधिकवर्षेभ्यः पूर्वमेव बोधायनेन कात्यायनेन च निर्मित आसीत्।

<u>संस्कृतवाङ्मये भौतशास्त्रस्य (Physics) उपयोगित्वम् -</u>

---

[2] यजुर्वेदः-१७/२

[3] ब्रह्मस्फुटसिद्धान्तः, १०.१२

[4] 'Science in Saṃskṛit' इति ग्रन्थस्य ६२-तमे पुटे।

[5] 'Science in Saṃskṛit' इति ग्रन्थस्य ६७-तमे पुटे ।

"प्राची प्रज्ञा" (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

संयोग-विभाग-वेगानां कर्मणः शब्दस्य प्रकाशस्य च गतिः (Motion) निर्णीतेति कणादेन वैशेषिकदर्शने प्रतिपादितम्-- 'संयोग-विभाग-वेगानां कर्म समानमि'ति (१.१.२०)। अपि च, प्रयत्नवशात् माध्याकर्षणं विरुध्य उत्क्षेपणमस्ति, तत्र च संयोगः फलं भवतीति तेन विशदीकृतं-- 'गुरुत्व-प्रयत्न-संयोगानाम् उत्क्षेपणमि'ति (१.१.२१)। अदृष्टकरणेन मणिगमनं सूच्याभिसर्पणञ्च भवतीत्यपि तत्रभवता निरणायि-- 'मणिगमनं सूच्याभिसर्पणम् अदृष्टकरणमि'ति (५.१.२५)।

संस्कृतवाङ्मये रसायनशास्त्रस्य (Chemistry) गुरुत्वम्—

रसार्णवग्रन्थे सुवर्ण-रौप्य-ताम्र-लौह-सीसक-जिङ्क्(Zink)-भेदेन धातोः (Metal) षड्विधत्वं समुपवर्णितमस्ति--

'सुवर्णं रजतं ताम्रं तीक्ष्णं वङ्गं भुजङ्गमम्।
लोहन्तु षड्विधं तच्च यथापूर्वं तदक्षयम्।।'[6] इति।

रसरत्नसमुच्चयग्रन्थे सामुद्र-सैन्धव-बिड्-सौवर्चल-रोमक-चूल्लिकाभेदेन लवणस्य (Salt) षड् भेदाः समुपवर्णिताः सन्ति--

'लवणानि षडुच्यन्ते सामुद्रं सैन्धवं बिडम्।
सौवर्चलं रोमकञ्च चूल्लिकालवणं तथा।।'[7] इति।

संस्कृतवाङ्मये जीवशास्त्रस्य (Biology) उपयोगिता--

शरीरं व्याधिमन्दिरम्। मनुष्याणां शरीरं तावद्व्याधेः आकरः। व्याधितो मुक्तेरुपदेश आयुर्वेदशास्त्रे निहितोऽस्ति। चरकसंहिता , सुश्रुतसंहिता , अष्टाङ्गसंग्रहः , अष्टाङ्गहृदयञ्चेत्यादयः आयुर्वेदशास्त्रस्य प्रमुखा ग्रन्थाः। चरकसंहिता अष्टसु स्थानेषु विभक्ता। एषु अष्टसु स्थानेषु चिकित्सास्थानम् अन्यतमम्। अत्र विविधानां रोगाणां कारणं, तेषां प्रतिकारोपायश्च वर्णितः। राजयक्षा-कर्कट-प्रभृतीनां चिकित्सापद्धतिरपि अत्र सुनिर्दिष्टा अस्ति। सुश्रुतसंहितायां शल्यचिकित्सायाः प्राधान्यं भजते। अष्टाङ्गहृदये शिशुरोगचिकित्सा, भूतविद्या, विषचिकित्सा इत्यादयो विवृताः सन्ति। अष्टाङ्गहृदये शिशुचिकित्सा, शल्यतन्त्रं , रसायनतन्त्रञ्चेत्यादय आलोचिताः।

---

[6] रसार्णवः, ७.९६

[7] रसरत्नसमुच्चयः, १०-११

CC BY

संस्कृतवाङ्मये उद्भिद्विद्यायाः (Botany) उपयोगिता -

संस्कृतशास्त्रे वृक्षाणां वर्गीकरणं (Classification), सालोकसंश्लेषप्रक्रिया (Photosynthesis), वृक्षारोपणपद्धतिः (Grafting) चेत्यादयो वर्णिताः सन्ति। वृक्षायुर्वेदग्रन्थे वनस्पति-द्रुम-लता-गुल्म-भेदेन वृक्षाणां चतुर्विधत्वमुल्लिखितं विद्यते। अपुष्पाः फलवन्तश्च ये ते वनस्पतय इत्युच्यते। सपुष्पाः फलवन्तश्च द्रुमाः इत्यभिधीयते। शाखादिरहिता प्रतानिनी या सा लतेति कथ्यते। सशाखाः बहुस्तम्बाश्च गुल्मा इति प्रोच्यते। तथा हि वृक्षायुर्वेदग्रन्थे--

'वनस्पतिद्रुमलतागुल्माः पादपजातयः।
बीजात्काण्डात्तथा कन्दात्तज्जन्म विविधं विदुः।।
ते वनस्पतयः प्रोक्ताः विना पुष्पैः पलन्ति ये।
द्रुमाश्च ते निगदिताः सहपुष्पैः फलन्ति ये।।
प्रसरन्ति प्रतानैर्यास्ता लताः परिकीर्तिताः।
बहुस्तम्बा विटपिनो ये ते गुल्माः प्रकीर्तिताः।।'[8] इति।

महाभारतस्य शान्तिपर्वणि सालोकसंश्लेषप्रक्रिया निरूपिता वर्तते। तस्मादेतत् स्पष्टीभवति यत् क्रिस्तात् शताधिकवर्षेभ्यः पूर्वं एषा प्रक्रिया संस्कृतशास्त्राद् अस्माभिः विज्ञाता आसीत्। तथा च रचितं शान्तिपर्वणि महाभारतस्य--

'तेन तज्जलमादत्तं जरयत्यग्निमारुतौ।
आहारपरिणामाच्च स्नेहो वृद्धिश्च जायते ।।'[9] इति।

अर्थात् मूलेन यज्जलं गृह्यते, तज्जलं वायु-सूर्यातापयोः संसर्गात्सक्रियं भवति। ततो जलवाय्वातापा मिलिताः सन्तः शरीरं तरलीकुर्वन्ति।

वृहत्संहितायां वृक्षारोपणस्योपयुक्तकालो निरूपितः अस्ति--

'अजातशाखान् शिशिरे जातशाखान् हिमागमे।
वर्षागमे च सुस्कन्धान् यथा दिक्स्थान् प्ररोपयेत्।।'[10] इति।

अपि च, वृक्षायुर्वेदग्रन्थे बीजनिर्माणं , वृक्षेभ्यः अनिलानामुत्पत्तिक्रमः, सस्यकणेषु प्लास्मानामकांशस्य स्थितिः; उपवनविनोदग्रन्थे (त्रयोदश-ईशावीयाब्दः) वृक्षाणां

---

[8] वृक्षायुर्वेदग्रन्थः, श्लोकः २७१-२७३.

[9] महाभारतस्य शान्तिपर्वणि, अध्यायः - १८४.१८

[10] वृहत्संहिता, ५५.६

चिकित्सापद्धतिः; चरकसंहितायां (३०० ख्री. पू.) सूर्यालोकेन वृक्षाणां प्रतिक्रिया; महाभारतस्य शान्तिपर्वणि वृक्षा दर्शनसमर्था इति (१८४.१३), गन्धं प्रति वृक्षाणां प्रतिक्रिया (१८४.१४), ते श्रवणक्षमाः (१७२.१२) चेत्यादयः सुवर्णिताः सन्ति। अनेन प्रमाणीभवति यदेतेषां विषयाणां परीक्षणार्थं तदानीन्तने काले 'Microscope' इति सूक्ष्मदर्शनयन्त्रमपि आसीत्।

संस्कृतव्याकरणशास्त्रे विज्ञानस्य गुरुत्वम्--

संस्कृतव्याकरणस्य माहेश्वरसूत्रे, भगवतः पाणिनेः "स्थानेऽन्तरतमः" (अ. १-१-५०) चेति सूत्रे वैज्ञानिकत्वं विद्यते।

क).माहेश्वरसूत्रे वैज्ञानिकत्वम् -

पाणिनीयव्याकरणे चतुर्दशानां माहेश्वरसूत्राणां परिशीलनात् ज्ञायते तत्रोपदिष्टं वर्णजालं गौणमुख्यन्यायाश्रयणैव विहितम्। 'स्वयं राजन्त' इति स्वरा इति व्युत्पत्त्या स्वराणां प्राधान्येन अभ्यर्हितत्वात् तेषां प्राथम्यं तदनु व्यञ्जनवर्णा उपदिष्टाः। स्वरेषु 'अक्षराणामकारोऽस्मि' (१०.३३) इति गीतायां गीतवचनानुसारम् अकारस्य ब्रह्मरूपताया आदौ तस्योपस्थितिः। व्यञ्जनेषु पुन आदौ अन्तःस्थानां, ततो वर्गाणां पञ्चमवर्णानां, अन्तिमे चान्येषां वर्णानां स्थितिः।

द्वितीयतः, अइउण् इत्यादिसूत्रे सन्ध्यभावः कथमिति जिज्ञासायामुच्यते संहिताया अविवक्षात् स्पष्टप्रतिपत्त्यर्थञ्च वर्णेषु न सन्धिः।

अतो माहेश्वरसूत्रपरिशीलनाद्वक्तुं शक्यते यत्प्रत्याहारसूत्रेषु संकलितवर्णक्रमः पूर्णतो वैज्ञानिको युक्तिसहश्च।

ख). स्थानेऽन्तरतमः (अ.१-१-५०) इति सूत्रे वैज्ञानिकत्वम् -

वैज्ञानिकतल्लजेन निउटन्-महाशयेन यो माध्याकर्षणसिद्धान्त (Law of Gravitation) आविष्कृतः, स भगवता पतञ्जलिना "स्थानेऽन्तरतमः" इति सूत्रभाष्ये बहुपूर्वमेव समुद्घोषितः -- "तद्यथा लोष्टः क्षिप्तो बहुवेगं गत्वा नैव तिर्यग्गच्छति नोर्ध्वमारोहति, पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः। यथा या एता आन्तरिक्ष्यः सूक्ष्मा आपस्तासां विकारो धूमः। स धूम आकाशे निवाते नैव तिर्यग् गच्छति न अर्वागवरोहति। अब्विकारोऽप एव गच्छत्यान्तर्यतः। यथा ज्योतिषो विकारोऽर्चिराकाशदेशे निवाते

सुप्रज्वलितं नैव तिर्यग् गच्छति न अर्वाग् अवरोहति। ज्योतिषो विकारो ज्योतिरेव गच्छति आन्तर्यतः।"[11] इति।

संस्कृतसाहित्ये वैज्ञानिकत्वम्--

संस्कृतसाहित्ये वैज्ञानिककविः कालिदासः सर्वैः सुविदितः। तस्य कृतीनां विविधेषु स्थानेषु विज्ञानसिद्धान्ता दरीदृश्यन्ते। ते यथा--

'सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।'[12] इति।

अत्र जलशब्दस्य पर्यायत्वेन रसशब्दस्य प्रयोगः कृतः वैज्ञानिककविना। रविकिरणेन जलं कथं वाष्पीभूय पुनः पयोधरावेगरूपेण पृथिव्याम् अवतरति तद्वर्णितं महाकविना। पयोधरावेगोऽयं समुद्रादुदेतीत्यस्मिन् विषये नास्ति संशयलेशो वैज्ञानिकेषु।

एवं, मेघदूतस्य पूर्वमेघे मेघस्योत्पत्तिः धुमज्योतिस्सलिलमरुतां सन्निवेशेन कथंकारं भवतीत्यपि सुष्ठु निरूपितं वैज्ञानिककविना। तत्र तत्रभवता प्रतिपादितं यज्ज्योतिषामुत्तापेन वाष्पीभूतं जलं वायुसंसर्गाद् मेघरूपतां धत्ते--

'धुमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः,
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे,
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।।'[13] इति।

इदमपि वैज्ञानिकतथ्यं सर्वैः सुविदितं यद् अर्कमरीचिभिरुष्णीभूय सिन्धुजलं वाष्पतां गच्छति ततश्च मेघरूपेण वर्षति, जलसंघर्षणेन च विद्युदुत्पद्यते। रघुवंशस्य समुद्रवर्णने जलाकर्षणविद्यानिरूपणावसरे वैज्ञानिककविना विवृतं--

'गर्भं दधत्यर्कमरीचयोऽस्माद्विवृद्धिमत्राश्नुवते वसूनि।
अबिन्धनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन।।'[14] इति।

एवञ्च रघुवंशस्य त्रयोदशसर्गे आकाशमार्गे सस्त्रीकस्य रामचन्द्रस्य अयोध्याप्रत्यावर्तनावसरे वैमानिकशास्त्रस्य वर्णनं कृतम्--

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः।
रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच।।[15] इति।

---

[11] पतञ्जलिकृतं व्याकरणमहाभाष्यम्--१.१, आह्निकम्-७, सूत्रम्-५०.

[12] रघुवंशम्, १.१८.

[13] मेघदूतम्, श्लोकः १५.

[14] रघुवंशम्, १३.४

[15] रघुवंशम्, १३.१

शब्दस्य गत्यपेक्षया तेजसो गतिः तीव्रतरेति महाकविना साधु निरूपितं कुमारसम्भवमहाकाव्यस्य तृतीये सर्गे। तत्र यदा सौन्दर्यदेवता कामदेवः तपोमग्नस्य भगवतः शिवस्योपरि पुष्पवाणं निक्षेप्तुमिच्छति, तदा क्रुद्धस्य शिवस्य तृतीयनयनोद्भूतो वह्निः कामदेवं भस्मसात् चकार। देवाः भगवतो महादेवस्य क्रोधाग्निं प्रशमयितुं प्रयत्नं कृतवन्तः। परन्तु तेषां प्रार्थनाशब्दस्य शिवकर्णप्राप्तेः पूर्वमेव कामदेवो भस्मसादभवत्, आलोकस्य गतेः शब्दगत्यपेक्षया प्रखरत्वात्। अत्र आधुनिकविज्ञानस्य तथ्यं स्फुटं प्रतीयते--

'क्रोधं प्रभो संहर संहरेति यावद् गिरः खे मरुतां चरन्ति।
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनञ्चकार।।'[16] इति।

ध्वनिविज्ञाने (Phonetics) विज्ञानस्य गुरुत्वम्--

परा-पश्यन्ती-मध्यमा-वैखरीभेदेन वाक् चतुर्विधा। मूलचक्रे स्थिता वाक् परा, नाभौ पश्यन्ती, हृदये मध्यमा, कण्ठे च वैखरीत्युच्यते। मूलचक्रं, नाभिः, हृदयं, कण्ठः, शिरः, मुखञ्चेत्यत्र वाणी क्रमशः स्थूलतां प्राप्य वर्णाभिव्यक्तेः सहायकं भवति।

किञ्च, सर्वेषामपि विषयाणाम् उपस्थापनेच्छा आदौ आत्मनि उपपद्यते। तस्मादादौ आत्मा बुद्ध्या युङ्क्ते। ततश्च इष्टमर्थं प्रकाशयितुमिच्छुः सन् मनो योजयति। मनश्च शरीरमनलं प्रवर्तयति। तदन्तरं प्राणवायौ प्रेरणा जायते। पश्चात् स एव प्राणवायुः क्रमशः फुस्फुसयोः, कण्ठे, शिरसि च चरन् स्वरादीन् समुत्पादयति। तथा चोक्तं पाणिनीयशिक्षायां--

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनो कायाग्निमाहन्ति स प्रेरयति मारुतम्।।[17]
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम्।
तारं तार्तीयसवनं शीर्षण्यं जगतानुगम्।।[18] इति।

अत एव वक्तुं शक्यते, वर्णोत्पत्त्युच्चारणयोः एताः पद्धतयो निश्चप्रचं वैज्ञानिक्यः, युक्तियुक्ताश्च॥

---

[16] कुमारसम्भवम्, ३.७२

[17] पाणिनीयशिक्षा, श्लोकः ६.

[18] पाणिनीयशिक्षा, श्लोकः ८

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

सहायकग्रन्थसूची

1. त्रिपाठी, रामकृपालः; महाकविकालिदासस्य साहित्ये वैज्ञानिकचिन्तनम्, आन्वीक्षिकी (मूल्याङ्किता त्रैमासिकी शोधपत्रिका), सम्पा- डॉ. सुरेशचरण बहुगुणा, उत्तराखण्ड-संस्कृत-अकादमी, हरिद्वारम्, वर्षम्-११, अङ्कः-२-३, जुलाई-दिसम्बर २०१४.
2. नरेशः, कुन्तूरु ; वैदिकं गणितशास्त्रम्, सम्भाषणसन्देशः, सम्पा. जनार्दन हेगडे, संस्कृतभारती , बेङ्गालूरुः , डिसेम्बर्- २०१७।
3. भारतीया विज्ञानपरम्परा (विविधैः लेखकैः लिखितानां लेखानां संग्रहः), संस्कृतभारती, देहली , द्वितीयं मुद्रणम्-२०१३.
4. Science in Saṃskrit, Saṃskṛta Bhāratī, New Delhi-110055, Third Print-Dec.2007.

डॉ. श्रीमन्तचटर्जी

Dr. SRIMONTA CHATTERJEE

Assistant Professor

Dept. Of Sanskrit,

Triveni Devi Bhalotia College,

P.O.-Raniganj-713347,

Dist.- Paschim Bardhaman,

West Bengal.

E-mail- srimontarkmv@gmail.com

***

"प्राची प्रज्ञा" (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

संस्कृतवाङ्मये व्यायोगपरिचयः

- सुजाता मुनुकुट्ल

शोधसारः -

वेदेष्वेव रूपकतत्त्वनिरूपणं कृतमिति श्रुतम्। वेदानामनन्तरं ब्राह्मणग्रन्थेषु नृत्यगीतसङ्गीतशब्दानां प्रयोगः असकृत् प्रयोगितः दृश्यते च। ततः परं श्रीमद्रामायण-श्रीमन्महाभारतादिषु सर्वत्रापि रूपकाणां प्रसक्तिः वर्तते च। एवं रूपकाणां प्राधान्यं सर्वत्र दृश्यते। तानि रूपाकाणि दशधा विभक्तानि सन्ति। तेषु रूपकेषु मध्यमव्यायोगविषये संक्षेपपरिचयः पत्रेऽस्मिन् प्रस्तूयते।

कविपरिचयः –

संस्कृतवाङ्मये भासस्य प्रत्येकं स्थानं वर्तते। सरस्वत्याः स्मितहासः एव भासः इति साहित्यप्रेमिकाः विश्वसन्ति। अतः जयदेवेन कथितं यत् –"भासो हासः कविकुलगुरुः कालिदासो विलासः" इति कालिदासं कविताकामिनी विलासरूपेण उक्त्वा, भासं कविता कामिन्याः हास इति वर्णितवान्। सरला भाषा, सहजा शैली, वर्णने वास्तविकता, मृदुत्वम्, शक्तियुक्तपात्राणां स्वरूपम्, एतानि सर्वाणि भासस्य कानिचन लक्षणानि। सः यमकालङ्कारे निपुणः, उत्प्रेक्षायाः एवं उपमायाश्च प्रयोगे अयं निपुणः । सः कालिदासात्पूर्ववर्ती आचार्यः। केचन विद्वांसः क्री.पू. 475 तः क्री.पू. 450 मध्यकालिकः सः इति अवोचन्। केचन क्री.पू 450 तः 370 मध्ये सः आसीदिति धृवीकृतवन्तः। स एव नाटककर्तृषु प्रथमः।

भासस्य रचनाः -

टि. गणपतिशास्त्रिमहोदयः क्री.श. 1909 एवं 1910 मध्यकाले केरलराज्ये भासनाटकहस्तप्रतीः प्राप्तवान्। तेन भासः संस्कृतजगति नाटककाररूपेण सुपरिचितो जातः। कन्याकुमार्याः 20 चतुर्योजनदूरे पद्मनाभपुरसमीपे मणिलिक्करमठे महामहोपाध्यायेन टि. गणपतिशास्त्रिवर्येणभासविरचित दश मळयाळलिप्या विद्यमानाः लिखितप्रतयः प्राप्ताः। ताः प्रतयः 300 वर्षपूर्वकालीनाः । तदनन्तरं शास्त्रिवर्येण एव त्रिवेण्ड्रं प्यालेस् लैब्ररी मध्ये इतोऽपि नाटकद्वयं प्राप्तम्। मद्रास् ओरियण्टल् मातृकाग्रन्थालयेऽपि मळयाळ-लिप्यामेव भासस्य अभिषेक, प्रतिमा, स्वप्नवासवदत्तलिखितप्रतयः प्राप्ताः। देवनागर्याम् एकामपि प्रतिं न प्राप्तवान्। गणपतिशास्त्रिणा लब्धानि त्रयोदश भासरूपकाणि"त्रयोदश त्रिवेन्द्र नाटकानि " इति नाम्ना क्री.श. 1912 -13 तमे वर्षे त्रिवेन्द्रात् प्रचुरितानि। तानि रूपकाणि प्रपञ्चे विद्यमानसंस्कृतज्ञान् आकर्षितानि। तदारभ्य भासः संस्कृतवाङ्मये आद्यः नाटककारः इति प्रसिद्धिं गतः।

CC BY

एतेषु 13 रूपकेषु षण्णां रूपकाणाम् इतिवृत्तं प्रसिद्धेतिहासात् महाभारतात् स्वीकृतम्। तानि मध्यमव्यायोगः, पञ्चरात्रम्, दूतवाक्यम्, दूतघटोत्कचम्, कर्णभारम् ऊरुभङ्गं चेति। रामायणात् नाटकद्वयम् अभिषेकनाटकम्, प्रतिमानाटकम् च। बालचरितस्य मूलम् हरिवंशम् आसीत्। प्रतिज्ञायौगन्धरायणम् , स्वप्नवासवदत्तं च बृहत्कथातः स्वीकृते। अविमारकं, दरिद्रचारुदत्तं च भासस्य स्वीयरचने।

भासस्य सर्वेषु रूपकेषु साधारणलक्षणानि

1.भासस्य रूपकाणि सर्वाण्यपि "ततः प्रविशति सूत्रधारः" इति वाक्येन प्रारभ्यन्ते।

2. तस्य नाटकेषु सर्वत्र "प्रस्तावना" इत्यस्य स्थाने "स्थापना" इति प्रयोगः दृश्यते।

3. कुत्रापि कवेः नाम नोल्लिखतम्।

4. तस्य बहुषु रूपकेषु एक एव भरतवाक्यश्लोकः सर्वत्र दृश्यते।

5. वैदिकाः प्रयोगाः प्रायः दृश्यन्ते।

6. वाल्मीकौ व्यासे चेवअस्मिन् अपिप्रयोगनैपुण्यम् अतिविशिष्टरीत्या दृश्यते। तस्य नाटकेषु एतदद्भुतं लक्षणम्।

7. प्रतिनाटकं प्रथमश्लोके मुद्रालङ्कारस्य उपयोगो भवति।

दशरूपकाणां संक्षिप्तपरिचयः -

नाटकं सप्रकरणं बाणः प्रहसनं डिमः ।
व्यायोगसमवकारौ वीथ्यङ्केहामृगा ।।

क्र. सं.	रूपकस्य नाम	वस्तु	नेता	रसः	सन्धिः/सन्ध्यङ्गं च	वृत्तिः	अङ्कः	उदाहरणम्
1.	नाटकम्	प्रख्यातवस्तु (इतिहासपुराण सम्बद्धम्)	धीरोदात्तः नायकः भवति। (नृपः/दिव्यपुरुषः)	शृङ्गारः/ वीरः अन्ये अङ्गरसाः भवन्ति।	मुखप्रतिमुखगर्भावमर्शनिर्वहणसन्धयः साङ्गैः भवन्ति। 64 सन्ध्यङ्गानि भवन्ति।	कैशिकी, आरभटी, सात्त्वती, भारती चेति चतस्रः वृत्तयः भवन्ति।	5-10 अङ्काः भवन्ति।	अभिज्ञान शाकुन्तलम्
2.	प्रकरणम्	उत्पाद्यम् = कल्पितम् इतिवृत्तम्	धीरशान्तः नायकः (विप्रः, वणिक्, अमात्यः)	शृङ्गारः/ वीरः अन्ये अङ्गरसाः भवन्ति।	मुखप्रतिमुखगर्भावमर्शनिर्वहणसन्धयः साङ्गैः भवन्ति। 64 सन्ध्यङ्गानि भवन्ति।	कैशिकी, आरभटी, सात्त्वती, भारती चेति चतस्रः वृत्तयः भवन्ति।	5-10 अङ्काः भवन्ति।	मृच्छकटिकम्

3.	भाणः	उत्पात्यम् = कल्पितम् इतिवृत्तम्	कुशलः/बुद्धिमान् विटः नायकः भवति।	वीरशृङ्गारौ सूचनारूपेण भवतः	मुखसन्धि,निर्वहणसन्धिश्च। 12+14=26सन्ध्यङ्गानि भवन्ति।	भारतीवृत्तिः अधिका भवति। कैशिकीं विना अन्याः तिस्रः वृत्तयः भवन्ति।	1 (एक एव अङ्कः)	लीलामधुकरम्
4.	प्रहसनम्	कल्पितेतिवृत्तम्	पाषण्डः, विप्रः, वैश्यादयः चेटचेटीसमाकुलम्	हास्यः अङ्गीरसः	मुखसन्धिः,निर्वहणसन्धिश्च। 12+14=26सन्ध्यङ्गानि भवन्ति।	भारतीवृत्तिः अधिका भवति। कैशिकीं विना अन्याः तिस्रः वृत्तयः भवन्ति।	1 (एक एव अङ्कः)	कन्दर्पकेलिः
5.	डिमः	प्रसिद्धेतिवृत्तम्	देवगन्धर्वपिशाचाद्याः 16 अत्यन्तोद्धत नायकाः	रौद्रः अङ्गीरसः, हास्यशृङ्गाररहि-तौ अन्ये अङ्गरसाः भवन्ति।	अवमर्शसन्धिं विना अवशिष्टाः सन्धयः भवन्ति। (मुख-प्रतिमुख-गर्भ-निर्वणश्च) 12+13+12+14 = 51 सन्ध्यङ्गानि भवन्ति।	कैशिकीं विना अन्याः तिस्रः वृत्तयः भवन्ति।	4 चत्वारः अङ्काः भवन्ति।	त्रिपुरदाहः
6	**व्यायोगः**	**प्रसिद्धेतिवृत्तम्**	**धीरोद्धतः**	**रौद्रः अङ्गीरसः, (हास्यशृङ्गाररहितौ) अन्ये अङ्गरसाः भवन्ति।**	**मुखप्रतिमुखनिर्वहणसन्धयः भवन्ति। 12+13+14=39 सन्ध्यङ्गानि भवन्ति।**	**कैशिकीं विना अन्याः तिस्रः वृत्तयः भवन्ति।**	**एक एव अङ्कः**	**मध्यमव्यायोगः**
7	समवकारः	प्रसिद्धेतिवृत्तम्	धीरोदात्तः द्वादश देवदानवादयः नायकाः	वीरः प्रधानः रसः। अन्ये अङ्गरसाः	मुखप्रतिमुखगर्भनिर्वहणश्च। 12+13+12+14 = 51सन्ध्यङ्गानि भवन्ति।	चतस्रः वृत्तयः भवन्ति। कैशिक्याः न्यूनत्वम्।	त्रयः अङ्काः भवन्ति।	समुद्रमन्थनम्
8.	वीथी	कल्पितेतिवृत्तम्	एकः अथवा द्वौ पात्रौ	प्रधानरूपेण शृङ्गारः सूच्यरसः। अन्ये रसाः अल्परूपेण वर्णनीयाः	मुखनिर्वहणश्च 12+14 =26सन्ध्यङ्गानि भवन्ति।	कैशिकीवृत्तिः	एक एव अङ्कः	मालविकाग्निमित्रम्

CC BY

9.	अङ्कः (उत्सृष्टिकाङ्कः)	प्रख्यातेतिवृत्तम्	साधारणजनः नायकः	करुणः मुख्यः रसः	मुखनिर्वहणश्च 12+14 =26सन्ध्यङ्गानि भवन्ति।	भारतीवृत्तिः अधिका भवति।	एक एव अङ्कः	शर्मिष्ठाययातिः
10.	ईहामृगः	मिश्रितेतिवृत्तम्	धीरोद्धताः नराः देवाश्च नायकाः	शृङ्गारः प्रधानः	मुखप्रतिमुखनिर्वहण सन्धयः भवन्ति। 12+13+14=39 सन्ध्यङ्गानि भवन्ति।	सर्वाः वृत्तयः भवन्ति। मुख्यरूपेण कैशिकी भवति।	चत्वारः अङ्काः	कुसुमशेखरविजयः

एतेषु **"मध्यमव्यायोगः"** व्यायोगाख्यस्यरूपकस्योदाहरणरूपेण स्वीक्रियते। नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः,व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगा इति नाम्ना संस्कृतवाङ्मये रूपकाणि दशप्रसिद्धानि सन्ति। तेषु व्यायोगनामकस्य रूपकभेदस्य उदाहरणभूतः मध्यमव्यायोगः। अस्य लक्षणमस्ति दशरूपके तृतीयप्रकाशे –

ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः।।3-60।।
हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद्रसाः।
अस्त्रीनिमित्तसङ्ग्रामो जामदग्न्यजये यथा।।3-61।।
एकाहाचरितैकाङ्को व्यायोगो बहुभिर्नरैः।[1]

व्यायुज्यन्ते अस्मिन् बहवः पुरुषाः इति व्यायोगः। अत्र हास्यशृङ्गारौ विहाय डिमवत् षट् रसाः भवन्ति। ते च करुण-रौद्र-वीर-अद्भुत-बीभत्स-भयानकाः। वृत्यात्मकत्वाच्च रसानामवचनेपि कैशिकी-रहितेतरवृत्तित्वं रसवदेव लभ्यते। अस्त्रीनिमित्तसङ्ग्रामः। यथा परशुरामेण पितृवधकोपात् सहस्रार्जुनवधः कृतः तथा।

एवमेव रसार्णवसुधाकरे तृतीये विलासे –

ख्यातेतिवृत्तिसम्पन्नो निस्सहायकनायकः।
युक्तो दशावरैः ख्यातैरुद्धतैः प्रतिनायकैः।।
विमर्शगर्भरहितो भारत्यारभटीस्फुटः।
हास्यशृङ्गाररहित एकाङ्को रौद्रसंश्रयः।।
एकवासरवृत्तान्तः प्राप्तविष्कम्भचूलिकः।
अस्त्रीनिमित्तसमरो व्यायोगः कथितो बुधैः।।
विज्ञेयमस्य लक्ष्यं तु धनञ्जयजयादिकम्।[2]

एवमेव नाट्यशास्त्रे अष्टादशोध्याये यथा -

व्यायोगस्तु विधिज्ञैः कार्यः प्रख्यातनायकशरीरः ।
अल्पस्त्रीजनयुक्तस्त्वेकाहकृतस्तथा चैव ॥

---

[1] दशरूपके तृतीयप्रकाशे 60,61,62 प्रथमपादपर्यन्तम्।

[2] रसार्णसुधाकरे तृतीयविलासे 229,230,231,232 प्रथमपादपर्न्तम॥

बहवस्तत्र च पुरुषाःकविभिः कार्या यथा समवकारे ।
न च तत्प्रमाणयुक्ताः कार्या एकाङ्क एवायम् ॥
न च दिव्यनायककृतः कार्यो राजर्षिनायकनिबद्धः ।
युद्धनियुद्धाघर्षणसंघर्षकृतश्च कर्तव्यः ॥
एवंविधस्तु कार्यो व्यायोगो दीप्तकाव्यरसयोनिः ।[3]

एवमेव इतरालङ्कारग्रन्थेष्वपि एते प्रसिद्धश्लोकाः दृश्यन्ते -
ख्यातेतिवृत्तो व्यायोगः स्वल्पस्त्रीजनसंयुतः।
हीनो गर्भविमर्शाभ्यां नरैर्बहुभिराश्रितः।।
एकाङ्कश्च भवेदस्त्रीनिमित्तसमरोदयः।
कैशिकीवृत्तिरहितः प्रख्यातस्तत्र नयकः।।
राजर्षिरथदिव्यो वा भवेद्धीरोद्धतश्च सः।

उपर्युक्तश्लोकाधारेण व्यायोगलक्षणानि एवं वर्तन्ते – व्यायोगे प्रसिद्धेतिवृत्तं भवेत्। स्त्रीपात्राणि न्यूनानि भवेयुः। गर्भविमर्शसन्धी विहाय अन्ये मुख-प्रतिमुख-निर्वहणाः त्रयः सन्धयः अत्र भवेयुः। पुरुषपात्राणि बहूनि भवेयुः। एकाङ्कः भवेत्। स्त्रीनिमित्तं युद्धं नैव भवेत्। कैशिकीवृत्तिं विना अन्याः सात्त्वती-आरभटी-भारती तिस्र वृत्तयः भवेयुः। धीरोद्धतः राजर्षिः अथवा दिव्यपुरुषः अत्र प्रसिद्धनायकः भवेत्।हास्य-शृङ्गार-शान्तरसान् विहाय अन्ये रसाः भवेयुः। मुख्यरूपेण वीर-रौद्ररसौ भवेताम्। इति व्यायोगस्य लक्षणानि। एते मध्यमव्यायोगे स्पष्टरूपेण भासन्ते। इदानीम् एतानि लक्षणानि अस्मिन् रूपके परिशील्यन्ते - महाभारतान्तर्गमितिवृत्तमाधारीकृत्य रचितम् इदं रूपकम्। अस्मिन् रूपके स्त्रीपात्रद्वयमेव वर्तते। एका ब्राह्मणी, अन्या राक्षसस्त्री हिडिम्बा च । षट् पुरुषपात्राणि सन्ति।

1. पाण्डवमध्यमः भीमः
2. वृद्धब्राह्मणः
3. ब्राह्मणस्य प्रथमः पुत्रः
4. ब्राह्मणस्य द्वितीयः पुत्रः
5. ब्राह्मणस्य तृतीयः पुत्रः
6. घटोत्कचश्चेति।

अत्र युद्धं भीमघटोत्कचयोर्मध्ये जातः। ब्राह्मणकुटुम्बरक्षणार्थं सङ्ग्रामः सञ्जातः। अतः स्त्रीनिमित्तं युद्धं न। कुन्ती पुत्रेषु मध्यमः भीमः सः धीरोद्धतनायकः। सः प्रसिद्धकुलोत्पन्नः राजकुलोत्पन्नश्च। पाण्डवेषु भीमसेनः मध्यम इति नाम्ना आहूयते। तस्यसम्बद्धमिदमिति कारणात् तन्नाम्ना रूपकमिदं मध्यमव्यायोगः इति प्रसिद्धिं गतम्।

मध्यमव्यायोगस्य कथा संक्षिप्तेन –

---

[3] नाट्यशास्त्रे अष्टादशाध्याये १४२, १४३, १४४ ,१४५ प्रथमपादपर्यन्तम्।

CC BY

एकदा कश्चन वृद्धब्राह्मणः तस्य त्रिभिः पुत्रैः पत्न्या च सह अरण्यमार्गे गच्छति स्म। तदा घटोत्त्कचः तान् निरुद्धवान्। भवत्सु एकेन मम मातुः आहाररूपेण आगन्तव्यमिति उक्तवान् च। तदा ब्राह्मणस्य मध्यम कुमारः गन्तुं सिद्धः अभवत्। घटोत्कचस्य अनुमतिं प्राप्य सः मध्यमः जलं पातुं सरस्तीरं गतवान्। सः मध्यमस्य प्रत्यागमने विलम्बः जातः। तदा घटोत्कचः तं तस्य नाम्ना मध्यम! मध्यम! इति उच्चैः आहूतवान्। तानि वचनानि पाण्डवमध्यमः भीमः श्रुत्वा तत्रागतवान्। तद्वृत्तान्तं सर्वं विज्ञाय तान् रक्षितुं घटोत्कचेन सह युद्धमकरोत्। युद्धे घटोत्कचः पराजितो अभवत्। मातुः हिडिम्बयाः द्वारा निजवृत्तान्तं ज्ञात्वा भीमः स्वपिता इति विज्ञाय आनन्दं प्राप्तवान् घटोत्कचः। पाण्डवमध्यमेन भीमेन ब्राह्मणकुटुम्बं रक्षितमिति कारणात् अस्य नाटकस्य तन्नाम स्थापितम्।

सहायकग्रन्थसूची

1. दशरूपकम् – हिन्दी दशरूपक, डा. सुधाकर मालवीय, कृष्णदास अकादमी, वाराणसी।
2. रसार्णवसुधाकरः– श्रीशिङ्गभूपालप्रणीतः, संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण त. गणपतिशास्त्रिणा संशोधितम्। महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन राजकीयमुद्रणयन्त्रालये तदध्यक्षेण मुद्रयित्वा प्रकाशितम्।
3. नाट्यशास्त्रम् – भरतमुनिः, जयपुरमहाराजाश्रितेन महामहोपाध्यायपण्डितदुर्गाप्रसादात्मजेन पण्डितकेदारनाथसाहित्यभूषणेन सम्पादितम्, भारतीयविद्याप्रकाशन, दिल्ली-बनारस
4. मध्यमव्यायोगः – भासः, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
5. సంస్కృతసాహిత్యచరిత్ర – డా. ముదిగంటి గోపాలరెడ్డి, డా. ముదిగంటి సుజాతారెడ్డి, పొట్టిశ్రీరాములు విశ్వవిద్యాలయం, హైదరాబాద్.

डा. सुजाता मुनुकुट्ल
Dr.SujathaMunukutla
Assistant Professor, Department of Sahitya
National Sanskrit University, Tirupati
Andhra Pradesh
munukutlasujatha@gmail.com

***

“प्राची प्रज्ञा” (ISSN 2348 – 8417) The Peer Reviewed Refereed E-Journal in Sanskrit , Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

सर्वङ्कषाटीकायां व्याकरणालोचने मल्लिनाथस्य कतिपयानवधानता

- मृत्युञ्जयगराँइ

शोधसारः -

महाकविमाघप्रणीतम् अत्युकृष्टमेकं महाकाव्यं तावद् शिशुपालवधमिति। महाकाव्यस्यास्य सम्यगार्थबोधे बह्वष्टीकाः विरचिताः सन्ति। तासु मल्लिनाथकृता ‘सर्वङ्कषा’ अतीवोत्कृष्टा टीका। अन्वयमुखेन टीकायामस्यां सर्वेषां श्लोकानां हृदयग्राही व्याख्या प्रदत्ता। तथाच प्रसङ्गक्रमेन तत्र व्याकरण-दर्शन-काम-अर्थ-सङ्गीत-कोष-धर्म-अलंकारशास्त्रादीनां बहुविधा आलोचना अपि समुपवर्णिता। तथापि व्याकरणगतालोचनमत्र अतीव समीचिनम्। माघकाव्यस्य बहुविधानां ख्याताख्यात-दुरुहशब्दानां युक्तिनिष्ठव्याख्यानमत्र परिदृष्टम्। अतः मल्लिनाथस्य व्याकरणप्रतिभा खलु सर्वैः विश्रुता। तथापि सर्वङ्कषायां व्याकरणालोचने मल्लिनाथस्य ईषदपि अनवधानता परिदृष्टा। कारक-समास-प्रत्ययगतव्याख्यानेषु च ईदृशी अनवधानता स्पष्टतया प्रकटिता। प्रस्तुते लेखेऽस्मिन् अस्याः अनवधानतायाः कतिपयानि दृष्टान्तानि उपस्थाप्यन्ते।

कुञ्ची-शब्दाः

पञ्चमहाकाव्यम् , टीका , कारकविभक्तिः, समासः , प्रत्ययः, लिङ्गम्, व्याकरणम्, काव्यालंकारसूत्रवृत्तिः, अव्ययम् , अभिधानम्, बाहुलकविधानम्।

प्रस्तावना

संस्कृतालंकृतपञ्चमहाकाव्येषु[1] अनवद्यकाव्यरूपेण शिशुपालवधस्य माघकाव्यस्य वा प्रशस्यस्थानं विराजते विद्वद्समाजे। सुकविकीर्तिलाभस्य दुराशायां विंशतिसर्गेषु महाकविमाघेन प्रणीतमिदं काव्यम्। शब्दवैचित्र्यं खलु महाकाव्यस्यास्य महदाकर्षणम्। कविवरमाघस्य नवीन-नुतन-शब्दानां सङ्गीतात्मकझंकारोऽर्थबोधस्य प्रतीक्षारहितेऽपि समाकर्षति सर्वान् हृदयान्। अतः सहृदयानां समीपे माघकाव्यस्यावेदनमतीव जनप्रीयम्। अत्यधिकजनप्रियत्वात् कविकर्मणः मर्मार्थं सुखेन बोधयितुं महाकाव्यस्यास्य काले काले विद्वद्भिः बह्वष्टीकाः विरचिताः सन्ति। तासु ‘सर्वङ्कषा’ नाम्नी टीका विद्वद्समाजे भूयसी प्रशंसिता। दक्षिणभारतीय-महोपाध्याय-कोलाचल-मल्लिनाथसूरी अस्याः टीकायाः प्रणेता। टीकायामस्याम् अन्वयमुखेन माघकाव्यस्य सर्वश्लोकानां हृदयग्राही व्याख्या प्रदत्ता। व्याख्यानकाले प्रसङ्गानुसारेणात्र अलंकार-व्याकरण-दर्शन-काम-कोष-धर्म-सङ्गीत-

CC BY

ज्योतिष-नीतिशास्त्रादिनां आलोचनमपि परिदृश्यते। एवमालोचनं न तु अमूलकम् अपितु युक्तिसन्मतं प्रासङ्गिकं चेति। यतश्चोक्तम् मल्लिनाथेन –

"इहान्वयमुखेनैव सर्वं व्याख्यायते मया।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते। ।" 2

वस्तुतः एषु आलोचनेषु व्याकरणात्मिकालोचना अतीव मनोग्राही। सुदक्षवैयाकरणवत् मल्लिनाथोऽप्यत्र शिशुपालवधस्य बहुनां ख्यात-अख्यात-दुरूहशब्दानां पदानां वा व्याकरणालोचनं प्रयच्छति। शिशुपालवधस्य पदविश्लेषणे अर्थबोधे रसबोधे च यस्यास्ति महान् उपयोगः। तथापि मल्लिनाथस्य व्याकरणालोचना न तु सम्पूर्णा दोषरहिता। वस्तुतः इह संसारे निर्दोषा रचना सर्वथा सुदुर्लभा। अतः टीकायामस्यां मल्लिनाथस्यापि ईषदनवधानता दृश्यते। कारक-समास-प्रत्ययादिषु व्याख्यानेषु कतिपयः दोषः सुस्पष्टतया परिलक्षितः। लेखेऽस्मिन् अस्य दोषस्य अनवधानस्य वा कतिपयानि निदर्शनानि निम्ने विश्लेषितानि।

कारकविभक्तिः

१. गीतनिनदस्य

"गगनं च गीतनिनदस्य गिरोच्चैः समया वनौघनमदभ्रमराणि। " (शिशु.६/७३)

शिशुपालवधस्य पद्येऽस्मिन् 'गीतनिनदस्य' इत्यस्य पदस्य षष्ठीविभक्तिप्रसङ्गे मल्लिनाथेनोक्तं सर्वङ्कषाटीकायाम्-

"गीतनिनदस्य गानध्वनेः समया तुल्यया। 'तुल्यार्थैः-' इत्यादिना वैकल्पिकी षष्ठी। "

पद्यांशेऽस्मिन् तुल्यार्थकस्य 'समया' इति पदस्योल्लेखोऽस्ति। "तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्"(२/३/७२) इत्यनेन सूत्रेण तुला-उपमाशब्दौ वर्जयित्वा तुल्यार्थकशब्दयोगे तृतीया विभक्तिः भवति अन्यतरस्याम्, पक्षे च षष्ठी। अतः तुल्यार्थके 'समया' इति शब्दयोगे अत्रापि अनेन सूत्रबलेन 'गीतनिनदस्य' पदे पक्षे षष्ठी विभक्तिर्भवति। मल्लिनाथमतानुसारं षष्ठीयं तु वैकल्पिकी। परन्तु मतमिदं न युक्तम्। भट्टोजिदीक्षितपादेन इयं षष्ठी पाक्षिकषष्ठीरूपेणोक्ता। यथोक्तं तेन सिद्धान्तकौमुद्याम्-

"तुल्यार्थैर्योगे तृतीया वा स्यात्, पक्षे षष्ठी। " 3

अतएव मल्लिनाथस्येयं व्याख्या खलु काचित् संशयग्रस्ता।

समासः

२. पुरुषोत्तम

"न वाच्यमित्थं पुरुषोत्तम त्वया। "(शिशु.१/३१)

शिशुपालवधस्य पद्येऽस्मिन् 'पुरुषोत्तम' इति पदस्य समासप्रसङ्गे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम्-

"हे पुरुषोत्तम पुरुषेषु श्रेष्ठ, 'न निर्धारणे' इति षष्ठीसमासप्रतिषेधः। "

टीकाकारमल्लिनाथेनात्र 'पुरुषोत्तम' इति पदस्य सप्तमीसमासः स्वीकृतः, अपितु षष्ठीसमासः न समर्थितः। सप्तमीसमासस्वीकरणे व्याख्येयं भविष्यति एवम् - 'पुरुषेषु उत्तमः' इत्यस्मिन् विग्रहे "संज्ञायाम्"(२/१/४४)[4] सूत्रेण संज्ञार्थे सप्तम्यन्तेन पुरुषेषु-पदेन सह 'उत्तमः' इति समर्थसुबन्तपदस्य सप्तमीतत्पुरुषसमासोऽस्ति। वस्तुतस्तु समासेऽस्मिन् "हलदन्तात्

सप्तम्याः संज्ञायाम्"(६/३/९)[5] सूत्रेण सप्तम्याः 'अलुक्' इत्यस्य प्रसङ्गोऽस्ति। परन्तु पदेऽस्मिन् सप्तम्या अलुक् नास्ति। अतः सप्तमीतत्पुरुषसमासव्याख्या अत्र काचित् संशयापन्ना परिदृष्टा।

मल्लिनाथस्य मतानुसारं निर्धारणषष्ठीहेतुत्वादत्र षष्ठी समासोऽपि न भवति। परन्तु कैयटाचार्यस्य प्रदीपटीकायामत्र षष्ठी समासः समर्थितः। कैयटाचार्यस्य मते, 'पुरुषाणाम् उत्तमः' इति विग्रहे "षष्ठी"(२/२/८) सूत्रेण षष्ठीसमासो भविष्यति। अत्र निर्धारणषष्ठी न स्यात्, अपितु सम्बन्धसामान्ये षष्ठी भवति। निर्धारणस्य त्रिविधं शर्तमपेक्षितम्। तद्यथा- निर्धारणावधिः, निर्धार्यमाणः, निर्धारणहेतुः चेति। परन्तु इह निर्धार्यमानस्य अभावः दृश्यते। यतश्चात्र निर्धारणषष्ठी न भविष्यति। अतएव "न निर्धारणे"(२/२/१०) इति सूत्रेण षष्ठीसमासोऽपि निषिद्धो न भवति। तथोक्तं प्रदीपटीकायाम्-

"निर्द्धारणाश्रये तु षष्ठीसप्तम्यौ भवतो यस्मान्निर्द्धार्यते यश्चैकदेशो निर्धार्यते यश्च निर्धारणहेतुरेतस्त्रयसंनिधाने निर्धारणं भवतीति तत्रैव षष्ठीसमासप्रतिषेधः। इह तु नागानामुत्तमो नागोत्तम इति त्रयसंनिधानाभावात्सम्बन्धसामान्ये षष्ठीति समासो भवत्येव।"[6]

मल्लिनाथेनान्यत्र रघुवंशमहाकाव्यस्य सञ्जीविनि-टीकायां 'पुरुषोत्तम' इति पदे कर्मधारयसमासोऽपि स्वीकृतः। रघुवंशमहाकाव्यस्य "हरिर्यथैकः पुरुषोत्तमः स्मृतो"(रघु.३/४९) इत्यस्य पद्यस्य व्याख्यायां मल्लिनाथेनोक्तम्-

"पुरुषोत्तमः इति सप्तमीसमासः। 'न निर्धारणे' इति षष्ठीसमासप्रतिषेधात्। कर्मधारये तु 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इत्युत्तमपुरुष इति स्यात्। "

कर्मधारयसमासोऽयं तु युक्तिनिष्ठः। बालमनोरमा तत्त्वबोधिनी इति टीकाद्वये अपि समासोऽयं समर्थितोऽस्ति[7]।

३. आयथातथ्यम्

"गुणानामायथातथ्यादर्थं विप्लावयन्ति ये। "(शिशु.२/५६)

सर्व० "तथात्वमनतिक्रम्य यथातथम्, यथायोग्यमिति यावत्। 'यथार्थे तु यथातथम्' इत्यमरः। यथार्थेऽव्ययीभावः। 'स नपुंसकम्' इति नपुंसकत्वम्। 'ह्रस्वो नपुंसके-' इति ह्रस्वत्वम्। ततो नञ्समासे अयथातथं, तस्य भाव आयथातथ्यम्। "

'तथात्वमनतिक्रम्य'- इत्यस्मिन् विग्रहे "यथाऽसादृश्ये"(२/१/७)[8] इति सूत्रेण अनतिक्रमणार्थे यथा-अव्ययेन सह 'तथा' इति पदस्याव्ययीभावसमासो भवति। अनन्तरं समासप्राप्तस्य प्रातिपदिकत्वात् "सुपो धातुप्रातिपदिकयोः"(२/४/७१) सूत्रेण सुप्-विभक्तिलोपो भवति। अव्ययीभावविधायके सूत्रे 'यथा' इति पदस्य प्रथमान्तत्वात् "प्रथमानिर्दिष्टं समास उपसर्जनम्"(१/२/४३) सूत्रेण यथा-अव्ययस्य उपसर्जनसंज्ञा, "उपसर्जनं पूर्वम्"(२/२/३०) सूत्रबलेन तस्य पूर्वनिपाते च 'यथा तथा' इत्येवं रूपं प्राप्तम्। तदनन्तरं अव्ययीभावसमासत्वात् "अव्ययीभावश्च"(२/४/१५) इत्यनेन सूत्रेण समासपदं क्लीवलिङ्गत्वं जातम्। क्लीवलिङ्गविधानात् परं "ह्रस्वो नपुंसके प्रातिपदिकस्य"(१/२/४७)[9] सूत्रेण समस्तपदस्य अन्तिमदीर्घस्वरस्य ह्रस्वत्वे, "नाव्ययीभावादतोऽमत्वपञ्चम्याः"(२/४/८३) इति सूत्रेण अमादेशे च 'यथातथम्' रूपं

CC BY

गठितम्। 'न यथातथम्' इति विग्रहे पुनः "नञ्"(२/२/६) सूत्रेण नञ्समासे 'अयथातथम्' पदं प्राप्तम्। अनन्तरं 'अयथातथस्य भावः' इत्यर्थे ष्यञ्-प्रत्ययेन, नञ्-इत्यस्य आदिस्वरस्य वृद्धिना च 'आयथातथ्यम्' इत्येवं पदं निष्पद्यते।

टीकाकारेण मल्लिनाथेनात्र "स नपुंसकम्"(२/४/१७) इत्यनेन सूत्रेण तावत् क्लीवलिङ्गस्य विधानं दर्शितम्। परन्तु एतद् न युक्तम्। अव्ययीभावसमासविषये अस्य सूत्रस्य विधानं नैव भविष्यति। यतश्चोक्तं भट्टोजिदीक्षितवृत्तिना-

"समाहारे द्विगुर्द्वन्द्वश्च नपुसकं स्यात्। परवल्लिङ्गापवादः। "(सि.कौ./समासप्रकरणम्)

महाभाष्ये खलु इत्यत्र अव्ययीभावसमासः निषिद्धो भवति। अत्र केवलं सुप्सुपासमासविधानं दृश्यते। अतः "यथातथयथापूरयोः पर्यायेण"(७/३/३१) इत्यस्य सूत्रस्य काशिकावृत्तौ उल्लिख्यते-

"सूत्रे यथातथ-यथापूरशब्दौ तु "यथाऽसादृश्ये"(२/१/७) इति अव्ययीभावसमासौ, तथाहि नपुसकाश्रयं ह्रस्वत्वं कृतम्। भाष्ये तु यथा दर्शितम्- 'अयथातथा भावः'(म.भा.) इति, तथा 'सुप्सुपा' इति समासो लक्ष्यते। "

अतएव 'आयथातथ्यम्' पदे समासद्वयमपि समीचिनम्। परन्तु मल्लिनाथस्य क्लीवलिङ्गत्वविधानं सूत्रं तावत् चिन्त्यम्।

प्रत्ययः

४. तडित्वान्

"गिरेस्तडित्वानिव तावदुच्चकैः"(शिशु.१/१२)

शिशुपालवधस्य पद्येऽस्मिन् 'तडित्वान्' इति पदस्य प्रत्ययविश्लेषणे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम्-

सर्व० "तडितोऽस्य सन्तीति तडित्वान्मेघ इव। 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' इति मतुपो मकारस्य वकारः। 'तसौ मत्वर्थे' इति भसंज्ञायामेकसंज्ञाधिकारेणापदत्वान्न जशत्वम्। "

'तडितोऽस्य सन्ति'- इत्यर्थे तडित्शब्दात् "तदस्यास्त्यस्मिन्निति मतुप्"(५/२/९४) अनेन सूत्रेण विकल्पे मतुप्-प्रत्ययो विहितः। प्रत्ययोऽयं तद्धितसंज्ञकः। भूमा-निन्दा-प्रशंसा-नित्ययोग-अतिशायन-संसर्ग-अस्त्यर्थेषु मतुवादयः प्रत्ययाः भवन्ति। यथोक्तं महाभाष्ये-

"भूमानिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुवादयः। ।"[10]

अनन्तरमनुबन्धलोपे 'तडित् मत्' इत्यवस्थायां "झयः"(८/२/१०) सूत्रेण झयप्रत्याहारस्थितात् त-वर्णान्तात् तडित्-शब्दात् परं मतुप्-इत्यस्य म-कारस्य व-कारे सु-विभक्तियोगे च 'तडित्वान्' इति पदं निष्पद्यते। "तसौ मत्वर्थे"(१/४/१९)[11] इत्यनेन सूत्रेणात्र मत्वर्थकात् परं त-कारान्तः तडित्-शब्दः भसंज्ञको भवति। तथा च भ-संज्ञकत्वात् तडित्-शब्दस्य त-कारस्य जशत्वं व-कारः न भवति। यतः पदान्तस्य खलु जशत्वं भवति न तु भ-संज्ञकस्य।

टीकाकारेण मल्लिनाथेनात्र "मादुपधायाश्च मतोर्वोऽयवादिभ्यः"(८/२/९) इति सूत्रेण मतुप्-इत्यस्य म-कारस्य व-कारः व्याख्यातः। वस्तुतस्तु एवं न युक्तम्। अनेन सूत्रेणैव मकारान्तात् मकारोपधाद् अवर्णन्ताद् अवर्णोपधात् च उत्तरस्य मतोः वः इत्ययमादेशो

भवति, यवदिभ्यः तु परतो न भवति। परन्तु तडित्-शब्दोऽत्र एषामन्तर्गतो नास्ति। अतएव "मादुपधायाश्च मतोर्वोऽयवादिभ्यः"(८/२/९) इति सूत्रेण मल्लिनाथस्य मतुप्-इत्यस्य म-कारस्य व-कारः, इत्येवं व्याख्यानं संशयापन्नमिति।

५. प्रफुल्लम्

"प्रफुल्लतापिच्छनिभैरभीषुभिः। "(शिशु.१/२२)

सर्व० "प्रफुल्लतीति प्रफुल्लं विकसितम्। 'फुल्ल विकसने' इति धातोः पचाद्यजन्तम्। फलेर्निष्ठायाम् 'अनुपसर्गात्फुल्लक्षीवकृशोल्लाघाः' इति निपातनात्प्रफुल्लमित्येवेति क्षीरस्वामी। "

मल्लिनाथस्य मतानुसारं 'प्रफुल्लम्' इति पदस्य व्याख्याद्वयमस्ति। तद्यथा-

1) प्र-उपसर्गपूर्वकात् पचाद्याकृतिगणपठितत्वात् विकसनार्थकात् फुल्ल्-धातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"(३/१/१३४)[12] इत्यनेन सूत्रेण अच्-प्रत्यययोगे 'प्रफुल्ल' शब्दः निष्पन्नो भवति।

2) सकर्मकात् फल्-धातोः भूतकाले "निष्ठा"(३/२/१०२) इत्यनेन सूत्रेण क्त-प्रत्ययः विहितो भवति। वस्तुतोऽयं क्त-प्रत्ययस्तु अनुपसर्गयोगे "अनुपसर्गात्फुल्लक्षीवकृशोल्लाघाः"(८/२/५५) इत्यनेन सूत्रेण निपातने सिद्धो भविष्यति। परन्तु अत्र प्र-उपसर्गयुक्तोऽस्ति। अतः क्त-प्रत्ययोऽत्र कथं समर्थनीयः ? इत्याशङ्कायां मल्लिनाथेन क्षीरस्वामीमतम् उद्धृतम्। 'अमरकोषः' इति ग्रन्थस्य 'अमरकोशोद्घाटनम्' नाम टीकायां क्षीरस्वामिना उक्तम्-

"प्रफलति स्म प्रफुल्लः, ञिफला विशरणे, क्ते-उत्परस्यातः(सू.) इत्युत्वम्(तिचेत्युत्वम्)। अनुपसर्गात्फुल्लक्षीवेति(सू.) फुल्लः साधुः। उत्फुल्लसंफुल्लयोरुपसंख्यानम्(वा.), प्रफुल्लेति पाठे फुल्ल विकसने, अच्। "[13]

वस्तुतः टीकाकारेण क्षीरस्वामिना अप्यत्र उपसर्गयोगे अच्, अनुपसर्गयोगे च क्त-प्रत्ययः इति मतमेव सुप्रतिष्ठितम्। अतएव मल्लिनाथस्य अस्मिन् स्थले क्त-प्रत्ययस्य व्याख्या न तु त्रुटिमुक्ता।

६. तापिच्छम्

"प्रफुल्लतापिच्छनिभैरभीषुभिः"(शिशु.१/२२)

सर्व० "तापिच्छस्य तमालस्य पुष्पं तापिच्छम्। 'फले लुक्' इति तद्धितलुक्। "

'तापिच्छस्य पुष्पम्'- इत्यस्मिन् विग्रहेऽत्र अवयवार्थे "अवयवे च प्राण्योषधिवृक्षेभ्यः" (४/३/१३५)[14] सूत्रेण वृक्षवाचकात् षष्ठ्यन्तात् तापिच्छ-शब्दात् तद्धितसंज्ञकोऽण्-प्रत्ययो विहितः। अथानुबन्धलोपे 'तापिच्छ अ'- इत्यवस्थायां पुष्पार्थे बाहुलकात् "पूष्पमूलेषु बहुलम्"(वा.२९५०) इति वार्तिकेन अण्-प्रत्ययस्य लुकि विभक्तिकार्ये च 'तापिच्छम्' इत्येवं पदं सिद्धम्।

सर्वङ्कषायां मल्लिनाथेनात्र "फले लुक्"(४/३/१६३)[15] सूत्रेण अण्-प्रत्ययस्य लुक् भवतीत्येवं व्याख्यातम्। वस्तुतः अनेन सूत्रेण एवं लुक् फलार्थे एव भवति न तु पुष्पार्थे। अतएव मल्लिनाथस्यैवं व्याख्या प्रमादरहिता नास्ति।

CC BY

७. भङ्गुराम्

"लघुकरिष्यन्नतिभारभङ्गुरामूं किल त्वं त्रिदिवादवातरः। "(शिशु.१/३६)

सर्व० "त्वमतिभारेणोर्जेन स्वरूपेण भङ्गुरां स्वयं भज्यमानाम्। 'भञ्जभासमिदो घुरच्'। 'भङ्गुरः कर्मकर्तरि' इति वामनः। "

शीलार्थेऽत्र भञ्ज्-धातोः कर्तरि "भञ्जभासमिदो घुरच्"(३/२/१६१)[16] इत्यनेन सूत्रेण घुरच्-प्रत्ययः विहितः। अनन्तरमनुबन्धलोपे 'भञ्ज् उर'- इत्यवस्थायां घितिपरत्वात् "चजोः कु घिण्ण्यतोः"(७/३/५२) सूत्रेण धातोः कुत्वादेशे विभक्तिकार्ये च 'भङ्गुराम्' पदं निष्पद्यते।

वस्तुतः कर्मकर्तरि एव घुरच्-प्रत्ययो विहितो भवति। परन्तु अत्र कर्तरि घुरच् दृश्यते। अतएवात्र घुरच्प्रत्ययस्य विधानं कथं समर्थनीयम्? विधानमेवं समर्थनाय मल्लिनाथेन वामनाचार्यस्य मतमुद्धृतम्। सर्वङ्कषायां 'भङ्गुरः कर्मकर्तरि' इत्येवंरूपेण उद्धृतिरियं परिदृष्टा। किं बहुना इत्येवमुद्धृतिः 'काव्यालंकार-सूत्रवृत्तिः' इति ग्रन्थे कुत्रापि न दृश्यते। अनेन ग्रन्थेन परिदृष्टा उद्धृतिः एवमस्ति-

"भिदुरादयः कर्मकर्तरि कर्तरि च। "[17]

वामनोक्तेन सूत्रेण भिदुरादयः शब्दाः कर्मकर्तरि कर्तरि च भवन्ति। अतएव मल्लिनाथप्रदत्तस्येवमुद्धृतिः न संशयरहिता।

८. आस्माकाः

"आस्माकदन्तिसांनिध्याद्वामनीभूतभूरुहः। "(शिशु.२/६३)

सर्व० "अस्माकमिमे आस्माकाः, 'युस्मदस्मदोरन्यतरस्यां खञ्' इति विकल्पादण्प्रत्ययः। 'तस्मिन्नणि च युस्माकास्माकौ' इत्यस्माकादेशः। "

'अस्माकम् इमे'- इत्यस्मिन् अर्थे "युस्मदस्मदोरन्यतरस्यां खञ्"(४/३/१) सूत्रेणात्र अस्मद्-शब्दात् पक्षे अण्-प्रत्ययो विधीयते। तदनन्तरमनुबन्धलोपे 'अस्मद् अ' इति जाते "तस्मिन्नणि च युस्माकास्माकौ"(४/३/२)[18] सूत्रेण अस्मद्-शब्दस्थाने अस्माक-इत्येवमादेशे, "तद्धितेष्वचामादेः"(७/२/११७) सूत्रबलेन 'अस्माक' इत्यस्य आद्यस्वरस्य वृद्धौ, विभक्तिकार्ये च 'आस्माकाः' इत्येवं पदं गठितम्।

टीकाकारमल्लिनाथस्य मतेऽत्र "युस्मदस्मदोरन्यतरस्यां खञ्"(४/३/१) सूत्रेण विकल्पे अण्-प्रत्ययो भवति। परन्तु सूत्रेऽस्मिन् विकल्पे अण्-प्रत्ययस्य विधानं नास्ति। यथोक्तं स्पष्टतया दीक्षितपादेन- "चाच्छः। पक्षेऽण्। युवयोर्युस्माकं वा अयं युस्मदीयः। अस्मदीयः। " इति।

अतएव मल्लिनाथस्य विकल्पे अणप्रत्ययविधानमत्र चिन्त्यम्।

९. नायकायते

"एकार्थतन्तुप्रोतायां नायको नायकायते। "(शिशु.२/९२)

सर्व० " 'उपमानादाचारे' इति क्यङ्। 'अकृत्सार्वधातुक-' इति दीर्घः। "

'नायक इव आचरति'- इत्यस्मिन् विग्रहेऽत्र आचरणार्थे "कर्तुः क्यङ् सलोपश्च"(३/१/११)[19] सूत्रेण कर्तृवाचकात् उपमानात् नायक-शब्दात् विकल्पे क्यङ्-प्रत्ययो विहितः। अथानुबन्धलोपे 'नायक अ' इत्यवस्थायां कितिपरत्वात् "अकृत्सार्वधातुकयोर्दीर्घः" (७/४/२५) सूत्रेण नायक-शब्दस्य अन्तस्य अ-कारस्य दीर्घत्वे नायकाय-शब्दः गठितः। पुनश्च

शब्दोऽयं "सनाद्यन्ता धातवः"(३/१/३२) सूत्रेण धातुसंज्ञाप्राप्तो भवति। तदनन्तरं 'नायकाय'-धातोः कर्तरि लट्-लकारे आत्मनेपदे त-विभक्तियोगे च 'नायकायते' पदं निष्पद्यते।

सर्वङ्कषाटीकायां मल्लिनाथेन "उपमानादाचारे"(३/१/१०)[20] इति सूत्रेणैव आचरणार्थे क्यच्-प्रत्यययोगे 'नायकायते' इत्येवं रूपं व्याख्यातम्। परन्तु अत्र सूत्रस्यास्य प्रयोगः न भविष्यति। क्यच्-प्रत्यययुक्ते सति "क्यचि च"(७/४/३३) इत्यनेन सूत्रेण क्यचि परतः अवर्णान्तस्य अङ्गस्य ई-कारादेशो भवति, अर्थात् 'नायकमिव आचरति = नायकीयति' इति रूपं भविष्यति। अतः "उपमानादाचारे"(३/१/१०) इति सूत्रेण क्यच्-प्रत्ययस्य प्रयोगोऽत्र न खलु प्रमादविरहितः।

उपसंहृतिः

कस्यचित् ग्रन्थस्योपरि यथायथमध्ययनं कर्तुं गुणसाकल्येन सह दोषावलोकनमपि अपेक्षितम्। नतुवा तदध्ययनं पक्षपातदुष्टं भवति। शिशुपालवधस्य सम्यगार्थबोधे सर्वङ्कषा नाम्नी टीका अतीव सुप्रसिद्धा। टीकायामस्यां मल्लिनाथस्य खलु सर्वातिशायिनः प्रतिभायाः स्वाक्षरोऽस्ति। वैदग्ध्यपूर्णालोचनमस्ति अस्याः महदाकर्षणम्। वर्णनचातुर्य्येण टीकाकारस्य भूमिका सततः प्रशंसनीया। तथापि टीकाकारः सर्वदा त्रुटिमुक्तो नास्ति। कदाचित् कुत्रापि ईषदनवधानतापि दृश्यतेऽस्मिन् टीकायाम्। व्याकरणालोचने ईदृशी अनावधनता तावत् लक्षणीयः विषयः। व्याकरणस्य कारक-समास-प्रत्ययादिनामालोचने कदाचित् किंचित् प्रामादिकत्वं लक्ष्यते। वस्तुतोऽत्र या प्रामादिकता दृश्यते ता अतीव स्वल्पा न तु गुरुतरा। संस्करणप्रमादवशादपि ईदृशी प्रामादिकता सम्भवति। किं बहुना परिदृश्यमाने संसारेऽस्मिन् कापि रचना त्रुटिमुक्ता नास्ति। मानवमात्रस्यैव गुणेन सह दोषावस्थानम् अप्यस्ति। महाकवीनां रचनायामपि बहुत्र दोषः परिलक्षितः। शिशुपालवधोऽपि नास्ति अस्य व्यतिक्रमः। महाकाव्येऽस्मिन् बहुत्र व्याकरणशृङ्खला सम्यकतया नैव रक्षिता। शिशुपालवधस्य 'सुगन्धिः' इत्यस्य पदस्य समासविश्लेषणे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम् -

"कस्तूरिकामृगाणां विमर्देन संघर्षेण सुगन्धिः शोभनगन्धः। यद्यपि गन्धस्येत्वे तदेकान्तग्रहणं कर्तव्यमित्युक्तम्, तथापि 'निरङ्कुशाः कवयः' इत्यपर्यनुयोगः। "

अर्थात् शिशुपालवधस्य 'सुगन्धिः' इत्यस्य पदस्य प्रयोगः व्याकरणदृष्ट्या संशयापन्नोऽस्ति। तथापि तत् पदं मल्लिनाथेन प्रामादिकरूपेण नोक्तम्। अपिच 'निरङ्कुशाः कवयः' इत्यनेन कवीनां स्वाधीनमननं प्रति श्रद्धार्घ्यं प्रतिध्वनितम्। कविगणं प्रति ईदृशी उदारदृष्टिः सत्मेव प्रशंसनीया। अतएव टीकाकारस्य मल्लिनाथस्य ईषदनवधानता अपि अस्माकं न धर्तव्या अपितु सादरेणैव ग्रहणीया- इति वक्तुं शक्यते।

CC BY

तथ्यसूत्राणि

1 कुमारसम्भवम्, रघुवंशम्, किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम् चेति पञ्च महाकाव्यानि।
2 सर्वङ्कषा, भूमिकाश्लोकः ८।
3 "तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्"(२/३/७२) इत्यस्य भट्टोजिदीक्षितोक्ता वृत्तिः।
4 "सप्तम्यन्तं सुपा प्राग्वत् संज्ञायाम्। वाक्येन संज्ञानवगमान्नित्यसमासोऽम्। "(सि.कौ./स.प्र.)।
5 "हलन्तादन्ताच्च सप्तम्या अलुक्संज्ञायाम्। "(सि.कौ./समासप्रकरणम्)।
6 'द्विवचनविभज्योपपदे तरवीयसुनौ'(५/३/५७) इति सूत्रभाष्यस्य प्रदीपटीका। (गुरुप्रसादशास्त्री-महोदय-सम्पादितस्य 'व्याकरणमहाभाष्यम्' इति ग्रन्थस्य पञ्चमे अध्याये पृ.४५९ द्रष्टव्या)।
7 'सिद्धान्तकौमुदी' इति ग्रन्थस्य समासप्रकरणे 'न निर्धारणे'(२/२/१०) इति सूत्रस्य दीक्षित-व्याख्यायाः बालमनोरमा तत्त्वबोधिनी च टीका द्रष्टव्या।
8 " 'यथा' इत्येतदव्ययमसादृश्ये वर्तमानं सुपा सह समस्यते, अव्ययीभावश्च समासो भवति। " (का.वृ.)।
9 "नपुंसकलिङ्गेऽर्थे यत्प्रातिपदिकं वर्तते तस्य ह्रस्वो भवति आदेशेऽलोन्त्यस्याचः। " (का.वृ.)।
10 "तदस्यास्त्यस्मिन्निति मतुप्"(५/२/९४) इति पाणिनीयसूत्रस्य भाष्यम्।
11 "तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये परे। " (सि.कौ./मत्वर्थीयप्रकरणम्)।
12 "नन्द्यादेर्ल्युर्ग्रह्यादेर्णिनिः पचादेरच् स्यात्। " (सि.कौ./पूर्वकृदन्तप्रकरणम्)।
13 अमरकोशस्य 'वन्ध्योऽफलोऽवकेशी च'(२/४/७) इति पद्यस्य अमरकोशोद्घाटनम् इति टीका।
14 "प्राण्योषधिवृक्षवाचिभ्यः शब्देभ्यः षष्ठीसमर्थेभ्योऽवयवे यथाविहितं प्रत्ययो भवति चकाराद्विकारे च। " (का.वृ.)।
15 "विकारावयवयोरुत्पन्नस्य फले तद्विषये विवक्षिते लुग्भवति। " (का.वृ.)।
16 "भञ्ज भास मिद इत्येतेभ्यो घुरच्प्रत्ययो भवति तच्छीलादिषु कर्तृषु। " (का.वृ.)।
17 काव्यालंकारसूत्रवृत्तिः ५/२/३८।
18 "युस्मदस्मदोरेतावादेशौ स्तः खञि अणि च। "(लघु.सि.कौ./तद्धिताः, शैषिकाः)।
19 "उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात्, सान्तस्य तु कर्तृवाचकस्य लोपो वा स्यात्। " (सि.कौ./नामधातुप्रकरणम्)।
20 "उपमानात्कर्मणः सुबन्तादाचारेऽर्थे क्यच् स्यात्। पुत्रमिवाचरति पुत्रीयति छात्रम्। विष्णूयति द्विजम्। " (सि.कौ./नामधातुप्रकरणम्)।

सन्दर्भग्रन्थाः

1. त्रिपाठी, जयशङ्करलाल सुधाकरमालवीय च सम्पादकौ। काशिका (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)। वाराणसी : तारा प्रिण्टिङ्ग वकर्स, प्रथमभागः १९८६, द्वितीयभागः १९८६, चतुर्थभागः१९८४।
2. दुर्गाप्रसाद सम्पादकः। शिवदत्तेन वासुदेवेन च संशोधितम्। शिशुपालवधम्(सर्वङ्कषाटीका-समेतम्)। बोम्बे : निर्णयसागरप्रेस, १९०५।
3. नगेन्द्र सम्पादकः। काव्यालंकारसूत्रवृत्तिः। दिल्ली : आत्माराम एण्ड संस, १९५४।
4. भट्टाचार्य्य, तपनशङ्कर, सम्पादकः। लघुसिद्धान्तकौमुदी। कोलकाता : संस्कृत बुक डिपो, २००४।
5. मिश्र, रमाशंकर, सम्पादकः। अष्टाध्यायीसूत्रपाठः। दिल्ली : मोतीलाल बनारसीदास, २००५।
6. वर्णि, वेदव्रत सम्पादकः। व्याकरणमहाभाष्यम्(प्रदीप-प्रदीपोद्द्योत-सहितम्)। रोहतक : हरयाना साहित्य संस्थानम्, प्रथमभागः १९६२, द्वितीयभागः १९६३।

7. शर्मा, गिरीधर, परमेश्वरानन्दशर्मा च सम्पादकौ। वैयाकरणसिद्धान्तकौमुदी(बालमनोरमा-तत्त्वबोधिनी-समेता)। दिल्ली : मोतीलाल बनारसीदासः, प्रथमभागः १९७७, द्वितीयभागः १९८२, तृतीयभागः १९७७, चतुर्थभागः १९७९।
8. शर्मा, हरदत्त एन.जि. सरदेशाइ च सम्पादकौ। नामलिङ्गानुशासनम्(अमरकोशोद्घाटन-टीका-सहितम्)। पुना : ओरियेण्टाल बुक एजेन्सी, १९४१।

मृत्युञ्जयगराँइ

MRITYUNJAY GORAIN

शोधछात्रः, संस्कृत-पालि-प्राकृत-विभागः, भाषाभवनम्,
विश्वभारती, शान्तिनिकेतनम्।

POSTAL ADDRESS -

VILL.+POST- LIPANIA, P.S.- PARA, DIST.- PURULIA,

STATE- WEST BENGAL, PIN- 723126

Email-mrityunjaygorain@gmail.com

***

सीतापरित्यागः रामायणे रघुवंशे च

- गौराङ्ग-साउः

शोधसारः -
वाल्मीकेः रामायणे कालिदासस्य रघुवंशे चसीतापरित्यागविषये समकालीनसमाजस्य प्रभावः परिलक्ष्यते। महाकाव्यद्वयेऽस्मिन् चरित्राणां मध्ये कालस्य छाया स्पष्टतया दृश्यते। कालिदासस्य समये मनुष्याः स्पष्टवादिनः आसन्। रामायणस्य रामे देवत्वं प्रतिष्ठितं वाल्मीकिना किन्तु कालिदासस्य रघुवंशे रामस्य देवत्वस्य ह्रासः जातः। रघुवंशे सीता रामायणस्य सीतायाः अपेक्षया आधुनिका। रामायणस्य वाल्मीकिः रघुवंशे मनुष्यरूपेण परिलक्ष्यते। अतः महाकाव्यद्वयस्य चरित्राणां मध्ये कालस्य प्रभावः स्पष्टतया परिलक्ष्यते।
कूटशब्दाः-सीतापरित्यागः, रामायणम्, रघुवंशम्, सीता

प्रस्तावना–

आदिकवेः महर्षिवाल्मीकेः रामकथाश्रितं रामायणमिति महाकाव्यमादिकाव्यमिति। व्यासवाल्मीकिभ्यां परं भारतवर्षे यस्य कवेः नाम परमश्रद्धया उच्चार्यते स एव कविकुलशिरोमणिः कालिदासः। प्राचीनालंकारिकगणः कालिदासं व्यासवाल्मीक्योः सममर्यादया प्रतिष्ठितवान्। आलंकारिकेण आनन्दवर्धनेन तस्य ध्वन्यालोकग्रन्थे उक्तम्- “येनास्मिन्नतिविचित्रकविपरम्परादाहिनिसंसारे कालिदासप्रभृतयोः द्वित्राः पञ्चषा वा महाकवयः इति गण्यन्ते”[1] इति। आदिकविना वाल्मीकिना रामायणस्य उत्तरकाण्डे, अपि च महाकविना कालिदासेन रघुवंशस्य चतुर्दशसर्गे सीतापरित्यागवृत्तान्तः चित्रितः।

साहित्यं समाजस्य दर्पणस्वरूपम्। प्रतिकालं समाजस्य मनुष्याणां चरित्रस्य वैशिष्टानि कवीनां काव्येऽपि प्रस्फुटितानि। यः कविः यस्मिन् काले विराजमान आसीत्, स कवि तस्य कालस्य मनुष्याणां वैशिष्ट्यद्वारा एव काव्यं रचयामास। वाल्मीकिकालिदासयोः काव्ययोः सीतापरित्यागवृत्तान्तं दृष्ट्वा वक्तुं शक्यते- अस्य महाकाव्यद्वयस्य चरित्रचित्रणविषये समकालीनसमाजस्य प्रभावः स्पष्टतया दृश्यते। महाकाव्यद्वयेऽस्मिन् सीतापरित्यागविषये भद्रस्य रामस्य सीतायाः वाल्मीकेः च वचनद्वारा तेषां चरित्रमध्ये समकालीनसमाजस्य संस्कृतेः च वैशिष्ट्यानि परिदृश्यन्ते।

रामायणे राजसभायां महाराजः रामः विचक्षणाः जनाः च हास्यरताः आसन्। तत्परं रामः भद्रनामकं चरं नगरस्य नगरवासिनः च मतं जिज्ञासितवान्। रामस्य आश्रिताः ये जनाः तस्य राज्ये वसन्ति, सीतां भरतं लक्ष्मणं शत्रुघ्नं कैकेयीं च प्रति तेषां नगरवासिनां मतं ज्ञातुमिच्छति राजा रामः। यथा –

ममाश्रितानि कान्याहुः पौरजानपदा जनाः।

---

[1]ध्वन्यालोके १.६

किञ्च सीतां समाश्रित्य भरतं किं च लक्ष्मणम्।।
किं नु शत्रुघ्नमुद्दिश्य कैकेयीं किं न मातरम्।
वक्तव्यतां च राजानो वने राज्ये व्रजन्ति च[2]।। इति।

रामस्य वचनात् अनन्तरं भद्रेण उक्तम्- सर्वविषये नगरवासिनः उत्तमाः सन्ति, तैः तु सर्वदा रामस्य रावणवधविषये सुकीर्त्तनं कृतम्। यथा-

एवमुक्ते तु रामेण भद्रः प्राञ्जलिरब्रवीत्।
स्थिताः शुभाः कथा राजन्वर्तन्ते पुरवासिनाम्।।
अयं तु विजयं सौम्य दशग्रीववधार्जितम्।
भूयिष्टं स्वपुरे पौरैः कथ्यन्ते पुरुषर्षभ[3]।। इति।

भद्रस्य वचनं श्रुत्वा रामः पुनः पुरावासिनः उत्तममन्दोभयविषयेषु जिज्ञासितवान्, तदा भद्रेण उक्तं – रामः रावणं हत्वा सीतामाहृत्य स्वगृहम् आनीतवान्। कथं रामस्य हृदये सीतासम्भोगस्य सुखम् ? यतः रावणः सीतायाः हरणं कृत्वा तं लङ्कायाः अशोकवने नयति स्म। सा सीता राक्षसैः सह अशोकवने प्रतिवसति स्म। कथं रामेण तां प्रति न क्रुद्धम् ?यदि राजा एवं कार्यं करोति, तर्हि प्रजानां स्त्रीणामपि अयं विषयः ग्रहणयोग्यः भवेत्। यथा उक्तं रामायणे-

हत्वा च रावणं संघे सीतामाहृत्य राघवः।
अमर्षं पृष्टतः कृत्वा स्ववेश्म पुनरानयत्।।
कीदृशं हृदये तस्य सीतासम्भोगजं सुखम्।
अङ्कमारोप्य तु पुरा रावणेन वलाद्धृतम्।।
लङ्कामपि पुरा नीतामशोकवनिकां गताम्।
रक्षसां वशमापन्नं कथं रामो न कुत्स्यति।।
अस्माकमपि दारेषु सहनीयं भविष्यति।
यथा हि कुरुते राजा प्रजास्तमनुवर्तते[4]।। इति।

रघुवंशमहाकाव्ये रामचन्द्रः अयोध्यायाः आनन्ददर्शनार्थं प्रासादम् आरूह्य राजपथस्य आपणानं, सरयूनद्याम् आन्दोलितनौकाः, उद्याने विलासिनागरिकान् च दृष्ट्वा सन्तोषलाभं कृत्वा भद्रनामकं चरं स्वचरित्रविषये जनश्रुतिमपृच्छत्-

ऋद्धापणं राजपथं स पश्यन् विगाह्यमानां सरयूञ्च नौभिः।
विलासिभिश्चाध्युषितानि पौरैः पुरोपकण्ठोपवनानि रेमे।।
स किंवदन्तीं वदतां पुरोगः स्ववृत्तमुद्दिश्य विशुद्धवृत्तः।
सर्पाधिराजोरूभुजोऽपसर्पं पप्रच्छ भद्रं विजितारिभद्रः[5]।। इति।

---

[2]रामायणे ७.४३.५-६

[3]रामायणे ७.४३.७-८

[4]रामायणे ७.४३.१६-१९

[5] रघुवंशे १.३०-३१

CC BY

The *śāstramañjūṣā*, Peer Reviewed Research papers on Indology 11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

तदा चरेण भद्रेण झटिति आदौ सीतापवादविषये उक्तं – हे मानवदेव, रक्षोभवने उषितायाः देव्याः सीतायाः परिग्रहं वर्जयित्वा तव समग्रं वृत्तं पुरवासिनः शंसन्ति। यथा –

निर्बन्धपृष्टः स जगाद सर्वं स्त्रवन्ति पौराश्चरितं त्वदीयम्।
अन्यत्र रक्षोभवनोषितायाः परिग्रहान्मानवदेव देव्याः[6]।। इति।

अस्य महाकाव्यद्वयस्य भद्रनामकचरस्य वचनं श्रुत्वा बोद्धुं शक्यते यत्, रामायणे भद्रः आदौ शुभवाक्यं रामं प्रति उक्त्वा ततः रामस्य पृच्छनात् अनन्तरं जनापवादम् अवदत्। किन्तु रघुवंशे भद्रः अतिसारल्येन जनापवादं रामम् अवदत्।

रामायणे रामस्य वचनद्वारा तस्य देवत्वं परिलक्ष्यते । वाल्मीकिना रामायणे तस्य देवरूपमाहात्म्यकीर्त्तनं कृतम्। वस्तुतः मुनीनां देवतानां वा दुःखेषु उद्विग्नमनाः सुखेषु विगतस्पृहः परिदृश्यते। ते तु सर्ववासनापरित्यागेषु समर्थाः यथा भगवता आम्नातं श्रीमद्भगवद्गीतायाम्-

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते।।
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते[7]।। इति।

एवमेव रामायणे श्रीरामेण अकीर्तेः निन्दा कीर्तेः पूजा चकृता। अत्र श्रीरामचन्द्रस्य प्रियायाः सीतायाः परित्यागे तस्य मनसि कोऽपि संशयः न दृश्यते। यथा –

पतत्येवाधमाल्लोकान्यावच्छब्दः प्रकीर्त्यते।
अकीर्तिर्निन्द्यते देवैः कीर्तिर्लोकेषु पूज्यते।।
कीर्त्यर्थं तु समारम्भः सर्वेषां सुमहात्मनाम्।
अप्यहं जीवितं जह्यां युष्मान्वा पुरुषर्षभाः।।
अपवादभयाद्भीतः किं पुनर्जनकात्मजाम्।
तस्माद्भवन्तः पश्यन्तु पतितं शोकसागरे[8]।। इति।

रघुवंशमहाकाव्ये श्रीरामचन्द्रः जनापवादं श्रुत्वा दुःखापन्नः अभवत्। तदा तस्य मनसि संशयः जातः। यथा-

कलत्रनिन्दा गुरुणा किलैवम् अभ्याहतं कीर्तिविपर्ययेण।
अयोधनेनाय इवाभितप्तं वैदेहिबन्धोर्हृदयं विददे।।
किमात्मनिर्वादकथामुपेक्षैजायामदोषामुत सन्त्यजानि।
इत्येकपक्षाश्रयविक्लवत्वाद् आसीत् स दोलाचलचित्तवृत्तिः[9]।।इति।

---

[6]रघुवंशे १.३२

[7]गीतायाम् २.५५-५६

[8]रामायणे ७.४५.१३-१५

[9]रघुवंशे १४.३३-३४

अत्र महाकविकालिदासेन किंकर्तव्यविमूढस्य रामस्य दोलाचलचित्तवृत्तित्वं प्रदर्शितम्। वस्तुतः अस्माकं विपदि समागतायां यथा मनसि चिन्ताद्वयमुपस्थथितं भवति तथा अत्र रामस्य मनसि अपि जनापवादस्य सीतापरित्यागस्य चापि चिन्ता उपस्थिता। वस्तुतस्तु अत्र रघुवंशे रामस्य मध्ये मनुष्यत्वं कालिदासेन प्रतिष्ठितं किन्तु रामायणे राममध्ये वाल्मीकिना देवत्वं प्रदर्शितम्।

रामायणे सरलप्राणा सीता कदापि न चिन्तितवती यत् रामः तस्या परित्यागं करिष्यति। तस्या निर्वासनविरोधेन कोऽपि प्रतिवादः न क्रियते तदा केवलं स्वभाग्यं दुष्यति सा। सा लक्ष्मणम् उक्तवती-

“प्रभोः चरणयोः मम वार्तां ज्ञापयतु। जानामि अहं शुद्धा, त्वां प्रति मम अचलाभक्तिः-एतद् ज्ञात्वापि त्वं माम त्यक्तवान्। भ्रातृन् प्रति तव आचरणं यत् प्रजाः प्रति तव एवम् आचरणं करणीयम्। मम कृते मम दुःखं नास्ति”।

सीतया रामः तु पतिरूपेण देवतारूपेण बन्धुरूपेण गुरुरूपेण वा सेव्यते स्म। यथा उक्तवती सा–

पतिर्हि देवता नार्याः पतिर्बन्धुः पतिर्गुरुः[10]। इति।

रघुवंशे सीता रामायणस्य सीतायाः अपेक्षया आधुनिका एव। अत्र सीता तस्याः परित्यागविषये लक्ष्मणम् आदिदेश-

वाच्यस्त्वया मद्वचनात् स राजा वह्नौ विशुद्धामपियत् समक्षम्।
मां लोकापवादश्रवणादहासीः श्रुतस्य किं तत् सदृशं कलस्य[11]।।इति।

अनेन श्लोकेन सीतायाः आधुनिकता प्रकटिता। अत्र सीता तस्या परित्यागस्य कारणमपृच्छत्। यद्यपि सा अग्निपरीक्षायाः उत्तीर्णाविशुद्धा, निष्पापा च तथापि कथं लोकापवादात् रामः तां त्यक्तवान्।

रामायणे महर्षिवाल्मीकिः योगवलेन सीतापरित्यागविषये ज्ञातवान्। ततः स सीताम् आश्रमे आलीतवान्। अपि च सीतायाः प्रतिपालनाय अवदत्। यथा

तासां तद्वचनं श्रुत्वा वाल्मीकिरिदमब्रवीत्।
सीतेयं समनुप्राप्तापत्नी रामस्य धीमतः।।
स्नुषा दशरथस्यैषा जनकस्य सुता सती।
अपापा पतिना त्यक्ता परिपाल्या मया सदा।।
इमां भवत्यः पश्यन्तु स्नेहेन परमेण हि।
गौरवान्मम वाक्याच्च पूज्या वोऽस्तु विशेषतः[12]।। इति।

रघुवंशे वाल्मीकेः वचनमध्ये रामं प्रति क्रोधस्य प्रभावः परिलक्ष्यते। यथा-

उत्खातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्येपविकत्थनेऽपि।

---

[10]रामायणे ७.४९.१७

[11]रघुवंशे १४.६१

[12]रामायणे ७.४९.१३-१८

CC BY

त्वां प्रत्यकस्मात् कलुषप्रवृन्तावस्त्येव मन्युर्भरताग्रजे मे[13]।। इति।

वस्तुतस्तु रामायणे वाल्मीकिः महर्षिरूपेण परिगण्यते। किन्तु रघुवंशे वाल्मीकिमध्ये मनुष्यत्वमारोपितं कालिदासेन।

रामायणे रामः देवरूपेण परिगण्यते। रामः राजा पतिश्च आसीत्। किन्तु तेन नृपरूपेण एव सीतापरित्यागः कृतः। यतः मनुसंहितायाम् उक्तं- "क्षत्रियस्य परो धर्मः प्रजानामेव पालनम्" इति। वस्तुतः रघुवंशे रामस्य देवत्वस्य ह्रासः परिलक्ष्यते। पण्डितानां शोकः न करणीयः। श्रीमद्भगवद्गीतायाम् उक्तं यथा भगवता-"गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः[14]" इति। किन्तु रघुवंशे अतिशोकग्रस्तः रामः परिलक्ष्यते। अत्र रामस्य मध्ये मनुष्यस्य वैशिष्ट्यानि परिदृश्यन्ते । रामायणे सीता देवीरूपेण परिगण्यते। अत्र सा तस्याः परित्यागविषये रामं प्रति क्रोधवाक्यं किमपि न अवदत्। किन्तु रघुवंशे सीता तदपेक्षया आधुनिका एव। रामायणे वाल्मीकिना रामस्य सीतापरित्यागविषये रामं प्रति क्रोधवाक्यं कोऽपि दोषः न उद्घाटितः। किन्तु रघुवंशे वाल्मीकेः वचनद्वारा तस्य मानविकरूपं प्रकाशितम्, तस्य मध्ये क्रोधः दृश्यते तत्र।

वस्तुतस्तु रामयणस्य कालः अतिप्राचीनकालः। अस्य कालस्य प्रभावः अस्मिन् महाकाव्ये प्राप्यते। रामायणस्य वहुकालात् परमेव कालिदासेन रघुवंशं विरचितम्। रामायणतः रघुवंशस्य समयः आधुनिकः एव। अतः अस्य समयस्य प्रभावः अस्य महाकाव्यस्य चरित्राणां मध्ये परिलक्ष्यते इति शम्।

ग्रन्थपञ्जी (Bibliography)

1. वाल्मीकिः, रामायणम्, सम्पा. श्रीसनत्कुमार-वन्द्योपाध्यायः, गोरक्षपुरः, गीताप्रेस, 2015 (प्रथम-संस्करणम्).
2. वाल्मीकिः. शिशुभारतीरामायणम्, सम्पा. अमियधरः. कोलकाताः साहित्यभारती-पाब्लिकेशनस्-प्राः-लिमिटेट्.
3. Mukhopadhyay, Govindagopala, A New Tri-lingual Dictionary. Kolkata, Sanskrit Book Depot, 2008.
4. श्रीमद्भगवद्गीता. सम्पा. गायत्रीवन्द्योपाध्याय. गोरक्षपुरः गीताप्रेस, 2016.

---

[13] रघुवंशे १४.७३

[14] श्रीमद्भगवद्गीतायाम् २.११

5. वाल्मीकिः, रामायणम्. सप्तमो भागः, उत्तरकाण्डम्, सम्पा. श्रीनिवासशास्त्री, देहलीः, राष्ट्रिय-संस्कृत-संस्थानम्, 2006 (द्वितीयं पुनर्मुद्रित-संस्करणम्).
6. कालिदासः, रघुवंशम्, सम्पा. कृष्णमणि-त्रिपाठी, चौखाम्बाः, चौखाम्बा-सुरभारती-प्रकाशन, 2008.

गौराङ्ग-साउः
Gouranga Show
State Aided College Teacher
Department of Sanskrit
NetajiSatabarshikiMahavidyalaya
Ashoknagar, 24 PGS(North), W.B.
gourangashow100.gs@gmail.com

***

CC BY

SUBMIT YOUR MANUSRIPT

Call for Research Papers for 12th Issue of peer reviewed Research Journal
"प्राची प्रज्ञा" (ISSN 2348 – 8417)

महोदयाः !

"प्राची प्रज्ञा" (ISSN 2348 – 8417) इति सन्दर्भितान्ताराष्ट्रियान्तर्जालपत्रिकायाः "शास्त्रमञ्जूषा" इति षाण्मासिकखण्डस्य **द्वादशावतरणस्य कृते (2021-जून्-मासे प्रकाशयिष्यमाणस्य)** निमित्तं मौलिकाः शोधलेखा आविश्वं विद्यमानेभ्यो विद्वद्भ्य आमन्त्र्यन्ते । लेखाः न्यूनातिन्यूनं A4 पृष्ठे 1.15 पङ्क्तिगतान्तरालसहिताः सप्तपृष्ठात्मका निम्नप्रारूपेणैव टङ्कयित्वा prachiprajnaenb@gmail.com इति अन्तर्जालसंकेतेन मृदुप्रतिकृतिरूपेणैव **15th जनवरी, 2021** पर्यन्तं प्रेषयितुं शक्यन्ते।

- शोधलेखाः संस्कृतभाषया/ Englishभाषया / हिन्दीभाषया वा 12/ 14 अक्षरमानेन A4 पृष्ठे 1.15 पङ्क्ति-अन्तरालेन समर्थ्यप्रान्तीयस्थापनपूर्वकं (Justified aligned) Microsoft Word आधारितसञ्चिकाप्रारूपमेवाश्रित्य टङ्किताः स्युः। संस्कृतभाषया हिन्दीभाषया च लेखाः Arial Unicode MS इति Unicode आधारितदेवनागरीलिप्या / रोमनलिप्या वा टङ्किताः स्युः।
- पादटिप्पणी / सन्दर्भसूची American Psychological Association (APA7) पद्धतिमनुसृत्य निर्मातव्या ।
- पृष्ठसज्जाक्रमो अधोनिर्दिष्टरूपेण स्यात्
    1. शीर्षकपृष्ठम्
    2. शोधसारः 100 शब्दैः
    3. मूलपाठः पादटिप्पणीसहितः
    4. सन्दर्भः
    5. अनुक्रमणिका
    6. चित्राणि
    7. परिशिष्टानि
- शीर्षकपृष्ठम् अधोनिर्दिष्टप्रकारेण स्यात्
    1. शोधपत्रशीर्षकं
    2. निबन्धकारस्य नाम आंग्ल-देवनागरीलिपिभ्यां
    3. निबन्धकारस्य संस्थासम्बद्धता
    4. निबन्धकारस्य पत्राचारसंकेतः
    5. अणुपत्रसंकेतः
    6. दूरभाषसंख्या
    7. पृष्ठसंख्या
- शोधपत्रेण सह स्वीयमेकम् सद्यः गृहीतं 3.5 x 4.5 cm परिमितं स्वीयं भावचित्रं 20 kb परिमितं (JPEG प्रारूपेण) अवश्यं प्रेषणीयम्।
- शोधपत्रेण सह घोषणापत्रस्य पूरितप्रारूपस्य अङ्कीयप्रतिमा (scanned copy of the filled in declaration form) अवश्यं प्रेषणीया ।

- विशेषज्ञमण्डल्या पुनरीक्षणोपरान्तं (Peer Reviewing) प्रकाशनयोग्याः शोधलेखाः प्रकाशयिष्यन्ते ।
- प्रकाशनयोग्यतायाः मानदण्डाः निम्नवत् निर्धारिताः सन्ति –

1. शोधलेखः संस्कृतवाङ्मयस्य केनाप्येकेनाङ्गेन सह सम्बद्धः स्यात्। यथा- वेदः, वेदाङ्गानि, उपनिषद्, दर्शनानि, पुराणानि, स्मृतिः, योगः, आगमः, साहित्यं, कव्यशास्त्रं, व्याकरणं, तन्त्रं, ज्योतिषं तथा संगणकीयभाषाविज्ञान-पर्यावरणाद्याधुनिकविषयाः।
2. शोधलेखः स्वीयः मौलिकश्च स्यात्।
3. शोधलेखे विवेचनप्रक्रिया समस्याचयनत → आरभ्य क्रमेण प्राक्कल्पना → ततः समालोचनात्मकं मूल्याङ्कनं → तथा अन्ते शोधस्य मौलिकनिष्कर्षेण सहोपसंहारः इत्येवं क्रमवद्धतापुरःसरं विकसिता स्यात्।
4. शोधलेखे काचिन्नवीना अवधारणा, किमपि नवीनं तथ्यं, नवीनं मूल्याङ्कनं, नवीनः सिद्धान्तः, नवीना शैली, नवीनः संकेतो वा अवश्यमाविष्कृतः स्यात्।
5. शोधलेखस्य भाषा परिष्कृता, प्राञ्जला, स्तरानुगुणा च स्यात्।
6. शोधलेखे समसामयिकी सम्बद्धता, तार्किकम् अनुशीलनं, तथा सन्दर्भाणामौचित्यमवश्यं स्युः।
7. शोधलेखे अन्यस्य प्रकाशनस्यांशोद्धरणे तदनुमतिः अवश्यं स्वीकर्तव्या यदि तादृशमुद्धरणं ५०० शब्देभ्योऽधिकमस्ति।
8. प्रकाशनात्परं शोधलेखस्य सर्वाधिकारः “प्राची प्रज्ञा” इत्यस्याः एव सुरक्षितः भविष्यति।
9. प्रकाशनसम्बन्धे पत्राचाराय शोधलेखेन सह प्रयुक्तान्तर्जालसंकेतः (Email ID) एव उपयोक्तव्यः।
10. सर्वापि प्रक्रिया अन्तर्जालमाध्यमेनैव सम्पादयिष्यते। मुद्रितरूपेण न काचित् प्रक्रिया अवलम्ब्यते। शोधलेखस्य प्रकाशनयोग्यताऽयोग्यतानिर्धारणदायित्वं “प्राची प्रज्ञा” इत्यस्यामेव न्यस्तं भविष्यति।

<u>शोधपत्रेण सह प्रेषणीयानां सूची</u>

1. **उपर्युक्तप्रारूपानुरूपः मौलिकः शोधलेखः**
2. **सद्यः गृहीतं 3.5 x 4.5 cm परिमितं स्वीयं 20 kb परिमितं (JPEG प्रारूपेण) भावचित्रम्।**
3. **प्रदत्तप्रारूपेण घोषणापत्रम्**

Call for Research Papers for 12th Issue of peer reviewed Research Journal
“प्राची प्रज्ञा” (ISSN 2348 – 8417)

Respected Scholars !

Research Papers in Sanskrit/ English/ Hindi are invited from the scholars from the entire globe for the **12th Issue (to be published in June, 2021)** of peer reviewed refereed, International Research Journal “प्राची प्रज्ञा” having ISSN no. 2348 – 8417, for its half yearly section “शास्त्रमञ्जूषा”. **The Last date of receipt of articles is 15th January, 2021** . A submission to “प्राची प्रज्ञा” must be an original work. The paper in not less than seven pages, should be emailed to prachiprajnaenb@gmail.com in e-copy only. A submission must fulfill the following criterion.

1. Format of the Research Paper:

- All the fonts of Devanagari / Roman and Roman with diacritical marks, must be Unicode compatible. For Devanagari, Arial Unicode MS and for Roman, Times New Roman is preferable. The size of fonts should be 12 in case of English and 14 in case of Sanskrit / Hindi.
- Format of file must be Microsoft Word only. File Formats in Adobe Page Maker / pdf / Corel Draw / Adobe In design etc. are not acceptable.
- Page size must be of A4 typed on 1.15 line spacing and justified aligned and 1" margined format.
- Footnotes / References should be embedded in the text in a consistent style and order, as per American Psychological Association (APA) style: https://apastyle.apa.org/style-grammar-guidelines/references/examples
- Arrangement of the pages of the paper should be made in the following format / order:
    - Title page
    - Abstract in about 100 words only
    - Text
    - References
    - Footnotes
    - Tables
    - Figures
    - Appendices

2. The Title page setup should be made in the following format / order:

- Paper title
- Author name in both English and Devanagari fonts
- Author’s affiliation
- Address to contact
- Email id
- Mobile Number
- Page Number

- A passport size photograph in JPEG format only of 3.5 x 4.5 cm, up to 20 kb, must be attached along with the Research Paper.
- Each Research paper should be accompanied with a scanned copy of the filled in declaration form available in our site.

All the research papers undergo a review process. The papers (without the name of the contributor) are sent to the reviewers having expertise on the field, and considered for publication only on the recommendations of the reviewers on following parameters:

1. The Research Paper must have a link to any branch of Sanskrit Studies, i.e. Vedas, Vedāṅgas, Upaniṣads, Philosophies, Purāṇas, Smṛtis, Literature, Poetics, Grammar, Tantras, Astrology, Astronomy and Modern subjects like Computational Linguistics, Environmental Science and allied fields.

2. The Research Paper must be an original contribution of the author.

3. The discussion should develop in the order from Statement of Problem to→ assumption or hypotheses to → critical evaluations → to a conclusion with the findings of research.

4. The Research Paper must present a discovery / invention of a new - idea / thought /design / plan / awareness / inkling/ indication / appreciation / conception / understanding / opinion / view/ concept / notion / theory / principle or even a new style of interpretation.

5. The language must be lucid and must meet the standard of presentation.

6. The Research Paper must have contemporary relevance, contributions to knowledge, clarity and logic in analysis, methodology and appropriateness of references.

7. If the author has quoted more than 500 words / a table / a figure from a published work, in the article, a copy of permission obtained from the respective copyright holder needs to be enclosed.

8. The copyright is transferred to the Journal if article is accepted for publication in प्राची प्रज्ञा / Prachi Prajna, ISSN 2348 – 8417.

9. All the correspondence should be made through the same email ID only by which the paper has been submitted.

10. All the process will be made online only and no printing media will be undertaken. The selection of the Research paper is entirely entrusted to "प्राची प्रज्ञा".

If the paper meets the preliminary requirements, the article will be processed for review, which could take up to 3 months. The accepted articles are scheduled for publication in the alphabetical order.

Check list of the enclosures along with the Research Paper:

1. **Original Research Paper in the prescribed format mentioned above.**
2. **A passport size photograph in JPEG format only of 3.5 x 4.5 cm up to 20 kb.**
3. **A Declaration by Author in the prescribed format**

Editor in Chief,
"प्राची प्रज्ञा"

प्राची प्रज्ञा
E-Journal in Sanskrit

“प्राची प्रज्ञा” (ISSN 2348 – 8417)

The Peer Reviewed Refereed E-Journal in Sanskrit
Indexed in DOAJ

https://sites.google.com/site/praachiprajnaa
The śāstramañjūṣā, Peer Reviewed Research Papers on Indology
11th Issue / Vol.VI – December, 2020
https://sites.google.com/site/praachiprajnaa/sastramanjusa

Licence

CC BY

Attribution (CC BY) : This license lets others distribute, remix, tweak, and build upon your work, even commercially, as long as they credit you for the original creation. This is the most accommodating of licenses offered, recommended for maximum dissemination and use of licensed materials.